श्री खण्डदेवविरचिता

भाट्टदीपिका

द्वितीयं संपुटम्

प्रधान संपादकः

डॉ. मण्डन मिश्रः, निदेशकः

संपादकः

पं. श्री. संपन्नारायणाचार्यः

न्यायमीमांसा, वेदान्त विद्वान्

उपनिदेशकः

प्रकाशकः

राष्ट्रिय संस्कृत संस्थानम्

जी. एन. ४, विशाल एन्क्लेव, राजा गार्डन

नई दिल्ली-११००२७

प्रकाशक:

डॉ. मण्डन मिश्रः

राष्ट्रिय संस्कृत संस्थान

जी. एन. ४, विशाल एन्क्लेव, राजा गार्डन,

नई दिल्ली-११००२७

मुद्रकः

अमर प्रिंटिंग प्रेस

८/२५, विजय नगर

दिल्ली-११०००९.

भाट्टदीपिकाद्वितीयसम्पुटविषयाः.

तृतीयाध्यायस्य पञ्चमः पादः—

तृतीयाध्यायस्य षष्ठः पादः—

अधिकरणानि. पृष्ठानि.

तृतीयाध्यायस्य सप्तमः पादः—

अधिकरणानि. पुटानि.

तृतीयस्याध्यायस्याष्टमः पादः—

चतुर्थाध्यायस्य चतुर्थः पादः—

अधिकरणानि. पृष्ठानि.

पञ्चमाध्यायस्य तृतीयः पादः—

अधिकरणानि. पृष्ठानि.

समाप्ता विषयाः.

श्रीः

भाट्टदीपिका.

तृतीयाध्यायस्य पञ्चमः पादः.

(१)—आज्याच्च सर्वसंयोगात् ॥ १ ॥ कारणाच्च ॥२ एकस्मिन् समवत्तशब्दात् ॥ ३ ॥ आज्ये च दर्शनात्स्विष्टकृदर्थवादस्य ॥ ४ ॥ अशेषत्वात्तु नैवं स्यात्सर्वादानादशेषता ॥ ५ ॥ साधारण्यान्न ध्रुवायां स्यात् ॥ ६ ॥ अक्तत्वाच्च जुह्वां तस्य च होमसंयोगात् ॥ ७ ॥ चमसवदिति चेत् ॥ ८ ॥ न चोदनाविरोधाद्धविःप्रकल्पनाच्च ॥ ९ ॥ उत्पन्नाधिकारात्सति सर्ववचनम् ॥ १० ॥ जातिविशेषात्परम् ॥ ११ ॥ अन्त्यमरेकार्थम् ॥ १२ ॥

उपांशुयाजप्रयाजाज्यभागानुयाजादिद्रव्याणां जौहवादीनां स्विष्टकृदिडादीनि शेषकार्याणि कर्तव्यानि उत नेति चिन्तायां— "उत्तरार्धात्सकृत्सकृत्समवद्यति" "सर्वेभ्यो हविर्भ्यस्समवद्य-

ति" इत्यादिवचनेभ्यः "वेद्यां हवींष्यासादयति" इतिवदङ्गप्रधानसाधारणहविरर्थत्वप्रतीतेः कर्तव्यानीति प्राप्ते—

यत्तावदेषां तत्तद्यागेष्वसाधारणं प्रयाजानुयाजेषु जौहवाद्येकदेशरूपं आज्यभागोपांशुयाजेषु च वाचनिकं ध्रौवापादानकं चतुर्गृहीतं तस्य तत्तद्यज्याक्षिप्तप्रक्षेपरूपविशेषप्रतिपत्तिसत्त्वात्, "चतुर्गृहीतं जुहोति" इति भाष्यकारोदाहृतोपांशुयाजावान्तरप्रकरणस्थवाक्यादेव तत्सत्त्वाद्वा न सामान्यविहितविद्यमानशेषोपक्षीण स्विष्टकृदादिप्रतिपत्तिग्राहकता । अत एव यत्र प्रयाजशेषाभिघारणादौ विशिष्यैव तद्विधानं तत्रागत्याऽवयवशस्तयोस्समुच्चयः । न चैवमाग्नेयस्यापि विशिष्य चतुर्धाकरणभक्षणरूपप्रतिपत्तिविधानात् स्विष्टकृदाद्यकरणापत्तिः, तत्र भक्षणस्य कल्प्यत्वेन तस्यापि विलम्बोपस्थितिकत्वेन तुल्यत्वात् । नापि तत्तदुपादानभूतध्रौवाज्यात् स्थाल्याज्याद्वा तत्करणं, तयोः "सर्वस्मै वा एतत्" इत्यादिवाक्याद्यज्ञादिरूपकरिष्यमाणकार्यार्थत्वस्याप्यवश्यंभावेनाकीर्णकरत्वाभावात् । न चाकीर्णकरत्वाभावेऽपि आज्येळा(डा)वन्मध्य एव प्रतिपत्तिः, तत्राग्रे स्थाल्याज्यस्य पिष्टलेपफलीकरणादावुपयोगसत्त्वेऽपि वचनादेव पत्नीसंयाजावयवशेषस्यैव प्रतिपत्त्युपपत्तावपि प्रकृते तादृशवचनाभावेन साधारणद्रव्यस्य प्रतिपत्त्ययोग्यत्वात् । न च सर्वकार्यान्ते क्रमं बाधित्वाऽपि प्रयोजनवशेन तत्करणं, समिष्टयजुरादिविशिष्टप्रतिपत्त्यन्तरविधानेन तत्र तदप्राप्तेः । अतश्शेषाभावान्न शेषकार्याणि ॥ १ ॥

(२)—साकंप्रस्थाय्ये स्विष्टकृदिडं च तद्वत् ॥

दर्शपूर्णमासयोः "साकंप्रस्थायीयेन यजेत पशुकामः" इत्यत्र सहत्वं फलाय विधीयते । तस्य च "आग्नेयेन प्रचर्याग्नीधे स्रुचौ

प्रदाय सह कुम्भीभिरभिक्रामेत्" इति वाक्येन सान्नाय्याङ्गभूतमभिक्रमणमाश्रयत्वेनोच्यते, कुम्भ्यौ निरूपकत्वेन, अन्यत्सर्वमनूद्यते। वाक्यभेदश्च न, निपातत्वाद्विशिष्टभावनाविधानाद्वेत्युक्तं द्वितीये[1]। तदत्र सान्नाय्याङ्गतया स्विष्टकृदादिशेषकार्याणि कर्तव्यानि न वेति चिन्तायां—अभिक्रमणे कुम्भीसाहित्येऽप्याहवनीयदेशं गत्वा चतुरवत्तमादायैव होमानुष्ठानाच्छेषसद्भावेन कर्तव्यानीति प्राप्ते—

नात्रापूर्वमभिक्रमणमाश्रयः, भेदकप्रमाणाभावात्; अपि तु सान्नाय्यप्रक्षेपाङ्गभूतमेव। तादृशाभिक्रमणकर्तुः कुम्भीनां साहित्यं च कर्त्रभिक्रमणकालीननयनसंस्कार्यत्वं, नान्यत्। नयनमपि च नेदमपूर्वं, अपि तु दृष्टार्थत्वलाभाय स्रुक्त्यागानुवादाच्चोक्तप्रक्षेपाङ्गभूतस्रुग्दण्डनयनमेव। अतश्च कुम्भीनामुक्तसंस्कार्यत्वान्यथानुपपत्त्याऽभिषवयुक्तपूतीकवत् स्रुकार्यप्रक्षेपार्थत्वावगत्या तत्स्थस्य हविषोऽपि द्व्यवदानवत् प्रक्षेपप्रतिपाद्यत्वावगतेस्सर्वहोमावसायान्न साकंप्रस्थायीयप्रयोगे सान्नाय्यस्य शेषकार्याणि ॥ २ ॥

(३)—सौत्रामण्यां च ग्रहेषु ॥ १४ ॥ तद्वच्च शेषवचनम् ॥ १५ ॥

सौत्रामणी नाम पशुयागः। तत्रातिदेशप्राप्तदेवतासंस्कारार्थे पशुपुरोडाशे द्रव्यतया पयोग्रहास्सुराग्रहाश्च विधीयन्ते इति दशमे[2] सूत्रभाष्यकाराभ्यां वक्ष्यते। तदत्र स्थानापत्त्या पुरोडाशाङ्गं स्विष्टकृदिडं कर्तव्यमेव। न च ग्रहशब्दस्य नामातिदेशकत्वाज्ज्योतिष्टोमिकशेषकार्यातिदेशशङ्का। ग्रहशब्दस्य प्रा[3]यणीयपदवन्नामातिदेशकत्वानुपपत्तेरिति प्राप्ते—

[1] २-३-४. अधिकरणे इदं स्पष्टम्। [2] १०-१-९. अधिकरणे.

[3] ७-३-२ अधिकरणे इदं स्पष्टम्.

न तावदत्रावशिष्टश्शेषोऽस्ति । "यथागृहीतान् ग्रहान् ऋत्विज उपाददते उत्तरेऽग्नौ पयोग्रहान् जुह्वति दक्षिणेऽग्नौ सुराग्रहान्" इति वचनेनानवदायैव होमावगमात् । न च "उच्छिनष्टि न सर्वहुतं जुहोति" इति वचनेन हुतशेषावगतेश्शेषकार्यकरणं, तस्य "ब्राह्मणं परिक्रीणीतोच्छेषणस्य पातारं यदि न विन्देत् वल्मीकवपायामवनयेत् ततोऽप्यवशिष्टं शतातृण्णायां विक्षारयन्ति" इति विशिष्य प्रतिपत्त्यन्तरविधानेनातिदेशिकप्रतिपत्तिबाधात् । वल्मीकवपा वल्मीकच्छिद्रम् । शतातृण्णा शतच्छिद्रा कुम्भी । इदं च सूत्रभाष्यकारमताभिप्रायेणोक्तम् । यदा तु वार्तिकोक्तरीत्या देवतासंस्कारार्थं यागान्तरमेव सुरापयोद्रव्यकं विधीयते तदाऽप्यौषधद्रव्यकत्वपयोद्रव्यकत्वाभ्यां दार्शपौर्णमासिकविध्यन्तस्याष्टमे[1] वक्ष्यमाणत्वेन स्विष्टकृदादिप्राप्तावपि पूर्ववदेव[2] तदभाव इत्यधिकरणं व्याख्येयम् ॥ ३ ॥

(४)—द्रव्यैकत्वे कर्मभेदात्प्रतिकर्म क्रियेरन् ॥ १६ ॥ अविभागाच्च शेषस्य सर्वान् प्रत्यवशिष्टत्वात् ॥ १७ ॥ ऐन्द्रवायवे तु वचनात् प्रतिकर्म भक्षस्स्यात् ॥ १८ ॥

सर्वपृष्ठायामिष्टौ "इन्द्राय राथन्तरायेन्द्राय बार्हतायेन्द्राय वैरूपाय" इत्यादि षड्ढविष्कायां षड्भ्योऽपि निरुप्य सहावघातपेषणे कृत्वा प्रकृतिवत् विभागे प्राप्ते तमकृत्वा वचनादेकमेव रथचक्रमात्रं पुरोडाशं कृत्वा "समन्ततः पर्यवद्यति" इति वचनेन समन्ततः पर्यवदाय प्रधानानि क्रियन्ते । अत्र समन्तत इत्येव कर्मभेदतात्पर्यग्राहकम् । अन्यथा "अग्नये कृत्तिकाभ्यः"

[1] ८-२-१.   [2] पूर्वाधिकरणवदित्यर्थः.

इतिवत्कर्मैकत्वे सकृदवदानापत्तेः । याज्याभेदाद्वा कर्मभेदः । तत्र च स्विष्टकृदिडादि प्रधानभेदात्प्रत्येकं भवति । न च द्रव्यैकत्वात्तन्त्रता, अवदानप्रदेशभेदेन तत्तदुत्तरार्धादीनां भेदात् । न च संस्कारवाक्यानां परस्परान्वये प्रमाणाभावेनोत्तरार्धस्यावदानप्रदेशप्रतियोगित्वाभावात्प्रकरणेन हविःप्रतियोगित्वप्रतीतेस्तस्य च पुरोडाशैक्येन साधारणत्वाद्द्रव्यैकत्वमिति वाच्यं, तत्तद्देवतायै चतुर्मुष्टिपरिमितस्यैव निरुप्तस्य हविष्ट्वेन पुरोडाशस्यात्र हविःप्रकृतितया हविष्ट्वाभावात् । न च तथाऽपि हविषस्संसृष्टत्वेन साधारणत्वाद्यागकाले इन्द्राय राथन्तराय यन्निरुप्तं तत्तस्मै न ममेति प्रत्येकसङ्कल्पेऽपि संसृष्टोत्तरार्धादेरगृह्यमाणविशेषत्वात्तन्त्रत्वं शेषकार्याणामिति वाच्यं, तथाऽपि "न ह्यत्रानूयाजान्" इतिवत् "द्विरैन्द्रवायवस्य भक्षयति द्विर्ह्येतस्य वषट्करोति" इत्यनेन प्रधानभेदस्य शेषकार्यभेदे हेतुत्वावगमात्तदन्यथाऽनुपपत्तिकल्पितव्याप्तिबलेन भेदोपपत्तेरिति प्राप्ते—

"तेन ह्यन्नं क्रियते"[1] इतिवत् विधौ लटो भूतकाललक्षणापत्तेरपेक्षितस्तुतिमात्रपरत्वावसायात्, गमकमात्रस्य च न्यायप्राप्ततन्त्रत्वबाधकत्वानुपपत्तेस्सकृदेव शेषकार्याणि । 'न ह्यत्र' इत्यत्र तु लक्षणाभावाद्धेतुविधित्वमिति विशेषः । ऐन्द्रवायवे तु वचनादेव भक्षावृत्तिरिति वैषम्यम् ॥ ४ ॥

(५)—सोमेऽवचनाद्भक्षो न विद्यते ॥ १९ ॥ स्याद्वाऽन्यार्थदर्शनात् ॥ २० ॥ वचनानि त्वपूर्वत्वात्तस्माद्यथोपदेशं स्युः ॥ २१ ॥ चमसेषु समाख्यानात्संयोगस्य तन्निमित्तत्वात् ॥ २२

---

[1] १, २, ३.

ज्योतिष्टोमे उत्पत्तिशिष्टोऽपि सोमोऽभिषवादिसंस्कारविधि-बलाद्रसप्रकृतिः । रस एव तु ग्रहचमसादिपात्रवृत्तिरिन्द्रवा-य्वादिदेवतासम्बन्धाद्धविरिति सर्व एव त्यज्यते । अस्य च "अल्पं जुहोति" इति वचनेनाल्पोद्देशेन प्रक्षेपरूपप्रतिपत्तिवि-धिर्द्वर्चवदानवत् । तत्र च "ग्रहैर्जुहोति" इत्यादिना पात्रवि-धिरिति स्थितिः । अतश्शेषसत्त्वात् भक्षणं तत्प्रतिपत्तिः । तत्प्रमाणं च समाख्या वचनं च । तत्र समाख्या तावत् "प्रैतु होतुश्चमसः प्र ब्रह्मणः" इत्यादिका वेदे, याज्ञिकानां सोमचम-सः इत्यादिका । अदनार्थस्य चमेर्धातोरधिकरणवाचके औ-णादिकेऽसुच्प्रत्यये कृते चमसशब्दनिष्पत्तिः । सोमश्चम्यतेऽ-स्मिन् इति व्युत्पत्त्या सोमभक्षणसाधनत्वावगतेस्तत्समाख्याक-ल्पितश्रुत्या होत्रादिकर्तृकभक्षणस्य सोमप्रतिपत्त्यर्थत्वसिद्धिः । यदि तु उणादयोऽव्युत्पन्नाः इति पक्षाश्रयणं, तदा चमस-शब्दस्य पात्रे रूढत्वेन योग्यतयैव होतृचमसादिसम्बन्धो भ-क्ष्यभक्षकत्वादिसम्बन्धेनैवेति तया भक्षणसिद्धिरविकला । अतश्च होतृब्रह्मोद्गातृयजमानमैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नी-ध्राणां स्वस्वचमसेषु समाख्यया भक्षः । सदस्यपक्षे तस्यापि स्वचमसे । वचनं त्वग्रे निरूपयिष्यते ॥ ९ ॥

(६)–उद्गातृचमसमेकश्श्रुतिसंयोगात् ॥ २३ ॥ सर्वे वा सर्वसंयोगात् ॥ २४ ॥ स्तोत्रकारिणां वा तत्संयोगाद्बहुश्रुतेः ॥ २५ ॥ सर्वे तु वेदसंयोगात्का-रणादेकदेशे स्यात् ॥ २६ ॥

तत्रैव "प्रैतु होतुः" इत्यादिमन्त्रे "प्रोद्गातॄणाम्" इति श्रुतम् ।

तेन किमुद्गातैवैकस्तच्चमसभक्षणे विनियुज्यते उतोद्गातृप्रस्तोतृप्रतिहर्तारस्त्रय इति चिन्तायां—प्रातिपदिकश्रुत्या उद्गातैव । न, च बहुवचनानुरोधेनास्य सर्वतोमुखादावुत्कर्षः, प्रातिपदिकस्य वा लिङ्गसमवायेन[1] त्रितयपरत्वं, योगेन वा उत्कृष्टगानकारित्वेन तत्त्रितयपरत्वं कल्प्यतामिति वाच्यं उद्गातृशब्दस्य प्रचुरप्रयोगेनोद्गीथापरपर्यायसामद्वितीयभागरूपोद्गानकर्तरि रूढत्वाद्गुणभूतबहुवचनानुरोधेन त्वदुक्तायास्त्रिविधाया अप्यन्यान्यकल्पनायाः पाशाधिकरण[2]न्यायेनानुपपत्तेः । न ह्युत्कर्षायोग एव तदधिकरणविषयः, प्रकरणबाधापादकतयोत्कर्षायोगे श्रुतिबाधापादकलक्षणाद्ययोगस्य सुतरां तदधिकरणविषयत्वात् । अतो बहुवचनमेव व्यत्ययानुशासनादिरीत्या एकत्वलक्षणार्थं व्याख्येयम् । न चैकत्वलक्षणायां जहत्स्वार्थतापत्तेः प्रातिपदिक एवाजहत्स्वार्थता युक्तेति केषांचिदुक्तं युक्तं, मुख्यत्वप्राधान्याभ्यां प्रातिपदिके जघन्यवृत्त्यङ्गीकारे निरस्ते जहत्स्वार्थतायाः फलमुखत्वेनादोषत्वात् । न च प्रतिहर्त्रादिकर्मण्यपि तत्प्रतिपादकवाक्येषु च औद्गात्रं कर्म, काण्डं वेति समाख्यानात् तत्कर्तर्यपि प्रतिहर्त्रादावुद्गातृशब्दस्य शक्त्यैव प्रयोगोपपत्तेरनेकार्थकस्योद्गातृशब्दस्य बहुवचनानुरोधेन "निषद्योद्गातारस्स्तुवते" इत्यादिवत् त्रितयपरत्वं, अविशेषाद्वा ससुब्रह्मण्यचतुष्टयपरत्वं, वा किं न स्यादिति वाच्यं, अनेकशक्तिकल्पनाभियोद्गानकर्तृवाचकस्यैवोद्गातृपदस्य लक्षणादिनाऽपि क्वाचित्कसर्वविषयप्रयोगोपपत्तेः । अत एव मुख्योद्गातुरेव कर्म मुख्यमौद्गात्रं तद्वेदसंयोगाच्चान्यत्राप्यौद्गात्रशब्दः उद्गातृशब्दश्च गौण इति द्रष्टव्यम् । अतः पाशाधिकरण[2]न्यायेनोद्गातैवैकः पिबेदिति प्राप्ते—

---

[1] १-४. [2] ९-३-५.

उद्गातृशब्दस्य ऋत्विग्विशेषे शक्तिः । क्लृप्तावयवयोगेनैवोत्कृष्टगानकर्तृमात्रवाचित्वेनोपपत्तावतिरिक्तशक्तिकल्पनायां प्रमाणाभावात् । प्रचुरप्रयोगस्याहवनीयेऽग्निपदवन्निरूढलक्षणयाऽप्युपपत्तेः । न चात्र रथकारादिशब्दवदवयवार्थं विहाय ऋत्विग्विशेषे प्रयोगः, येनातिरिक्ताऽपि शक्तिः कल्प्येत । न चोद्गायतिरप्युद्गीथवाच्येवेति नियमः "उद्गायतीनामरविन्दलोचनम्" इत्यादावन्यत्रापि प्रयोगात् । अत एव पङ्कजादिशब्दस्य मण्डूकादौ प्रयोगाभावेन योगरूढिकल्पनायामपि प्रकृते न तत्कल्पना, अपि त्वग्निशब्दवन्निरूढलक्षणैव । अतश्च तात्पर्यग्राहकसत्त्वे लाक्षणिकार्थग्रहणेऽपि प्रकृते "अग्निमुपनिधाय स्तुवीत" इतिवत् मुख्यार्थसम्भवे लाक्षणिकार्थग्रहणायोगाद्बहुवचनानुरोधाच्च "निषद्योद्गातारः" इतिवत् प्रकृतापूर्वीयगानकर्तॄणां त्रयाणामेव ग्रहणम्। न सुब्रह्मण्यस्य भाष्यकारोक्तस्यापि गानकर्तृत्वाभावात् । मूलग्रन्थान्यथाकरणं तु युक्त्यनुरोधेन न दोषः । सिद्धान्तेऽन्यथात्वाभावादिति ध्येयम् ॥ ६ ॥

(७)—गावस्तुतो भक्षो न विद्यतेऽनाम्नानात् ॥ २७ ॥ हारियोजने वा सर्वसंयोगात् ॥ २८ ॥ चमसिनां वा सन्निधानात् ॥ २९ ॥ सर्वेषां तु विधित्वात्तदर्था चमसिश्रुतिः ॥

भक्षे समाख्यां प्रमाणमुक्त्वा वचनमिदानीमभिधीयते । "यथाचमसमन्यांश्चमसांश्चमसिनो भक्षयन्ति अथैतस्य हारियोजनस्य सर्व एव लिप्सन्ते" इति श्रुतम् । तत्र लिप्साश-

ब्देनोपक्रमस्यार्थवादानुरोधात्, लिप्सामात्रग्रहणेऽदृष्टार्थत्वापत्तेश्च लक्षणया भक्षणमभिधीयते । तच्च हारियोजने वक्ष्यमाणविधया वषट्कारनिमित्तं होमाभिषवनिमित्तं च यद्यपि प्राप्तं, तथाऽप्यत्र विशिष्टोद्देशे वाक्यभेदापत्तेर्भक्षान्तरमेव सर्वकर्तृविशिष्टं विधीयते । अथवा हारियोजनावान्तरप्रकरणे पाठात्तदीयभक्षानुवादेनैव "पुरस्तादैन्द्रवायवस्य भक्षयति सर्वतः परिहारमाश्विनं भक्षयति" इत्यादिवत् गुणमात्रं विधीयते । विशेषधर्मपुरस्कारेण कर्तृविधानाच्च नैककर्त्रवरोधे कर्त्रन्तरविधानानुपपत्तिशङ्का । सर्वथा वाचनिकः कर्तृविशेषः । तदिह सर्वपदं किं चमसिमात्रपरं किं वा प्रकृतसर्वर्त्विक्परमिति चिन्तायां—सर्वशब्दस्य सर्वनामत्वादुपस्थितपरामर्शित्वावगतेश्चमसिनामेव च पूर्वमुपस्थितत्वात्तेषामेव ग्रहणमिति प्राप्ते—

चमसिशब्दस्यान्यचमसेषु एकैकस्यैव चमसिनो भक्षणं न्याय्यं अत्र तु चमसिनामन्येषां च सर्वेषामेव तत् युक्तमित्येवं स्तुत्यालम्बनत्वेनैवोपपत्तेर्न पुनस्सर्वपदसङ्कोचकत्वम् । अतश्च परमसर्वेण व्यवहारासम्भवादावश्यकेन प्रकरणादिनैव प्रकृतकर्मकरमात्रग्रहणोपपत्तौ पुनश्चमसिभिर्विशेषणे प्रमाणाभावः । न चैवं पत्न्या अपि ग्रहणापत्तिः, मेषीवदेव पुल्लिङ्गेन तस्या ग्रहणानुपपत्तेः । चमसाध्वर्यूणां तु याज्ञिकाचाराभावादेवाग्रहणमिति ध्येयम् । न हि ऋत्विज एव सर्वशब्देन ग्राह्या इत्यत्रान्यत्किञ्चित्प्रमाणमस्ति ॥ ७ ॥

(८)—वषट्काराच्च भक्षयेत् ॥ ३१ ॥

सोम एव "वषट्कर्तुः प्रथमभक्षः" इति श्रुतम् । तत् किं भक्षान्तरवचनं किं वा समाख्यादिप्राप्तभक्षानुवादेन प्राथम्य-

मात्रविधिरिति चिन्तायां— भक्षान्तरत्वे प्रमाणाभावात्प्राथम्यमात्रविधिः । न च वषट्कर्तुरपि विधेयत्वे वाक्यभेदः वषट्कारे निमित्ते भक्षोद्देशेन प्राथम्यविधानात्, रथन्तरे निमित्ते ग्रहोद्देशेनैन्द्रवायवाग्रत्वविधिवच्च विजातीयानेकोद्देशे वाक्यभेदाभावात् । अतश्च यत्र चमसे हारियोजने वाऽध्वर्य्वादेरन्यस्य वषट्कर्तुश्च समाख्यया होमाभिषवाभ्यां लिप्सावचनेन वा भक्षप्राप्तिस्तत्र वषट्कर्तुः प्रथमं भक्षस्ततोऽन्यस्येति वचनार्थ इति प्राप्ते—

'प्रथमभक्षः' इति समासरूपे एकस्मिन् पदे एकांशेनोद्देश्यत्वे एकांशेन विधेयत्वे चाङ्गीक्रियमाणे एकप्रसरताभङ्गापत्तेः कर्मान्तरमेवेदम् । न च तस्मिन् दूषकताबीजाभावः सामर्थ्यभङ्गस्यैव तद्बीजत्वात् । तथा हि—सर्वत्रोद्देश्यविधेयभावस्थले उद्देश्ये विधेयान्वयात्पूर्वमुद्देश्यस्योद्देश्यत्वेन क्रियान्वयोऽवश्यं वक्तव्यः । अत एव "यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्" इत्यपि सङ्गच्छते । प्राथम्यं तत्त्वेन प्रथमं क्रियान्वयः अन्यस्यातिप्रसक्तत्वात् । तदत्र यत्र भिन्नपदस्थले यागेन स्वर्गं भावयेदित्यादौ तत्तत्पदात्पदार्थोपस्थित्यनन्तरं स्वर्गस्योद्देश्यत्वेन यागस्य च विधेयत्वेन क्रियान्वये प्रथमावगते पश्चादेव विधेयस्य यागस्योद्देश्ये स्वर्गेऽन्वय इति स्थितिः, तद्वच्चेहाप्येकपदस्थले भक्षे प्राथम्यान्वयात्पूर्वं भक्षस्य क्रियान्वयोऽभ्युपगन्तव्यः । ततश्च क्रियान्वयात्पूर्वं भक्षप्राथम्ययोर्विशेषणविशेष्यभावानवगमादेकार्थीभावलक्षणसामर्थ्यभङ्गादपरिपूर्णस्य समासपदस्य पदान्तरेणाख्यातेनाप्यन्वयायोगात् । यद्यपि चास्मन्मते वैयाकरणवत् विशिष्टार्थवाचकत्वं न सामर्थ्यं तथाऽपि क्रियान्वयात्पूर्वं विशिष्टार्थबोधकत्वमेव तदिति बोध्यम् । अत्र च क्रियाभिन्नं विधेयं बोध्यम् ।

क्रियात्मके विधेये तदन्वयात्पूर्वमुद्देश्यस्य तत्त्वेन क्रियान्वयस्य वक्तुमशक्यत्वात् । अत एव "विविदिषन्ति यज्ञेन" इत्यादौ विविदिषोद्देशेन यज्ञादिभावनाविधानेऽपि न क्षतिः । अतश्चैकप्रसरताभङ्गभिया भक्षान्तरमेव विधेयम् । अत एव "लोहितोष्णीषाः" इत्यादावतिदेशात्पूर्वमेव लोहितोष्णीषविशिष्टकर्तार एव प्रचारोद्देशेन विधीयन्ते विशेषणमात्रविधिफलका इति तत्रतत्र एकप्रसरताभङ्गपरिहारप्रकारो वक्ष्यते । अतश्च प्रकृते एकप्रसरताभङ्गभिया प्राथम्यस्य पूर्वकर्मण्यनिवेशाद्गुणादेव वषट्कर्तृप्राथम्योभयविशिष्टं भक्षान्तरमेव विधीयते सोमसंस्कारार्थम् । तत्र च यागार्थत्वेन वषट्कारस्य क्लृप्तत्वात्कर्तुरुपलक्षणमात्रत्वेनार्थान्निमित्तत्वावगतेर्वषट्कारनिमित्तकमिदं भणक्षं ग्रहेषु चमसेषु वाऽविशेषात्सिद्धं भवति॥

(९)–होमाभिषवाभ्यां च ॥ ३२ ॥

इदमपरं भक्षस्य निमित्तं "हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि (भक्षान्) भक्षयन्ति" इत्यत्र हविर्धानादीनां सर्वेषां गुणानां विध्यन्तरादर्थाच्च प्राप्तत्वात्केवलं होमाभिषवसमानकर्तृकत्वं भक्षमात्रेऽप्राप्तं विधेयम् । यद्यपि च हारियोजनादौ होमाभिषवसमानकर्तुरपि भक्षणं प्राप्तं, तथाऽप्यवयुत्यानुवादे वाक्यवैयर्थ्यापत्तेस्तस्य विधेयता । सा च न पूर्वविहितभक्षेषु, सर्वत्रोत्पत्तिशिष्टविशेषविहितकर्त्रन्तरावरोधात् । अतश्च होमाभिषवसमानकर्तृकं भक्षणान्तरमेवेह विधीयते, कर्तृरूपगुणानुरोधेन वाऽवेष्टि[1]वत् वषट्कारभक्षस्यैव प्रयोगभेदमात्रम् । न चोत्पत्तौ नियामकाभावः । प्राथम्यस्यैवोत्पत्त्यन्वायिनो वषट्कारवाक्ये नियामकत्वात् । प्राथम्यस्यापि प्रयोगान्वये तु कर्मान्तरमेवेति ध्येयम् । अत्र च होमेऽभिषवसमानकर्तृकत्वस्याध्व-

[1] २-३-२.

षट्वसमाख्याबलादेव प्राप्तेः प्रधानान्वयस्याभ्यार्हितत्वाच्च भक्षणत्वाभिषवसमानकर्तृकत्वं होमसमानकर्तृकत्ववद्विधीयते । होमाभिषवयोश्च कृतफलकत्वाद्वषट्कारवदेवार्थानिमित्तत्वम् । तयोस्समुच्चितयोर्निमित्ततेति षष्ठे[1] वक्ष्यते । अतश्च यो यदभ्यासे होमाभिषवोभयकर्ताऽध्वर्युः प्रतिप्रस्थाताऽन्यो वा ग्रहे चमसे वा स तत्र भक्षयेत् ॥ ९ ॥

(१०)–प्रत्यक्षोपदेशाच्चमसानामव्यक्तश्शेषे ॥ स्याद्वा कारणभावादनिर्देशश्चमसानां कर्तुस्तद्वचनत्वात् ॥ ३४ ॥ चमसे चान्यदर्शनात् ॥ ३५ ॥

अथ यत्रैकस्मिन् पात्रेऽनेकेषां भक्षकर्तृणां, एकस्मिन् कर्तरि वाऽनेकेषां वषट्कारहोमाभिषवसमाख्यादिकारणानां, समवायस्तत्रैकशेषप्रतिपत्त्यर्थत्वाद्भक्षाणां विकल्पे, प्रत्यक्षशिष्टानामपि वषट्कारादिभक्षाणां सामान्यविहितत्वात् कल्प्ययाऽपि समाख्यया विशेषनिष्ठया प्रमेयबलाबलन्यायेन बाधाद्ग्रहविषयत्वावगतेर्भेदविषयत्वे वा प्राप्ते—

"अल्पं भक्षयति" इति वचनेन कृत्स्नस्य शेषस्यैकभक्षणप्रतिपाद्यत्वासम्भवादेकेन भक्षणेन प्रतिपादितेऽपि शेषेऽवशिष्टशेषस्य भक्षणान्तरेण प्रतिपत्तिसम्भवात्, प्राथम्यविधेश्च समुच्चयः । नन्वेवं कर्तृभेदेनानेकेषां भक्षाणां पृथगनुष्ठानेन समुच्चयोपपत्तावपि यत्रैकस्मिन्नेव कर्तरि कारणानेकत्वं तत्र प्रयोगविध्यवगतसाहित्यसम्पत्त्यर्थं तन्त्रत्वोपपत्तेर्न पृथगनुष्ठानेन समुच्चयः । वस्तुतस्तु—समाख्यायाः ब्रह्मोद्गातृयजमानसदस्यचमसे-

[1] ६-४-७.

षु कारणान्तरेणैतत्कर्तृकभक्षस्याप्राप्तत्वाद्विधायकश्रुतिकल्पकत्वेऽपि होतृकचमसेषु वषट्कर्तृकत्वेनैव तेषां तत्र भक्षस्य प्राप्तत्वात् क्लृप्तप्रवृत्तिनिमित्ततया न विधिकल्पकत्वावकाशः । एवं हारियोजनेऽपि येषां कारणान्तरेण न भक्षप्राप्तिस्तत्प्राप्तिफलक एव सर्वत्वविधिरिति न तत्रापि कारणद्वयस्यैकस्मिन् कर्तरि समवाय इति चेन्न, मैत्रावरुणादिहोतृकचमसेषु वषट्कारात्तेषामिव होतुरपि वषट्कर्तृत्वाद्धोतृचमससाधारण्येन चाध्वर्योरपि होमाभिषवकर्तृत्वाद्धोत्रादीनामपि तद्भक्षणप्राप्तेर्विशिष्य तत्तच्चमस इत्येवंविधसमाख्यायास्तत्तत्कर्तृकभक्षणान्तरविधिमन्तरेणानुपपत्तेः । अत एव तन्त्रानुष्ठाने विधिफलाभावेन तन्त्रत्वमपि न । न चैवमप्येकस्मिन्नेव कस्मिंश्चिदभ्यासे समाख्यानिमित्तभक्षकरणमात्रेण समाख्योपपत्तौ न चमससाध्याभ्यासमात्रे तदापत्तिः । समाख्याकल्प्यश्रुतावविशेषात्प्रकृतापूर्वसाधनचमसस्थसोमसंस्कारार्थत्वेन तत्तत्कर्तृकभक्षणस्य विधेयत्वेन सर्वत्रैव चमससाध्याभ्यासे तत्प्राप्तेः । अतस्सर्वत्रैवैकपात्रे कर्तृभेद इवैककर्तरि कारणभेदेऽपि युक्तो भक्षणस्य पृथगनुष्ठानेन समुच्चयः । हारियोजने तु मास्तु समुच्चयः । याज्ञिकानुष्ठानं चेत्तर्हि तेनास्तु सः॥ १०

(११)–एकपात्रे क्रमादध्वर्युः पूर्वो भक्षयेत् ॥ ३६ ॥ होता वा मन्त्रवर्णात् ॥ ३७ ॥ वचनाच्च ॥ ३८ ॥ कारणानुपूर्व्याच्च ॥ ३९ ॥

भक्षसमुच्चये चिन्तितेऽधुना प्रसङ्गात्तत्क्रमो निरूप्यते । तत्रैकस्मिन् पात्रे कर्तृभेदेन भक्षभेदे "वषट्कर्तुः प्रथमभक्षः" इति वचनात् "होतेव नः प्रथमः पाहि" इत्यादिमन्त्रवर्णाच्च वषट्कर्तुस्तन्निमित्तः प्रथमो भक्षः । न च होमकर्तुरध्वर्योर्हस्ते पा-

त्रसत्त्वादर्पणप्रत्यर्पणकल्पने गौरवापत्तेस्तस्यैव न्यायेन भक्षप्राथम्यावगतेस्तदपेक्षया च वषट्कर्तुः प्राथम्यविधानेऽपूर्वविधित्वापत्तेस्समाख्यानिमित्तभक्षापेक्षयैव तेन प्राथम्यविधिर्नियमविधिलाघवानुरोधेन युक्तमिति वाच्यं, नियामकन्यायप्रवृत्तेः पूर्वमेवैतस्य वचनस्य प्रवृत्तत्वेन नियमविधित्वानपायान्नयायेन सङ्कोचानुपपत्तेः । अतो वषट्कारनिमित्तं प्रथमं भक्षः । मैत्रावरुणादेचमसेषु सवनमुखीये ऐन्द्रप्रदाने होत्रा वषट्कारान्मित्रावरुणादिभ्यश्च प्रदाने मैत्रावरुणादिभिर्वषट्कारात् वषट्कर्त्रनेकत्वे तु प्रदानक्रमेणैव क्रमः। वषट्कर्तृभक्षानन्तरं च होमाभिषवोभयकर्तृसत्त्वे तस्य भक्षः तन्निमित्तभक्षस्य वाचनिकत्वात् । ततो दुर्बलसमाख्याप्रमाणकः । होमाभिषवकर्तृकभक्षाभावे तु तदनन्तरं भिन्नकर्तृकसमाख्याप्रमाणक एव । समानकर्तृके तु होमाभिषवकर्तृकभक्षाभावे द्विरनुष्ठानमात्रे न क्रमाभिव्यञ्जकं किञ्चित् । तत्सत्त्वे तु पूर्वोक्त एव क्रम इति ध्येयम् ॥ ११ ॥

(१२)-वचनादनुज्ञातभक्षणम् ॥ ४० ॥ तदुपहूत उपह्वयस्वेत्यनेनानुज्ञापयेल्लिङ्गात् ॥ ४१ ॥ तत्रार्थात्प्रतिवचनम् ॥ ४२ ॥

इदं च भक्षणं "नानुपहूतेन सोमः पातव्यः" इति वचनादनुज्ञाप्यैव । तदपि न लौकिकेन शब्देन अपि तु आम्नानवशात् "उपहूत उपह्वयस्व" इत्यनेनैव मन्त्रेण । तत्रापि लिङ्गेन वाक्यं बाधित्वा विभज्यैवैकोऽनुज्ञापनेऽपरश्चानुज्ञायाम् । निषेधबलाच्चानुज्ञापनानुज्ञयोर्विधिकल्पना, मन्त्रबलाच्च । तत्राप्यर्थक्रमेण पाठक्रमं बाधित्वा "उपह्वयस्व" इति प्रथममनुज्ञाग्रहणे "उपहूतः" इति पश्चादनुज्ञादाने विनियोक्तव्यम् ॥ १२ ॥

(१३)–तदेकपात्राणां समवायात् ॥

सेयमनुज्ञा यस्यैकस्मिन्नेव पात्रे भक्षप्रसक्तिस्तस्यैव ग्राह्या, दृष्टार्थतालाभात्, भागाधिक्यादिप्रसङ्गनिमित्तकलहशङ्कानिवृत्त्यर्थत्वात्। उपायान्तरेणापि तन्निवृत्तावस्य नियमविधित्वात्। अन्यस्यानुज्ञाने त्वदृष्टार्थत्वमपूर्वविधित्वं दोषः। अत एव यत्रैकस्मिन् पात्रे एक एव भक्षयिता तत्र नैवानुज्ञाग्रहणम्। एवमन्तिमस्यापि भक्षयितुर्नानुज्ञाग्रहणं प्रयोजनाभावात्। याज्ञिकास्त्वाचरन्ति ॥ १३ ॥

(१४)–याज्यापनयेनापनीतो भक्षः प्रवरवत् ॥ ४४ ॥ यष्टुर्वा कारणागमात् ॥ ४५ ॥ प्रवृत्तत्वात्प्रवरस्यानपायः ॥ ४६ ॥

ज्योतिष्टोमे ऋतुयाज्यासु हौत्रप्रवचनाम्नातासु अन्त्या याज्या होतुरपनीय यजमानस्य विकल्पेन विधीयते "यजमानस्य याज्या सोऽभिप्रेष्यति होतरेतद्यजेति स्वयं वा निषद्य यजति" इति। तत्र स्वयं याज्यापाठपक्षे वषट्कारभक्षयोस्स एव कर्ता उत होता वेति चिन्तायां–षष्ठीश्रुत्या यजमानस्य याज्यामात्रं श्रुतं न वषट्कारः तस्य "याज्याया अधि वषट्करोति" इति वचनेन याज्यातो भेदात्। अतश्च वषट्कारे समाख्यानिमित्तो होतैवेति तन्निमित्तो भक्षस्तस्यैव। यत्तु "स्वयं वा" इति वचनं तत् न तावद्यागकर्तृत्वविधायकं तस्य प्रधानवाक्यादेव सिद्धेः। नापि यागप्रकाशकवषट्कारप्रयोक्तृत्वविधायकं विध्यन्तरत्वे वाक्यभेदापत्तेः। अत आद्यवाक्येन यजमानस्य याज्यायां विहितायां द्वितीयेन प्रैषकर्तृत्वविधानात् प्रैषार्थकर्तृत्वानुपपत्तेरेव

याज्यार्थविकल्पप्राप्तेर्योगकर्तृत्वस्य च याज्याप्रयोक्तृत्वमात्रेणाप्युपपत्तेस्तृतीयमर्थवादः। 'निषद्य' इत्यपि याज्यायां निषण्णत्वस्य सामान्याविधित एव प्राप्तत्वादनुवादः। "अनवानं यजति" इति याज्यान्तरविषयमिति प्राप्ते --

आख्यातश्रवणात्, वाशब्दानुपपत्तेश्च तृतीयमेव विधायकं आद्यं त्वर्थवादः। अतश्च याज्यान्तेन वषट्कारेणैव मुख्ययागकर्तृत्वाद्वषट्कारोऽपि तस्यैव, याज्यावषट्कारयोस्समानकर्तृत्वस्यानवानस्य च बाधापेक्षया वषट्कारे होतृकर्तृकत्वमात्रस्यैवैकस्य समाख्याप्रमाणकस्य बाधौचित्याच्च। एवं चाद्यस्यापि विधित्वे न कश्चिद्दोषः। अतश्च वषट्कारनिमित्तो भक्षोऽपि तस्यैव ॥ १४॥

(१५)–फलचमसो नैमित्तिको भक्षविकारश्श्रुतिसंयोगात् ॥ ४७ ॥ इज्याविकारो वा संस्कारस्य तदर्थत्वात्॥४८॥होमात् ॥४९ चमसैश्च तुल्यकालत्वात् ॥ ५० ॥ लिङ्गदर्शनाच्च ॥ ५१ ॥

तत्रैव "यदि राजन्यं वैश्यं वा याजयेत् स यदि सोमं विभक्षयिषेत् न्यग्रोधस्तिभिनीराहृत्य तास्सम्पिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत् न सोमम्" इति श्रुतम्। तत्र द्वितीयो यदिशब्दो निस्सन्दिग्धत्वपरः। आद्यस्तु निमित्तत्वपर एव। स्तिभिनीः अङ्कुरान् फलानि च। तत्रैतस्य फलचमसपदाभिधेयस्य किं भक्षणमात्रं किं वा यागोऽपीति चिन्तायां—निमित्तत्वेनापक्षीणस्य यागस्य फलचमसान्वयित्वानुपपत्तेस्तच्छब्दपरामृष्टस्य च तस्य भक्षान्वयश्रवणात्प्राप्तयागानुवादेनानेकपेषणादि-

रूपगुणविधाने वाक्यभेदापत्तेश्चानेकगुणविशिष्टं भक्षान्तरमेव फलचमसकरणकं विधीयते । फलचमसस्य विनियोगाभावेन संस्कार्यत्वानुपपत्तेस्सक्तुन्यायेन[1] विनियोगभङ्गस्यावश्यकत्वात् । तदप्यारादुपकारकमपि यजमानसोमभक्षस्य बाधकं, "न सोमम्" इत्यनुवादबलात्, "न गिरा गिरेति ब्रूयात्[2]" इतिवदेककार्यकारित्वाभावेऽपि बाधकत्वरूपाया एव स्थानापत्तेरङ्गीकारात् । अस्तु वाऽयं स्वतन्त्र एव तन्निषेध इति प्राप्ते—

यद्यपि भक्षान्तरमिदं तथाऽपि तस्य नारादुपकारकत्वं 'तम्' इति द्वितीयानिर्देशेन फलचमससंस्करार्थत्वप्रतीतेः । अनुपयुक्तस्य च संस्कारायोगेऽपि "अध्वर्युं वृणीते" इत्यादिवद्विनियोगकल्पना । तत्रापि "स यदि सोमं बिभक्षयिषेत्" इत्याद्यनुवादबलाद्यजमानकर्तृकसोमभक्षस्य च तावतैवोपपत्तौ सर्वत्र सोमबाधेन सर्वार्थत्वकल्पने प्रमाणाभावाद्यजमानचमसयागाभ्याससाधनत्वमेव फलचमसस्य कल्प्यते इति न काचिदनुपपत्तिः । वस्तुतस्तु-भक्षान्तरत्वे प्रमाणाभावात्सोमभक्ष एव यजमानकर्तृकः पेषणदध्युन्मृज्युत्तरकालद्वयविशिष्टः फलचमससंस्कारकत्वेन विनियुज्यते । "राजा राजसूयेन" इतिवत्, "तस्य वायव्यासु" इतिवच्च विनियोगविशिष्टप्रयोगविधानादवाक्यभेदः । तस्य च यजमानचमसाभ्यासीयद्रव्यसंस्कारकभक्षसंस्कार्यत्वात्पूर्वोक्तयुक्तेश्च तदीयत्वानुमानात्कल्पितवाक्येन फलचमसस्योक्तयागाभ्याससाधनत्वसिद्धिः । नैमित्तिकत्वाच्च तत्र नित्यसोमबाधकत्वम् । एवं च स्थानापत्त्यैव फलचमसे इतरसोमसंस्कारवद्यजमानभक्षस्यापि प्राप्तिसम्भवे पूर्वप्रवृत्त्या तद्विध्यङ्गीकरणं गुणद्वयविधा-

---

[1] २-१-६ अधिकरणेऽयं न्यायो द्रष्टव्यः ।

[2] ९-१-१६ अधिकरणे एतद्वाक्यविचारो द्रष्टव्यः ।

नार्थं, फलचमसस्य यागसाधनत्वसिद्धयर्थं चेति द्रष्टव्यम् । एतेन "यदि सोमं न विन्देत् पूतिकानाभिषुणुयात्" इत्यत्राभिषवयुक्तपूतीकानामपि यागसाधनत्वं व्याख्यातम् ॥ १५ ॥

(१६)–अनुप्रसर्पिषु सामान्यात् ॥ ५२ ॥ ब्राह्मणा वा तुल्यशब्दत्वात् ॥ ५३ ॥

राजसूये दशपेयो नाम सोमयागविकारो राजकर्तृकः । तत्रातिदेशतो दशसु चमसेषु प्राप्तेषु यजमानचमसे राज्ञो भक्षणम् । तत्रापरं "शतं ब्राह्मणास्सोमान् भक्षयन्ति," "दशदशैकैकं चमसमनुप्रसर्पेयुः" इति वचनद्वयं श्रुतम् । तत्र न तावत् "शतं ब्राह्मणाः" इति विधिः 'दशदश' इत्यनुवादः, भक्षानुवादेन गुणद्वयविधाने वाक्यभेदात्, एकैकस्मिन् भक्षे शतब्राह्मणप्राप्त्यापत्तौ दशदशेत्यस्य प्राप्त्यभावाच्च । अतो दशदशेत्येव, लिङ्श्रवणाद्विधिः । सोऽपि च न चमसोद्देशेन दशत्वस्य प्राप्तत्वात् । नापि तदुद्देशेन भक्षाश्रितदशकर्तृविधिः । चमसोन्नयनादिक्रियान्तरस्याप्याश्रयत्वप्रसङ्गेन भक्षस्यैवाश्रयत्वे प्रमाणाभावात्, याज्ञिकाचारसिद्धसमाख्याभक्षस्यैव नियमेनोपस्थित्यभावेन वषट्कारनिमित्तस्याप्याश्रयत्वापत्तेश्च, 'चमसम्' इति द्वितीयाया अनुशब्दयोगनिमित्तत्वेन प्रतियोगित्वपरतया तस्योद्देश्यत्वोपस्थापकत्वाभावाच्च । नापि चमसानुप्रसर्पणोद्देशेन दशकर्तृविधिः विशिष्टोद्देशे वाक्यभेदात्, चमसप्रतियोगिकर्त्विककर्तृकानुप्रसर्पणस्याप्राप्तत्वाच्च, "प्रयाजेभ्यस्तत्" इतिवत् सर्वचमसेष्वेकस्यैव दशकस्य प्रसक्त्यापत्तेश्च । चमसेष्वेकैकत्वविशेषणे पुनर्विशिष्टोद्देशः । दशदशेति वीप्सार्थविधाने वाक्यभेदः, प्रतिचमसं विंशत्यापत्तिश्च । अतो दशकर्तृविशिष्टं प्रत्येकचमस-

प्रतियोगिकमनुप्रसर्पणमेवात्र विधीयते । तयोश्च पार्ष्ठिकान्वये ए-
कैकस्मिन् चमसे दशदश कर्तारो भवन्तीति वीप्सानुवादः । अ-
नुप्रसर्पणस्य च प्रयोजनापेक्षायां वैमृधन्यायेन[1] चमसपदान्तर्ग-
तचमिधातुप्रतिपाद्यसमाख्यानिमित्तभक्षस्यैव स्ववाक्योपस्थि-
तत्वात्तद्वाचकपदान्तरकल्पनया प्रयोजनत्वम् । अतश्च समा-
ख्यानिमित्तभक्षार्थं प्रतिचमसं दशानामनुप्रसर्पणे चमसानां द-
शत्वाच्छतसङ्ख्यासम्पत्तेश्शतवाक्यमनुवादो विधेयदशत्वस्तुत्यर्थः
न तु ब्राह्मणत्वविधायकः वाक्यभेदापत्तेः । अतो ब्राह्मणग्रहणं
सोमपदवदेव भूम्ना गौणमिति यजमानचमसे राजत्वजातेरेव
न्यायप्राप्तत्वाद्राजन्या दश भक्षयेयुरिति प्राप्ते—

ब्राह्मणत्वस्य सर्वचमसेषु प्राप्त्यभावेन "उपरि हि देवे-
भ्यो धारयति"[1] इतिवद्विधेयत्वोपपत्तेर्गौणत्वे प्रमाणाभावात्
ब्राह्मणत्वमेवेह शतोद्देशेन विधीयते । "सोमान् भक्षयन्ति" इत्य-
नुवादमात्रम् । वस्तुतस्तु भक्षयतिना पूर्ववाक्ये समाख्याभ-
क्षस्योद्देश्यत्वेनोपस्थितस्यैवोपादानात्तदुद्देशेनैव ब्राह्मणत्वविधान-
मिति दशत्वेनैकत्वबाधवत् ब्राह्मणत्वेन राजत्वबाध इति यज-
मानचमसेऽपि ब्राह्मणा एव फलचमसं दश भक्षयेयुः । न च
"स यदि सोमम्" इत्यनेन राजकर्तृकभक्षस्य निमित्तत्वावगतेः
कथं तदभावे फलचमस इति वाच्यं, निमित्तद्वयाङ्गीकारे वा-
क्यभेदापत्तेराद्येनैव यदिशब्देन यागगतराजकर्तृकत्वस्य निमित्त-
त्वप्रतिपादनात् । अयं तु यदिशब्दो निस्सन्दिग्धत्वार्थकोऽनुवाद
इत्युक्तम् ॥ १६ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
तृतीयस्याध्यायस्य पञ्चमः पादः.

---

[1] ४-३-११ अधिकरणेऽयं न्यायो द्रष्टव्यः.

अथ तृतीयाध्यायस्य षष्ठः पादः.

(१)-सर्वार्थमप्रकरणात् ॥ १ ॥ प्रकृतौ वाऽ[1] द्विरुक्तत्वात् ॥ २ ॥ तद्वर्जं तु वचनप्राप्ते ॥ ३ ॥ दर्शनादिति चेत् ॥ ४ ॥ न चोदनैकार्थ्यात् ॥ ५ ॥ उत्पत्तिरिति चेत् ॥ ६ ॥ न तुल्यत्वात् ॥ ७ ॥ चोदनार्थकात्स्न्यात्तु मुख्यविप्रतिषेधात्प्रकृत्यर्थः ॥ ८ ॥

अनारभ्यश्रुतेन "यस्य पर्णमयी जुहूर्भवति" इत्यादिनाऽव्यभिचरितक्रतुसंम्बन्धिजुहूद्देशेन विधीयमाना पर्णता तद्वारेण जुहूसाध्यक्रत्वङ्गमिति स्थिते, सा किं प्रकृतिविकृतिसाधारणी उत प्रकृतेरेवेति चिन्तायां—अविशेषात्सर्वेषामपि। न च विकृतावतिदेशेनापि प्राप्तेर्द्विरुक्तत्वापत्तिः, उपदेशेनैव प्राप्तिसत्त्वे अतिदेशस्य कुशविषयत्वाकल्पनवत् पर्णताविषयत्वाकल्पनात्। न च विकृतौ जुहूप्राप्तेरतिदेशायत्तत्वात्तस्य च प्रकृतेस्सर्वाङ्गसम्बन्धोत्तरकालिकत्वेन पर्णताविधेः प्रथमं प्रकृतिविषयशाब्दबोधजनकत्वावश्यम्भावे पुनर्विकृतिविषये तज्जनकत्वायोगेन प्राप्तिकालवैषम्यापत्तिरिति वाच्यं, वैमृधा[2]दिवत् पर्णताव्यतिरिक्ताङ्गसम्बन्धेनैव

[1] द्विरुक्तत्वादिति पाठे विकृताविति पदमध्याहृत्य तत्र द्विरुक्तत्वात्प्रकृतावेवानाराभ्याधीतानां निवेश इत्यर्थो बोध्यः। पाठद्वयं वार्तिककारेण प्रदर्शितम्॥

[2] ४-३-११.

प्रकृतेः पूर्णत्वमङ्गीकृत्य विकृतावतिदेशोपपत्तौ पर्णतायाः पश्चा देव विधानेन साधारण्योपपत्तेः। अन्यथा वैमृधेऽपि वैमृधव्य- तिरिक्तप्रयाजाद्यतिदेशानापत्तेरिति प्राप्ते—

यत्किञ्चिदितिकर्तव्यताकवैमृधोपेतसकलाङ्गसम्बन्धेनैव प्रकृ- तेः पूर्णत्वमङ्गीकृत्य वैमृधे अतिदेशकल्पनायामपि येषामङ्गानां स्वाङ्गसम्बन्धेन निराकाङ्क्षता तेषामेवातिदेशो न वैमृधस्य, अङ्गवि- शेषानवगमेन तद्भावनायाः अपरिपूर्णत्वात्। अतश्च पर्णतारूपा- ङ्गसम्बन्धं विना प्रकृतेः पूर्णत्वाभावादतिदेशतो जुहूप्राप्तयनन्तरं पुनः पर्णताविधौ प्राप्तिकालवैषम्यापत्तेः प्रकृत्यर्थैव पर्णता। यथा चैवं सति "दीक्षासु यूपं छिनत्ति" इत्यत्राग्नीषोमीयसवनीयानू- बन्ध्यसम्बन्ध्युपदिष्टातिदिष्टच्छेदनसाधारण्येन दीक्षाकालविधौ न प्राप्तिकालवैषम्यं तथा तत्रैव[1] वक्ष्यामः। वस्तुतस्तु—नैव तत्र साधारण्येन विधिः, प्रकृत्यर्थत्वेन विहितस्यातिदेशतोपि प्राप्ति- सम्भवात्। तथाऽपि यूपैकत्वं भिन्नकालिकत्वेनागृह्यमाणविशेष- त्वात्पात्रवदेव नानुपपन्नम्॥

प्रयोजनं पूर्वपक्षे पर्णतालोपे वेदान्तरीयविकृतौ याजुर्वेदि- कत्वात्तद्वेषप्रायश्चित्तम्। सिद्धान्ते अविज्ञातप्रायश्चित्तं विकृतिवे- दीयं वा। भूरादिप्रायश्चित्तानामप्युपक्रमानुसारेणोच्चैस्त्वादिवत् वेदधर्मत्वात्॥ १॥

(२)—प्रकरणविशेषात्तु विकृतौ विरोधि स्यात्॥

"सप्तदश सामिधेनीरनुब्रूयात्" इत्यनारभ्याधीतं सामिधेन्यु- द्देशेन विधीयमानं साप्तदश्यं प्राकरणिकपाञ्चदश्यावरोधान्न पूर्व- वत्प्रकृतौ दर्शपूर्णमासयोर्निविशते, सामिधेनीस्वरूपे आनर्थक्य-

[1] ११-३-४.

प्रसक्तौ लक्षणीयस्यापूर्वविशेषसाधनत्वस्य प्रकरणेन झडित्युपस्थापनात्। साप्तदश्ये तु अव्यभिचरितक्रतुसम्बन्धेन कथञ्चिदपूर्वसामान्यस्योपस्थितावपि तद्विशेषस्य द्विरुक्तत्वन्यायेनोपस्थित्या विलम्बितत्वात्। किन्तु विकृतौ। न च तत्रापि क्लृप्तोपकारपाञ्चदश्यावरोधः। औपदेशिकत्वेन शरवद्बाधकत्वोपपत्तेः। न चानारभ्याधीतत्वेन दौर्बल्यं, निरवकाशत्वरूपप्राबल्ययुक्तेरुभयत्रापि तुल्यत्वात्। अत एव "य इष्ट्या" इत्यनेनावगम्यमानं सद्यस्कालत्वादि सर्वविकृतिषु निविशत एव। अत एव सर्वविकृतिषु साप्तदश्यप्राप्तौ कासुचिन्मित्रविन्दादिविकृतिषु तत्पुनश्श्रवणं अन्यविकृतिषु तत्परिसङ्ख्याफलकोपसंहारार्थम्। न च वाक्यद्वयवैयर्थ्यापत्तिः, एकेन सामिधेनीसम्बन्धोऽपरेण क्रतुविशेषसम्बन्ध इति विषयभेदात्। न चैवमपि प्राकरणिकेनैवोभयसम्बन्धसिद्धौ इतरवैयर्थ्यं, वाक्यद्वयाम्नानबलेनाभ्युदयशिरस्कत्वकल्पनादिति दशमे[2] वक्ष्यते॥

(३)–नैमित्तिकं तु प्रकृतौ तद्विकारस्संयोगविशेषात्॥ १०॥

यत्तु प्रकरण एव "सप्तदश वैश्यस्य" इति नैमित्तिकं साप्तदश्यं, तत् पाञ्चदश्यबाधकम्। अत्र हि षष्ठ्या निमित्तत्वमेव वैश्यस्योच्यते। विजातीयत्वाच्च सामिधेन्युद्देशेऽपि न वाक्यभेदः। वैश्यस्वामिकसामिधेन्युद्देशेन वा साप्तदश्यविधिः। षष्ठ्या परस्परसम्बन्धस्य प्राचां व्युत्पन्नत्वेन च विशिष्टोद्देशो युक्तः। वैश्योद्देशेनैव वा स्वस्वामिकसामिधेनीकत्वसम्बन्धेन तद्विधिः, "सामिधेनीरनुब्रूयात्" इत्यस्य तात्पर्यग्राहकत्वात्। अ-

---

[1] ३-६-१. [2] १०-८-९.

न्यपक्षद्वये च वैश्याभावे सान्नाय्यानुष्ठानान्निमित्तत्वं तस्यार्थिकम्। तथा काम्यमपि गोदोहनादि एकविंशत्याद्यनुवचनादि च नित्यस्य चमसपात्रादश्यादेर्नैमित्तिकस्य च सान्नाय्यादेर्बाधकं, नित्यस्य सामान्यविहितत्वेन ब्राह्मणादिप्रयोगे सावकाशत्वेन च विशेषविहितान्निरवकाशाच्च काम्यनैमित्तिकाद्दुर्बलत्वावगतेः। न चैवमपि नैमित्तिकस्य कामनारहितप्रयोगे सावकाशत्ववत् काम्यस्यापि ब्राह्मणादिकाम्यप्रयोगे सावकाशत्वाद्यविशेषेण नैमित्तिकापेक्षया बलवत्त्वानापत्तिः, साक्षात्पुरुषार्थसाधने पुरुषस्योन्मुखत्वेन काम्यस्य पुरस्स्फूर्तिकतया बलवत्त्वोपपत्तेः। न च काम्यस्य क्रत्वनङ्गत्वात् तेन क्रत्वङ्गभूतनित्यादेर्बाधे विगुणक्रत्वाश्रितात्काम्यादपि फलानापत्तिः, काम्यस्य लाघवेन परप्रयुक्ताश्रयोपजीवितया स्वातन्त्र्येणानुष्ठानशङ्काऽनुपपत्तेः, आश्रयस्यापि परप्रयुक्तकाम्यगुणेनैवोपकारसिद्धौ नित्यनैमित्तिकचमसाद्यनुष्ठापकत्वाकल्पनात् काम्यप्रयोगे चमसादेरङ्गत्वाभावेनैव वैगुण्याप्रसक्तेः। अतो दुर्बलस्य नित्यादेः प्रबलानास्कन्दितप्रयोगविषयत्वकल्पनया प्राप्तबाधविभ्रया बाधकत्वं काम्यनैमित्तिकादेरिति सिद्धम् ॥ ३ ॥

(४)—इष्ट्यर्थमग्न्याधेयं प्रकरणात् ॥ ११ ॥ न वा तासां तदर्थत्वात् ॥ १२ ॥ लिङ्गदर्शनाच्च ॥ १३ ॥

अग्नीनामतिदेशेन पवमानेष्ट्यङ्गत्वावगमात्तत्संस्कारकत्वेन विहितस्याधानस्यापि प्रकरणसहकृतवाक्यात्पवमानेष्टिसाधनीभूताग्निसंस्कारकत्वेन विनियुक्तस्य पवमानेष्ट्यङ्गत्वं, पवमानेष्टीनां विश्वजिन्न्यायेन[1] फलकल्पनेति प्राप्ते—

---

[1] ४-३-६.

आधानस्य किमग्न्युत्पादकत्वं उत सम्मार्गादिवदग्निनिष्ठातिशयमात्रजनकत्वं, उभयथाऽपि त्वन्मते अग्निहोत्रादिष्वाहवनीयाद्युत्पादकाभावादतिदेशस्यैवासम्भवः। अतोऽग्निहोत्राद्यङ्गभूताहवनीयाद्युत्पादकमेवाधानम्। पवमानेष्टयोऽप्यग्न्यङ्गभूताः, फलवदाधानाङ्गभूता एव वा प्रकरणात्। ततश्च पवमानेष्टिष्वसिद्धत्वादग्नेरातिदेशस्यैवाभावः ॥

प्रयोजनं पवमानेष्टिषु पूर्वपक्षे अन्वारम्भणीया, सिद्धान्ते प्रधानारम्भत्वा[1]न्नेत्यादि ॥ ४ ॥

(५)–तत्प्रकृत्यर्थं यथाऽन्येऽनारभ्यवादाः ॥ १४ सर्वार्थं वाऽऽधानस्य स्वकालत्वात् ॥ १५ ॥

तदाधानमग्निवदेव पर्ण[2]तान्यायेनाव्यभिचरितक्रतुसम्बन्ध्यग्न्यङ्गत्वेन क्रत्वङ्गत्वावगतेर्द्विरुक्ततादोषभियैव प्रकृत्यर्थमिति प्राप्ते- नाधानस्य क्रत्वङ्गत्वं प्रमाणाभावात्। जुह्वादयो ह्याकृतिविशेषरूपाः पर्णतादिव्यतिरेकेणापि काष्ठान्तरेण जायमाना आनर्थक्यभयाद्युक्तं यत्पर्णतादेस्स्वजन्यापूर्वार्थतां बोधयन्तीति। आहवनीयाद्यग्नयस्तु अदृष्टविशेषरूपा आधानं विनोत्पत्तौ प्रमाणाभावादानर्थक्याभावेन स्वस्वरूपार्थत्वमेवाधानस्यावबोधयन्ति। अत एव तत्र नाग्निशब्दे अपूर्वसाधनत्वलक्षणा। अतः क्रत्वर्थत्वस्यैवाभावात् प्रकृत्यर्थता दूरापास्तैव। न चैवमाधानाकरणे क्रतुवैगुण्यानापत्तिः, अग्न्यभावेन वैगुण्योपपत्तेः। वस्तुतस्तु—लाघवेन क्रतुविधीनामाधानविधिसिद्धाग्निग्रहणेनैवोपपत्तौ स्वयमग्निप्रयोजकत्वाभावादनाहिताग्नेरनधिकार एव क्रतुष्विति वैगुण्यशङ्का दूरापास्तैव। एवं पवमानेष्टीनामप्यक्रत्वर्थत्वं व्याख्यातम् ॥

---

[1] पृथगारम्भाभावा. पा. [2] ३-६-१.

प्रयोजनं पूर्वपक्षे आधानस्य कालान्तराम्नानेन भिन्नप्रयोगविधिविहिततया सर्वार्थे सकृदनुष्ठानेऽपि बृहस्पतिसवादिवदधिकारिविशेषणत्वे प्रमाणाभावान्नित्ये आधानं विनाऽप्यनुष्ठानं यथाशक्तिप्रयोगे। सिद्धान्ते त्वधिकारसम्पादकत्वान्नेति ॥ ५ ॥

(६)–तासामग्निः प्रकृतितः प्रयाजवत् ॥ १६ ॥
न वा तासां तदर्थत्वात् ॥ १७ ॥

पवमानेष्टीनां दर्शप्रकृतित्वादतिदेशेन प्रयाजादिवदेवाग्नयः प्राप्नुवन्ति, ते चाधानपवमानेष्टिसाध्या इति ततः पूर्वं कर्तव्यमेवाधानं पवमानेष्टयश्च । न चानवस्था यावत्पौर्णमास्यादिकालंकरणोपपत्तेरिति प्राप्ते—

न तावत्पवमानेष्ट्यादिकं प्रकृतावङ्गं, अग्निमात्रार्थत्वस्य स्थापितत्वात्[1] । सत्यपि चाङ्गत्वे तेषां नातिदेशः पवमानेष्ट्यादिषु, यत्किञ्चिदितिकर्तव्यताकपवमानेष्ट्युपेतसकलाङ्गसम्बन्धेनैव प्रकृतेः पूर्णतां परिकल्प्य पवमानेष्टिष्वतिदेशकल्पनात्, येषामङ्गानां प्रकृतौ स्वाङ्गसम्बन्धेन निराकाङ्क्षता तेषामेवातिदेशः न पवमानेष्ट्यादीनां, तेषामङ्गविशेषानवगमेन तद्भावनाया अपरिपूर्णत्वात् । अतोऽन्वार[2]म्भणीयावैमृ[3]धन्यायेनैव नातिदेशः । वस्तुतस्तु—नाङ्गत्वमपि । अग्नीनां तु सत्यप्यङ्गत्वे साध्यत्वान्नेहातिदेशः । अवश्यं हि ये प्रथमत आधानपवमानेष्ट्यादयः कार्यास्तेभ्योऽग्निसिद्धिरङ्गीकर्तव्या । ततश्च तेभ्यः कार्यसिद्धावन्येषामकरणम् । यथा चैवं सति पवमानेष्टिहोमादय आधानहोमा वा आधानजन्योत्पत्त्यपूर्वरूपाहवनीयादौ भवन्ति तथा कौस्तुभे वारणाधिकरणे[4] अत्र च स्पष्टम् ॥ ६ ॥

[1] ३-६-४ अधिकरणे. [2] १०-१-४. [3] ४-३-११. [4] ३-१-१२.

(७)—तुल्यस्सर्वेषां पशुविधिः प्रकरणाविशेषात् ॥ १८ ॥ स्थानाच्च पूर्वस्य ॥ १९ ॥ श्वस्त्वेकेषां तत्र प्राक्छ्रुतिर्गुणार्था ॥ २० ॥ तेनोत्कृष्टस्य कालविधिरिति चेत् ॥ २१ ॥ नैकदेशत्वात् ॥ २२ ॥ अर्थेनेति चेत् ॥ २३ न श्रुतिविप्रतिषेधात् ॥ २४ ॥ स्थानात्तु पूर्वस्य संस्कारस्य तदर्थत्वात् ॥ २५ ॥ लिङ्गदर्शनाच्च ॥ २६ ॥ अचोदना गुणार्थेन ॥ २७ ॥

ज्योतिष्टोमे क्रयसन्निधावग्नीषोमीयः पशुराम्नातो वचनात् "स एष औपवसथ्येऽहन्यालब्धव्यः" इत्यस्माच्चतुर्थेऽहन्यनुष्ठीयते। पशुधर्माश्च तत्रैव पशूपाकरणादयस्समाम्नाताः। सवनीयश्च पशुस्सौत्येऽहनि समाम्नातः "आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोति" इति। अनुबन्ध्यश्चान्ते समाम्नातः। तदिह किं पशुधर्माणां पशुत्रयसाधारण्यं, उत सवनीयमात्रार्थत्वं, उत सवनीयाग्नीषोमीयोभयार्थत्वं, उताग्नीषोमीयमात्रार्थत्वमेवेति चिन्तायां महाप्रकरणवशाज्ज्योतिष्टोमसम्बद्धानां धर्माणां पशुधर्मत्वेन साक्षात्सम्बन्धायोगादानर्थक्यतदङ्गन्यायेन पशुयागद्वारा जनकत्वावगतस्तेषां च मध्ये कस्यचित् विशिष्य प्रकरणबाधकबलवत्प्रकरणाभावेनाविशेषात्सर्वार्थत्वमित्याद्यः। द्वितीयस्तु—सत्यपि ज्योतिष्टोमप्रकरणस्य पशु-

धर्मग्राहकत्वे सवनीयावान्तरप्रकरणेन तद्बाधः । तस्य हि औपवसथ्येऽहन्येवोत्पत्तिः "आग्नेयः पशुरग्निष्टोमे आलब्धव्यः, ऐन्द्राग्न उक्थ्ये द्वितीयः, ऐन्द्रो वृष्णिष्षोडशिनि तृतीयः, सारस्वती मेष्यतिरात्रे चतुर्थी" इत्येतैर्वचनैः क्रतुपशूनां विधानात् । तस्य क्लृप्तोपकारप्राकृताङ्गसम्बन्धेऽप्यपेक्षितानां पशुधर्माणां सन्निहितत्वेन प्राकृताङ्गसन्दष्टत्वेन चावान्तरप्रकरणोपपत्तिः । ऐन्द्राग्नादिपशूनां तु संस्थाधिकरणन्यायेन[1] समानविधानत्वाभावादेव न पशुधर्मग्राहकत्वशङ्का । अस्तु वा—तेषामप्यवान्तरप्रकरणाद्धर्मग्राहकत्वं, नैतावता सर्वार्थत्वम् । न सौत्येऽहनि तद्विधिः, सवनीयोद्देशेन तस्याश्विनग्रहग्रहणोत्तरकालत्वमात्रविधायकत्वात् । यूपपरिव्याणस्य "त्रिवृता यूपं परिव्ययति" इति सामान्यविधिना, "आश्विनं ग्रहं गृहीत्वा उपनिष्क्रम्य यूपं परिव्ययति" इति परिव्याणविधिना वा प्राप्तत्वेनानुवादात् । परिव्याणान्तरे त्रिवृत्त्वस्यापि रशनासाधारण्याधिकरण[2] एवोपपादयिष्यमाणत्वाच्च । न च तथाऽपि दूरस्थकर्मानुवादेन कालविधिरशक्यः, औपवसथ्येऽहनि विहितानामपि क्रतुपशूनां "वपया प्रातस्सवने चरन्ति पुरोडाशेन माध्यन्दिने अङ्गैस्तृतीयसवने" इत्यनेनोत्कर्षविधानात् सौत्येऽहन्यनुष्ठीयमानतयोपस्थित्युपपत्तेः । तेन यथैव क्रयसन्निधावाम्नातस्याग्नीषोमीयस्य औपवसथ्येऽहन्यनुष्ठीयमानत्वेनैव धर्मग्राहकत्वं सिद्धान्ते, तद्वदिहापीति न दोषः । न चैवमपि क्व सवनीयविधिरित्यत्र विनिगमनाविरहः, धर्मबाहुल्यस्य नियामकत्वात् । अतश्चावान्तरप्रकरणात् सवनीयार्था इति । तृतीयस्तु—सत्यं सवनीयार्थाः, स्थानादग्नीषोमीयार्था अपि । तस्य हि क्रयसन्निधौ विधिदशायामेव क्लृप्तोपकारप्राकृताङ्गैर्निराका-

[1] ३-६-१६. [2] ३-६-१०.

ङ्क्षीकृतस्य औपवसथ्येऽहन्युत्कृष्टस्यार्थोपस्थितिमात्रसत्त्वेन स्थानम् । सवनीयवद्वाक्यसन्निध्यभावेन प्रकरणशङ्काऽनुपपत्तेः । अत एवेतिकर्तव्यतात्वेनायोग्यसम्बन्धयोर्वाक्यार्थयोस्सन्निधिरिति स्थानलक्षणम् । यद्यपि चात्र पशुधर्माणां श्रुत्यादिविनियुक्तत्वान्न प्रकरणस्य स्थानस्य वा विनियोजकत्वसम्भावना, तथाऽप्यपूर्वसाधनत्वलक्षणातात्पर्यग्राहकत्व एव विनियोजकत्वव्यवहारो भाक्त इति द्रष्टव्यम् । न चैवमपि प्रकरणेन स्थानबाधापत्तिः, अग्नीषोमीयस्य पशुधर्माकाङ्क्षायामेवातिदेशकल्पनवदौपदेशिकस्थानस्यैव विनियोजकत्वकल्पनौचित्यात् । अन्यथा प्रबलौपदेशिकप्रमाणेन प्रकृत्यर्थत्वात् धर्माणां क्वापि विकृत्यर्थत्वानापत्तेः। इन्द्रादेरुपायान्तरेणापि स्मृतिसम्भवान्न लिङ्गादेश्श्रुतिकल्पकत्वमिति विशेषः। अत उभयार्थत्वमिति प्राप्ते—

न सवनीयस्यावान्तरप्रकरणं सौत्येऽहन्युत्पत्तेः । अन्यथा दूरस्थकर्मानुवादेन कालरूपानुपादेयगुणविधानानुपपत्तेः । न च प्रातस्सवने उत्कृष्टत्वादेवोपस्थितिः, आनुष्ठानिकोपस्थितेरङ्गग्राहकत्वेऽपि प्रकरणान्तरप्रतिबन्धकत्वस्य क्वाप्यदर्शनात् । अस्तु वा तत्, तथाऽपि वपाभ्यासमात्रस्य प्रातस्सवने उत्कृष्टत्वेऽप्युपाकरणोत्कर्षे प्रमाणाभावादुपस्थित्यनुपपत्तेः । यद्यपि चोपाकरोतिना याग एव लक्ष्यते, तथाऽपि शक्यार्थस्योपाकरणस्याग्निग्रहणोत्तरकालत्वस्याप्राप्तेरनुवादानुपपत्तिः । यद्यपि च वपाप्रचारोत्तरभाविपदार्थानां तदा[1]द्युत्कर्षन्यायेनोत्कर्षस्सम्भाव्येत, तथाऽपि न तत्पूर्वभाविनामुपाकरणादीनामुत्कर्षे प्रमाणमस्ति । वस्तुतस्तु पूर्वे[2]द्युर्वेदिकरणन्यायेनापूर्वत्वात् तदुत्तरभाविनामपि नोत्कर्षः। वस्तुतस्तु—गङ्गायां घोष इत्यादौ शक्यार्थस्य प्रोपा-

[1] ५-१-१२. [2] ५-१-१६.

न्वयप्राप्त्यभावेऽपि लक्षणादर्शनात् तस्योत्तरकालत्वप्राप्त्यभावेऽप्युपाकरोतिना वपाभ्यासलक्षणोपपत्तेः पश्वनपक्रमोपयोगियूपदार्ढ्यसम्पादकद्वितीययूपपरिव्याणस्याश्विनग्रहणोत्तरकालविधित एव तदुत्तरभाविवपायागस्याप्याश्विनग्रहणोत्तरकालत्वसिद्धेरेतद्वाक्यवैयर्थ्यभियैवाभ्यासादेतस्योत्पत्तिविधित्वं, तत्रापीतरस्य सर्वस्य द्वितीययूपपरिव्याणादेर्वाक्यान्तरप्राप्तत्वात्कालविशिष्टं शुद्धमेव वा द्रव्यदेवताविशिष्टं कर्मैव विधीयते, ततश्चानेनैव वाक्येनाग्नेयसवनीयस्यैतत्समानजातीयैश्च वाक्यान्तरैरैन्द्राग्नयादीनां विधानादौपवसथ्येऽहनि तेषां पुनश्श्रवणमनुवादमात्रं, तथाऽपि "यथा वै मत्स्योऽविदितो जनमवधूनुते एवमेतेऽप्रज्ञायमाना जनमवधून्वते" इत्यर्थवादकृतसन्ततकरणनिमित्तकानिन्दोपपादकैतच्छब्दापेक्षितपशुसमर्पणार्थं, निन्दोन्नीतदोषपरिहारार्थं च "वपया प्रातस्सवने चरन्ति" इत्यादिना वपाप्रचारोद्देशेन प्रातस्सवनादिकालविधिः। खण्डशः कालभेदेनानुष्ठाने हि मध्ये स्मृत्यर्थमवकाशलाभाद्दोषपरिहारः। यद्यपि चात्रापि कालविधानं दूरस्थकर्मानुवादेनाशक्यं, तथाऽप्यर्थवादत एव तदुपस्थितेर्न कश्चिद्दोषः। यत्तु प्रचारविप्रकर्षस्योपादेयस्य गुणस्य सत्त्वान्न दोष इति मूलोक्तं समाधानं, तत् विप्रकर्षस्याशाब्दस्य विधेयत्वाभावादुपेक्षितम्। अतो न सवनीयस्यावान्तरप्रकरणं, स्थानात्त्वग्नीषोमीययागाङ्गं पशुधर्माः। न च ज्योतिष्टोमप्रकरणेन स्थानबाधः, पशुधर्माणां श्रुत्यादिभिः पशुसंस्कारकतया विनियुक्तानामयोग्यतया ज्योतिष्टोपप्रकरणेनाग्रहणात्। अतो यत्रैव श्रुतस्सम्बन्धः यथा "वाजपेयस्य"[1] इत्यादौ तत्रैवानर्थक्यतदङ्गन्यायः, न त्वत्र। एवं सत्यपि यदि तस्यापि पशोः विशिष्यप्रमाणान्तरमपूर्वसाधनत्वो-

---

[1] ३-१-९ अधिकरणे एतद्वाक्यविचारो द्रष्टव्यः.

परस्थापकं न स्यात्ततो महाप्रकरणपरिगृहीतानामेषामानर्थक्यत-दङ्गन्यायेन[1] भवेत्सर्वपश्वर्थत्वं, न त्वेतदस्ति, स्थानेनाग्नीषोमीयार्थत्वात्, तेन सिद्धमग्नीषोमीये उपदेशोऽन्यत्र त्वतिदेश इति । सामानविध्यप्रयोजनं दशमादौ स्पष्टम् ॥ ७ ॥

(८)—दोहयोः कालभेदादसंयुक्तं शृतं स्यात् ॥ २८ ॥ प्रकरणाविभागाद्वा तत्संयुक्तस्य कालशास्त्रम् ॥ २९ ॥

दर्शपूर्णमासयोर्दधि पूर्वेद्युरपरेद्युश्च पय उत्पाद्यते । दोहधर्माश्च शाखाहरणादयः पूर्वेद्युः क्रियन्ते । तेषामनुष्ठानसादेश्याद्दधिमात्राङ्गत्वमिति प्राप्ते—

यद्यपि स्थानं भवेत्, तथाऽपि प्रकरणेन तद्बाधः । न ह्यत्र पूर्ववत् कलसोपकारत्वादिना प्रकरणाभावश्शङ्कितुं शक्यः । न च स्थानमपि दधियागस्यास्ति, उत्तरेद्युरेवानुष्ठानात् । दध्नस्तु विद्यमानमपि नानर्थक्यभियाऽपूर्वसाधनत्वलक्षणतात्पर्यग्राहकम् । न च स्मारकविधयैव दध्नैव यागोपस्थितेस्स्थानशङ्का, तादृशोपस्थितेर्नैयत्याभावेन ग्राहकत्वानुपपत्तेः । किञ्च दोहधर्माः परेद्युरेवाम्नाताः तत्रैव भाव्यापेक्षायां प्रकरणादुभयार्थत्वेनावगम्यमानाः पूर्वेद्युरनुष्ठीयमानदधिसिद्ध्यर्थं पूर्वेद्युस्तन्त्रेण क्रियमाणा अपि न तन्मात्रार्था भवन्ति । दोहनादयस्तु सामर्थ्यादेवावर्तन्त इति विशेषः ॥ ८ ॥

(९)—तद्वत्सवनान्तरे ग्रहाम्नानम् ॥ ३० ॥

ज्योतिष्टोमे प्रातस्सवनिकग्रहसन्निधौ ग्रहधर्माः "उपोप्तेऽन्ये ग्रहास्साद्यन्तेऽनुपोप्ते ध्रुवः" इत्याद्याश्श्रुताः । ते निस्सन्दिग्धस्थानात् प्रातस्सवनिकग्रहमात्रार्था इति प्राप्ते—

---

[1] ३-१-९.

माध्यन्दिनसवनिकादीनामपि प्रकरणात् तेन च स्थानबाधात् सर्वार्थत्वं प्रयाजादीनामिवाग्नीषोमीयार्थत्वमिति ॥ ९ ॥

(१०)–रशना च लिङ्गदर्शनात् ॥ ३१ ॥

पशुनियोजनाङ्गत्वेन विनियुक्तस्य यूपस्यानुष्ठानसादेश्यादग्नीषोमीयापूर्वसाधनीभूतपशुनियोजनार्थत्वं, अतिदेशात्तु सवनीयानुबन्ध्यार्थत्वम्। एवं तदुत्पादकानां छेदनादिसंस्काराणामपि। यद्यपि च यूपस्वरूपे आनर्थक्याभावः, तथाऽप्यनुवादस्य सन्निहितगामित्वादेवाग्नीषोमीये निवेशः। विकृतौ त्वभिक्रमणवत् गमनम्। तेषां तु भेदेनानुष्ठाने प्राप्ते दीक्षाकालस्याप्युपदेशातिदेशाभ्यां विहितस्यैकत्वात्तन्त्रेणानुष्ठानादेकस्या एव यूपव्यक्तेस्सर्वोपकारत्वमेकादशे[1] वक्ष्यते। ये च परिव्याणादय उत्पन्नयूपसंस्कारकास्तेषामेवानुष्ठानसादेश्यातिदेशाभ्यां प्रकृतिविकृत्यङ्गत्वम्। यूपस्वरूपस्य तद्व्यतिरेकेणाप्युत्पन्नत्वात्। यूपव्यक्तेरेकत्वात्तु[illegible]णविशेषत्वेऽप्यातिथ्याद्यर्थबर्हिःप्रोक्षणन्यायेन[2] प्रसङ्गेन कार्यसिद्धेः नावृत्तिः। न चैवं तन्न्यायेनैवाग्निपात्रसम्मार्गादेर्दार्शपूर्णमासिकस्यापि विकृतौ प्रसङ्गापत्तिः, व्रीहिप्रोक्षणादिवद्यत्कार्यकूटोद्देशेन यद्व्यक्तेरुत्पत्तिस्तत्कार्यकूटाङ्गभूतव्यक्तिगतसंस्कारजन्यादृष्टं प्रति तत्कार्यान्तिमकार्यत्वेन नाशकत्वस्य कॢप्तत्वेन तदनापत्तेः। न ह्यत्राग्निपात्रादेर्यत्कार्यकूटोद्देशेनोत्पत्तिस्तत्कार्यकूटाङ्गं संस्कारः, सम्मार्गस्य ज्योतिष्टोमाद्यनङ्गत्वात्, अतस्तद्व्यक्तिजन्यादृष्टत्वावच्छिन्नं प्रति तत्प्रतियोगीयफलीभूतान्तिमकार्यत्वेन नाशकतेति विशिष्यकार्यकारणभावेनैव तत्प्रतियोगिवृत्त्यन्तिमफलेन नाश इति वैषम्यम्। एवं च परिव्याणरशनातद्धर्मादय औपवसथ्येऽहन्यनुष्ठीयमाना अप्युपदेशातिदेशाभ्यां त्रितयोपकारकाः। सवनीये

[1] ११-३-३. [2] १२-१-१९.

च "आश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययति" इति विधिनाऽभ्यासात्परिव्याणान्तरं विहितं, आश्विनोत्तरकालस्य पाठादुपनिष्क्रमणस्य चार्थादेव प्राप्तेः। तच्च प्रकरणात् सवनीयस्यैवाङ्गम्। तदपि च न प्राकृतकार्यापन्नं, प्राकाशदानवद्विधिवैयर्थ्यापत्तेः। अत एव तत्कार्यमदृष्टं यूपदार्ढ्यं वेत्यन्यदेतत्। तदिह रशना तद्धर्माश्च त्रिवृत्त्वदर्भमयत्वादयो नाप्राकृतकार्यापन्ने परिव्याणान्तरे यूपावटबर्हिरास्तरण इव भवन्तीति प्राप्ते—

उत्पत्तिवाक्ये त्रिवृत्त्वानुवादरूपतात्पर्यग्राहकवशाल्लाघवाच्च प्रकृतापूर्वसाधनीभूतयूपपरिव्याणत्वमेवोद्देश्यतावच्छेदकं न तु विजातीययूपपरिव्याणत्वं, तथात्वे उत्पत्तिवाक्ये त्रिवृत्त्वस्याप्राप्तत्वेन विधाने गौरवापत्तेः, अत उद्देश्यतावच्छेदकरूपसत्त्वात्तत्रापि रशनातद्धर्माः। व्याख्यातॄणां तु सङ्गतिलोभेन यूपतच्छेदनपरिव्याणरशनातद्धर्माणां सर्वेषामुपदेशेनैव त्रितयसाधारण्यमङ्गीकृत्य सवनीयपरिव्याणान्तरे उपदेशेनैव तत्प्राप्तिं व्याचक्षाणानामाशयं न विद्मः ॥ १० ॥

(११)—आराच्छिष्टमसंयुक्तमितरैस्सन्निधानात्॥ ३२ ॥ संयुक्तं वा तदर्थत्वाच्छेषस्य तन्निमित्तत्वात् ॥ ३३ ॥ निर्देशाद्व्यवतिष्ठेत ॥

ग्रहधर्माणां ग्रहस्वरूपे आनर्थक्यप्रसक्तौ ग्रहयागाभ्यासापूर्वसाधनत्वमेव ग्रहपदेन लक्ष्यते दीक्षणीयावाङ्नियमन्यायेन, न तु ज्योतिष्टोमापूर्वसाधनत्वम्। अतश्च प्रकरणोपस्थितापूर्वसाधनत्वस्यैव लक्षणान्नानारभ्याधीतांश्वदाभ्ययागाभ्यासापूर्वसाधनत्वं धर्माणामिति प्राप्ते—

प्रकरणादन्येषामिवानुष्ठानसादेश्यादनारभ्याधीतानामप्युपस्थितेर्वाक्यसङ्कोचे प्रमाणाभावादेव सर्वार्थत्वम्। अत एव प्रब-

लेन दुर्बलेन वा प्रमाणेन साधनत्वेनावगतानां सर्वेषामेव हविषां वेद्यादिकमङ्गम् । वस्तुतस्तु—अश्वदाभ्ययोरनारभ्याधीतयोरपि प्राकरणिकेन वाक्येनैव क्रत्वङ्गतेति तुल्यत्वमेव ॥ ११ ॥

(१२)—अग्न्यङ्गमप्रकरणे तद्वत् ॥ ३५ ॥

इष्टकाधर्माणामकृष्णत्वादीनामनारभ्याधीतचित्रिण्यादीष्टकाविनियोगस्याप्यनारभ्याधीतत्वात्प्राकरणिकेष्टकामात्रधर्मत्वमिति प्राप्ते—

पूर्ववदनुष्ठानसादेश्यादिष्टकाप्रयोज्यचयनापूर्वसम्बन्धित्वस्य तत्प्रयोज्यक्रत्वपूर्वसम्बन्धित्वस्यैव वा लक्षणीयस्यानारभ्याधीतास्वप्यविशेषाद्यात्राप्युभयधर्मत्वम् ॥ १२ ॥

(१३)—नैमित्तिकमतुल्यत्वादसमानविधानं स्यात् ॥ ३६ ॥

सोमधर्मा अभिषवादयः फलचमसेऽपि समानविधानाः, सोमस्वरूपे आनर्थक्यप्रसक्तौ लक्षणीयस्य ज्योतिष्टोमापूर्वसाधनीभूतप्रदेयप्रकृतित्वस्योद्देश्यतावच्छेदकस्य यवेष्विव फलचमसेऽप्यविशेषात् । न ह्यत्र सोमत्वमपि विवक्षितं, फलचमसे स्थानापत्त्याऽप्यभिषवाद्यनापत्तेः । न च नित्यानामभिषवादीनां नित्यक्रतुसम्बन्धे अनित्यस्य फलचमसस्य द्वारत्वानुपपत्तिः, नित्यानामपि नित्यसोमवदनित्यफलचमसस्य द्वारत्वे उद्देश्यत्व एव वा बाधकाभावात् । इष्यत एव हि "उपांशु यजुषा" इत्यादौ नित्यानां नैमित्तिकानां च होमादीनामुपांशुत्वादिविषयता । न चैवं नैमित्तिकस्य नित्यविनियोगोत्तरप्रतीतिकत्वेन विलम्बितप्रतीतिकत्वादतुल्यत्वं, तथात्वे प्रमाणाभावात् । क्वचित् सत्त्वेऽपि च संस्कारविध्युत्तरप्रवृत्तिकत्वे प्रमाणाभावेनातुल्यत्वाभावाच्च । अ-

स्तु वा तत्, तथाऽपि संस्कारविध्युद्देश्यतावच्छेदकाक्रान्तत्वस्य फलचमसेऽप्यनिवारणाच्च । न च संस्कारविधावपूर्वसाधनत्व-रूपसामान्यधर्मप्रकारकसोमविशेष्यकबोधाङ्गीकारान्न फलचमस-सङ्ग्रह इति वाच्यं, एवमप्युपदेशस्य सोमतात्पर्यकत्वानिवारणेन विकारभूतेऽपि फलचमसेऽप्राकृतविशेष्यकत्वप्रसङ्गादाभिषवाद्यना-पत्तेः । अतश्च सर्वत्र संस्कारविधौ प्रकृत्यपूर्वसाधनत्वप्रकार-कप्रकृत्यपूर्वसाधनविशेष्यक एव बोध इति तद्वत्कुर्यादित्यतिदेशेन विकृत्यपूर्वसाधने समानविधानत्वाभावेऽपि धर्मप्राप्तिरविरुद्धा । प्रकृते तु फलचमसस्य प्रकृत्यपूर्वसाधनत्वादेव यवादिवदुपदे-शविषयत्वमिति प्राप्ते—

सत्यं सर्वत्र संस्कारविधौ प्रकृत्यपूर्वसम्बन्धित्वप्रकारकप्रकृत्य-पूर्वसम्बन्धिविशेष्यक एव पार्यन्तिक उद्देश्यबोधः, तथाऽपि सा सम्बन्धिता यद्धर्मावच्छिन्नस्य संस्कारविधिपार्यन्तिकशाब्दबो-धात्पूर्वं प्रमीयते तद्धर्मावच्छिन्नस्यैव संस्कारविध्युपदेशविषय-त्वेन व्यवहारो नान्यस्य, तस्य घटादेरिव तत्त्वेनाप्रतीतस्यो-द्देश्यत्वानुपपत्तेः । अत्र च "तप्ते पयसि दध्यानयति" इत्या-दौ प्रथमं पयस्त्वावच्छिन्नोद्देशेन विधीयमानेऽपि दध्यानयने पयस्त्वावच्छिन्नस्यापूर्वसाधनत्वबोधोत्तरमेवापूर्वसाधनत्वावच्छि-न्नोद्देश्यत्वस्य पार्यन्तिकत्वात् पयस एवोपदेशविधिविषयत्वं पार्यन्तिकपदोपादानान्न विरुध्यते । प्रकृते च न फलचमसत्वाव-च्छेदेनापूर्वसाधनता अभिषवादिविधितः पूर्वं प्रमिता, तथात्वे "स यदि सोमं विभक्षयिषेत्तमस्मै भक्षं प्रयच्छेत् न सोमम्" इत्याद्यनुवादानुपपत्तेः । अतस्तात्पर्यग्राहकानुरोधेन सत्यप्युद्देश्य-तावच्छेदकावच्छिन्नत्वे नोपदेशविषयत्वं, फलचमसस्येत्यसमान-विधानता । अतश्च तद्रूपैव धर्माकाङ्क्षायां सत्यपि कर्मैकत्वे

कल्पितेन स्थानापत्त्याख्यातिदेशेन क्रयाभिषवादीनां सोमधर्माणां प्राप्तिः । अत एव प्राकृतिकौपदेशविषयभिन्नविषयत्वादस्य संस्कारोहत्वमाचक्षते । वस्तुतस्तु—गुणकामवाक्य इवात्र भावनान्तरमेव विधीयते अनेकगुणोपादानाच्च । अतश्च तस्या एवेतिकर्तव्यताकाङ्क्षयाऽतिदेशकल्पनमित्यपि वक्तुं शक्यम् । अत एव "न्यग्रोधस्तिभिनोराहृत्य" इत्याहरणस्यैवौपदेशिकत्वान्न क्रय इति केचित् ॥

प्रयोजनं—गुणकामप्रवृत्त्यप्रवृत्ती, सोमपदवतो मन्त्रस्य लोपोहौ च ॥ १३ ॥

(१४)—प्रतिनिधिश्च तद्वत् ॥ ३७ ॥ तद्वत्प्रयोजनैकत्वात् ॥ ३८ ॥ अशास्त्रलक्षणत्वाच्च ॥

व्रीह्याद्यभावे नीवारादिसदृशप्रतिनिधेरपि संस्कारविधितः पूर्वं साधनत्वानवगमादसमानविधानत्वं, सकलाङ्गयुक्तव्रीहिजन्ययागप्रयोगासम्भवे कर्मशास्त्रेण तदाक्षेपादिति प्राप्ते—

सत्यमुत्तरकालं तदाक्षेपः, तथाऽपि व्रीहिशास्त्रार्थालोचनवेळायामेव व्रीहित्वजातेर्यागसाधनत्वेऽवगते तदन्यथाऽनुपपत्त्या तदवच्छिन्नव्यक्तेस्तदारम्भकीभूतावयवानां च साधनत्वमाक्षिप्यते। अतश्च जातिव्यक्त्यवयवसाधनतानां पूर्वमेवावगतानां सर्वासामसम्भवे कतिपयग्रहणस्योत्तरकालप्रतीतिकत्वेऽपि स्वरूपेण पूर्वावगतेस्समानविधानत्वोपपत्तिः । न हि नीवारत्वेन रूपेण तेषामुपादानं, येन तद्रूपेण साधनत्वबोधस्यौत्तरकालिकत्वादसमानविधानत्वापत्तिः, अपि तु व्रीह्यारम्भकावयवसमानजातीयकतिपयावयवारब्धत्वेन । अतश्च तेषां व्रीह्यवयवनिष्ठसाधनतासम्पत्त्यर्थमवर्जनीयतयोपादानेऽप्यवयवसाधनतायास्संस्कारविधिभ्यः

पूर्वमेव प्रमितत्वात्समानविधानत्वोपपत्तिः । संस्कारविधिषु हि प्रकृतापूर्वसाधनीभूतप्रदेयप्रकृतित्वत्वावच्छिन्नप्रकृतित्वस्यैवोद्देश्य-तावच्छेदकत्वादवयवनिष्ठसाधनताया अवयविनिष्ठसाधनताभेदेऽपि न विरोधः। एवं च यत्र नावयवघटितसादृश्येन प्रतिनिधिस्तत्र न समानविधानत्वं, न वा कार्यापत्त्याऽपि धर्मप्राप्तिः । यथा अवघातप्रतिनिधितया नखनिर्लुञ्छनादेः करणे नखेषु प्रोक्षणादेः, यूपावटास्तरणबर्हिर्वल्लौकिकेतिकर्तव्यतोपादानेनापि चरितार्थत्वात् । फलचमसे तु "तमस्मै भक्षं प्रयच्छेत्" इत्यादिशब्दगतलिङ्गादेवातिदेशकल्पनमिति विशेषः ॥

प्रयोजनं—"व्रीहीणां मेध" इति मन्त्रस्य पूर्वपक्षे लोपः । सिद्धान्तेऽनूहः । मन्त्रान्तर्गतव्रीह्यादिपदानां व्रीहित्वसाधनताक्षिप्त-साधनताकानामित्यर्थेनावयवेष्वपि प्रयोगोपपत्तेः ॥ १४ ॥

(१५)–नियमार्था गुणश्रुतिः ॥ ४० ॥

यत्र तु पूतीकादौ तत्त्वेन अभावेविधिः, तत्र सकलाङ्गयुक्त-सोमजन्ययागप्रयोगासम्भवे पश्चादेव तत्प्रवृत्तेः न समानविधा-नत्वम् । न ह्यत्र पूतीकगतावयवानां प्रतिनिधिनियमः । तेषां मन्दसदृशत्वेन पक्षेऽप्यप्राप्तेः, पूतीकपदेऽवयवलक्षणाप्रसङ्गाच्च । न च नियमविधिलाघवानुरोधेन तदङ्गीकारः, तस्य फलमुखत्वेन निषादस्थपत्यधिकरणन्यायेनाकिञ्चित्करत्वादिति प्राप्ते—[1]

पूतीकपदार्थस्य हि पूतीकत्वस्य नात्र करणत्वं श्रुतं, द्वितीयान्तत्वात् । अतश्च नियमविधिलाघवानुरोधेन तया न पूतीकत्वस्य साक्षाद्यागसाधनत्वं लक्ष्यते, अपित्ववयवनिष्ठसाधनतानान्तरीयकप्रयोजकत्वमेवेति न पूतीकपदेऽवयवलक्षणा, सदृशनियामकन्यायप्रवृत्तेः पूर्वमेव चास्य विधेः प्रवृत्तेर्नियमविधित्वोप-

[1] ६-१-१२.

पत्तिः । अतश्चात्रापि कतिपयावयवसाधनत्वस्य सोमशास्त्रादेव सिद्धेस्समानविधानत्वम् ॥ १५ ॥

(१६)–संस्थास्तु समानविधानाः प्रकरणाविशेषात् ॥ ४१ ॥ व्यपदेशश्च तुल्यवत् ॥ ४२ ॥ विकारास्तु कामसंयोगे नित्यस्य समत्वात् ॥ ४३ ॥ अपि वा द्विरुक्तत्वात्प्रकृतेर्भविष्यन्तीति ॥ ४४ ॥ वचनात्तु समुच्चयः ॥ ४५ ॥ प्रतिषेधाच्च पूर्वलिङ्गानाम् ॥ ४६ ॥ गुणविशेषादेकस्य व्यपदेशः ॥ ४७ ॥

ज्योतिष्टोमे चतस्रस्संस्थाः अग्निष्टोमोक्थ्यषोडश्यतिरात्रसंज्ञकाः। संस्था नाम क्रतुप्रयोगवृत्तिस्तोत्रोपरमः। तत्र द्वादशस्तोत्राण्यग्निष्टोमे, तत्राग्निष्टोमस्तोत्रमन्त्यम्। साऽग्निष्टोमसंस्था नित्या काम्या च, संयोगपृथक्त्वात् दध्यादिवत् । उक्थ्येऽग्निष्टोमस्तोत्रोत्तरं त्रीण्यन्यान्युक्थ्यस्तोत्राणि, सा उक्थ्यसंस्था। षोडशिनि तदुत्तरं षोडशिस्तोत्रं, सा षोडशिसंस्था । अतिरात्रे तदुत्तरं द्वादशस्तोत्रात्मकास्त्रयो रात्रिपर्यायाः आश्विनस्तोत्रं च, सा अतिरात्रसंस्था । यास्तु अत्यग्निष्टोमवाजपेयाप्तोर्यामाख्याः अन्यास्तिस्रस्स्मृतौ गण्यन्ते, ता एतास्वेवान्तर्भूताः । यत्राग्निष्टोमस्तोत्रोत्तरमुक्थ्यान्यकृत्वा षोडशिस्तोत्रं क्रियते, सा अग्निष्टोमसंस्थैवात्यग्निष्टोमपदवाच्या । यथाऽवस्थितषोडश्युत्तरं यत्र वाजपेयस्तोत्रं क्रियते, सा षोडशिसंस्थैव वाजपेयपदवाच्या । यत्रातिरात्रे चतुर्थो रात्रिपर्यायस्स्तोत्रत्रयात्मको वर्धते, तत्रातिरात्रसंस्थैवाप्तोर्यामपदवाच्या । तत्रात्यग्निष्टोमो राजन्यस्य नि-

स्यः " त्यग्निष्टोमे राजन्यस्य गृह्णीयात्" इति वचनात् । अन्यास्तूक्थ्यादयः काम्याः "पशुकाम उक्थ्यं गृह्णीयात्" "षोडशिना वीर्यकामः स्तुवीत" "अतिरात्रेण प्रजाकामं याजयेत्" इति वचनेभ्यः । अत्राग्निष्टोमादिशब्दानां प्रचुरप्रयोगात संस्थास्वेव शक्तिः, तद्वति ज्योतिष्टोमे निरूढलक्षणा, तद्वति क्रत्वन्तरे साम्प्रतिकी, ग्रहणे स्तोत्रे च गौणी इत्येवं कौस्तुभे द्रष्टव्यम् । अतश्च संस्थानामेव फलसम्बन्धः । ग्रहणस्तोत्रादिकं तु तत्तद्वाक्ये वाक्यान्तरप्राप्तमनूद्यते । संस्थापदार्थवृत्तिप्रयोगस्य प्रतिसम्बन्ध्यपेक्षायां च प्रकरणाज्ज्योतिष्टोमक्रतुरेवाश्रयत्वेनान्वीयते । तदेतत्सर्वमिन्द्रियकामाधिकरणे[1] स्थितमेव ।

इह तु सर्वगुणकामानामाश्रयसामानविध्यचिन्तायां—फलवत्त्वेन संस्थादीनामपि ज्योतिष्टोमादिवत् प्रकरणाविशेषात् दीक्षणीयादिधर्माणामुभयार्थत्वमिति प्राप्ते—

फलवत्त्वज्ञानं विना धर्माणामङ्गत्वबोधानुपपत्तेः, तस्य च गुणस्थले आश्रयसम्बन्धव्यतिरेकेणाबुद्ध्यमानत्वादाश्रयस्य च स्वविधिविहितस्य लाभसम्भवे गुणेनोत्पत्तिविनियोगप्रयोगाणामनाक्षेपाद्धर्माणां गुणान्वयात्पूर्वमेवाश्रयान्वयस्य तद्विधिपर्यवसानार्थमवश्यं वाच्यत्वेन विरम्यव्यापारत्वापत्तेर्नोभयार्थत्वम् । न ह्येवमाश्रयनिष्ठफलवत्त्वज्ञानं गुणान्वयाधीनं, तद्बोधव्यतिरेकेणापि यागस्य क्रियारूपस्य फलवत्त्वबोधोपपत्तेः । गुणे तु फलवत्त्वज्ञापकविधिवैयर्थ्यापत्त्यैव कृतिसाध्याश्रयान्वयस्य धर्मान्वयात्पूर्वमवश्यं वाच्यत्वम् । अत एवाश्रयो गुणनिष्ठकरणतासम्पादको गुणकरणतावच्छेदककोटिप्रविष्टो वेति, करणाकाङ्क्षैव वितता आश्रयाकाङ्क्षेति मूलप्रवादः । अतो धर्माणामाश्रयाङ्गत्वमेव । गुणभावनायां तु आश्रयतो धर्मातिदेश इति सिद्धम् ॥

---

[1] २-२-११.

प्रयोजनं यद्यपि न गुणकामप्राप्तिरूपं सम्भावि, संस्थानां विकृतित्वेऽपि तदाश्रयभूतस्य ज्योतिष्टोमस्य प्रकृतिभूतस्य सत्त्वेनैव सदोमानाद्याश्रितगुणकामानां, षोडश्याद्यभ्यासाङ्गभूतग्रहणाद्याश्रितानां वा गुणकामानां प्राप्त्युपपत्तेः। नाप्युद्भिदादीनां वैकल्पिकसंस्थाप्रकृतिकत्वरूपं, यागसादृश्याधिक्येन ज्योतिष्टोमप्रकृतिकत्वस्यैवोपपत्तेः, तथाऽपि यत्र "अथैष भूर्वैश्वदेवः" इत्यादौ न यागत्वपरिचायकपदश्रवणं, तत्र वैकल्पिकसंस्थाप्रकृतिकत्वं पूर्वपक्षे। सिद्धान्ते ज्योतिष्टोमप्रकृतिकत्वमेवेति द्रष्टव्यम्। संस्थाऽङ्गभूतधर्मभ्रेषे याजुर्वैदिकादिप्रायश्चित्तं पूर्वपक्षे। सिद्धान्ते त्वविज्ञातमपि। तथा "यज्ञस्याशी रुद्रमशीय" इत्यादियज्ञपदोपेतमन्त्रेऽविकृतप्रयोगः पूर्वपक्षे, संस्थायामस्य लोपात्। सिद्धान्ते यज्ञस्य संस्थायाश्चाशीरित्येवमूहितव्यम् ॥ १६ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
तृतीयस्याध्यायस्य षष्ठः पादः.

अथ तृतीयाध्यायस्य सप्तमः पादः.

(१)–प्रकरणविशेषादसंयुक्तं प्रधानस्य ॥ १ ॥ सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात् ॥ २ ॥ आरादपीति चेत् ॥ ३ ॥ न तद्वाक्यं हि तदर्थत्वात् ॥ ४ ॥ लिङ्गदर्शनाच्च ॥ ५ ॥

दर्शपूर्णमासयोर्वेदिर्बर्हिषी तद्धर्माश्च खननलवनादयः किं अङ्गप्रधानसाधारणहविरासादनार्थाः, उत प्रधानाङ्गभूतहविरासा-

दनमात्रार्था इति चिन्तायां—"वेद्यां हवींष्यासादयति" "बर्हिषि हवींष्यासादयति" इति वचनेन वेदिबर्हिरासादनस्य हविरुद्देशेन विधानादर्थात्तयोरपि हविरर्थत्वप्रतीतेः हविस्स्वरूपे चानर्थक्यप्रसक्तावपूर्वसाधनत्वलक्षणातात्पर्यग्राहकजिज्ञासायामप्रतिबद्धफलवत्प्रधानाधिकाराख्यप्रकरणस्यैव तात्पर्यग्राहकत्वावसायात्तेन चाङ्गत्वसम्बन्धस्यैव शाब्दस्य लक्षणाघटकतयाऽऽश्रयणात् प्रधानापूर्वाङ्गभूतहविरर्थत्वमेवेति प्राप्ते—

प्रकरणेन वाक्यसङ्कोचे प्रमाणाभावादानर्थक्यपरिहारार्थं यथा प्रधानप्रकरणेन तात्पर्यग्रहः, तथा दुर्बलेनाप्यङ्गाधिकाराख्यतत्प्रकरणेनापि । अत एवानारभ्याधीताङ्गानुष्ठानसादेश्यस्यापि तात्पर्यग्राहकत्वमुक्तम । तेन सर्वार्था एवैते । अस्तु वा प्रधानप्रकरणेन तत् । तथाऽपि नाङ्गत्वं सम्बन्धघटकं, गौरवात्, अपि तु उपकारकत्वमात्रमभ्युदितेष्ट्यां दधिपयसोरिव । सम्बन्धमात्रं वा स्वर्गादिवत् "अगन्म" इत्यत्र । अतश्च प्रधानापूर्वोपकारकहविरर्थत्वमात्रावगतेरङ्गतदङ्गहविषामप्यनारभ्याधीतानां प्राकरणिकानां वा प्रधानोपकारकत्वाविशेषात् सर्वार्थत्वम् ॥ १ ॥

(२)–फलसंयोगात्तु स्वामियुक्तं प्रधानस्य ॥६॥

दर्शपूर्णमासयोः ज्योतिष्टोमादौ च केशश्मश्रुवपनादयस्तावत् क्रतुयुक्तपुरुषसंस्कारार्थाः, न त्वारादुपकारकाः "केशश्मश्रु वपते" "नखानि निकृन्तते" "दतो धावते" 'आङ्क्ते' 'अभ्यङ्क्ते' इत्यादावात्मनेपदनिर्देशेन पुरुषार्थत्वावगमात् । क्रियाफलस्य ह्यात्मगामित्वे अत्मनेपदम् । आरादुपकारकत्वे तु तत्फलस्य क्रतुसाद्गुण्यस्य क्रतुगतत्वेन नात्मगामित्वम् । यत्त्ववान्तरादृष्टं, न तत्क्रियाफलम् । यद्यपि कृतीअञ्जूधातुः परस्मैपदेव, तथाऽपि

छन्दस्यात्मनेपददर्शनात्, तस्यापि च सार्थकत्वे सम्भवति सा- धुत्वार्थत्वस्यान्याय्यत्वात् 'स्वरित' इत्यादिविधेरेवानित्यत्वं प- रिकल्प्य आत्मगामिक्रियाफलकत्वाङ्गीकारो न दोषाय । एवं "दतो धावते" इत्यादौ दन्तानां द्वितीयया संस्कार्यत्वावगमः । "पयोव्रतं ब्राह्मणस्य" इत्यादौ षष्ठ्या । स्नानस्य तु मला- पकर्षणार्थत्वलिङ्गात् । एवं तपसोऽपि वक्ष्यते । अन्ततो यत्र न किञ्चिद्गमकं, तत्र दीक्षासमाख्यैव तथा, यमादिपरिग्रहानुकूल- पुरुषसंस्कारवाचित्वात् । पुरुषस्य च क्रतूपयोगित्वं कर्तृतया, क्र- तुजन्यफलभोक्तृतया वा ।

तदिह संस्काराः किं कर्तृत्वांशोपयोगिनः, उत भोक्तृत्वां- शोपयोगिनः इति चिन्तायां भोक्तृत्वार्थत्वे समप्राधान्यापत्तेः प्रकरणावगतक्रतुसम्बन्धबाधापत्तिः । अतः कर्तृत्वार्थाः । दन्त- धावनादीनां शरीरसंस्कारार्थत्वात्तस्य च परलोकभोग्यफलभोक्तृ- त्वेऽनुपयोगादपि तथात्वम् । अतश्च कर्तुरङ्गप्रधानार्थत्वात्संस्का- राणामपि तथात्वमिति प्राप्ते—

कर्तृत्वस्य शरीरादिवदेव संस्कारव्यतिरेकेणापि जायमान- त्वाद्वैयर्थ्यादपूर्वरूपभोक्तृत्वार्थत्वमेव युक्तम् । भोक्तृत्वस्य कर्तृ- त्वापेक्षयाऽभ्यर्हितत्वाच्चैवम् । शरीरादीनामपि स्वावच्छेद्यजीव- व्यक्तिगतत्वसम्बन्धेन भोक्तृत्वोपयोगित्वमव्याहतम् । न चैवं प्रा- धान्यापत्तिः, क्षेत्रसंस्काराणां बीजावपनार्थत्वस्येवात्मसंस्काराणा- मपि क्रतुजन्यफलाधानयोग्यताजननार्थानां क्रत्वङ्गत्वोपपत्तेः । अत एव सर्वैरेव संस्कारैस्स्वस्वावान्तरादृष्टद्वारा समुच्चित्य सा जन्यते। प्रधानफलमेव वाऽऽत्मन्युत्पद्यते इति तदर्था एव संस्काराः, ना- ङ्गार्थाः, तत्फलस्य क्रतुगामित्वात् । यत्र तु दृष्टविधया वचना- देव वा कर्तृत्वोपयोगित्वं यथा प्राथमिकशुद्ध्यर्थस्नानाचमनादौ, "हि-

रव्यमालिनः प्रचरन्ति" इत्यादौ च, बहुवचनात्तत्र कर्तृत्व एवो-पयोगादङ्गप्रधानार्थत्वम् । अत एव तादृशस्थलेऽङ्गविकृतिषु त-स्यातिदेशः ॥ २ ॥

(३)—चिकीर्षया च संयोगात् ॥ ७ ॥

सोमे षट्त्रिंशत्प्रक्रमादिपरिमाणां वेदिं विधाय श्रुतं "इयति शक्ष्यामहेऽस्यां कर्तुं" इति । सा वेदिर्यद्यपि देशत्वा-दङ्गप्रधानार्थतया प्रसज्यते, तथाऽपि दीक्षा[1]दक्षिणन्यायेनोक्तवच-नात्प्रधानमात्रार्था । 'कर्तुं' इति हि तुमुना इच्छार्थकेन चिकी-र्षितार्थत्वप्रतीतेः, प्रधानस्यैव चिकीर्षितत्वात्, अङ्गानां चाचि-कीर्षितानामपि चिकीर्षितप्रधानार्थत्वेनैवानुष्ठानात् प्रधानमात्रा-र्थैव वेदिः ॥ ३ ॥

स्थितं तावदपर्यवसितं—

(४)—तथाऽभिधानेन ॥ ८ ॥ तद्युक्ते तु फल-श्रुतिस्तस्मात्सर्वचिकीर्षा स्यात् ॥ ९ ॥ गुणाभिधानात्सर्वार्थमभिधानम् ॥ १० ॥

दर्शपूर्णमासयोः "चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहो-त्राऽमावास्यां" इति श्रुतम् । तत्राप्येतौ मन्त्रौ पौर्णमास्यमावा-स्यापदवाच्यप्रधानमात्रसंयोगात्तद्धविराभिमर्शनार्थावेव । न ह्यत्र पौर्णमास्यादिशब्दौ कालपरौ, तथात्वे द्वितीयया सप्तम्यर्थलक्ष-णापत्तेः, "आसन्नानि हवींष्यभिमृशति" इति प्राप्ताभिमर्शना-नुवादेन मन्त्रकालोभयविधौ वाक्यभेदापत्तेश्च । काले निमित्ते अभिमर्शनोद्देशेन मन्त्रविधौ प्रतिपदादिकालीनाभिमर्शने मन्त्राना-

[1] एकान्तारितोत्तराधिकरणेऽयं न्यायो द्रष्टव्यः ।

पत्तेश्च । पौर्णमास्यमावास्यापदाभ्यां पौर्णमास्यादिप्रयोगस्याधिकरणत्वविधौ चोभयत्र प्रातिपदिके प्रत्यये च लक्षणाप्रसङ्गो वाक्यभेदश्च तदवस्थ एव । प्रयोगस्य निमित्तत्वाङ्गीकारे च लक्षणाद्वयप्रसङ्गो विकृतावप्राप्त्यापत्तिश्च । अतो लाघवात्प्रातिपदिकेनैव पौर्णमास्यादिप्रधानमात्रसम्बन्धिहविर्लक्षणात्तदुद्देशेनैव मन्त्रविशिष्टमभिमर्शनं विनियुज्यते, मन्त्रमात्रं वा तदुद्देशेन विधीयते, अभिमर्शनं तु प्रकरणप्राप्तानुवादः । उत्पत्तिवाक्ये च हविश्शब्देन प्रधानमात्रहविरुपादानं उपसंहारविधया न विरुध्यते, अतः प्रधानमात्रार्थौ मन्त्रौ ॥

स्थितादुत्तरं—यद्यपि चिकीर्षितार्था वेदिः, तथाऽपि साङ्गस्यैव फलसामग्रीत्वेन चिकीर्षितत्वादङ्गप्रधानार्थैव सा । वस्तुतस्तु—देशत्वात्तस्याः प्रकरणादेवाङ्गप्रधानार्थत्वासिद्धेरर्थवाद एवायं 'इयति शक्ष्यामहे' इति। अत एव 'शक्ष्यामहे' इति वचनात् कर्तृप्रचारमात्रार्थत्वमङ्गीकृत्याङ्गप्रधानार्थत्वमप्यपास्तम् । अतस्सर्वार्थाया वेदेः अग्नीषोमीयादौ प्राकृतहविरासादनार्थवेदिबाधकत्वं, तद्विकृतौ चातिदेशस्सिद्धो भवति । यत्तु द्वादशे[1] प्राकृतवेदेः प्रसङ्ग इति वक्ष्यते, तत् कर्तृप्रचारमात्रार्थत्वं कृत्वाचिन्तया ॥

द्वितीयस्योत्तरं—सत्यं पौर्णमास्यादिशब्दाभ्यां प्रधानसम्बन्धिहविर्लक्षणा, तथाऽपि सम्बन्धो नाङ्गत्वाख्यः, तथात्वे वाक्यसङ्कोचापत्तेः, अपि तु उपकारकत्वाख्य इत्यङ्गप्रधानार्थावेव मन्त्रौ ॥ ४

(५)—दीक्षादक्षिणं तु वचनात् प्रधानस्य ॥ ११ ॥ निवृत्तिदर्शनाच्च ॥ १२ ॥

---

[1] १२-१-३.

ज्योतिष्टोमे दीक्षा "दण्डेन यजमानं दीक्षयति" इत्यादिका, दक्षिणा च "गौश्चाश्वश्च" इत्यादिका, श्रुता। सा अङ्गप्रधानार्था। दीक्षायास्तावत् द्वितीयया पुरुषसंस्कारिकाया वपनाधिकरणन्यायेन[1] फलिसंस्कारकत्वप्रसक्तावपि "यो दीक्षितो यदग्नीषोमीयं पशुमालभते" "दीक्षितस्सोमं क्रीणाति" इत्यादौ दीक्षितग्रहणात् "निर्मन्थ्येनेष्टकाः पचन्ति" इत्यादिवद्विशेषणीभूतदीक्षाया अपि कर्तृसंस्कारद्वारा अग्नीषोमीयाद्यर्थत्वप्रतीतेः, तस्य च स्वतन्त्रविध्युन्नायकत्वे गौरवादनुवादविधया "दण्डेन दीक्षयति" इत्यादौ "हिरण्यमालिनः" इति बहुवचनवत् कर्तृसंस्कारकतातात्पर्यग्राहकत्वावगतेः कर्तुरङ्गप्रधानार्थत्वेन दीक्षाया अप्यङ्गप्रधानार्थत्वम्। दक्षिणायास्तु कर्त्रानमनद्वाराऽङ्गप्रधानार्थत्वं स्फुटमेव। एवं च "दीक्षाः सोमस्य," "दक्षिणा सोमस्य" इति वचनद्वयं साक्षात्परम्परासाधारणसम्बन्धसामान्यमादायानुवादः, इतरथा परिसङ्ख्यापत्तेरिति प्राप्ते—

वचनानर्थक्यभिया प्रधानमात्रार्थत्वम्। फलतः परिसङ्ख्यात्वाच्च न त्रैदोष्यापत्तिः। न च वचनस्य प्रधानप्रयुक्तत्वमात्रपरत्वेनाप्युपपत्तेरङ्गाङ्गत्वनिवृत्तिपरत्वे मानाभावः, प्रसङ्गासिद्धकृतिकारकत्वादेर्निराकर्तुमशक्यतया वचनस्याङ्गोद्देश्यतामात्रनिवृत्तिफलकत्वावसायात्। तस्याश्च प्रयुक्तत्व इवाङ्गत्वेऽपि प्रविष्टत्वेनोभयनिवृत्त्युपपत्तेः। प्रयुक्तत्वनिवृत्तौ अङ्गत्वाङ्गीकारे फलाभावाच्च। न च दक्षिणावाक्ये परिसङ्ख्यार्थत्वोपपत्तावपि 'दण्डेन' इत्यादिवाक्येन दीक्षायाः प्रसक्तस्य प्रधानमात्रार्थत्वस्य "यो दीक्षितः" इत्यादिवाक्येन दीक्षायास्तत्तदङ्गाङ्गताविधायकेन बाधितस्य प्रतिप्रसवार्थता "दीक्षा सोमस्य" इति वाक्यस्यास्त्विति वाच्यं, गौरवेणाग्नीषोमीयादिवाक्यस्य दीक्षाविधायकत्वानुपपत्तेः।

[1] ३-७-२.

अतोऽनुवादविधयैव तद्बाधकत्वाद्युक्तमेव परिसङ्ख्यात्वम्। वस्तुतस्तु—गौरवभियैवानुवादविधयाऽपि न बाधकत्वं, अपितु प्रधानाङ्गभूतदीक्षायुक्तपुरुषानुवाद एव "य एवं विद्वान्" इतिवत् दीक्षितपदम्। अतश्च दीक्षावाक्यस्यानुवादकत्वमेव दाक्षिणाप्रशंसाफलकम्। अतः प्रधानमात्रार्थमेव दीक्षादक्षिणम्। तथाऽपि तु नाङ्गेषु प्राकृती अन्या वा दक्षिणा, प्रसङ्गेन कार्यसिद्धेर्द्वादशे[1]वक्ष्यमाणत्वात्॥

प्रयोजनं—अग्नीषोमीयादिविकारेषु दीक्षादक्षिणयोरनतिदेशः सिद्धान्ते। ततश्च तेष्वपेक्षितत्वात् शातोक्थ्यादिवत् प्रकृतिप्रकृतितोऽन्वाहार्यदक्षिणायास्स्वतन्त्रातिदेशः, अर्थाक्षिप्तं यत्किञ्चिदानतिसाधनद्रव्यं वा दक्षिणेत्यपि तत्रैव वक्ष्यते॥५॥

(६)–तथा यूपस्य वेदिः॥१३॥ देशमात्रं वाऽशिष्येणैकवाक्यत्वात्॥१४॥

दर्शपूर्णमासयोः "होतुरन्तर्वेद्येकः पादो भवति बहिर्वेद्येकः" इति श्रुतम्। तथा सोमे अग्नीषोमीययूपमानं प्रकृत्य "अर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदि" इति तत्रान्तर्वेदिदेश एव तत्तदङ्गत्वेन विधीयते उत अन्तर्वेदिबहिर्वेदिशब्दलक्षितदेशविशेषो वा इति चिन्तायां—लक्षणायां प्रमाणाभावात् अन्तर्वेदिदेश एवैकपादोद्देशेन यूपार्धोद्देशेन च विधीयते, तद्विधौ पादार्धान्तरयोर्बहिर्वेदिदेशः प्राप्त एवानूद्यत इति प्राप्ते—

आद्योदाहरणे तावद्धविरासादनार्थाया दार्शिक्या वेदेरेकपादोद्देशेन विधौ एकत्वस्योद्देश्यविशेषणस्याविवक्षापत्तेः "बहिर्वेद्येकः" इत्यस्यानुवादायोगाद्विधाने वाक्यभेदापत्तेरगत्या देशविशेष एव लक्षणया हौत्रस्थानोद्देशेन विधीयते। न च देश-

[1] १२-१-१६.

विशेषलक्षणापेक्षया लाघवादन्तर्वेदित्वविशिष्टबाहिर्वेदित्वमेव लक्षणया विधीयतामिति वाच्यं, विशेष्यविशेषणभावे विनिगमनाविरहात् ।

द्वितीयोदाहरणेऽपि सौमिक्याः वेदेर्देशत्वेनाङ्गप्रधानार्थत्वस्य स्थापि[1]तत्वात्, यूपार्धद्वयेऽपि वेदेः प्राप्तत्वादर्धोद्देशेन तद्विधाने परिसङ्ख्यापत्तिः । न चाग्नीषोमीयादिरूपाङ्गाङ्गत्वेऽपि वेदेस्तदङ्गभूतयूपमानाङ्गत्वे प्रमाणाभावः, प्रयोगविधिना साङ्गानामेवाङ्गानां प्रयोगविधानात् । अन्यथा तदङ्गप्रयाजपशुपुरोडाशादिहविरासादनादौ वेद्यादेरनापत्तेः । न च वाक्येन वेदेर्यूपार्धाङ्गत्वेन विधानात् प्रकरणगम्यसर्वार्थत्वस्य बाधोपपत्तेः परिसङ्ख्यात्वानापत्तिः, षट्त्रिंशत्प्रक्रमपरिमाणार्थवादस्य "इयति शक्ष्यामहे" इत्यस्यार्धमात्रार्थत्वेऽनुपपद्यमानत्वेन सर्वार्थत्वबाधानुपपत्तेः । न चैवमपि फलतः परिसङ्ख्यात्वात्त्रैदोष्यानापत्तिः, प्रापकप्रमाणप्रतिबन्धाभावेन शाब्दपरिसङ्ख्यात्वापत्त्या त्रैदोष्यावश्यकत्वात् । अतो वरं देशविशेषलक्षणैवैका । न चार्धोद्देशेन बहिर्वेदिमात्रविधानादर्धान्तरे च अन्तर्वेदेरेव प्राप्तत्वेनानुवादोपपत्तेर्न लक्षणाऽपीति वाच्यं, अनुवादवैयर्थ्यभियैव लक्षणाङ्गीकारात्, तथाऽप्यन्तर्वेदिपद एव लक्षणाङ्गीकारे बहिर्वेदेरपि विधेयत्वेन वाक्यभेदापत्तेः । "अर्धमन्तर्वेदि अर्धं बहिर्वेदि" इति पदैर्लक्षितदेशविशिष्टमानस्यैव यूपोद्देशेन विधानम् । तत्प्रयोजनं तु यूपैकादशिन्यां वेदेरविवृद्धिः । वस्तुतस्तु—देशविशेषलक्षणायामपि सामान्यतस्साङ्गे विहिताया वेदेरविरोधेनार्धप्राप्त्युपपत्तेः यूपैकादशिन्यामपि तदर्थं वेदिविवृद्धिरावश्यकी, अत एव "यावद्यूपं वेदिमुद्धन्ति" इति कल्पसूत्रकारवचनमपि सङ्गच्छते । अतोऽन्यत्प्रयोजनं मृग्यम् । देशविशेषलक्षणैव वा नाङ्गीकर्तव्येति ध्येयम् ॥ ६ ॥

[1] ३-७-४ अधिकरणे.

(७)–सामिधेनीस्तदन्वाहुरिति हविर्धानयोर्वचनात्सामिधेनीनाम् ॥ १५ ॥ देशमात्रं वा प्रत्यक्षं ह्यर्थकर्म सोमस्य ॥ १६ ॥ समाख्यानं तु तद्वत् ॥ १७ ॥

सोमे "उत यत्सुन्वन्ति सामिधेनीस्तदन्वाहुः" इति श्रुतम्। यत् यत्र दक्षिणहविर्धानेऽभिषवः तत्राग्नीषोमीयादिसामिधेनीरनुब्रूयादित्यर्थः। तत्र हविर्धानशकटः सामिधेन्यङ्गं उत तल्लक्षितो देशविशेष इति चिन्तायां—पूर्ववत् परिसङ्ख्यावाक्यभेदाद्यभावात् लक्षणापरिहाराय सोमधारणेन कृतार्थस्यापि हविर्धानस्यैव पुरोडाशकपालन्यायेन[1] सामिधेन्यङ्गत्वमिति प्राप्ते—

हविर्धानस्यात्यन्ताप्राप्तस्य सामिधेन्यङ्गत्वेन विधावपूर्वविधित्वापत्तेः, प्रकृतितः आहवनीयप्रत्यग्देशस्यातिदेशप्राप्तस्यानियमेन दक्षिणोत्तरहविर्धानसमीपवर्तितया प्राप्तेर्दक्षिणहविर्धानलक्षितदेशस्य नियमविधौ लाघवमिति तदनुरोधेन लक्षणाऽपि न दोषः। वस्तुतस्तु—लाघवस्य प्रमाणानुग्राहकत्वात् निषादस्थपत्यधिकरणन्यायेन[2] औत्तरकालिकत्वाच्च तदनुरोधेन लक्षणाऽनुपपत्तेः, यत् यत्र देशे सुन्वन्ति अभिषुण्वन्ति तत् तस्मिन् अभिषवदेशे सामिधेनीरनुब्रूयादित्यर्थावगमेन हविर्धानस्याप्रतीतेः अभिषवदेशस्यैव श्रौतत्वेन विधेयत्वात् न लक्षणाऽपि ॥

प्रयोजनं पूर्वपक्षे हविर्धानोपरि सामिधेनीपाठः। सिद्धान्ते अभिषवदेशे दक्षिणहविर्धानसमीपे ॥ ७ ॥

(८)–शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्, तस्मात्स्वयंप्रयोगे स्यात् ॥ १८ ॥ उत्सर्गे तु

---

[1] ४-१-११.

[2] ६-१-१२.

प्रधानत्वाच्छेषकारी प्रधानस्य तस्मादन्यः स्वयं वा स्यात् ॥ १९ ॥ अन्यो वा स्यात्परिक्रयाम्नानाद्विप्रतिषेधात्प्रत्यगात्मनि ॥२०

तदेवं पूर्वैस्सह प्रकरणस्थानयोर्विरोधाविरोधविचारे समाप्ते अधुना समाख्यायास्तं कर्तुं प्रथमं तावत् स्वाम्यतिरिक्तकर्तृसद्भावः प्रतिपाद्यते । अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादिषु दक्षिणायुक्तेषु कर्मसु यद्यपि तावत् "स्वर्गकामो यजेत" इति सामानाधिकरण्यात् साङ्गाया अपि यागादिकरणिकाया भावनायास्स्वर्गकामकर्तृकत्वं प्रतीयते, तथाऽपि कर्तृत्वस्य "स्वतन्त्रः कर्ता" "तत्प्रयोजको हेतुश्च" इति सूत्रद्वयानुरोधात्, "षड्भिर्हलैः कर्षति" इति प्रयोगाच्च साक्षात्प्रयोजकसाधारण्येनैवावगतेरसति प्रमाणान्तरे प्रयोजककर्तृत्वायोगेऽपि प्रकृते दक्षिणाम्नानादिना प्रयोजककर्तृत्वस्याप्यवगतेस्स्वाम्यतिरिक्तस्यापि कर्तृत्वम् । कर्मकरानतिनामन- वचनो हि दक्षिणाशब्दो नासत्सु कर्त्रन्तरेषूपपद्यते । न ह्यत्रास्ति किञ्चिद्बलवद्बाधकम । येन "यदि पत्नीस्संयाजयन् कपालमभिजुहुयात् वैश्वानरं द्वादशकपालं निर्वपेत् तस्यैकहायनो गौर्दक्षिणा तं स त्रेष्याय दद्यात्" इत्यत्र त्रेष्यस्य ऋत्विक्प्रतिषेधादेवादृष्टार्थत्वं दक्षिणायाः कल्प्येत । सामानाधिकरण्यस्य प्रयोजककर्तृत्वेनाप्युपपत्तेः । आत्मनेपदस्यापि साक्षात्प्रयोजकसाधारण्येनाप्यकर्तरि फलप्रतिषेधकत्वेनैवोपपत्तौ न फल्यतिरिक्तस्य कर्तृत्वप्रतिषेधकत्वम् । अत एव "यजन्ति याजकाः" इति परस्मैपदप्रयोगः । तेन कस्यापि बाधकस्याभावाच्च दक्षिणादानस्यादृष्टार्थत्वकल्पना, अतस्तद्बलात् "दर्शपूर्णमासयोश्चत्वार ऋत्विजः" इति वचनाद्धौत्रादिसमाख्यावरणाद्याम्नानबलाच्च स्वाम्यतिरिक्ता अपि कर्तारः । न च स्वामिनोऽशक्तौ दक्षिणादिनाऽन्योपादानं, दक्षिणादेर्नि-

त्यवदाम्नानविरोधात् । अतः परकीयस्वत्वस्य परेणोत्स्रष्टुमशक्यत्वादुत्सर्गमात्रं स्वामिना कार्यम् । अन्यत्तु विशेषतः प्रमाणाभावेऽन्येनैवेति सिद्धम् ॥ ८ ॥

(९)—तत्रार्थात्कर्तृपरिमाणं स्यादनियमोऽविशेषात् ॥ २१ ॥ अपि वा श्रुतिभेदात्प्रतिनामधेयं स्युः ॥ २२ ॥ एकस्य कर्मभेदादिति चेत् ॥ २३ ॥ नोत्पत्तौ हि ॥ २४ ॥

ते कियन्त इत्यपेक्षायां तत्तत्कर्मण्यध्वर्य्वादिसंज्ञापुरस्कारेण तत्तत्कर्मविधानात् यावतां यत्र विधानं तावन्त एव तत्र ज्ञेयाः । अतश्चाग्निहोत्रे एक एवाध्वर्युः, दर्शपूर्णमासयोश्चत्वारः, चातुर्मास्येषु पञ्च, पशौ षट्, सोमे षड्विंशतिः । न च परिक्रयवशादेकोपादानावश्यंभावे तस्यैव पाचकलावकादिवत्तत्कर्मकरणनिमित्तास्तावत्यस्संज्ञा भविष्यन्तीति वाच्यं, संज्ञानां कर्मकरणात्पूर्वमेव "अध्वर्युं वृणीते" इत्यादिना प्रयुक्तत्वेन कर्मकरणनिमित्तत्वाभावात्, अपि तु तत्तद्वरणनिमित्तकत्वं तत्तद्वरणजन्यतत्तदानतिनिमित्तकत्वं वा उक्तविधानतिजन्याध्यवसायविशेषनिमित्तकत्वं वा, कृतेऽपि वरणे अहमध्वर्युस्स्यां इत्यध्यवसायाभावेऽध्वर्युशब्दाप्रयोगात् । वस्तुतस्तु अध्यवसायस्यापि निश्चयरूपस्य क्षणिकत्वात्तज्जन्याभिमानविशेष एव निमित्तं, तस्य च सत्रे स्वत एवानतत्वेन वरणाभावेऽपि इच्छात एव सत्त्वादध्वर्युत्वाद्युपपत्तिः । प्रकृतावपि "होता अवृतस्सामिधेनीरन्वाह" इति वरणात्पूर्वं होतृशब्दप्रयोगोपपत्तिः । अत एव वरणजन्यादृष्टवत्त्वमध्वर्युत्वादिकमिति प्राभाकरमतमपास्तम् । सत्रेऽ-

पि ऋतुयाज्यावरणवत् वरणापत्तेश्च । न चैवमप्येकस्यैव तत्तद्-
भिमानोपपत्तेः कर्तृभेदे प्रमाणाभावः "अध्वर्युं वृणीते" "ब्रह्माणं
वृणीते" इति तत्तद्विधिविहितवरणानामभ्यासेन भिन्नानां सं-
स्कार्यभेदं विनाऽनुपपत्तेः । अप्रवृत्तस्य पुरुषस्य प्रवर्तनफल-
कमभ्यर्थनं हि वरणं, न च तदेकास्मिन् पुरुषेऽनेकं सम्भवति ।
भिन्नानां च संस्कार्याणां तत्तत्क्रियासु भिन्नास्वेव विनियोगान्न
विकल्पाशङ्का । "दर्शपूर्णमासयोश्चत्वार ऋत्विजः" इत्याद्यनुवाद-
बलादप्येवम् । एवं च "ऋत्विजो वृणीते" इत्ययमपि न वरण-
विधिः । तथात्वे ऋत्विज इति बहुत्वानुवादानुपपत्तेः, अपि तु
ऋत्विक्संस्कारकवरणमात्रानुवादः ऋत्विग्धर्माणां तदुत्तरत्वप्रा-
प्त्यर्थः तत्तद्धर्मविधानार्थश्च । अतो यावन्ति लौकिकानि
सम्भवन्ति वा वरणानि तावन्तः कर्तार इति सिद्धम् ॥ ९ ॥

(१०)—चमसाध्वर्यवश्च तैर्व्यपदेशात् ॥ २५ ॥

अध्वर्य्वादिसंज्ञानां रूढत्वादस्तु भेदकत्वम् । चमसाध्व-
र्युसंज्ञायास्तु चमसेषु अध्वर्युरित्येवं यौगिकत्वादध्वर्युपुरुषादय
एवैते इति प्राप्ते—

सत्यपि संज्ञाया यौगिकत्वे "चमसाध्वर्यून् वृणीते" इति
पृथग्वरणाम्नानाद्वरितव्यानां चमसाध्वर्यूणां पूर्ववदेवान्यत्वम् ।
एवं "सदस्यं वृणीते" इति वचनात्सदस्यस्यापि । एवं च
"मध्यतःकारिणां चमसाध्वर्यवो होतृकाणां चमसाध्वर्यवः"[1] इति
ऋत्विक्सम्बन्धव्यपदेशोऽपि भेदे एवोपपद्यते ॥ १० ॥

---

[1] होतृब्रह्मोद्गातृयजमानाः चत्वारः मध्यतःकारिणः ।
मैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्राः षड्होतृकाः ।

(११)–उत्पत्तौ तु बहुश्रुतेः ॥ २६ ॥

ते चमसाध्वर्यवो वरणवाक्ये बहुत्वश्रुतेर्बहवः। यद्यपि तत्रोद्देश्यविशेषणत्वाद्बहुत्वाविवक्षा, तथाऽपि "स्वाध्यायोऽध्येतव्यः" इतिवत् संस्कारविध्यन्यथाऽनुपपत्त्या विनियोगकल्पनदशायां तद्विवक्षोपपत्तिः। अनयैव दिशा "पुरोहितं वृणीते" "अध्वर्युं वृणीते" इत्यादावप्येकत्वाविवक्षा द्रष्टव्या। वस्तुतस्तु—तत्रतत्र विनियोगेऽपि "चमसाध्वर्यवश्चमसानुन्नयन्ति" "अध्वर्युः पुरो विभजते" इत्यादौ बहुत्त्वैकत्वश्रुतेस्तद्विवक्षोपपत्तिः ॥ ११ ॥

(१२)–दशत्वं लिङ्गदर्शनात् ॥ २७ ॥

ते च दश एकादश वा, न तु त्रयः, चमसानां तावत्त्वात्। अत एव मध्यतःकारिणां होत्रादीनां चतुर्णां होतृकाणां च मैत्रावरुणादीनां षण्णां चमसाध्वर्यव इति व्यपदेशोपि सङ्गच्छते। सदस्यपक्षे तच्चमसे एकादशः। एवं च दशपेये क्रतौ सिद्धवद्दश चमसाध्वर्यव इत्यनुवादोपि सदस्याभावपक्षे सङ्गच्छते। त्रित्वपक्षे न कथञ्चिदस्योपपत्तिः ॥ १२ ॥

(१३)–शमिता च शब्दभेदात् ॥ २८ ॥ प्रकरणाद्वोत्पत्त्यसंयोगात् ॥ २९ ॥

पशौ "शमितारमुपनयीत" इति श्रुतः शमिता तु वरणभेदानाम्नानात् सत्यपि संज्ञाभेदे यौगिकत्वेन प्रकृतेष्वेव ऋत्विक्षु अनृत्विक्षु वा वृतेषु तस्या उपपत्तेर्नान्यः। तत्राप्यध्वर्योः "पराङावर्ततेऽध्वर्युः पशोस्संज्ञप्यमानात्" इति वचनेनासामर्थ्यात् तत्पुरुषः प्रतिप्रस्थाता संज्ञपयेत्। न च तस्य हिंसादोषभियाऽप्रवृत्तिः। दक्षिणादिलोभेन तदङ्गीकारेण प्रवृत्त्युपपत्तेः। अत एवार्त्विज्यं नि-

न्दान्ति । ब्राह्मणस्य च शामित्रविषये कलौ पृथङ्निषेधो दोषाधिक्यज्ञापनार्थः । अत एव कलौ शामित्रे ब्राह्मणालाभेन शूद्रेण क्रियमाणे "क्लोमानं शमितुस्तद्ब्राह्मणाय दद्यात् यद्यब्राह्मणस्स्यात्" इति वचनं सङ्गच्छत एव । अब्राह्मणपदं यजमानपरमिति तु प्राञ्चः ॥ १३ ॥

(१४)–उपगाश्च लिङ्गदर्शनात् ॥ ३० ॥

एवं सोमे समाम्नाता उपगातारोपि वृतेष्वेव । न चोपगातॄणां गातृगुणत्वेन लोकप्रसिद्धेर्वृतानां च तुल्यकक्षत्वेन तदभावादन्य इति वाच्यं, तुल्यानामपि प्रैषप्रैषार्थकारित्ववत्परस्परोपकारित्वस्योचितत्वात् । स्वामिपरिक्रीतानामपि शिल्पकारिणां तथा दर्शनाच्च । तत्राप्युपगानस्य सामवेदिकत्वात् उद्गात्रादीनां त्रयाणां गानव्यापृतत्वेऽपि सुब्रह्मण्यो नियतः । अन्ये तु "त्र्यवरा उपगायन्ति, चत्वार उपगायन्ति" इति वचनान्तरानुसारादनियताः । अत एव "नाध्वर्युरुपगायेत्" इति वचनान्नासौ ॥

(१५)–विक्रयी त्वन्यः कर्मणोऽचोदितत्वात् ॥

सोमविक्रयी त्वन्य एव । वरणादिकं हि क्रत्वर्थत्वात्तदङ्गपदार्थकरणाय पुरुषानुपादातुं क्रियते । विक्रयस्त्वविहितत्वात् विहितक्रयान्यथाऽनुपपत्त्याऽऽवश्यकोपि दोषस्वीकारेण रागतः प्रवृत्तपुरुषकर्तृकविक्रयोपजीवनेनापि क्रयसिद्धेरनाक्षेपाच्चानङ्गम् । अतस्तत्र वृतानामप्राप्तेरन्य एवेति ॥ १५ ॥

(१६)–कर्मकार्यात्सर्वेषामृत्विक्त्वमविशेषात् ॥ ३२ ॥ न वा परिसङ्ख्यानात् ॥ ३३ ॥ पक्षेणेति चेत् ॥ ३४ ॥ न सर्वेषामधिकारः ॥

ब्रह्मादयश्चमसाध्वर्यवश्च सोमे कर्तारस्समधिगताः, ते सर्वे ऋत्विक्पदवाच्याः ऋत्विक्पदस्य "ऋत्विग्दधृक्" इत्यादिस्मृत्या कर्तृवाचिकिन्नन्तत्वनिपातनेन यौगिकत्वावगतेः वसन्ताख्यऋतुकालीनयागप्रयोगकर्तृवाचित्वनिर्णयेनादृष्टरूपऋत्विक्त्वे रूढिमङ्गीकृत्यौणादिकत्वकल्पनानुपपत्तेः तस्य च सर्वपुरुषेष्वविशेषात् । "तस्यैतस्य यज्ञक्रतोस्सप्तदश ऋत्विजः" इति तु "एकं वृणीते" इत्यादिवदवयुत्यानुवादः । इतरथा परिसङ्ख्यायां त्रिदोषत्वापत्तेः । अदृष्टरूपऋत्विक्त्वकल्पनायां गौरवात् । अत एव च वरणमेव तज्जन्यादृष्टमेव वा ऋत्विक्पदप्रवृत्तिनिमित्तमित्यपास्तं रूढिकल्पनायां प्रमाणाभावात्, ब्रह्मादिवरणानां भेदादनेकादृष्टशक्तिकल्पनापत्तेश्च । व्यापकधर्मस्य वरणत्वस्यैव शक्यत्वाङ्गीकारे त्वतिप्रसङ्ग इत्यस्मन्मतप्रवेशः, यजमाने वरणाभावेन ऋत्विक्त्वानापत्तेश्च, सत्रे ऋत्विक्त्वसम्पत्तये वरणापत्तेश्च । अत एव "ऋत्विजो वृणीते" इत्यस्यैव वरणविधित्वादेकमेव वरणं ऋत्विक्पदप्रवृत्तिनिमित्तमित्यप्यपास्तं "ब्रह्माणं वृणीते" इत्यादिविधीनां वैयर्थ्यप्रसङ्गाच्च । एतेन ब्रह्मादिनिष्ठक्रतुयजनान्येव ऋत्विक्पदप्रवृत्तिनिमित्तामित्यप्यपास्तं, अनेकशक्तिकल्पनातादवस्थ्यात् । अतश्च सर्वं एव ऋत्विक्पदवाच्या इति सर्वेषामेव हिरण्यमालित्वादि ऋत्विक्कार्यमिति प्राप्ते—

सत्यं ऋत्विक्पदं यौगिकं क्रतुयजनसामान्यवाचि च । तथाऽपि सप्तदशश्रुत्या उद्भित्पङ्कजादिवदेव रूढिमकल्पयित्वैव सप्तदशश्रुत्युन्नीतप्राचीनप्रयोगस्य सहकारित्वकल्पनेनैव सप्तदशानामेव ऋत्विक्पदशक्यत्वोपपत्तिः । न ह्युद्भिदादिपदेष्वतिप्रसङ्गनिराकरणार्थं रूढिकल्पनं, तथात्वे सोमादिवत् मत्वर्थलक्षणामङ्गीकृत्य गुणविधित्वस्यैवापत्तेः । न चैवं सप्तदशश्रुतेः परिसङ्ख्यात्वाप-

स्या त्रिदोषत्वापत्तिः । ऋत्विक्पदज्ञानकारणताकल्पनवेळायामेव सप्तदशश्रुतेस्तात्पर्यग्राहकत्वकल्पनेन प्राप्तपरिसङ्ख्यात्वाभावात् । अतश्च सप्तदशानामेव ऋत्विक्कार्यं हिरण्यमालित्वादि ॥ १६ ॥

(१७)–नियमस्तु दक्षिणाभिश्श्रुतिसंयोगात् ॥ ३६ ॥ उक्त्वा च यजमानत्वं तेषां दीक्षाविधानात् ॥ ३७ ॥

के ते सप्तदशेत्यपेक्षायां "ऋत्विग्भ्यो दक्षिणां ददाति" इत्युपक्रम्य अग्नीधे ब्रह्मणे उद्गात्रे इत्यादिना षोडशानामेव सङ्कीर्तनात् तेषामेव ऋत्विक्त्वम् । अत एव सत्रे यजमानानामेव ऋत्विक्त्वात्तेषामेव यजमानसहितानां दीक्षाश्रवणम् । अतष्षोडश तावत् समधिगताः ॥ १७ ॥

(१८)–स्वामिसप्तदशाः कर्मसामान्यात् ॥ ३८

सप्तदशस्तु सदस्यः । तस्यापि पृथग्वरणाम्नानात् चमसविधानाच्चेति प्राप्ते—

सदस्यकर्तव्यपदार्थाश्रवणात् वरणस्य सक्तुन्यायेन[1] विनियोगभङ्गं कल्पयित्वाऽदृष्टार्थत्वावगतेः सदस्यस्य पाक्षिकत्वेन सप्तदशश्रुतेः पाक्षिकानुवादत्वापत्तेः सत्रे तस्य दीक्षाऽनाम्नानाच्च स्वाम्येव सप्तदशः । कर्मकरत्वेऽपि वा न पत्नी सप्तदशत्वजनकीभूता, अपेक्षाबुद्धौ लिङ्गवैरूप्याङ्गीकारे प्रमाणाभावात् ॥ १८ ॥

(१९)–ते सर्वार्थाः प्रयुक्तत्वात् ॥ ३९ ॥

---

[1] २-१-५.

तत्तत्क्रतुषु प्रमितानां तेषांतेषां कर्तॄणां अव्यवस्थयैवासति विशेषविधौ लिङ्गप्रकरणाभ्यां तत्तत्पदार्थकर्तृत्वं, न तु तयोः दुर्बलयोः आध्वर्यवादिसमाख्यया सङ्कोचः ॥ स्थितं तावदपर्यवसितम् ॥ १९ ॥

(२०)—अग्नयश्च स्वकालत्वात् ॥ ४० ॥ तत्संयोगात्कर्मणो व्यवस्था स्यात्संयोगस्यार्थवत्त्वात् ॥ ४१ ॥

आहवनीयादयोऽग्नयोऽनारभ्याधीतवचनैर्होमाद्यनुवादेन विहिताः पर्णतान्यायेन[1] प्रकृतिहोमाद्यर्था एव। विकृतौ तु ये तावद्धोमादयोऽतिदेशेन प्राप्यन्ते तेषु प्राप्तिकालवैषम्यात् स्पष्टमेव द्विरुक्तत्वम् । येऽप्यामनहोमादयोऽपूर्वास्तेषामपि विकृतिसम्बन्धबोधव्यतिरेकेणाङ्गग्राहकत्वानुपपत्तेः विकृतेश्च क्लृप्तोपकाराङ्गग्रहणार्थं पूर्वमतिदेशकल्पनावश्यंभावात् तस्य च प्रकृतावाहवनीयप्राप्तिमन्तरेणानुपपत्तेस्तेष्वपि द्विरुक्तत्वम् । अतस्तेषु नोपदेशेन, नापि यूपावटास्तरणबर्हिर्वदतिदेशेनाहवनीयप्राप्तिः । अतोऽधिकरणं विनैव ते इति प्राप्ते—

सत्यमतिदेशप्राप्तेषु नाहवनीयाद्युपदेशः। अपूर्वेषु त्वस्यानारभ्याधीतत्वादुपदेशेन प्राप्तिरविरुद्धा । न ह्यामनहोमादीनां विकृतिसम्बन्धं विना नाङ्गग्राहकत्वं, उत्पत्तिवाक्ये इष्टसामान्यस्य भाव्यत्वबोधेनापि शाब्दबोधस्य पर्यवसन्नतया तदनुवादेनाहवनीयविधानोपपत्तेः। अतस्तेऽपि सर्वार्थाः ॥

स्थितादुत्तरं—नात्र समाख्यया लिङ्गप्रकरणयोर्बाधः, किन्तु ताभ्यामव्यवस्थया प्राप्तानां कर्तॄणां व्यवस्थामात्रमपेक्षितं क्रि-

[1] ३-६-१.

यते। अतश्च हौत्रसमाख्याताः पदार्थाः होत्रा कर्तव्याः। आध्वर्यवसमाख्याताश्चाध्वर्युणा। औद्गात्रसमाख्याता उद्गात्रा। सर्वेषु हि ऋग्वेदयजुर्वेदसामवेदेषु ये पदार्था विहिताः तेषामेताः क्रमेण समाख्याः याज्ञिकानां प्रसिद्धाः। यौगिकाश्चैते शब्दाः न पदार्थानामध्वर्य्वादिसम्बन्धव्यतिरेकेण सम्भवन्ति इति तेषु तेषां योग्यत्वात्कर्तृत्वसिद्धिः ॥ २० ॥

(२१)—तस्योपदेशसमाख्यानेन निर्देशः ॥ ४२ तद्वच्च लिङ्गदर्शनम् ॥ ४३ ॥

अयं चोत्सर्गः वचनात् "यजमानस्य याज्या" इत्यादिकात्, विशेषसमाख्यया च पोत्रीयं नेष्ट्रीयं याजमानं इत्यादिकया अपोद्यते। न चैवं तादृशविषये सामान्यसमाख्याया निर्विषयत्वापत्त्याऽऽनर्थक्यप्रतिहतन्यायेन विकल्पापत्तिः। यथाशक्तिप्रयोगे पोत्रादीनामशक्तौ सविषयत्वोपपत्तेः। वस्तुतस्तु—हौत्रादिसमाख्यायास्सामानाधिकरण्यसम्बन्धेन ऋग्वेदविहितकर्मत्वमुपलक्षणीकृत्यैव तत्तत्पदार्थेषु होत्रादिविधायकत्वं, निरुक्तसम्बन्धेनाग्नीषोमीयप्राक्कालवृत्तित्वमुपलक्षणीकृत्योपांशुत्वविधायकत्वमिव "यत्किञ्चित्प्राचीनम्" इत्यस्य। अतश्च तद्वदेव केषुचित् पदार्थेषु तदभावेऽपि न क्षतिः। अत एव दक्षिणारहितकाम्यादौ यजमानस्यैव कर्तृत्वेऽपि समाख्याया न काचिदनुपपत्तिः ॥ २१ ॥

(२२)—प्रैषानुवचनं मैत्रावरुणस्योपदेशात् ॥ ४४ ॥ पुरोनुवाक्याधिकारो वा प्रैषसन्निधानात् ॥ ४५ ॥ प्रातरनुवाके च होतृदर्शनात् ॥ ४६ ॥

ज्योतिष्टोमे "मैत्रावरुणः प्रेष्यति चान्वाह च" इति श्रुतम्। सन्ति च तत्र केचित् केवलाः प्रैषाः "अग्नये समिध्यमानायानुब्रूहि, यूपायाज्यमानायानुब्रूहि" इत्यादयः। केवलानि चानुवचनानि "प्रवो वाजा अभिद्यवः, अञ्जन्ति त्वामध्वरे देवयन्तः" इत्यादीनि। उपदेशातिदेशप्राप्तानि। प्रैषोत्तरत्वाच्चैषामनुवचनत्वम्। कानिचित्तु प्रैषत्वे सत्येवानुवचनानि, यथा—"होता यक्षत्" इत्यादीनि। एषां च "प्रेष्य" इत्यध्वर्युप्रैषोत्तरभावित्वात् "होतर्यज" इत्यन्ते प्रैषत्वाच्चोभयरूपत्वम्।

तदिह मैत्रावरुणः प्रैषानुवचनोद्देशेन विधीयमानस्सर्वत्र स्यात्, न तु प्रैषान्तानुवचनेष्वेव, उद्देश्यविशेषणस्य साहित्यस्याविवक्षितत्वात्। चशब्दस्यापि प्रैषानुवचनरूपधर्मिसाहित्यपरत्वेन प्रैषत्वानुवचनत्वरूपधर्मयोरैकाधिकरण्यरूपसाहित्यबोधकत्वाभावात्। तस्य च प्रतिप्रधानं गुणावृत्तिन्यायेनैवास्मन्मतेऽपि सिद्धेरनुवादकत्वाच्च। अतश्च सर्वत्रैव समाख्याप्राप्तकर्त्रन्तरबाधेन वाक्यान्मैत्रावरुणनिवेशः। न चात्रानेकोद्देशे वाक्यभेदो दोषः, "अर्धमन्तर्वेदि मिनोति" इतिवदाख्यातैकत्वाभावात्। अत एवैकवाक्योपादानगम्यसाहित्यस्योद्देश्यगतस्याप्रतीतत्वादेव न विवक्षापत्तिः।

न चैवमपि शुद्धप्रैषेष्वध्वर्युकर्तृकत्वस्य शुद्धानुवचनेषु च होतृकर्तृकत्वस्यैव समाख्यया प्राप्तेः कर्त्रन्तरानपेक्षत्वादेव न मैत्रावरुणविधिः। प्रैषान्तानुवचनेषु तु प्रैषत्वेनाध्वर्युकर्तृकत्वस्यानुवचनत्वेन च होतृकर्तृकत्वस्य प्राप्तेर्विरोधेनोभयोरपि निवृत्तौ कर्त्रन्तरापेक्षायां तत्रैव मैत्रावरुणविधिरिति पार्थसारथ्युक्तं युक्तमिति वाच्यम्, प्रैषान्तानुवचनानामपि हौत्र एव पाठस्य वार्तिकोक्तत्वेनाध्वर्युकर्तृकत्वाप्राप्तेः, उभयत्र पाठेन तत्प्राप्तावपि वा विकल्पेनोभयनिवेशोपपत्तेर्निवृत्त्यप्रसङ्गाच्च।

यदपि वार्तिके अग्नीषोमीयाद्यङ्गभूतेषु प्रैषान्तानुवचनेषु यजेतिशब्दस्य प्राकृतत्वात्तन्मात्रेऽतिदेशेनाध्वर्योः प्राप्तिः, 'प्रेष्य' इति प्रैषान्तराम्नानाद्वा "इतरमन्यः" इति न्यायेन[1] प्रतिप्रस्थातुः. सोमाङ्गान्तर्वृत्तियजेतिशब्दे तु "हौतर्यज" इति लिङ्गानुरोधेन समाख्यां बाधित्वा मैत्रावरुणस्य, तदतिरिक्तपदार्थान्तरेषु होतुरेव। ततश्चांशभेदेन नानाकर्तृप्राप्तेरेकपदार्थत्वेन च कर्तृद्वयासम्भवात् प्रच्युतयोस्तयोर्मैत्रावरुणविधिरित्युक्तं, तदपि यजेतिशब्दस्याग्नीषोमीयादौ हौत्र एव प्रत्यक्षपठितत्वेन समाख्यया आतिदेशिकाध्वर्य्वादिबाधेन होतृप्राप्तेस्तस्य च "हौतर्यज" इति लिङ्गेन बाधेऽपि तत्पुरुषस्य मैत्रावरुणस्यैव यजेतिशब्दे तदेकवाक्यतापन्नपदान्तरेषु च प्राप्तेरुपेक्षितम् ।

अबाधेऽपि वा समाख्याया दुर्बलत्वेन यजेतिशब्दे तदेकवाक्यतापन्नपदान्तरेषु च प्रतिप्रस्थातुरेवैकस्य प्राप्तेर्न कर्त्रन्तरापेक्षा । एवं सोमाङ्गभूतेष्वपि[2] बोध्यम्। अतस्सर्वत्रैव मैत्रावरुण इति प्राप्ते—

वाक्यभेदाङ्गीकारे अनुषङ्गापत्तेश्चशब्दवैयर्थ्याच्च पदद्वयेन प्रैषान्तानुवचनान्येव "अर्धमन्तर्वेदि" इतिवल्लक्षयित्वा तेष्वेव मैत्रावरुणविधानम्। चशब्देन च धर्मिणोरितरेतरयोगस्य स्वरूपे कार्ये वाऽसम्भवात्, समुच्चयस्य च न्यायादेव प्राप्तेरानर्थक्यतदङ्गन्यायेन धर्मयोरेव प्रैषत्वानुवचनत्वयोरितरेतरयोगप्रतीतेः, निपातस्थले च परस्परान्वयस्य व्युत्पत्तिसिद्धत्वेन वाक्यभेदाभावात् लक्षणां विनैव परस्परयुक्तप्रैषत्वानुवचनत्वावच्छिन्नोद्देशेन मैत्रावरुणो विधीयते। अत एव प्रैषानुवचनान्यतरत्वावच्छिन्न एव लक्षणोपपत्तेर्न युक्तो वाक्यसङ्कोच इत्यप्यपास्तम्।

---

[1] ३-८-१०. [2] ३-१-९.

वस्तुतस्तु शुद्धानुवाक्यास्वपि कासुचित् मैत्रावरुणस्य याज्ञिकसम्मतत्वाच्चशब्दो नेतरेतरयोगार्थः। अपि तु धर्मिसमुच्चयार्थ एव सन्ननुवादः। नचैवं सार्वत्रिकत्वापत्तिः, अनुवादस्य सतिसम्भवे सन्निहितगामित्वमिति नियमेन यानि केवलान्यनुवचनानि प्रैषान्तानुवचनानि च तान्यधिकृत्यायं विधिः प्रवृत्तस्तद्विषयकत्वस्यैवाङ्गीकारात् ॥ २२ ॥

(२३)—चमसांश्चमसाध्वर्यवः समाख्यानात् ॥ ४६ ॥ अध्वर्युर्वा तन्न्यायत्वात् ॥ ४७ ॥ चमसे चान्यदर्शनात् ॥ ४८ ॥ अशक्तौ ते प्रतीयेरन् ॥ ४९ ॥

चमसे विशेषसमाख्यया चमसाध्वर्युरूपया तेषामेव होमादौ कर्तृत्वं, समासान्तर्गताध्वर्युपदस्य रूढ्या शुद्धाध्वर्युपदवदेव वरणादिनिमित्तत्वाविशेषात्। इयांस्तु विशेषः यत् तस्य सर्वकार्येषु विनियोगः, एतेषां तु चमसेष्वेवेति। यदि तु तत्तद्वरणानां भेदादनेकशक्तिकल्पने गौरवमाशङ्केत। ततोऽस्तु एष्वध्वर्युशब्दस्य गौणत्वम्। न च विनिगमनाविरहः, चमसाध्वर्युवरणवाक्ये रूढिकल्पने चमसाध्वर्युपदस्यैव तत्कल्पनापत्तेः, अध्वर्युपदस्य ततो भिन्नस्य शक्त्यन्तरकल्पनावश्यम्भावात् अतो लाघवात्प्रचुरप्रयोगाच्चाध्वर्युपदस्यैव प्रसिद्धाध्वर्यावेव शक्तिः, इतरेषु तु गौणी, तथाऽपि तु ग्रहादौ तस्यापि होमादिकर्तृत्वाद्धोमकर्तृत्वसादृश्यमात्रेणैतेषु गौणत्वोपपत्तेः सामान्यसमाख्यां बाधित्वा चमसेष्वेतेषामेव होमादिकर्तृत्वमिति प्राप्ते—

गौणत्वस्यावश्यकत्वे चमसवृत्तिहोमादिकर्तृत्वेनापि गौण-

त्वोपपत्तौ स्वोपजीव्यसामान्यसमाख्याबाधे प्रमाणाभावप्रसक्ते-ष्वप्यध्वर्युरेव होमादिकर्ता । तस्यान्यत्र व्यापृतत्वे तु गौणसमा-ख्यया चमसाध्वर्यवः । तेषामप्यसम्भवे "इतरमन्यः" इत्येवं प्रतिप्रस्थात्रादयः ॥ २३ ॥

(२४)—वेदोपदेशात्पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः ॥ ५० ॥ तद्गुणाद्वा स्वधर्मः स्यादधि-कारसामर्थ्यात्सहाङ्गैरव्यक्तश्शेषे ॥ ५१ ॥

औद्गात्रे सामवेदे श्येनश्श्रुतो ज्योतिष्टोमधर्मवान् । तत्र प्राकृताङ्गेष्वतिदेशेन नानर्त्विजः प्राप्ताः औपदेशिक्या औद्गा-त्रसमाख्यया बाध्यन्त इति तेषूद्गातैव कर्ता । समाख्या हि क-र्तृप्रापिका । कर्ता च प्रयोगाङ्गम् । प्रयोगश्च प्रयोगविधिना साङ्गस्यैको विधीयत इति समाख्ययाऽङ्गेष्वपि कर्तृविधिरुपदेशेन । अतश्च यथैव "अप्स्ववभृथेन चरन्ति" इत्यत्रापां देशत्वात् साङ्गभावनाविषयत्वप्रतीतेः प्राकृतेषु प्रयाजादिष्वग्निबाधकत्वं तथा प्रकृतेऽपि । न च समाख्यायाः प्रधानमात्रे श्रुताया अप्यङ्गवि-षयकत्वस्य कल्पनीयत्वेन प्रयोगविध्याश्रितत्वात् तस्यातिदेश-प्रापिताङ्गविषयत्वेन तदपेक्षत्वादुपजीव्यचोदकप्रापितनानाकर्तृक-त्वबाधानुपपत्तिरिति वाच्यं, सत्यपि तृतीयाश्रवणेऽपामप्यङ्गविष-यत्वस्य कल्पनीयत्वेनोक्तविधयाऽग्निबाधकत्वानापत्तेः । न हि तृ-तीयायास्साङ्गवृत्तिकरणत्वे शक्तिः, अपि तु प्रधानकरणत्व एव, तत्तु अङ्गवैशिष्ट्यं विनाऽनुपपन्नमित्यङ्गविषयत्वं कल्प्यमेव । अतश्च शरादौ कॢप्तोपदेशस्थल इव कल्प्योपदेशस्याप्यतिदेशबाधकत्वं वाच्यम् । अत एव यत्र प्रकृतावेव स्तोत्रशस्त्रादौ वेदान्तरीये

विशेषसमाख्यारूपेणोपदेशेनैव कर्त्रन्तरप्राप्तिः तत्राङ्गविषये कल्प्यायाः प्रधानसमाख्याया बाध इष्ट एव । वर्णितं ह्येतत् गुणमुख्यव्यतिक्रमाधिकरणे[1] । प्रकृते त्वातिदेशिकत्वात्प्रधानसमाख्याया एव प्राबल्यमिति प्राप्ते—

इहापि प्रयोगविध्याश्रितायास्तस्या अङ्गविषये कल्प्यत्वेनोपजीव्यातिदेशापेक्षत्वात् तेन च कर्तृविशिष्टानामेव च प्राप्तत्वेन कर्त्रपेक्षाभावात् समाख्याया आकाङ्क्षाविरहे श्रुत्यकल्पकत्वात्, कल्पकत्वेऽपि वा प्राकृताङ्गविषयत्वाभावात् न प्राकृतकर्तृबाधकत्वम् । नचैवमप्स्वपि तथात्वापत्तिः, अब्विधे प्रत्यक्षत्वात्तासां च धात्वर्थान्वयस्याव्युत्पन्नत्वात् तृतीययाऽवभृथकरणकभावनायामन्वयावगतेर्देशत्वेन च भावनोत्पत्त्यन्वयित्वाभावेन तत्प्रयोगान्वयित्वात्, प्रयोगस्य चाङ्गप्रधानसाधारणत्वात् भावनान्वयद्वारा पाश्चात्यतद्विशेषणान्वयेऽविशेषेणोभयान्वयतात्पर्यावगत्या उपदेशेनैव प्रधान इवाङ्गेष्वप्यग्निबाधात् । अत एव यत्र तृतीयाश्रवणाभावः यथा "यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्याः" इत्यादौ तत्र प्रधानकर्मकभावनायामेवान्वयात्तस्यां चाङ्गान्वयाभावेन प्रधान एव प्राकृतस्वरादिबाधकत्वम् । प्रकृते तु समाख्यायाः प्रधानमात्रविषयत्वात्तस्य च स्वामिकर्तृकत्वेनान्यकर्तृकत्वानुपपत्तेस्स्वनिर्विषयत्वान्यथानुपपत्त्या कथञ्चिदानर्थक्यतदङ्गन्यायेना[2]ङ्गमात्रविषयत्वकल्पनेऽपि क्लृप्तकर्तृकाङ्गविषयत्वकल्पने प्रमाणाभावात् कण्टकवितोदनाद्यौपदेशिकाङ्गविषयत्वमेव कल्प्यते । वस्तुतस्तु—तेषामपि विशिष्य स्वसमाख्ययैव कर्तृप्राप्तेर्न प्रधानसमाख्याविषयत्वं, अपि तु यानि वेदत्रयाविहितानि स्मृ-

---

[1] ३-३-२. [2] ३-१-९.

त्यनुमितवेदविहितानि तद्विषयैव सेति ध्येयम् । अतः प्राकृताङ्गेषु नानैव कर्तारः । किञ्च समाख्यायाः पाठमात्रनिबन्धनत्वेन "उच्चै-र्ऋचा" इत्यादिवत् विधाननिबन्धनत्वाभावात् प्राकृतानां च सा-मवेदेऽपठितत्वादपि तद्विषयत्वाभावः. ॥ २४ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
तृतीयस्याध्यायस्य सप्तमः पादः.

अथ तृतीयाध्यायस्याष्टमः पादः.

(१)–स्वामिकर्म परिक्रयः कर्मणस्तदर्थत्वात् ॥ १ ॥ वचनादितरेषां स्यात् ॥ २ ॥

वरणं दक्षिणादानंच समाख्ययाऽध्वर्य्वादिभिरेव कार्यम् । अध्वर्युश्च यथा तान् स्वद्रव्येण परिक्रीणीते तदुपायं यजमानः कुर्यात् । अध्वर्योश्च "इतरमन्यः"[1] इति न्यायेन वरणादिकं प्र-तिप्रस्थाता कुर्यात् । स चाध्वर्युर्दक्षिणाम्नानात् तेनानतस्स्वकृ-त्यं कुर्यात् । ऋत्विगन्तरार्थं स्वद्रव्यं दातुं यजमान उपायान्तरं कुर्यादिति प्राप्ते—

अवश्यं वृतोऽध्वर्युरन्यान् वृणीते, अन्यथाऽध्वर्युत्वासम्भवात्, वरणस्यादृष्टार्थत्वापत्तेश्च । तद्वरणं च येनादौ कर्तव्यं तस्या-ध्वर्युगणत्वसम्पत्तये वरणस्यावश्यकत्वात् तस्य चासमाख्यातक-र्तृकत्वावश्यंभावात् वरणे तावत् समाख्याबाध आवश्यक एव ।

[1] ३-८-१०,

एवं दक्षिणादानेऽप्युपायान्तरकल्पने गौरवापत्तेः प्रयोगवाक्यावगतस्वामिकर्तृकत्वबाधापत्तेश्च समाख्याया एव केवलाया बाधः।

वस्तुतस्तु—सर्वत्र स्वामिकर्तृकत्वप्राप्तौ वरणेनेव दक्षिणादानेनाप्यन्यत्रान्यकर्तृकत्वे सिद्धे समाख्यया नियममात्रं क्रियत इति स्वलाघवानुरोधेनापि समाख्या वरणभरणविषयिणी। सत्यपि वा तस्मिन् उपायान्तरकल्पनाद्यनुरोधेनैव दानमात्रे स्वामिकर्तृकत्वम्। यत्र तु वचनं यथा "य एतामिष्टकामुपदध्यात् स त्रीन् वरान् दद्यात्" इत्यादौ तत्राध्वर्य्वादीनामपि दानकर्तृत्वम्। तत्र हि स्वामिकर्तृकत्वे उपधानस्य सामानाधिकरण्येन तत्समानकर्तृकत्वावगतेस्तस्यापि तत्कर्तृकत्वे 'उपदध्यात्' इति परस्मैपदानुपपत्तिः, तस्य परत्वेनोपधात्रभिन्नगामिक्रियाफलकत्वावगतेः। यदि तु क्रियाफलस्याप्ययादिगतत्वात्परस्मैपदोपपत्तिरित्याशङ्क्येत, ततः प्राप्तोपधानानुवादेन दानस्य तत्कर्तृकत्वस्य च विधौ वाक्यभेदापत्तेः य इत्यनेन कर्तृप्राप्तिप्रतीतेश्चोपधानस्याध्वर्युकर्तृकत्वावसायात् तत्समानकर्तृकस्य दानस्यापि तत्कर्तृकत्वसिद्धिः ॥ १ ॥

(२)—संस्कारास्तु पुरुषसामर्थ्ये यथावेदं कर्मवद्व्यवतिष्ठेरन् ॥३॥ याजमानास्तु तत्प्रधानत्वात्कर्मवत् ॥ ४ ॥ व्यपदेशाच्च ॥ ५ ॥ गुणत्वेन तस्य निर्देशः ॥ ६ ॥ चोदनां प्रति भावाच्च ॥ ७ । अतुल्यत्वादसमानविधानास्स्युः ॥ ८ ॥

वपनादयः फलिसंस्कारास्समाख्यानादध्वर्युकर्तृकाः । तेनाध्वर्युणा क्षुरं दण्डकाष्ठं जलं च गृहीत्वा यजमानस्य केशवपनादि दन्तधावनं स्नानं च करणीयं अञ्जनाभ्यञ्जनवदिति प्राप्ते—

"वपत" इत्यात्मनेपदाद्वपनफलाश्रयस्य यजमानस्यैव तत्कर्तृत्वं प्रतीयते । अस्ति च तस्यापि छेदनाख्यवपनाधारत्वेन स्थाली पचतीतिवत् कर्तृत्वं, तदादायैव "तस्मात्केशान् वपाम्यहं" इति प्रयोगः । यस्तु "नापितो वपति" इत्यादिप्रयोगः, स छेदनानुकूलक्षुरक्रियाकर्तृत्वमादाय । तत्प्रयोजककर्तृत्वमादायैव "नापितो यजमानं वापयति" इत्यादिप्रयोगः । अतश्च "वपत" इत्यात्मनेपदस्थले आधारत्वमादायैव कर्तृत्वोपपत्तौ क्षुरग्रहणकर्तृत्वेऽपि तात्पर्यकल्पने प्रमाणाभावः । तेनार्थाक्षिप्तस्य तस्य यजमानकर्तृकत्वनियम एव प्रमाणाभावेऽध्वर्युकर्तृकत्वनियमस्य कः प्रसङ्गः इति नापितकर्तृकमपि तत् । सोमे तु "प्रवपति देव श्रूः" इति परस्मैपदप्रयोगात् अध्वर्युकर्तृकगोदानवपनोत्तरं 'नापिताय क्षुरं प्रयच्छति' इति विधानात्तत्कर्तृकमेव तत् । एवमन्यत्राप्यात्मनेपदयुक्ते द्रष्टव्यम् । अत एव यत्र "तमभ्यनक्ति" "शरेषिकयाऽनक्ति" "दण्डेन दीक्षयति" इत्यादौ परस्मैपदनिर्देशः अधिकरश्रुतः, तत्र सत्यप्याधारत्वमादायात्मनेपदोपपत्त्या यजमानकर्तृकत्वे व्यापारान्तरस्यापि विधेयत्वादध्वर्युकर्तृकत्वमिष्टमेव । स्नाने तु स्वनिष्ठव्यापार एव स्नातीति परस्मैपदस्यापि प्रयोगादन्यकर्तृके च स्नापयतीत्येव प्रयोगात् यजमाननिष्ठव्यापारस्यैव विधेयत्वेनान्यकर्तृकव्यापारस्याविधेयत्वेन नाध्वर्युनियमः । न ह्यत्र परस्मैपदादन्यकर्तृकत्वनियमः, स्नाधातोरस्वरितेत्त्वाद्यभावेन तदभावात् । अतः फलिसंस्कारास्स्वामिकर्तृका एव । कर्तृसंस्कारास्तु हिरण्यमालित्वादयस्सामान्यविहितास्सर्वे-

षामेव । विशिष्यविहितास्तु तेषामेवेति न तत्रापि समाख्यया नियमः । तस्याः नियामकमात्रत्वेन प्रापकत्वाभावादिति वक्ष्यते[1] ॥ २ ॥

(३)–तपश्च फलसिद्धित्वाल्लोकवत् ॥ ९ ॥ वाक्यशेषश्च तद्वत् ॥ १० ॥ वचनादितरेषां स्यात् ॥ ११ ॥

सोमे "द्व्यहं नाश्नाति त्र्यहं नाश्नाति" इति श्रुतम् । तत्रायमशनप्रतिषेधः अनृतवदनप्रतिषेधवदेवाराादुपकारको न फलिसंस्कारकः, आत्मनेपदाद्यभावात् । सत्त्वेऽपि वा स्वरितेत्त्वाद्यभावाच्च । अतश्च समाख्यानादध्वर्युकर्तृकत्वम् ।

वस्तुतस्तु—अनृतवदनवदेव निषेध्याशनस्याविहितत्वादभावस्य चाननुष्ठेयत्वान्न समाख्याविषयत्वमिति कर्तृमात्रविषयत्वे प्राप्ते—

आरादुपकारकत्वपक्षे अशनस्य क्रतुवैगुण्यजनकत्वं तस्य च फलप्रतिबन्धकत्वमित्यादि कल्पनापेक्षया लाघवेनाशनाभावस्य दुःखजनकतया क्लृप्तत्वात्तद्दुःखस्य च स्वजनकीभूतपापनाशकत्वस्यापि क्लृप्ततया केवलं तत्पापस्य सोमफलप्रतिबन्धकत्वमात्रकल्पनया अशनाभावस्य यजमाननिष्ठफलप्रतिबन्धकाभावसम्पादकत्वमेव "यदाऽनशनस्तदा मेध्यार्हः" इति वाक्यशेषानुसारात् कल्पयितुमुचितम् । अतश्च तस्य लिङ्गादेव यजमानमात्रनिष्ठत्वम् । न ह्यन्यसमवेतदुःखेनान्यदीयं पापं नश्येत् । न च ऋत्विग्गतपापस्य स्वामिगतफलप्रतिबन्धकत्वकल्पनं गौरवात् । अत एव यत्र "ऋत्विज उपवसन्ति" इत्यादिवचनं तत्रानृतवदनन्यायेनारादुपकारक-

[1] एकान्तरितोत्तराधिकरणे.

त्वकल्पनं व्यधिकरणस्यैव वा प्रतिबन्धकत्वादकल्पनमिति द्रष्टव्यम्। अत एव न तत्र समाख्या नियामिका ॥ ३ ॥

(४)–गुणत्वाच्च वेदेन न व्यवस्था स्यात् ॥१२

ये ऋत्विक्संस्कारा हिरण्यमालित्वादयः तत्तद्वेदपठितास्ते समाख्यानादध्वर्य्वादिना कर्तव्याः बहुत्वस्योद्देश्यगतत्वेनाविवक्षितत्वात्। अथाप्यनुवादापेक्षा तदा तत्पुरुषैः कार्याः इति प्राप्ते—

अनियतकर्तृप्राप्तौ समाख्यया लाघवेनापेक्षितनियममात्रकरणात् प्रकृते च संस्कार्यस्य प्रतिप्रधानावृत्तिन्यायेन सर्वस्यैव नियतप्राप्ततया नियमानपेक्षत्वान्न समाख्यायास्तन्नियामकत्वम्। कर्त्रन्तरपरिसङ्ख्यापकत्वं तु वैरूप्यापत्तेरयुक्तम्।

यदि तु समाख्यायास्तत्तत्पदार्थवाचिन्याः भेदेनास्या हिरण्यमालित्वविषयिण्याः परिसङ्ख्यापकत्वमेवेत्याशङ्क्यत तथाऽपि समाख्यया वचनस्य सङ्कोचायोगादेव सर्वविषयत्वनिश्चयः ॥ ४ ॥

(५)–तथा कामोऽर्थसंयोगात् ॥ १३ ॥ व्यपदेशादितरेषां स्यात् ॥ १४ ॥

ये गुणजन्याः कामाः "यदि कामयेत वर्षुकः पर्जन्यस्स्यादिति नीचैस्सदो मिनुयात्" इत्यादयः ते मानाद्याश्रयस्य तावदाध्वर्यवत्वात्तत्सामानाधिकरण्याच्च कामयतेस्तत्समानकर्तृकत्वप्रतीतेः अध्वर्युनिष्ठा एव। अत एव यत्र "दध्नेन्द्रियकामस्य" इत्यादिवैयधिकरण्यं तत्र यजमानगामित्वमेव, प्रक्षेपाख्यस्य होमस्याध्वर्यवत्वादिति प्राप्ते–

'मिनुयात्' इति ञितः परस्मैपदनिर्देशात् अध्वर्युभिन्नकर्तृकत्वावगतेस्सामानाधिकरण्यबाधेन याजमानत्वमेव। यत्रापि

"यो वृष्टिकामस्स सौभरेण स्तुवीत" इत्यादौ न परस्मैपदं तत्रापि नोद्गातृगामित्वं. ऋत्विक्कामानुरोधेन यजमानफलसाधनी-भूतनित्यगुणबाधानुपपत्तेः । अतस्तत्र सामानाधिकरण्यमात्मने-पदं च प्रयोजककर्तृत्वाभिप्रायेणैव व्याख्येयम् । अत एव यत्र न नित्यगुणबाधः बाधेऽपि वा साक्षादेव वचनं तत्र स्वामिभिन्न-गामित्वेऽपि न क्षतिः यथा "आत्मने वा यजमानाय वा यं कामं कामयते तमुद्गायेत्" इति । अत्र पृथग्यजमानपदश्रवणाद्वा-शब्दश्रवणाच्चात्मनेपदेनोद्गातैवोच्यते । अत एवानुषङ्गेण वाक्यभे-दोऽप्यदोषः । 'तं' इत्यनेनोभयनिष्ठं वैकल्पिकं कामं परामृश्यो-द्गेयत्वविधानाद्वा न वाक्यभेदः । गायतश्च "गायन्ति यं सा-मगाः" इत्यादावर्थाभिधानेऽपि प्रयोगाङ्ग कामस्यार्थस्योद्गेयत्व-विधानतः ॥ ५ ॥

(६)—मन्त्राश्चाकर्मकरणास्तद्वत् ॥ १५ ॥ विप्र-योगे च दर्शनात् ॥ १६ ॥

इह येऽकरणभूताः कर्मफलप्रकाशकाः कर्माङ्गभूता मन्त्राः "आयुर्दा अग्ने" "अगन्म सुवः" इत्यादयः ते समाख्याना-दाध्वर्यवा इति प्राप्ते—

यद्यप्येते लिङ्गादिनाऽऽहवनीयोपस्थानादौ विनियुक्ताः न सूक्तवाकादिवत् तृतीयया इतिकरणेन वा विनियुक्तत्वाभावादा-नुषङ्गिकफलकल्पकाः, तथाऽपि कर्मफलमेवो स्थानादिप्रयोज्यं प्रो-त्साहनार्थं प्रकाशयन्ति । तत्र च यत्रैतत्प्रकाश्यं फलं कर्मज-न्यत्वेन क्लृप्तं तत्र तत् शक्त्यैव नियतमनियतं वा प्रकाश्यते । अत एव दर्शपूर्णमासादौ स्वर्गायुरादेः फलत्वात् तत्तत्फलार्थ-प्रयोग एव तत्तन्मन्त्रः न फलान्तरार्थप्रयोगे । यत्र तु नैतत्प्र-

काश्यस्य कर्मफलत्वं तत्र लक्षणया कर्मफलमेवैतेन मन्त्रेण प्रकाश्यत इति द्रष्टव्यम् । तच्च फलं यजमानगाम्येव, ऋत्विक्फलस्योपस्थानाद्यप्रयोज्यत्वेन तत्प्रकाशने तदङ्गत्वानुपपत्तेः । तस्य यजमानादाशास्यत्वेनाग्निं प्रत्यनाशास्यत्वाच्च । न च यजमानफलमेवाध्वर्युणाऽऽशास्यतां, 'मे' इति 'अगन्म' इत्यध्वर्य्वप्रकाशकत्वेन लिङ्गविरोधात् । अतो याजमाना एवैते । अत एव यत्र नैतादृशं लिङ्गं तत्राध्वर्यवा एव ॥ ६ ॥

(७)—द्व्याम्नातेषूभौ द्व्याम्नानस्यार्थवत्त्वात्॥१७

ये मन्त्रास्सामान्यत आध्वर्यवसमाख्याते काण्डे समाम्नाताः पुनश्च याजमानेऽपि विशेषतस्समाख्यायन्ते, यथा आज्यग्रहणमन्त्रास्स्रुग्व्यूहनमन्त्राश्च, ते तावत् सत्यप्यभ्यासे प्रत्यभिज्ञायमानत्वात् विध्यभावाच्चाभिन्नाः । अतस्तत्र गुणभूतकर्तृद्वयस्य विकल्पः । विशेषसमाख्याबलाद्वा यजमान एव कर्ता । आज्यग्रहणस्रुग्व्यूहनादेर्वा निस्सन्दिग्धमाध्वर्यवत्वात्तदङ्गभूता मन्त्रा अपि तत्कर्तृका एव । न चैवं द्विःपाठवैयर्थ्यं, एकत्र स्वरूपज्ञानमन्यत्र विनियोग इत्येवं सार्थक्यादित्येवं प्राप्ते—

एकपाठेनैवोभयसिद्धौ द्वितीयस्य वैयर्थ्यापत्तेस्तस्योच्चारणान्तरविधायित्वावगतेस्तस्य च समाख्यान्तरेण कर्त्रन्तरसिद्धिः । उच्चारणान्तरप्रयोजनं तत्क्रियाप्रत्यवेक्षणमिति नादृष्टकल्पनाऽपि । यद्यपि च तत् नियमेन यजमानस्य न प्राप्तं, तथाऽपि द्विःपाठबलादेव तत्कल्पनमिति न दोषः । यत्र तु नैवंविधं प्रयोजनं कर्तृभेदो वा सम्भवी यथा "अयं सहस्रमानवः" इत्यस्यामौद्गात्र एव प्रगीताप्रगीतभेदेन समाम्नातायां, तत्रागत्याऽभ्युदयशिरस्कत्वं परिकल्प्योत्पत्तिविनियोगपरत्वेन सार्थक्यमिति विशेषः ॥ ७ ॥

(८)–ज्ञाते च वचनं न ह्यविद्वान् विहितोऽस्ति॥

वाजपेयादौ यत्र "क्लृप्तीर्यजमानं वाचयति" इति श्रुतं, तत्र याजमानो मन्त्रः, वाचनमाध्वर्यवमित्यविवादम्। परं तु वाचयतेः ब्रह्मचारिणो गायत्र्युपदेशादौ शिक्षणवाचित्वेन क्लृप्ततया प्रकृतेऽपि शिक्षणविधायित्वावगतेस्तस्य चादृष्टार्थत्वप्रसक्तेन ज्ञातर्यसम्भवादुक्तविधाज्ञानुरोधेनाज्ञ एव वाजपेयादावधिकारी। अतोऽन्येषां क्रतूनामध्ययनविधिसिद्धज्ञानोपजीवनेन ज्ञात्रधिकारिकत्वेऽपि वाजपेयादौ तदसम्भवादज्ञस्यैव वाचनमिति प्राप्ते—

वाचयतेर्वचनानुकूलव्यापारमात्रवाचित्वेन क्वचिदन्यथाऽनुपपत्त्या शिक्षणग्रहणेऽपि स्मारणमात्रग्रहणेनापि प्रकृते वाचनोपपत्तेरज्ञानाक्षेपकत्वे प्रमाणाभावात् तज्ज्ञ एव वाचनम्। तत्र खण्डशो वा, इमं मन्त्रं ब्रूहि इत्येवं वेत्यन्यदेतत्॥ ८॥

(९)–याजमाने समाख्यानात्कर्माणि याजमानं स्युः॥ १९॥ अध्वर्युर्वा तदर्थो हि न्यायपूर्वं समाख्यानम्॥ २०॥

दर्शपूर्णमासयोः "वत्समुपावसृजति" इत्यादीनि चतुर्विंशतिकर्माण्याध्वर्यवसमाख्यायुक्तानि प्रत्येकं भिन्नदेशे विधाय पुनस्तान्येव याजमानसमाख्यायुक्तानि "वत्सं चोपावसृजति उखां चाधिश्रयति" इत्याद्युक्त्वा "एतानि वै द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि सम्पाद्य यजेत" इति श्रुतम्। तदेषां ह्याम्नातमन्त्रवदुभयकर्तृकत्वं तावन्न सम्भवत्यदृष्टार्थतापत्तेः। न चाभ्यासात्कर्मान्तरं, अन्यपरत्वात्। अत एवैककर्तृकत्वावश्यंभावे विशेषसमाख्यानाद्याजमानत्वे प्राप्ते—

नैषां याजमानकाण्डे विधानं, आध्वर्यवे भिन्नदेशे विहितानामेव द्वयोर्मिथःप्रत्यासन्नत्वाख्यद्वन्द्वतारूपगुणविधानार्थमनुवादात्। अतः पदार्थेषु तावदध्वर्युरेव कर्ता। न च द्वन्द्वतायामेव यजमानश्शङ्क्यः, अन्येन क्रियमाणानामन्येन द्वन्द्वतायास्सम्पादयितुमशक्यत्वात्। द्वन्द्वता नाम एकया वत्सोपावसर्जनक्रियया धेनुवत्सयोः प्रत्यासन्नत्वसम्पादनम्। एकया चावहननक्रिययोलूखलमुसलयोः। एवं द्वादशसु क्रियासु द्रष्टव्यम्। न च तत्कर्त्रनुरोधेन प्रधानभूतपदार्थानां कर्तृबाधः, अङ्गगुणविरोधन्यायेन[1] तदसम्भवात्। न च "तानि सम्पाद्य यजेत" इति क्त्वाप्रत्ययबलेनैव द्वन्द्वताया यागसमानकर्तृकत्वावगतेर्वचनादेवाङ्गनिष्ठादपि पदार्थेषु समाख्याबाध इति वाच्यं, क्त्वाप्रत्ययस्य प्रयोजकत्वेनाप्युपपत्तेः प्रधानसमाख्याबाधकत्वानुपपत्तेः। एवं द्वन्द्वतानिष्ठसमाख्याऽपि प्रयोजकत्वाभिप्रायेणैव व्याख्येया। अतस्स्मारणमात्रं याजमानं पदार्थास्त्वाध्वर्यवा एव ॥ ९ ॥

(१०)–विप्रतिषेधे करणः समवायविशेषादितरमन्यस्तेषां यतोऽविशेषस्स्यात् ॥ २१ ॥

दैक्षे पशौ यूपपरिव्याणे आध्वर्यवः करणमन्त्रः "परिवीरसि" इत्ययं श्रुतः। तथा "युवा सुवासाः" इत्ययं क्रियमाणानुवादी हौत्रोऽपि। तौ च द्वावपि "यूपाय परिव्लीयमाणायानुब्रूहि" इति प्रैषवशादेतदुत्तरपाठाच्चैतत्प्रैषाव्यवहितोत्तरक्षणे एककालीनौ, साङ्गपरिव्याणभावनाकरणैस्समानकालीनत्वाच्च क्रियमाणानुवादित्वाविरोधश्च। सोमविकृतौ च कौण्डपायिनामयने तथैव प्राप्तौ। तत्र च "यो होता सोऽध्वर्युः" इति श्रुतम्। त-

[1] १२-२-९.

स्य च सत्रत्वात् सत्रे चानतिप्रयुक्तवरणजन्यहोतृत्वाध्वर्युत्वादे-रानत्यभावेनाभावात् "यो होता" इत्यत्र होत्रध्वर्युपदाभ्यां त-त्कार्यलक्षणया कार्यद्वयेऽप्येककर्तृकत्वं विधीयते। अतश्चैपदेशि-कैककर्तृकत्वबलेन प्राकृतैककालकत्वबाधात् प्रथमतः करणमन्त्रः पश्चादपर इत्याद्यः पक्षः। होतृत्वादेरध्यवसायमात्रनिमित्तकत्वस्य स्थापितत्वात् सत्रेऽपि तत्सम्भवेन पदद्वये कार्यलक्षणायां प्रमा-णाभावात् जघन्य एवाध्वर्युपदे तल्लक्षणामङ्गीकृत्याध्वर्यवपदार्था-नां होतृसंस्कारकत्वेन विधानम्। अप्राकृतकार्यकारित्वापत्तेः हो-तृपदे कर्मत्वलक्षणापत्तेश्च होतैव वा तत्कर्तृत्वेन विधीयते। त-थाऽपि तु "परिधौ पशुं नियुञ्जीत" इत्यत्र परिधित्वाविरोधे-नैव होतृत्वाविरोधेनैव कर्तृत्वविधानात् हौत्रः क्रियमाणानुवा-द्येव तेन प्रयोक्तव्यः। अपरस्तु तेन कालान्तरे/ अन्येन वा त-त्पुरुषेण तस्मिन्नेव काले प्रयोक्तव्यः। इति प्राप्ते—

पुरोडाशकपालवदग्निपरिधानार्थस्यैव परिधेः पशुनियोजने विनियोगाद्युक्तं परिधिधर्माणां सत्वकत्वादीनां प्राबल्यम्। प्रकृ-ते त्वध्यवसायनिमित्तहोतृत्वेनैवाध्वर्यवे विनियोगाद्धोतृकार्यस्य प्रयोजकत्वकल्पने प्रमाणाभावादाध्वर्यवस्य करणस्यैव प्रत्यक्ष-वाक्यावगतशेषित्वेन प्राबल्यान्नातिदेशिकसमाख्याप्रमाणकक्रिय-माणानुवादिनः प्राथम्यम्। न वा कालान्तरे तस्य होत्रा पाठः। "स उ श्रेयान् भवति" इति लिङ्गावगतक्रियमाणानुवादित्वबा-धापत्तेः। नापि करणमन्त्राव्यवहितोत्तरक्षणे होत्रा तस्य पाठः "यूपाय" इत्यादिप्रैषे होतुः कर्तृत्वेन प्रैषार्थे तदसम्भवात्। अतस्तस्मिंस्तत्काल एव होतृपुरुषोऽन्यः कश्चिदन्तरङ्गोऽध्वर्यादिः कर्ता। तस्य कार्यान्तरव्यापृतौ तु बहिरङ्गोऽपि ॥ १० ॥

(११)—प्रैषेषु च पराधिकारात् ॥ २२ ॥

"प्रोक्षणीरासादय" इत्यादयः प्रैषाः, प्रैषार्थाश्च प्रोक्षण्यासादनादयस्समाख्यानादध्वर्युणैवैकेन कर्तव्याः। न च स्वस्मिन् स्वस्य प्रैषानुपपत्तिः "चेतो वृथा खिद्यसे" इत्यादाविव स्वस्मिन्नपि स्वस्योपदेशासम्भवात्। वस्तुतो नैवायं प्रैषः अपि तु "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" इति चकारेण लोटोऽपि प्राप्तकालतायां विधानात्प्राप्तकालतायामयं लोट्। प्रोक्षण्यासादनस्य प्राप्तः काल इति। युष्मदर्थको मध्यमपुरुषस्तु साधुत्वार्थः। अथवा हे प्रोक्षण्यासादन तव प्राप्तः काल इति क्रियायां चेतनत्वाध्यारोपेण सः। यत्र तु 'अग्नीदग्नीन् विहर' इत्येवं प्रैषस्तत्रास्तु सम्बोधनानुरोधेन प्रैषार्थस्याग्नीध्रकर्तृकत्वम्। वस्तुतस्तु हे अग्नीत् ममाग्निविहरणस्य प्राप्तः कालः इति व्याख्यातुं शक्यत्वात् न तत्रापि समाख्याबाध इति प्राप्ते

समाख्यानुरोधेन मध्यमपुरुषस्य साधुत्वेन क्रियायां चैतन्याध्यारोपेण व्याख्याने प्रमाणाभावात्सम्बोधनमध्यमयोश्चादृष्टार्थत्वापत्तेः प्रैषत्वसमाख्याबाधापत्तेश्च प्राप्तकालार्थकत्वानुपपत्तेः प्रैषस्यापि स्वस्मिन्नौपचारिकत्वापत्त्या एकत्राध्वर्युसमाख्याबाधेनोभयोर्भिन्नकर्तृकत्वमेव ॥ ११ ॥

(१२)–अध्वर्युस्तु दर्शनात् ॥ २३ ॥ गौणो वा कर्मसामान्यात् ॥ २४ ॥

तत्रापि बहुषु प्रधानभूतेषु प्रैषार्थेषु समाख्याबाधे प्रमाणाभावादेकस्मिन् "प्रोक्षणीरासादय" इत्यादिप्रैष एवाध्वर्युबाधेनान्यकर्तृकत्वम्। अत एव "तिर्यञ्चं स्फ्यं धारयित्वा सम्प्रैषमाह यद्यन्वञ्चं धारयेत् स्फ्यो वज्रेणाध्वर्युं क्षिण्वीत" इति धारयितुर्भिन्नमध्वर्युं दर्शयतीति प्राप्ते—

प्रैषार्थेष्वन्यकर्तृकत्वेऽपि प्रयोजकत्वेनाप्यध्वर्योः कर्तृत्वोपपत्तेस्समाख्यायाः कुत्राप्यबाधात् प्रैषार्थान् अन्य एव कुर्यात्। प्रैषोच्चारणं त्वध्वर्युः। स च सोमादावसति विशेषवचने प्रतिप्रस्थात्रादिस्तत्पुरुषः। दर्शादौ त्वाग्नीध्र एव, कर्मकरत्वेन याज्ञिकप्रसिद्धत्वादिति ध्येयम्। यत्तु लिङ्गं, तत् यद्यध्वर्युरन्वञ्चं धारयेत् तदा स्फ्यस्तं क्षिण्वीतेत्यर्थेऽपि बाधकाभावात् धारणप्रैषयोराध्वर्यवत्वेऽप्युपपन्नम्। स्फ्यधारणमपि कल्पसूत्रेष्वाध्वर्यवमेव प्रसिद्धमित्यत्रत्यवार्तिकं प्रौढिवादः ॥ १२ ॥

(१३)—ऋत्विक्फलं करणेष्वर्थवत्त्वात् ॥ २५ ॥ स्वामिनो वा तदर्थत्वात् ॥ २६ ॥ लिङ्गदर्शनाच्च ॥ २७ ॥

ये इतिकरणेन तृतीयया वा विनियुक्ताः करणमन्त्रास्तेषां मान्त्रवर्णिकक्रियाजन्यफलकत्वं, न तु "आयुर्दा अग्ने" इत्यादिवत् प्रधानफलानुवादकत्वमित्युक्तं कौस्तुभे[1]।

तदत्र "ममाग्ने वर्चो विहवेष्विति पूर्वमग्निं परिगृह्णाति" इत्यादावग्रयन्वाधानक्रिया तावदाध्वर्यवी, मन्त्रलिङ्गवशेन प्रधानभूतक्रियायां समाख्याप्राप्तकर्तृबाधानुपपत्तेः। न च याजमानेन मन्त्रेणाध्वर्युगतक्रियाप्रकाशनं, "वयं त्वेन्धानाः" इति मन्त्रलिङ्गेन क्रियासमानकर्तृकत्वस्य मन्त्रे प्रतीतेः। अतश्च मन्त्रक्रिययोरुभयोरप्याध्वर्यवत्वात्फलमपि वर्चःप्रभृति तद्गतमेव, अन्यथा "ममाग्ने" इति "मह्यं नमन्तां" इत्यादिमन्त्रलिङ्गविरोधापत्तेः। न च साङ्गप्रधानविधायिफलवाक्यगतात्मनेपदानुरोधेनाङ्गफलानामपि स्वर्गका-

---

[1] मन्त्राधिकरणे.

मकर्तृकत्वावगतेर्यजमानगामित्वमिति वाच्यं, श्रुतस्याप्यात्मनेपदस्य सावकाशतया तेन कल्पितस्यापि लैङ्गिकस्याध्वर्युवृत्तित्वस्य बाधानुपपत्तेः। न चात्मनेपदार्थस्यैतद्विषये बाधे विधेरप्रयन्वाधानविषयेऽनुष्ठापकत्वस्यापि बाधापत्तिः, प्रमाणाभावात्। अतोऽग्निसंस्कारार्थानुष्ठापितक्रियाजन्यानुषङ्गिकफलस्य कत्वनुपकारिणोऽप्याध्वर्यवत्वेऽपि न काचित्क्षतिरिति प्राप्ते—

"यां कां चन यज्ञे ऋत्विज आशिषमाशासते यजमानस्यैव सा" इत्यनन्यथासिद्धलिङ्गानुगृहीतात्मनेपदश्रुत्या यजमानगामित्वावगतेरेतल्लिङ्गबलादेव च यत्र नात्मनेपदश्रवणं यथा 'जुहुयात्' इत्यादौ तत्रापि यजमानगामित्वम्। अतश्च तदनुरोधेन "मम" इति मम यजमानस्येत्येवं व्याख्येयम्। 'मह्यं' इत्यादौ तु अस्मच्छब्देन यजमान एवोपचारादभिधीयत इति न दोषः॥

प्रयोजनं सत्रेऽग्न्यन्वाधानाभावादूहानूहरूपप्रयोजनासम्भवेऽप्यर्थानुसन्धानविशेषरूपं द्रष्टव्यम्॥ १३॥

(१४)—कर्मार्थे तु फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात्॥ २८॥

यत्र तु "मा मा सन्ताप्त" इत्यादौ इतिकरणविनियुक्त एवासन्तापनादिरूपं फलं ऋत्विग्गामित्वेऽपि क्रतुविरोधिसन्तापनिवर्तकतया तदुपयोगि तत्र "यजमानस्य सा" इति षष्ठ्याः परम्परयाऽप्युपपत्तेर्लिङ्गानुरोधात् ऋत्विग्गाम्येव॥ १४॥

(१५)—व्यपदेशाच्च॥ ९२॥

एवं यत्रापि "तन्नौ सह" इत्यादौ द्विवचनाद्यनुपपत्तिस्तत्रापि ऋत्विग्गामित्वम्॥ १५॥

(१६)—द्रव्यसंस्कारः प्रकरणाविशेषात्सर्वकर्मणाम् ॥ ३० ॥ निर्देशात्तु विकृतावपूर्वस्यानधिकारः ॥ ३१ ॥

बर्हिर्धर्माणां प्रकृतावङ्गप्रधानसाधारण्यमुक्तम्[1]। अतश्च दैक्षपशावपि "बर्हिषा यूपावटमवस्तृणाति" इति विहिते यूपावटस्तरणबर्हिष्यपि दार्शिका बर्हिर्धर्मा भवेयुरिति प्राप्ते—

प्रकृतौ "बर्हिषि हवींष्यासादयति" इति वचनादङ्गप्रधानसाधारणहविरासादनार्थ एव बर्हिषि धर्माः, न कार्यमात्रार्थे इत्युत्तराधिकरणे वक्ष्यते। यद्यपि वा परिभोजनीयादिवत् प्राकृतकार्यमात्रार्थत्वं स्यात्, तथाऽपि नाप्राकृतकार्ये यूपावटस्तरणार्थे बर्हिषि भवेयुः, उपकारपृष्ठभावेनैव पदार्थानामतिदेशेन विकृतावप्राकृतकार्यकारित्वकल्पनानुपपत्तेः। न हि प्रकृतौ येन केन चित्सम्बन्धेनापूर्वसम्बन्धिबर्हिष्ट्वमुद्देश्यतावच्छेदकं, येनाप्राकृतस्यापि तत्सम्बन्धाद्धर्मग्राहकत्वं शङ्क्येत, सम्बन्धविशेषग्राहकप्रमाणबलेन तावद्विशेषाणामेव प्रवशेनानुपस्थितसामान्यस्योद्देश्यतावच्छेदककोटावप्रवेशात्। न च तथाऽपि यूपावटस्तरणभावनाया धर्माकाङ्क्षायामेव फलचमसन्यायेन[2] धर्मग्राहकत्वं, लौकिकधर्मग्रहणेनापि आकाङ्क्षानिवृत्तौ उपदेशातिदेशयोरभावात्। फलचमसे तु स्थानापत्त्या भक्षानुवादबलाच्चातिदेशकल्पनमिति विशेषः ॥ १६ ॥

(१७)—विरोधे च श्रुतिविशेषादव्यक्तश्शेषे ॥ ३२

प्रकृतावपि न समन्त्रकबर्हिर्लवनादिधर्माणां प्रकृत्यपूर्वसम्बन्धिबर्हिर्मात्रार्थत्वं, अपि तु हविरासादनार्थबर्हिरर्थत्वमेव। अत एव

---

[1] ३-७-१ अधिकरणे. [2] ३-५-१२.

पवित्रविधृत्यादिबर्हिषि नैते संस्काराः। "त्रिधा तु पञ्चधा तु वा बर्हिर्लुनाति" इति विहितलवनसंस्कृतस्य बर्हिषस्तथैव सन्नद्धस्यासादितस्य "त्रिधा तु पञ्चधा तु वा बर्हिस्स्तृणाति" इति वचनेन सर्वस्यैव स्तरणे विनियोगात्। अमन्त्रकलवनमात्रसंस्कृतस्य परिभोजनीयबर्हिषः प्राकृततादितरसर्वकार्यार्थत्वेन तत एव पवित्रादिकरणोपपत्तेः ॥ १७ ॥

(१८)—अपनयस्त्वेकदेशस्य विद्यमानसंयोगात् ॥ ३३ ॥

सोमे "पुरोडाशशकलमैन्द्रवायवपात्रे प्रास्यति, आमिक्षां मैत्रावरुणपात्रे, धाना आश्विनपात्रे" इति श्रुतम्। तत्र शकलपदस्योत्तरार्धादिपदवदेकदेशवाचित्वेन स्वतन्त्रपुरोडाशाक्षेपकत्वाप्रसक्तेः प्रातस्सवनिकसवनीयपुरोडाशावयवपरत्वं तावन्निर्विवादम्। आमिक्षादौ तु तदभावात् "पयसा मैत्रावरुणं श्रीणाति" इतिवत् लौकिकामिक्षादिग्राहकत्वेनोपपत्तौ क्लृप्तप्रतिपत्तिबाधेन सवनीयगततद्ग्राहकत्वे प्रमाणाभाव इति प्राप्ते—

द्वितीयया प्रासनस्यामिक्षादिप्रतिपत्तित्वावगमात् तदंशे औपदेशिक्या तथा आतिदेशिकप्रतिपत्तिबाधोपपत्तेः प्रातस्सवनिकसवनीयसम्बन्धिनामेव पुरोडाशादीनां ग्रहणम् ॥ १८ ॥

(१९)—विकृतौ सर्वार्थश्शेषः प्रकृतिवत् ॥ ३४ ॥ मुख्यार्थो वाऽङ्गस्याचोदितत्वात् ॥

अनारभ्य "यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्याः" इति श्रुतमुपांशुत्वं प्रधानवदङ्गेष्वपि मन्त्रोच्चारणसत्त्वात्

काम्यशब्दस्य च कामप्रयोजकत्वेनाङ्गेष्वपि प्रयोगोपपत्तेः, जनकत्वमात्रपरत्वेऽपि चोद्देश्येष्टिविशेषणत्वेनाविवक्षितत्वादिष्टीनामेवाविवक्षितत्वे सोमेऽपि तदापत्तेः साङ्गेष्ट्यङ्गमिति प्राप्ते—

अङ्गेषु क्वचिदपि काम्यशब्दप्रयोगाभावात् जनकत्वसम्बन्धेन प्रधानमात्रपरत्वावगतेः काम्यत्वेष्टित्वोभयपरामर्शकतच्छब्दस्य चोद्देश्यपरत्वेनोभयविवक्षोपपत्तेः प्रकृतौ प्राकरणिकत्रैस्वर्यावरोधे निवेशासम्भवेऽपि काम्यविकृतीष्टिप्रधानमात्रे निवेशः। न ह्यत्र "उच्चैः प्रवर्ग्येण" "अप्स्ववभृथेन" इत्यादिवत् करणविभक्तिनिर्देशः, येन साङ्गस्य भवेत्। तव्यप्रत्ययेन कर्मत्वाभिधानात्तु प्रधानमात्र एव निवेशः ॥ १९ ॥

(२०)—सन्निधानविशेषादसम्भवे तदङ्गानाम् ॥

श्येने "दृतिनवनीतमाज्यं भवति" इति श्रुतं दृतिनवनीतं प्रकरणाच्छ्येनप्रधानाङ्गम्। न ह्यत्राज्यानुवादेन दृत्यधिकरणकनवनीतप्रकृतिविधिः, आज्यस्य नवनीतप्रकृतिकत्वस्य प्राप्तत्वात्/ तदनुवादेन दृत्यधिकरणत्वविधावेकप्रसरताभङ्गापत्तेश्च। अतो बहुव्रीहिसमासार्थ एवैको दृत्यधिकरणकनवनीतप्रकृतिकं सन्निधानाच्छ्येने द्रव्यतया विधीयते। आज्यपदं तु तस्यैव नवनीतप्रकृतिकत्वादनुवादः अन्यपदार्थतात्पर्यग्राहकं चेति नानेकविधेयता। अत एव श्येनोप्याज्यद्रव्यकत्वादुपांशुयाजविकार एव। गमकान्तरसत्त्वे तु सोमप्रत्याम्नायमात्रमाज्यमिति प्राप्ते—

विशिष्टविधिगौरवाद्यापत्तेरतिदेशप्राप्ताज्योद्देश्यपरत्वमेवाज्यशब्दस्याङ्गीकृत्य तदुद्देशेन दृत्यधिकरणकनवनीतप्रकृतिकत्वमेव प्रयोगान्तःपातितया विधीयते। आज्यं चाङ्गेष्वेव प्राप्तमिति तन्मात्रविषयता ।

यत्तु दृतिनवनीतपदस्य तत्पुरुषत्वमङ्गीकृत्य दृत्यधिकरणकनवनीतमेवाज्यपदलक्षिततत्कार्योद्देशेन द्रव्यतया पकृततत्पाज्यप्रत्याम्नायत्वेन विधीयत इति न्यायसुधाकृतोक्तं, तत् आज्यपदे साम्प्रतिकलक्षणापत्तेस्तदपेक्षयाऽनुशासनिकनिरूढलक्षणापदकबहुव्रीह्यङ्गीकारस्यैव न्याय्यत्वादुपेक्षितम्। यदि तु किञ्चिद्भ्रमकान्तरं भवेत् तदा तदेवास्तु ॥ २० ॥

(२१)–आधानेऽपि तथेति चेत् ॥ ३७ ॥ नाप्रकरणत्वादङ्गस्य तन्निमित्तत्वात् ॥ ३८ ॥

सर्वत्र धर्माणां अनारभ्याधीतप्राकरणिकसाधारण्येनापूर्वोपकारक एवान्वयात्पवमानेष्ट्याधानादीनामपि च श्येनापूर्वोपकारकत्वात् तत्रापि दृतिनवनीतमिति प्राप्ते—

यदुपकारकता वैधप्रमाणप्रमिता तदुपकारक एव धर्माणां निवेशः। न तु अर्थसमाजग्रस्तोपकारकत्वेऽपि, श्येनोपकारकयजमानाज्यभोजनादावपि दृतिनवनीतत्वापत्तेः। न चाधानादेश्श्येनोपकारकत्वं शास्त्रे प्रमितम्, अग्निमात्रार्थत्वस्यैव तत्प्रमितत्वात्। अतश्श्येनप्रयोगवर्तितदुपकारकाज्य एव तन्निवेशः ॥ २१ ॥

(२२)–तत्काले वा लिङ्गदर्शनात् ॥ ३९ ॥ सर्वेषां वाऽविशेषात् ॥ ४० ॥ न्यायोक्ते लिङ्गदर्शनम् ॥ ४१ ॥

एवं चेत्सुत्याकाल एव श्येनवैशेषिकाणां "सहपशूनालभते" इत्यादीनां दर्शनात् दृतिनवनीतत्वस्यापि सुत्याकालाङ्गाज्य एव निवेश इति प्राप्ते—

सामान्यतोदृष्टेन वाक्यसङ्कोचायोगात्सर्वार्थत्वम् । न हि-पशुसाहित्यस्यापि तुल्यकालत्वे श्येनाङ्गत्वं प्रयोजकं, अपि तु प्रधानप्रत्यासत्तितुल्यकालोत्कर्षवाक्याबाधरूपहेतुत्रयम् । न चात्र तदस्ति । अतस्सर्वार्थतैव ॥ २२ ॥

(२३)—मांसं तु सवनीयानां चोदनाविशेषात् ॥ ४२ ॥ भक्तिरसन्निधावन्याय्येति चेत् ॥ ४३ ॥ स्यात्प्रकृतिलिङ्गाद्वैराजवत् ॥ ४४ ॥

षट्त्रिंशदाब्दिके शाक्त्यानामयनाख्ये सत्रे "संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति तत्र यान् मृगान् हन्ति तेषां तरसास्सवनीयाः पुरोडाशा भवन्ति" इति श्रुतं मांसं "भवन्ति" इति विधिभावनाप्रत्यासन्नत्वात्पुरोडाशस्य तदुद्देशेनैव विधीयते । विधेरेव हि प्रवर्तनार्थं भावनाभाव्यसाकाङ्क्षत्वम् । अतस्तत्प्रत्यासन्नस्यैव तदुचितं, न सवनीयानाम् । यदा तु "पुरोडाशास्सवनीयाः" इति भवदेवाद्धृतः पाठस्तदा प्राथमिकत्वाद्विधेयतरसप्रत्यासन्नत्वाच्च पुरोडाशकार्यस्यैवोद्देश्यत्वं स्पष्टमेव । न च पुरोडाशस्य सवनीयपदेन विशेषणं, विशिष्टोद्देशापत्तेः । अतस्सर्वपुरोडाशकार्ये तरसं विधीयते । सवनीयपदं तु सवनीयासवनीयपुरोडाशमात्रे गौणं लाक्षणिकं वा । अतः पुरोडाशमात्रस्थाने तरसं, न धानादिस्थाने इति प्राप्ते—

सवनीयपदवत्पुरोडाशपदेऽपि कार्यलक्षणापत्तेः प्राथमिकसवनीयपदमेव सवनीययागोद्देश्यतापरम् । प्रथमायास्तु द्वितीयार्थे लक्षणोभयवादिसिद्धैव । अतस्सवनीययागोद्देशेनैव धानादिपञ्चकबाधेन तरसं विधीयते । पुरोडाशपदं त्वेकं जघन्यं च

पुरोडाशवत्त्वसम्बन्धेन सवनीययागेषु लाक्षणिकमनुवादः । इ- ष्टश्च "पुरोडाशानलंकुरु" इत्यादौ पुरोडाशशब्दस्सवनीयसम्ब- न्धिहविःपर इति तस्य सवनीययागलक्षकत्वं सुकरमेव ॥

तदेवं श्रुत्यादिषट्प्रमाणकमङ्गत्वं निरूपितम् । अतः परं प्र- योज्यत्वं निरूपयिष्यते ॥ २३ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
तृतीयस्याध्यायस्याष्टमः पादः.
अध्यायश्च समाप्तः.

अथ चतुर्थाध्यायस्य प्रथमः पादः.

(१)–अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ॥ १ ॥

एवं सिद्धे शेषिनिरूपिते शेषत्वे प्रयोजकनिरूपितं प्रयो- ज्यत्वमिदानीं निरूप्यते । तच्च परोद्देशप्रवृत्तकृतिव्याप्यत्वम् । कृतिव्याप्यत्वं चानुष्ठाप्यत्वरूपं कालादिव्यावृत्तं वाजपेयाधिक- रणे[1] कौस्तुभ एवोपपादितम् । अतश्च कालादेः कृतिकारकत्व- घटिताङ्गत्वसत्त्वेऽपि प्रयोज्यत्वाभावः, अङ्गत्वाच्च प्रयोज्यत्वस्य भेदः । तेन यदुद्देशप्रवृत्तकृतिव्याप्यत्वं यस्य तत् तत्प्रयोज्यं, यथा दध्यानयनप्रयाजादि आमिक्षादर्शपूर्णमासादेः । यन्निष्ठकृति- व्याप्यतानिरूपितोद्देश्यताशालि यत् तत् तस्य प्रयोजकं, यथा आमिक्षादर्शादि दध्यानयनादेः । उद्देश्यता चात्रानुपादेयपञ्चक-

[1] १-४-६.

साधारणी ग्राह्या, तेन कालनिमित्तादेः प्रयोजकत्वाविघातः। यद्यपि विधिरेव सर्वत्रानुष्ठापकः प्रवर्तनारूपत्वात्। प्रवर्तनारूपो हि विधिः इष्टसाधनत्वमिव कृतिसाध्यत्वापरपर्यायं प्रयोज्यत्वमपि विषयस्याक्षिपतीति भवति प्रयोजकः, तथाऽपि स्व यदुद्देशेन प्रयोजयति तस्यापि प्रयोजकत्वव्यवहारश्शास्त्रे। अत्र च यद्यपि न प्रयोज्यत्वावच्छेदेन तन्निरूपणं प्रति शेषत्वनिरूपणस्य हेतुत्वं, निमित्ताद्यङ्गत्वाभावेऽपि नैमित्तिकस्य तत्प्रयोज्यत्वेनाङ्गत्वे व्यापकत्वस्येव, पुरोडाशकपालादेस्तुषोपवापं प्रति कारकत्वेनाङ्गत्वसत्त्वेऽपि तत्प्रयोज्यत्वाभावेन व्याप्यत्वस्याप्यभावात्। अतो * नावच्छेदकावच्छेदेन हेतुहेतुमद्भावः, तथाऽपि क्वचिद्ध्यानयनादिनिष्ठप्रयोज्यत्वनिरूपणे तन्निष्ठशेषत्वनिरूपणस्य उपयोगात्सामानाधिकरण्येन तन्निरूपणं प्रत्यङ्गत्वानिरूपणस्य हेतुत्वात्सङ्गत्युपपत्तिः। अत्र प्रयोज्यत्वं क्वचित् क्रत्वर्थपुरुषार्थविचारद्वारेण क्वचिदन्यद्वारेण निरूप्यते क्वचित्साक्षादेवेति प्रयोज्यत्वमेवाध्यायार्थः। क्रत्वर्थपुरुषार्थत्वं तु तृतीयसिद्धमप्युदाहरणविशेषनिष्ठतया प्रयोज्यत्वसिद्ध्यर्थं विचार्यत इति विवेकः ॥ १ ॥

(२)—यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्सार्थलक्षणाविभक्तत्वात् ॥ २ ॥

वक्ष्यमाणयोः क्रत्वर्थपुरुषार्थयोर्लक्षणमुच्यते। तत्र तन्त्ररत्ने तावत् स्वयंप्रार्थितसाध्याधीनानुष्ठानं पुरुषार्थः। तदुपका-

---

* पुरोडाशकपालादेस्तुषोपवापं प्रति कारकत्वेनाङ्गत्वसत्त्वेऽपि तत्प्रयोज्यत्वाभावात्, निमित्ताद्यङ्गत्वाभावेऽपि नैमित्तिकस्य तत्प्रयोज्यत्वाच्च। अत उभयतो व्यभिचारादेव '' निमित्त '' इत्यारभ्य '' अतः'' इत्यन्ते ग्रन्थे पाठान्तरमिदम्.

रकं क्रत्वर्थ इत्युक्तम् । तन्न । फले काम्यकालादौ "न क-
लञ्जं भक्षयेत्" इति निषेधेषु चाव्याप्त्यापत्तेः, अनुष्ठेयत्वाभा-
वात्, निषेधेषु स्वयंप्रार्थितसाध्याप्रसिद्धेश्च । क्रत्वर्थलक्षणस्य आ-
धानादावतिव्याप्तेश्च ।

यदपि शास्त्रदीपिकायां इतिकर्तव्यतात्वेनान्वितत्वं क्रत्व-
र्थत्वं तद्भिन्नत्वं करणफलवृत्तिपुरुषार्थत्वमित्युक्तम् । तदपि
न, क्रत्वर्थनिषेधानामक्रियात्वेनानितिकर्तव्यतात्वेन तेष्वव्याप्तेः,
आधानाध्ययनयोरुभयभिन्नत्वस्य तन्त्ररत्ने त्वदुक्तत्वेन तत्र
पुरुषार्थलक्षणस्यातिव्याप्तेश्च । तस्मात् स्वयंप्रार्थितवृत्त्युद्देश्य-
तानिरूपितविधेयताकत्वं पुरुषार्थत्वम् । स्वयंप्रार्थितत्वं च
शास्त्रानधीनेष्टसाधनताज्ञानजन्येच्छाविषयत्वं, स्वर्गपश्वादौ हीष्ट-
साधनता न शास्त्रगम्या । इदंच स्वर्गस्य देशविशेषरूपत्वे । सु-
खविशेषरूपत्वे तु शास्त्राधीनेष्टसाधनताज्ञानाजन्येच्छाविषयत्वं
ष्यम् । यागक्रतूपकारादौ तु सा शास्त्रगम्येति ते न स्वयंप्रा-
ाः, स्वर्गादयश्च तथा । अतः तदुद्देशेन विधीयमानयागादिर्भवति
षार्थः । फलस्य पुरुषार्थत्वव्यवहारो भाक्त इत्युक्तमेव "फलं
व पुरुषार्थत्वात्" इत्यत्र । उद्देश्यताविधेयत्वे च स्वरूपसम्बन्धरूप-
विषयताविशेषात्मके लक्षणघटके, न तु साध्यत्वानुष्ठेयत्वात्मके ।
तेन निषेधस्थले नरकाभावोद्देशेन निवृत्तिविधानात्फलोद्देशेन
च कालविधानान्नाव्याप्तिः । पुरुषार्थेष्वभ्यनुज्ञाविधिषु च दोषाभा-
वोद्देशेन तत्तत्क्रियाविधानान्नाव्याप्तिः । एवं च स्वयंप्रार्थित-
भिन्नवृत्त्युद्देश्यतानिरूपितविधेयताकत्वमेवेह क्रत्वर्थत्वम् । क्रतुशा-
ब्दो ह्यस्मिन् प्रकरणे स्वयमप्रार्थितपरः । तेनाधानाध्ययनयोः
ज्योतिष्टोमाद्यर्थत्वाभावेऽपि तादृशान्नचर्थत्वज्ञानार्थत्वात्क्रत्वर्थत्वो-
पपत्तिः । क्रत्वर्थनिषेधेषु चोक्तविधया क्रतुवैगुण्यपरिहारोद्देशेन

मिवृत्तेर्विधेयत्वान्नाव्याप्तिः "नातिरात्रे" इत्यादौ च क्रतुसाद्गुण्यस्याङ्गान्तरजन्यत्वेऽपि षोडशिग्रहणाभावं प्रत्युद्देश्यत्वाविघातान्न सा। एवं क्रत्वर्थाभ्यनुज्ञाविधिष्वपीति सर्वं समञ्जसम् ॥

यद्वा—नानेन लक्षणकरणम्। अपि तु—फलस्यापीतरांशवत् भावनाविशेषणत्वाद्विधेयत्वम्। न ह्यन्यांशयोरपि विशेषणत्वातिरिक्तं विधेयत्वम्। यदि तु विशिष्टभावनाविधावर्थादितरांशयोर्विधिरुच्येत तत् फलस्याप्यविशिष्टमिति प्राप्ते—

विशिष्टभावनाविधाने आर्थिकविशेषणविधेरावश्यकत्वात् तस्य च यदंशेऽप्राप्तिस्तदंश एव कल्पनात् फलस्य च रागप्राप्तत्वेन तत्कल्पने प्रमाणाभावादविधेयत्वम् ॥

प्रयोजनं—पूर्वपक्षे श्येनफलस्याभिचारस्य विधेयत्वान्निषेधाविषयत्वम्। सिद्धान्ते तु रागप्राप्तत्वात् "न हिंस्यात्" इति निषेधविषयत्वम्। न च हिंसाशब्दस्य मरणानुकूलव्यापारवाचित्वात्तस्य च वैरिमरणाख्याभिचारफलकश्येनरूपस्य विहितत्वात्कथं निषेधविषयत्वमिति वाच्यं, "अभिचरन् यजेत" इति सामानाधिकरण्यात् श्येनसमानकर्तृकत्वावगतेः अभिचारपदस्य मरणानुकूलश्येनकर्तृनिष्ठविषदानादिरूपव्यापारवाचित्वावगतेस्तस्यैव श्येनफलत्वावसायात् रागप्राप्तस्य निषेधविषयत्वोपपत्तेः। एवं चावश्यं श्येनेन विषदानाद्युत्पत्तिः तेन वैरिमरणं, न तु श्येनेनैव साक्षादिति ध्येयम्। यत्तु—वैरिनिष्ठो मरणानुकूलव्यापार एवाभिचारपदार्थः तत्र च यजमानस्य श्येनद्वारा प्रयोजककर्तृत्वमिति तस्य निषेधाविषयत्वेऽपि यजमानस्य पापोत्पत्तिरिति केनचिदुक्तम्, तच्छयेनस्यैव प्रयोजकव्यापारत्वात्तस्य च विहितत्वात् तत्कर्तृत्वेन यजमाने पापोत्पत्त्यनुपपत्तेरुपेक्षितम्।

यत्र तु "वैरिमरणकामो यजेत" इति श्रुतं तत्र वैरिमरणानुकूलकर्तृनिष्ठलौकिकव्यापाराभावेऽपि वैरिमरणरूपपरानिष्टचिन्तनादेव पापमिति ध्येयम्। अभिचारार्थकर्मणस्तामसधर्मत्वस्मरणाद्वा तथा। प्रकृतेऽपि तथैवास्तु॥

यद्वा—गोदोहनादीनां षष्ठीश्रुत्या पुरुषार्थत्वावगमेऽपि प्रकरणात्क्रत्वङ्गत्वं; इतरथा प्रणयनस्य चमसलोपेनाङ्गाभावाद्वैगुण्यापत्त्या विगुणप्रणयनाश्रिताद्गुणादपि फलानुपपत्तेः। अत उपजीव्यत्वाद्दुर्बलमपि प्रकरणं विनियोजकम्। अथवा षष्ठी सम्बन्धमात्रवाचिनी हीषादिन्यायेन[1] सर्वकामवाक्यप्राप्तपशुप्रयोजकप्रणयनजनकत्वसम्बन्धेनैव प्रकरणानुरोधेन पशूद्देशेन गोदोहनं विधीयते। न तु साक्षादिति प्राप्ते—

दुर्बलप्रकरणानुरोधेन परम्परासम्बन्धाङ्गीकारे प्रमाणाभावात् हीषादिवन्नियमविधिलाघवाभावाच्च साक्षादेवोद्देश्यत्वं पशूनाम्। प्रणयनवैगुण्यस्य च परप्रयुक्तगोदोहनजन्योपकारमात्रोपजीवनेन प्रणयनस्य तत्प्रयोगेऽनङ्गचमसाग्राहितयाऽनाशङ्क्यत्वात्पुरुषार्थत्वमेव तस्येति पशुप्रयुक्तमेव गोदोहनमिति स्वतन्त्रपशुकामनायामेव तत्कर्तव्यम्॥

यत्तु भाष्यकारादिभिः "ब्राह्मणः प्रतिग्रहादिना द्रव्यमार्जयेत् जयादिना राजन्यः" इत्यादिविधिमुदाहृत्यानारभ्याधीतस्यापि प्रतिग्रहादिनियमस्य फलकल्पनाभिया क्रत्वर्थत्वावसायात् तादृशविशिष्टोपायार्जितं द्रव्यमपि सर्वं क्रत्वर्थमेव। अत एवाव्यभिचरितहिरण्यादिसम्बन्धात्तन्नाशे इष्ट्यादीनामपि क्रत्वर्थत्वसिद्धिरिति पूर्वपक्षयित्वा श्रुत्याद्यभावाददृष्टकल्पनस्य क्रत्वर्थत्व-

[1] ३-२-१३.

पक्षेऽपि तुल्यत्वान्नियमस्य क्रत्वर्थत्वानुपपत्तेः आर्जनस्य राग-प्राप्तत्वेनाविधेयत्वात्तदार्जितद्रव्यस्य दृष्टार्थत्वाद्विहिताविहितसा-धारणपुरुषकृत्यमात्रशेषत्वमेव । इतरथा जीवनलोपात् सर्वतन्त्र-परिलोपापत्तेः । किञ्च द्रव्यार्जनरूपाङ्गोपक्रमेणै सर्वक्रतूनामुपक्र-मात् "यो दर्शपूर्णमासयाजी सन् अमावास्यां वा पौर्णमासीं वाऽतिपातयेत्" इत्यनारम्भरूपातिपातदर्शनानुपपत्तिः । अत आ-र्जनं तावत्पुरुषार्थं, नियमोऽप्यदृष्टार्थत्वेऽपि पुरुषार्थ एव । एवं क्षामवत्यादयोपि पुरुषार्था एव, क्रत्वर्थत्वे प्रमाणाभावादिति सि-द्धान्तितम्, तत् प्रतिग्रहनियमस्य फलकल्पनाभयात्क्रत्वर्थत्वे हिर-ण्यधारणादेरपि क्रत्वर्थत्वापत्तेस्तेन गतार्थत्वाच्चोपेक्षितम् । किञ्च नियमस्य क्रत्वर्थत्वेन भूतवननादिवत् तदार्जितद्रव्यस्य क्रत्व-र्थत्वेऽपि भोजनाद्यर्थमनियतद्रव्योपायाक्षेपप्रतिबन्धे प्रमाणाभा-वान्न सर्वस्य द्रव्यस्य क्षामवत्यादीनां वा क्रत्वङ्गता । अत एव सिद्धान्ते जीवनलोपापादनमसङ्गतम् । किञ्च अस्तु वा तत् त-थाऽप्यतिपातनस्यानारम्भरूपत्वे प्रमाणाभावात् यागाकरणस्यास-मापनस्यैवातिपातनत्वाङ्गीकारेण तद्दर्शनोपपत्तिः । अनारम्भरूप-त्वेऽपि वा द्रव्यार्जनस्य प्रयोगबहिर्भूताङ्गत्वाङ्गीकारेण प्रयोगा-न्तःपातेऽपि भूतिवननप्रयाजादिवदेव प्रतिप्रयोगावृत्त्यङ्गीकारेणाति-पातदर्शने न काचिदनुपपत्तिः ।

वस्तुतस्तु नायं प्रतिग्रहादिर्नियमावधिः, फलकल्पनापत्तेः, "प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वारयेत्" इति तस्य पापजन-कत्वश्रुतेश्च । नापि प्रतिग्रहाद्यतिरिक्तोपायान्तरपरिसङ्ख्या, चौ-र्यादीनां सर्वसाधारणप्रतिषेधेनैव परिसङ्ख्यातत्वात्, सिलो-ञ्छदायादीनां मुख्यवृत्तित्वेन परिसङ्ख्यानुपपत्तेश्च, जयवाणि-ज्यादीनां ब्राह्मणपुरस्कारेण आपद्वृत्तित्वविधानादेवानापदि प्र-

तिषेधाच्च । अतो ब्राह्मणस्य प्रतिग्रहविधिः दायसिलोञ्छाद्यसंम्भवे दोषाभावमात्रबोधकतयाऽभ्यनुज्ञाविधिरेव । दायसिलोञ्छादीनां तु निषिद्धत्वाभावात् मुख्यवृत्तित्वमेव । सोऽपि च "त्रीणि कर्माणि जीविका" इत्यादिवचनात्प्रकरणाद्यभावाच्च पुरुषार्थः ।

"न्यायागतेन द्रव्येण कुर्यात्कर्माणि वै द्विजः ।
अन्यायोपगतं द्रव्यं गृहीत्वा यो ह्यपण्डितः ।
धर्माकाङ्क्षी तु यजते न धर्मफलमश्नुते ॥"

इत्यादिवचनैस्तु मुख्यगौणसाधारणवृत्त्युपायानामधिकारितारतम्येन क्रत्वर्थत्वस्यापि बोधनात् संयोगपृथक्त्वन्यायेनोभयार्थत्वेऽपि न दोषः । यदि तु सिलोञ्छादेः क्वचित्फलश्रवणं भवेत्, तदा जीवनाश्रितयावज्जीवसिलोञ्छनियमस्यैव फलजनकत्वं बोध्यं, न तु प्रतिग्रहस्येति व्यर्थोऽयं विचारः, कृत्वाचिन्तात्वेन वा बोध्यः ॥ २ ॥

(३)—तदुत्सर्गे कर्माणि पुरुषार्थाय, शास्त्रस्यानतिशङ्क्यत्वात् न च द्रव्यं चिकीर्ष्यते तेनार्थेनाभिसम्बन्धात्क्रियायां पुरुषश्रुतिः ॥ ३ ॥ अविशेषात्तु शास्त्रस्य यथाश्रुति फलानि स्युः ॥ ४ ॥ अपि वा कारणाग्रहणे तदर्थमर्थस्यानभिसम्बन्धात् ॥ ५ ॥ तथा च लोकभूतेषु ॥ ६ ॥

"तस्य व्रतं" इत्युपक्रम्य स्नातकपुरस्कारेण
"नेक्षेतोद्यन्तमादित्यं नास्तंयन्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम्"

इत्यादि प्रजापतिव्रतं श्रुतम् । तत्रापि भाष्यकारादिभिः प्रतिषेधत्वे पर्युदासत्वे चोभयथाऽपि फलकल्पनाभिया क्रत्वर्थत्वमाशङ्क्य अनारभ्याधीतत्वात् श्रुत्याद्यभावेन क्रत्वर्थत्वानुपपत्तेः पर्युदासत्वमङ्गीकृत्य पुरुषार्थत्वं सिद्धान्तितम् । तदपि कळञ्जभक्षणप्रतिषेधहिरण्यधारणन्यायेन [1] क्रत्वर्थत्वशङ्कानुपपत्तेरुपेक्षितम् ।

विचारस्त्वेवमेवात्र कर्तव्यः । किमयं प्रतिषेधः पर्युदासो वेति । सिद्धान्ते आर्थवादिकफलप्रयुक्तत्वात् प्रतिषेधपक्षे च तदभावादध्यायसङ्गतिः । तत्र नञः प्रधानान्वयस्याभ्यर्हितत्वाद्भावनान्वयव्युत्पत्तेर्धात्वर्थाद्यन्वयस्य लक्षणादिभियाऽनुपपत्तेः । पर्युदासत्वायोगाद्रागप्राप्तोद्यदादित्येक्षणभावनायाः प्रतिषेध एवायं पुरुषार्थः कळञ्जभक्षणादिप्रतिषेधवत् । अतश्च निषेधेनेक्षणस्यानिष्टसाधनत्वाक्षेपेऽपि फलान्तराकाङ्क्षाभावात् "नैतावता हैनसा युक्तो भवति" इत्यार्थवादिकपापक्षयफलकल्पनानुपपत्तेः नार्थवादिकफलप्रयुक्तत्वम् । अर्थवादस्त्वीक्षणजन्यप्रत्यवायाभाव[2]बोधनद्वारा ईक्षणनिन्देति प्राप्ते—

"तस्य व्रतं" इति व्रतशब्देनोपक्रमस्थेनानुष्ठेयक्रियाप्रतिपादनात् तदनुरोधेनोपसंहारस्थो निषेधोऽप्यनुष्ठेयामेव क्रियां विधत्ते । अत एव नञीक्षतिभ्यामीक्षणाभावसङ्कल्परूपक्रियैव लक्षणया विधीयते । मानससङ्कल्पस्य प्रवृत्तिनिवृत्त्यविनाभूतत्वात् ईक्षतिरेव वा लक्षकः नञ्पदं तात्पर्यग्राहकम् ।

नचैवमुद्यदादित्यस्य पदार्थैकदेशे ईक्षणे अन्वयापत्तिः, कारकाणां प्रथमतो भावनान्वयस्यैव स्वीकारेणैकदेशान्वयाप्रसक्तेः । यन्मते हि सोमादीनां प्रथमत एव धात्वर्थेऽन्वयस्तन्मत एवेदं दूष-

---

[1] ३-४-१२. [2] वायात्पाप.

णं न त्वसम्मते । अतोऽनीप्सितकर्मत्वेन सक्तुवल्लक्षितकरणत्वेनैव वा भावनान्वयः । पार्ष्ठिकान्वये तु समस्तपदघटितवाक्यस्यैव कल्पनान्न कोपि दोषः । अतश्चोद्यदादित्येक्षणाभावसङ्कल्पभावनैवोद्ये निमित्ते विधीयते । णमुलादिवत् शतृप्रत्ययेन निमित्तत्वाभिधानात्, तत्फलं चार्थवादिकमघक्षयः । अतस्सिद्धं भावनातिरिक्ते नञस्सम्बन्धात्पर्युदासः स च फलप्रयुक्त इति । नन्वेवमपि नञः भेदवद्वाचित्वस्य "तदन्यताद्विरुद्धतदभावेषु नञ्" इति प्रसिद्धेरुद्यत्पदेनैव सम्बन्धाङ्गीकारादुद्यद्भिन्नादित्येक्षणस्यैवाघक्षयफलकत्वेन विधानोपपत्तेर्न सङ्कल्पलक्षणा । न च सुबन्तसम्बन्धे नञ्समासापत्तिः, नानुयाजेष्वितिवदुपपत्तेः । न च नञः आदित्यपदेन वा सम्बन्धः उद्यत्पदेन वेत्यत्र विनिगमकाभावः, विशेषसाकाङ्क्षत्वस्यैव विनिगमकस्य सत्त्वादिति चेत्—तथात्वेऽपि उद्यन्तमिति सुबन्तपदस्य निपातान्वयव्युत्पत्त्यभावेन उद्यद्भिन्नेऽपि पदद्वयलक्षणाया आवश्यकत्वात् । तथात्वे स्वभावेनैव तादृशादित्येक्षणस्य सर्वदा जायमानत्वेनाघक्षयोपपत्तेर्विधिवैफल्याच्च । स्वरसतः प्रतीयमाननिषेधस्य सङ्कल्पलक्षणयाऽप्यपरित्यागेन भवदुक्तपर्युदासानुपपत्तेश्च । अस्मिन्नुदाहरणे तथाऽङ्गीकारेऽपि "न वारिस्थं" इत्यत्र "एकादश्यां न भुञ्जीत" इत्यादौ च सङ्कल्पलक्षणाया आवश्यकत्वाच्च ॥

प्रयोजनं स्पष्टमेव । सूत्राण्यप्यस्मिन्नेव विचारे सुधीभिर्योज्यानि ॥ ३ ॥

(४)—द्रव्याणि त्वविशेषेणानर्थक्यात्प्रदीयेरन् ॥ ७ ॥ स्वेन त्वर्थेन सम्बन्धो द्रव्याणां पृथ-

गर्थत्वात् तस्माद्यथाश्रुति स्युः ॥ ८ ॥ चो-द्यन्ते चार्थकथासु ॥ ९ ॥ लिङ्गदर्शनाच्च ॥

"स्फ्यश्च" इत्याद्युपक्रमस्य श्रुतस्य यज्ञायुधवाक्यस्य तृतीये[1] उदाहृतस्यैव साक्षात्प्रधानभूताग्नेयाद्युद्देशेन, उत्पत्तिवाक्या-विहितद्रव्यकोपांशुयाजोद्देशेनैव वा स्फ्यादिद्रव्यविधायकत्वं, इतरथा समस्तवाक्यवैयर्थ्यापत्तेः, यज्ञशब्दस्य तत्साधनोद्धननादि-लक्षकत्वापत्तेश्च। तस्मादुद्धननादिवाक्यैस्स्फ्यादीनामुद्धननाद्यर्थ-त्वेऽप्याज्येन सह विकल्पेनोपांशुयाजार्थत्वमपीति प्राप्ते—

सम्भरणविध्येकवाक्यत्वादस्य तदर्थवादत्वेनाप्युपपत्तेरन-न्यशेषभूतेन "सर्वस्मै वै" इति वाक्येन विहितस्याज्यस्य पाक्षिकत्वापादकत्वानुपपत्तेः, उद्धननादिक्रियाभेदेऽपि च दशत्वस्य सम्भरणरूपैकक्रियासम्बन्धादेवोपपत्तेरायुधशब्दस्य च प्रयो-जकत्वमात्रलक्षणयाऽप्युपपत्तौ साधनत्वलक्षकत्वाभावात् यज्ञश-ब्देऽपि तदनापत्तेर्नैतस्य स्फ्यादिविधायकत्वम्। तदेतदर्थवाद-त्वस्य तृतीयसिद्धत्वेन पूर्वपक्षोत्थानाभावेऽपि शिष्यहितार्थमुक्त-मिति द्रष्टव्यम्।

यत्त्वत्र भाष्यकारादिभिर्लिङ्गमुक्तं स्फ्याद्याकारस्य द्रव्यवदा-नेन विकलत्वात् पूर्वपक्षे परिधानीये कर्मणि "आहिताग्निमग्नि-भिर्दहन्ति यज्ञपात्रैश्च" इति यज्ञपात्रकरणकदाहानुपपत्तिरिति, तत् पूर्वपक्षे उद्धननाद्यर्थपात्राणां पृथक्सत्त्वात् तेषां च यज्ञ-साधनत्वाभावेऽप्यायुधशब्दाभावेन प्रयोजकतयैव यज्ञपात्रत्वोप-पत्त्या दाहोपपत्तेरुपेक्षणीयम् ॥ ४ ॥

---

[1] ३-१-५.

(५)—तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात् ॥ ११ ॥ एकश्रुतित्वाच्च ॥ १२ ॥ प्रतीयत इति चेत् ॥ १३ ॥ नाशब्दं तत्प्रमाणत्वात्पूर्ववत् ॥ १४ ॥ शब्दवत्तूपलक्ष्यते तदागमे हि तद्दृश्यते तस्य ज्ञानं हि यथाऽन्येषाम् ॥ १५ ॥ तद्वच्च लिङ्गदर्शनम् ॥ १६ ॥

"पशुना यजेत" इत्यादौ यत्रोपादेयपश्वादिगता सङ्ख्या विभक्त्युपात्ता, सा किं विवक्षिता न वेति चिन्तायां "सत्त्वप्रधानानि नामानि" इति स्मृत्या प्रातिपदिकार्थपश्वादेर्विभक्त्युपात्तसङ्ख्याविशेष्यत्वरूपसत्त्वसमाख्यया विभक्त्युपात्तसङ्ख्यायाः प्रातिपदिकार्थं प्रति पदश्रुत्या योग्यतारूपलिङ्गेन च विशेषणत्वावगमात् वाक्यीयक्रियान्वयानुपपत्तेः तदभावेऽपि क्रियाया अवैगुण्याच्च विवक्षिता सङ्ख्या । न चैकत्वादेः पश्वन्वयेऽपि तद्विशिष्टस्यैव पशोः कारकान्वयद्वारा क्रियासम्बन्धाल्लोहितोष्णीषादिवत् पशुविशेषणस्यापि विवक्षोपपत्तिः, सङ्ख्याकरणत्वयोर्विभक्त्या युगपदुपादानेन सङ्ख्यायाः प्रथमतः पश्वन्वयमभिधाय पश्चाद्विशिष्टस्य पशोः कारकान्वयाभिधाने विरम्यव्यापारापत्तेः ।

न च त्वयाऽपि सङ्ख्यायाः पदश्रुत्या पश्वन्वयाङ्गीकारात् युगपदन्वयद्वयशाब्दबोधस्य विरुद्धत्वात्प्रथमतश्शुद्धस्य पशोः कारकान्वयमङ्गीकृत्य पश्चात्सङ्ख्यायाः पश्वन्वयाङ्गीकारे तवापि विरम्यव्यापारापत्तिरिति वाच्यम्, तथाऽपि भावनान्वितकारकविशेषणविशेषणस्यासमस्तपदस्थले भावनान्वयव्युत्पत्त्यभावेनाविवक्षोपपत्तेः । इतरथाऽऽरुण्यस्याप्यनुशासनिकमत्वर्थलक्ष-

णयैकहायनीं प्रत्येव विशेषणत्वोपपत्तौ प्रथमतः क्रियान्वयमभ्युपगम्य पाष्ठिकैकहायनीसम्बन्धसिद्धान्तभङ्गापत्तेः। अत्र च लौहित्यादेर्भावनान्वितकारकविशेषणविशेषणत्वेऽपि समस्तपदत्वान्न क्षतिः। वारवन्तीयादेस्तु क्त्वाशब्दोक्तभावनायामेवान्वय इति न काचित्क्षतिः। अत एव सोमारुण्यादीनामपि न प्राथमिको धात्वर्थान्वयः। अपि तु भावनान्वय एवेत्युक्तं तत्र तत्र।

किञ्च न प्रत्ययार्थस्यैकत्वस्य प्रकृत्यर्थं पशुं प्रति प्रकारता, प्रत्ययार्थप्राधान्यभङ्गापत्तेः, अपि तु पशोरेव करणत्वं प्रतीव एकत्वं प्रत्यपि प्रकारता। अतश्चैकत्वस्य, करणत्ववत् विधेयभावनायामप्रकारत्वादविवक्षेति प्राप्ते—

पशोः करणत्व एवान्वयो न त्वेकत्वेऽपि प्रमाणाभावात्। अतश्च पशोस्तद्द्वारा भावनान्वयवत् सङ्ख्याया अपि बलीयस्या समानाभिधानश्रुत्या आधेयत्वेन सामानाधिकरण्येन वा प्रथमतः कारकान्वयस्यैवाङ्गीकारात् पश्चाच्च पदश्रुत्यादिना आधेयत्वसम्बन्धेन पश्वन्वयोपपत्तेर्निरुक्तव्युत्पत्त्यैव भावनासम्बन्धित्वाद्विवक्षितत्वम्। न चैवं "यदि सोममपहरेयुरेकां गां दक्षिणां दद्यात्" इत्यादावेकपदवैयर्थ्यं 'गां' इत्यनेनैवैकत्वविधानोपपत्तेरिति वाच्यम्, एकत्वविधिवत् गोत्वविधेरपि प्राप्तदक्षिणानुवादेन "धेनुर्दक्षिणा" इतिवद्विशिष्टकारकान्तरविधानेनापत्तौ द्वादशशतसङ्ख्यावत्सामान्यविहिताश्वादीनामपि बाधप्रसङ्गात्तन्निवृत्त्या दानाश्रितस्यैकत्वस्यैव गौरुद्देशेन विधानार्थमेकग्रहणोपपत्तेः, अतो विवक्षितैव सङ्ख्या। अत एव "कर्णा याम्याः, अवलिप्ता रौद्राः, नभोरूपाः पार्जन्यास्तेषामैन्द्राग्नो दशमः" इति दशमत्वदर्शनमुपपन्नम् ॥ ५ ॥

(६)–तथा च लिङ्गम् ॥ १७ ॥

भवतु सङ्ख्या शब्दार्थत्वाद्विवक्षिता। लिङ्गं तूपादेयगतम-प्यशब्दार्थत्वादविवक्षितम्। न हि तत् प्रातिपदिकार्थः, सिंहादिपदात्तदप्रतीतेः, तस्य लिङ्गत्रयसाधारण्येन लिङ्गविशेषव्यभिचाराच्च। नापि प्रत्ययार्थः, व्यभिचारादेव। नापि टाबादीनां सुब्विकाराणां "तस्माच्छसोनः पुंसि" इत्यादीनां, विलिङ्गे वृक्षादौ विपरीतलिङ्गे मक्षिकादौ च प्रयोगेण व्यभिचारादेव। अतश्शब्दानुशासनमात्रमेवेदं, न लिङ्गं नाम कस्यचिच्छब्दस्यार्थः इत्यविवक्षितमिति प्राप्ते—

सिंहस्सिंही इत्यादावनन्यथासिद्धलिङ्गप्रतीतेर्लिङ्गमपि क्वचित् टाबादीनां सुब्विकाराणां च क्वचिच्च तिसृचतस्रादिप्रातिपदिकविकाराणां वाच्यम्। अतश्च तत् क्वचित्सङ्ख्यावत् क्वचिच्च प्रातिपदिकार्थत्वेनैव विवक्षितम्। यत्र तु बाधस्तत्र साधुत्वार्थं तच्छब्दप्रयोगः ॥ ६ ॥

(७)–आश्रयिष्वविशेषेण भावोऽर्थः प्रतीयेत॥ १८ ॥ चोदनायां त्वनारम्भो विभक्तत्वान्न ह्यनेन विधीयते ॥ १९ ॥ स्याद्वा द्रव्यचिकीर्षायां भावोऽर्थे च गुणभूतताऽऽश्रयाद्धि गुणीभावः ॥ २० ॥

यजति जुहोतीति वा यत्र श्रुतं, तत्र यजेस्तावत् देवतोद्देशविशिष्टद्रव्यत्यागवाचित्वात् त्यागांशस्यादृष्टविधया आरादुपकारकत्वं, उद्देशांशस्य त्वदृष्टविधया तदुपकारकत्वमेव। अत

एवोद्देशाङ्गभूतदेवतायाः त्यागाङ्गभूतद्रव्यापेक्षया दुर्बलत्वम्। प्रक्षेपस्तु तत्र त्यागाङ्गद्रव्यसंस्कारक एव। जुहोतिस्थले तु तदङ्गमेव अदृष्टविधयर्थेतरौ। समप्रधानौ वा प्रक्षेपेण सह। अत एवोभयत्र मन्त्रस्तदङ्गभूतदेवताप्रकाशनार्थ एवेति स्थितिः। यत्र तु स्वाहाकारस्विष्टकृत्सूक्तवाकपशुपुरोडाशपिष्टलेपादिहोमवाजिनेज्यादौ परकीयं द्रव्यं देवता वा प्रक्षेपांशेनोद्देशांशेन मन्त्रेण वा संस्क्रियते, यथा स्वाहाकारसूक्तवाकपशुपुरोडाशादौ आग्नेयादिदेवताः मन्त्रदेवतोद्देशाभ्यां, स्विष्टकृति प्रक्षेपांशेन तदीयं द्रव्यं, मन्त्रेणैव तदीया देवताः, उद्देशांशस्य स्विष्टकृद्देवताकत्वात्, पिष्टलेपहोमादौ प्रक्षेपेण तदीयं द्रव्यमेव। सर्वत्र प्रमाणं तत्र तत्रोक्तं वक्ष्यते च। यस्तु तत्र त्यागांशः सोऽदृष्टार्थ एव। न च तस्य पदार्थैकदेशत्वान्निष्प्रयोजनत्वेऽपि न क्षतिः, विहितपदार्थान्यथाऽनुपपत्त्या तदवयवानामप्यर्थाद्विहितत्वेन प्रयोजनाकाङ्क्षोपपत्तेः। अतस्सोऽप्यदृष्टार्थ एव सन् फलवत्प्रक्षेपाद्यङ्गं तत्संस्कार्यद्रव्याद्यङ्गमेव वेति तत्संस्कार्यद्रव्यदेवतादावेव प्रोक्षणादिवददृष्टं जनयतीति सन्निपत्योपकारकस्तत्प्रयुक्तश्चेति प्राप्ते—

विशेष्यतया प्रतीतस्य त्यागांशस्य प्रक्षेपाद्यङ्गत्वे प्रमाणाभावात् देवतादेश्च दृष्टमात्रापेक्षत्वेनादृष्टोपकारानपेक्षत्वात् प्रकरणात्त्यागांशस्यारादुपकारकत्वमेव प्रयाजादिवत्। तत्र त्वेतावान् विशेषः, यत् परप्रयुक्तद्रव्यदेवतोपजीवित्वेन तत् परप्रयुक्तत्वभावे स्वातन्त्र्येण तत्तद्द्रव्यदेवताक्षेपकत्वम्। अत एवैककपालस्य सर्वहोमे स्विष्टकृद्यागस्य लोप एव, स्वोपकारकद्रव्यस्य नाशादिति निमित्ताभावेनाज्येनापि समापनायोगात्। चयनादावयागे वाचनिकप्रयाजादिविनियोगेऽपि च न स्वाहाकारयागः। प्रकृतौ तु द्रव्यनाशे "यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आ-

ज्येनैता देवताः परिसङ्ख्याय यजेत" इति वचनादाज्येन समापनम्। सन्निपत्योपकारकत्वे तु संस्कार्याभावादिडावल्लोप एवेति विशेषः ॥ ७ ॥

(८)—अर्थे समवैषम्यतो द्रव्यकर्मणाम् ॥ २१ ॥

एवं तावत्क्रत्वर्थपुरुषार्थविचारद्वारेण प्रयोजकत्वं चिन्तितम्। इदानीं तु साक्षादेव तच्चिन्त्यते। तत्सिद्ध्यर्थस्तु काचित्कोऽङ्गाङ्गिभावविचार इति सुखग्रहणार्थं प्रतिज्ञामात्रमिदम् ॥ ८

(९)—एकनिष्पत्तेस्सर्वं समं स्यात् ॥ २२ ॥ संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात् ॥ २३ ॥ मुख्यशब्दाभिसंस्तवाच्च ॥ २४ ॥

चातुर्मास्येषु प्रथमे पर्वणि "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति श्रुतम्। तत्र दध्यानयनस्य आमिक्षा वाजिनं चेत्युभयं प्रयोजकं उतामिक्षैवेति चिन्तायां—दध्यानयनवाक्ये तावत् तप्तपयोऽधिकरणकदध्यानयनमात्रं श्रुतं, न तु पयसो दध्नो वा प्राधान्यं, सप्तम्या प्राधान्यानभिधानात्। तथात्वे उद्देश्यविशेषणत्वेन तापस्याविवक्षापत्तेश्च।

न चानयतेर्द्विकर्मकत्वात् पयसो व्याप्यमानत्वेन दध्यपेक्षयाऽपि प्राधान्यावगतिः। द्विकर्मकधातुस्थले अधिकरणत्वादिकारकान्तराविवक्षायां सम्बन्धमात्रविवक्षायां च सम्बन्धसामान्ये षष्ठीप्राप्तौ "अकथितं च" इति कर्मसंज्ञाकरणात् द्वितीयाविधानावगतावपि प्राधान्ये प्रमाणाभावात्, प्रकृते सप्तमीश्रवणेनाधिकरणत्वविवक्षाऽवगतेर्द्वितीयकर्मप्रसक्त्यभावाच्च।

दध्नस्तूपयोगाभावादेव सक्तुवन्न प्राधान्यावगतिः। न ह्यामिक्षा नाम दधिपयोरूपा, रसघनीभावादिधर्मभेदेनार्थान्तरत्वात्। "तस्यै शृतं तस्यै दधि तस्या आमिक्षा तस्यै वाजिनम्" इति भेदेन व्यपदेशाच्च। "गोपयसोर्यत्" इति विकारवाचियत्प्रत्ययान्तपयस्याशब्दपर्यायत्वाच्च। "जुषन्तां युज्यं पयः" इति तु धान्यशब्दवद्विकारपरम्। अतश्च दध्यानयनस्य स्ववाक्ये उद्देश्याभावात्सामर्थ्येन दधिसंसृष्टपयोजन्यामिक्षार्थत्वाङ्गीकारे च जन्यत्वाविशेषेण वाजिनार्थत्वस्याप्यवगतेरुभयं प्रयोजकमिति प्राप्ते

"सा वैश्वदेवी" इति सर्वनाम्नः प्रकृतपरामर्शित्वात्पूर्ववाक्ये यत्प्राधान्येन निर्दिष्टं तदामिक्षेत्यवधार्यते न त्वर्थान्तरम्। रसश्च मधुराम्लरूपस्तयोरेवावधार्यत इति न ततोऽप्यर्थान्तरम्। घनीभावस्तु पीयूषादवदभेदेऽप्युपपन्न एव। पृथङ्निर्देशोऽप्यवस्थान्तरात्। विकारार्थकयत्प्रत्ययस्मृतिरपि तच्छब्दानुरोधेनावस्थापरैव। तस्मान्नामिक्षाऽर्थान्तरं, अपि तु दधि पयो वा, तत्रापि विशेषस्त्वष्टमे [1] अतिदेशविशेषसिद्ध्यर्थं निरूपयिष्यते। तत्सिद्धं स्ववाक्य एवामिक्षारूपोद्देशसम्बन्धित्वावगतेर्दध्यानयनं तत्प्रयुक्तमेव। न तु वाजिनप्रयुक्तं, तस्य तच्छब्दाद्यभावेनार्थान्तरत्वप्रतीतेः, तज्जन्यत्वेऽपि शेषित्वानवगमात्। अतश्च तस्यानुनिष्पन्नत्वात्तद्यागस्य स्विष्टकृदादिवदनुनिष्पन्नप्रतिपत्तित्वावगतेस्तदभावेऽपि च परप्रयुक्तदध्यानयनोपजीवित्वावगतेर्न तत्प्रयोजकत्वं वाजिनस्य कल्पनीयं गौरवप्रसङ्गात्॥

प्रयोजनं पूर्वपक्षे वाजिनयागस्यार्थकर्मत्वेन समप्राधान्यापत्तेरामिक्षायागविकारेऽनतिदेशः। सिद्धान्ते त्वनुनिष्पन्नप्रतिपत्तित्वेनामिक्षायागाङ्गत्वात्तद्विकारेऽतिदेशः।

[1] ८-२-४.

सोमेश्वरस्य तु सिद्धान्तेऽपि वाजिनयागेऽर्थकर्मत्वं वदतः आमिक्षायागाङ्गत्वानापत्तेस्तद्विकारेऽतिदेशो न सिद्ध्येत्। "अष्टौ हवींषि" इत्यस्य विनिगमनाविरहेणावयुत्यानुवादत्वस्य स्वमतेऽप्यापत्तेः।

यत्तु भाष्यकारादिभिः पूर्वपक्षे वाजिननाशे आमिक्षानाश इव पुनर्दध्यानयनेन वाजिनोत्पत्तिः, सिद्धान्ते तु आज्येन समापनमिति प्रयोजनमुक्तम्, तत् षष्ठे[1] हविर्नाशादिनिमित्ते आज्येन समापनस्य विधिबलेन वक्ष्यमाणत्वेन पूर्वपक्षेऽपि तुल्यत्वादुपेक्षितम् ॥ ९ ॥

(१०)—पदकर्माप्रयोजकं नयनस्य परार्थत्वात्॥

सोमक्रयार्थमेकहायनीं विधाय क्रयदेशे तन्नयने क्रियमाणे तस्याः षट्पदान्यनुनिष्क्रामति सप्तमं पदं स्फ्येन विलिखति हिरण्यमन्तर्धाय पदे जुहोति ततः सप्तमं पदमध्वर्युरञ्जलिना गृह्णाति "यर्हि हविर्धाने प्राची प्रवर्तयेयुः तर्हि तेनाक्षमुपाञ्ज्यात्" इति श्रुतम्। तत्राक्षाभ्यञ्जनमपि क्रयवदेकहायनीनयनस्य प्रयोजकं, जन्यत्ववदङ्गित्वस्याप्युभयत्र समत्वात्। अक्षाभ्यञ्जने हि तच्छब्देनैव पदपांसवो निर्दिष्टा इति ते तदङ्गम्। पदस्य चैकहायनीनिरूपितत्वं तस्यास्सप्तमं पदमित्यनुषङ्गात् शाखान्तरवचनाच्चावगतमिति साऽपि तदङ्गम्। अतश्च नीयमानसंस्कारार्थस्य नयनस्याप्युभयार्थत्वादुभयप्रयोज्यत्वम्। न च प्रकरणादेवैकहायनीलाभात्तच्छब्दस्यानुवादकत्वं, प्रकरणप्राप्तेः पूर्वप्रवृत्त्यङ्गीकारेण प्रयोजकत्वफलकाङ्गत्वविध्युपपत्तेः। न च तथाऽपि क्रयप्रयुक्तत्वविशिष्टैकहायन्या एव तच्छब्देन परामर्शात् पुरोडाशकपालन्यायाप-

[1] ६-४-१.

त्तिः,[1] तथात्वे फलाभावेन तच्छब्दवैयर्थ्यापत्तेः तस्यैकहायनी-स्वरूपमात्रपरत्वाङ्गीकारादिति प्राप्ते—

विधिगौरवप्रयोजकशक्तिकल्पनागौरवाभ्यां तच्छब्दस्य पूर्व-परामर्शित्वस्वभावेनोपजीव्यप्रकरणप्राप्तानुवादकत्वावगतेश्चैकहाय-न्याः क्रयमात्राङ्गत्वावसायात्तदङ्गभूतनयनस्यापि तन्मात्रार्थत्वप्र-तीतेरक्षाभ्यञ्जनं पदहोमादिकं वा क्रयप्रयुक्तैकहायनीतन्नयनला-भेन चरितार्थं नैकहायन्यास्तन्नयनस्य वा प्रयोजकम् । अतश्चै-कहायन्यां क्रयार्थं नीयमानायां दैवाद्ग्रावणि सप्तमपदपाते अ-क्षाभ्यञ्जनार्थं पुनर्न तदानयनम् । यथाशक्ति प्रयोगादौ क्रयलोपेऽ-पि वा नैकहायनीप्रयुक्तिः । अक्षाभ्यञ्जनार्थं तु येकेचित्पांसवो ग्राह्या एव, गुणलोपे मुख्यलोपानुपपत्तेः । होमस्त्वारादुपकार-कत्वाद्ग्रावण्येव । यथाशक्ति प्रयोगे त्वाहवनीये निर्ग्रन्थिकरणक एव वेत्यन्यदेतत् ॥ १० ॥

(११)–अर्थाभिधानकर्म च भविष्यता संयो-गस्य तन्निमित्तत्वात्तदर्थो हि विधीयते ॥

दर्शपूर्णमासयोः "पुरोडाशकपालेन तुषानुपवपति" इति श्रुतम् । तत्र कपालस्य "कपालेषु पुरोडाशं श्रपयति" इति श्रपणे विनियुक्तस्यापि तृतीयया तुषोपवापार्थत्वेनाप्यार्थिकवि-शेषणविधिना विनियोगादुभयप्रयुक्तत्वम् । न च पुरोडाशार्थ-कपालत्वेनैव तुषोपवापे विनियोगान्न तुषोपवापप्रयुक्तत्वं, प्रकृ-तिविकारभावाभावेन तादर्थ्यसमासायोगात् । षष्ठीसमासे च सम्बन्धमात्रावगतेस्तस्य च कपालत्वेनैव विनियोगेऽपि पुरोडा

[1] अव्यवहितोत्तराधिकरणेऽयं न्यायो द्रष्टव्यः.

शार्थोपात्तस्यैव प्रसङ्गेन ग्रहणोपपत्तेरनुवादत्वात् । यदि तु प्रसङ्गलक्षणाभावादुपादेयस्थले प्रकृतग्रहणस्य च "तानि द्वैधम्[1]" इत्यत्र निराकृतत्वान्न पुरोडाशकपालनियम इत्याशङ्क्येत, ततोऽस्तु नाम पुरोडाशसम्बन्धविशिष्टस्यैव विधानं, तत्फलं च तद्भिन्नकपालव्यावृत्तिरेव न त्वप्रयोजकत्वमपि, सम्बन्धरूपाङ्गाभावेऽप्यग्निहोत्रहवणीन्यायेन[2] प्रधानभूतकपालबाधानुपपत्तेः चर्वादौ तन्नियमाभावरूपस्याप्रयोजकत्वफलस्यासम्भवादिति प्राप्ते—

पुरोडाशसम्बन्धस्य प्रमाणान्तरगम्यस्यालोचने तत्प्रयुक्तत्वस्याप्यवगतेर्न पुनस्तुषोपवापविधिरपि तत्प्रयुङ्क्ते । अतो लाघवादवघातकालीनस्तुषोपवापः परप्रयुक्तकपालोपजीवितया न कपालोपादानासादनयोः प्रयोजकः । निनयनकालीनस्तु कपालधारणस्य प्रयोजको भवत्येव । उपादानस्य तु सोऽप्यप्रयोजकः ।

प्रयोजनं चर्वादौ न कपालनियमः । अग्निहोत्रहवण्यां तु वक्ष्यते ॥ ११ ॥

(१२)–पशावनालम्भाल्लोहितशकृतोरकर्मत्वम्॥

पशौ "शकृत्सम्प्रविध्यति लोहितं निरस्यति" इति श्रुतं निरसनं पश्वालम्भनस्य शकृल्लोहितस्यैव वा प्रयोजकम् । नहीदं तस्य प्रतिपत्तिः । हृदयादीनामेव हविष्ट्वेन तस्यानुपयुक्तत्वात् अपूर्वसाधनत्वाभावाच्च । अतश्चार्थकर्मैवेदं शकृल्लोहितस्य तावत्प्रयोजकम् । पश्वालम्भोऽपि च विशसनवाक्ये श्रुतः प्रयोजनाकाङ्क्षस्सन् हृद- 'रिव लोहितादेरपि पशुप्रकृतिकत्वमाक्षिपति । न हि हृद- तदुत्पत्तिवाक्याधीनं, तस्य तदभावे हविष्ट्वेनैव तद्विधायक- ''नस्तत्रत्यं पशुपदमपि देवतासम्बन्धासिद्ध्यर्थं वस्तु-

1. 2 १०-२-२६.

तोऽनुवाद एव। अस्तु वा उत्पत्तिवाक्यावगतं पशोर्यागसाधनत्वं विशसनवाक्यानुरोधाद्ववीरूपहृदयादिप्रकृतित्वरूपमेवेति विशसनवाक्यस्यापि तत्परत्वमेव। तथाऽपि निरसनस्यार्थकर्मत्वाज्ज्ञाघनीवल्लौकिकशकृल्लोहितप्रयोजकत्वे न किञ्चिद्बाधकमिति प्राप्ते—

द्वितीयया निरसनस्य प्रतिपत्तित्वावगमान्न लोहितादिप्रयोजकत्वं, अपितु उपयुक्तत्वाभावेऽपि चानुनिष्पन्नत्वेन प्रतिपत्तिसापेक्षत्वात् परम्परयाऽपूर्वसम्बन्धस्य सत्त्वेन चानर्थक्याभावात् प्रतिपत्तिकर्मत्वोपपत्तेः॥

प्रयोजनं पशुलोहिताद्यभावनाशयोस्तल्लोपः। प्रायश्चित्तं परं तल्लोपनिमित्तं भवत्येव। सोमेश्वरलिखितरक्षोभागत्वसत्त्वे तु त्यागांशस्याज्येन येनकेनचिद्वा द्रव्येण समापनं भवत्येवेति द्रष्टव्यम्॥ १२॥

(१३)—एकदेशद्रव्यश्चोत्पत्तौ विद्यमानसंयोगात्॥ २८॥ निर्देशात्तस्यान्यदर्थादिति चेत्॥ २९॥ न शेषसन्निधानात्॥ ३०॥ कर्मकार्यात्॥ ३१॥ लिङ्गदर्शनाच्च॥ ३२॥

यत्र "उत्तरार्धात्स्विष्टकृते समवद्यति" इत्यादौ न द्वितीयानिर्देशः तत्र तर्हि प्रतिपत्तित्वे प्रमाणाभावादपादानत्वेन श्रुतस्योत्तरार्धस्य यागं प्रति गुणत्वादुत्तरार्धस्य तावद्यागः प्रयोजको भवत्येव। तस्य च ससम्बन्धिकत्वेन स्वप्रतिसम्बन्धियत्किञ्चिदवयव्याक्षेपकत्वं सुलभमेव। न च प्रकृतपुरोडाशरूपावयविसत्त्वे न स्वतन्त्राक्षेपकत्वं। प्रकृतस्य स्वकार्ये सर्वस्य विनि-

युक्तत्वेनान्यत्र विनियोगायोगात् । न च तस्य प्रतिपत्तिसापेक्षत्वात्प्रक्षेपांशेनास्य प्रतिपत्तिकर्मत्वं शङ्क्यम्। प्रक्षेपांशस्याप्याग्नेयादिप्रक्षेपवत्स्वयागाङ्गत्वेनैव प्रयोजनानपेक्षत्वात्। उत्तरार्धस्यांशभेदेनापि गुणत्वप्रधानत्वयोरङ्गीकारे वैरूप्यप्रसङ्गाच्च। प्रधानमात्रत्वस्वीकारेऽपि लक्षणायास्तावदनिवारणाच्च। अतस्सिद्धं स्विष्टकृद्यागोऽर्थकर्मैव प्रयाजादिवत्सन् उत्तरार्धतदवयविनोः प्रयोजक इति प्राप्ते—

यद्यपि तावदर्थकर्मैव स्यात् तथाऽपि ससम्बन्धिकत्वात्प्रतिसम्बन्ध्यपेक्षायां यावत्प्रकृतप्रतिसम्बन्धिलाभस्तावन्नान्याक्षेपकत्वं गौरवात्। अस्ति च प्रकृते प्रतिपत्त्यपेक्षश्शेषः। अतस्तदुपजीवकत्वमेव। अत एव "शेषात्स्विष्टकृते" इत्यपि लिङ्गमुपपद्यते। एवं चोत्तरार्धस्य त्यागं प्रति गुणत्वेन विनियुक्तस्यापि प्रधानगतप्रतिपत्त्यपेक्षानुरोधेन वाक्यान्तरकल्पनया प्रक्षेपांशं प्रति प्राधान्येऽपि न क्षतिः। श्रुतयागविधिनाऽपि धारणप्रयोजकत्वकल्पनागौरवभिया तदनुमितेश्च । अत एवानुमितप्रतिपत्तेरेव धारणप्रयोजकत्वादिकल्पनादोषो "नानुमिते ह्यसौ" इति न्यायादनुमानस्य फलमुखत्वाच्च। अत एव "सर्वाणि हवींषि समवद्यति" इति लिङ्गमपि प्राधान्यादुपपन्नम्। अत एव स्विष्टकृत्प्रक्षेपोऽपि प्रधानाङ्गभूतस्तत्प्रयुक्त एव सन् स्विष्टकृद्यागस्याप्यङ्गं तत्प्रयुक्तश्च प्रतिपाद्यत्वाविशेषात् । अतस्स नावयविनो नोत्तरार्धस्य वा प्रयोजकः। आज्यप्रक्षेपस्य तु प्रयोजको भवत्येवेति सिद्धम् ॥ १३ ॥

(१४)—अभिघारणे विप्रकर्षादनुयाजवत्पात्रभेदस्स्यात् ॥ ३३ ॥ न वाऽपात्रत्वादपात्र-

त्वं त्वेकदेशत्वात् ॥ ३४ ॥ हेतुत्वाच्च सहप्रयोगस्य ॥ ३५ ॥ अभावदर्शनाच्च ॥ ३६ सति सव्यवचनम् ॥ ३७ ॥ न तस्येति चेत् ॥ ३८ ॥ स्यात्तस्य मुख्यत्वात् ॥ ३९ ॥

दर्शपूर्णमासयोः "प्रयाजशेषेण हवींष्यभिघारयति" इति श्रुतम्। तत्र प्रयाजशेषाभिघारणस्य तृतीयाद्वितीयाभ्यां उपयुक्तसंस्कारापेक्षया चोपयोक्ष्यमाणसंस्कारस्याभ्यर्हितत्वाद्धविस्संस्कारकत्वमेव, न तु प्रयाजशेषप्रतिपत्त्यर्थत्वं लक्षणाद्वयप्रसङ्गात्। न च हविस्संस्कारकत्वे अदृष्टकल्पनापत्तेरपेक्षितदृष्टरूपप्रतिपत्त्यर्थत्वलाभाय लक्षणाद्वयाङ्गीकरणमपि न दोषायेति मिश्रमतं युक्तं, निषादस्थपत्यधिकरण[1]न्यायेनादृष्टकल्पनादेः फलमुखत्वात्।

किञ्च द्वितीयायास्सप्तम्यर्थलक्षकत्वे हविषामभिघारणं प्रत्युपादेयत्वापत्तेस्तद्गतबहुत्वस्य विवक्षापत्तौ त्रिष्वेव करणापत्तिः। तथा च ग्रहैकत्वाधिकरणे तदविवक्षाभिधानं वार्तिककारीयं नोपपद्येत।

यत्तु अभिघारणं प्रत्याधारत्वेनान्वितानामपि हविषामाधारतानियमं प्रत्युद्देश्यत्वात्तद्विशेषणाविवक्षेति, तन्न श्रुताभिघारणं प्रत्युपादेयमात्रत्वेन विवक्षितत्वे आर्थिकाधारतानियमं प्रत्यपि त्रयाणामेवोद्देश्यतापत्तेः। किञ्च यदर्थो नियमाश्रयः तदर्थ एव नियम इति सर्वत्र क्लृप्तेराधारतानियमोऽप्यभिघारणनियमवत्तद्द्वारा प्रयाजेष्वेवोपयुज्येत। इतरथा पशुस्थजाघनीतुषोपवापादिवाक्येष्वपि करणतानियमस्य जाघनीप्रतिपत्त्यर्थत्वकपालसंस्कारकत्वापत्तेरेकत्वाविवक्षापत्तिः।

---

[1] ६-१-१२.

एतेन पदद्वयेऽपि लक्षणामङ्गीकृत्याधारतानियमोद्देश्यतामात्रेणैव हविस्सङ्ख्याविवक्षामुक्तवतो भट्टसोमेश्वरस्यापि मतं प्रत्युक्तम् ॥ यत्तु कैश्चित्तृतीयाया एव द्वितीयार्थे लक्षणामङ्गीकृत्याभिघारणस्योभयार्थत्वं विजातीयानेकोद्देश्यकत्वाच्च न वाक्यभेद इत्युक्तम्, तदपि न, निषादस्थपत्यधिकरणविरोधस्य तादवस्थ्यात्, श्रुतोद्देश्यसत्त्वे लाक्षणिकस्य तस्यान्याय्यत्वाच्च, न्याय्यत्वेऽपि वा श्रुतहवीरूपोद्देश्यसंस्कारस्यैव धारणप्रयोजकत्वापत्तेश्च।

किञ्च वैजात्यं न तावन्निमित्तफलादिवत्, उभयोरपीप्सितत्वाख्योद्देश्यत्वस्य समानत्वात्। अथ वैजात्याभावेऽपि साकाङ्क्षत्वादेव नानेकोद्देश्यता, तथात्वे गोदोहनादेरपि पशुप्रणयनाद्युभयोद्देश्यतापत्तेः। अतोऽभिघारणस्य केवलहविस्संस्कारार्थत्वान्नियनकालीनपुरोडाशकपालन्यायेन शेषोत्पादनाप्रयोजकत्वेऽपि धारणप्रयोजकत्वोपपत्तिः। अतश्च दैक्षे हृदयाद्यभिघारणार्थं वाजपेये च प्राजापत्यवपाभिघारणार्थं च धारणीय एव पात्रान्तरे प्रयाजशेषः। प्रकृतौ हि प्रयाजोत्तरं वपायागमात्रं कृत्वा कालान्तरे हृदयादियागः। वाजपेये च प्राजापत्यान् क्रतुपशूंश्च सहोपक्रम्य दशप्रयाजोत्तरं पर्यग्निकरणान्ते कृते प्राजापत्यानां वैकल्पिको ब्रह्मसामकाले उत्कर्षः। अतश्च पर्यग्निकरणोत्तरभाव्युत्तमप्रयाजशेषेण क्रतुपशुवपाभिघारणवत्कालान्तरभाविप्राजापत्यवपाभिघारणार्थमपि धार्यश्शेष इति प्राप्ते—

सत्यं प्रयाजशेषाभिघारणं हविस्संस्कारार्थमेव वाक्येन, तथाऽपि तु प्रयाजशेषस्य प्रतिपत्त्यपेक्षत्वात् तदनुरोधेन स्विष्टकृद्वदेव वाक्यान्तरकल्पनयाऽभिघारणस्यैव तत्प्रतिपत्त्यर्थत्वमङ्गीक्रियते। न च प्रयाजेषु सर्वहोमस्यैवापत्तेर्न प्रतिपत्त्यपेक्षा। आ-

र्थिकप्रतिपत्त्यन्तरविध्यभावेऽपि प्रयाजशेषकरणकाभिघारणविधिनैव द्वितीयतुषोपवापवद्धारणाक्षेपापत्त्या सर्वहोमानापत्तेः । न च स्विष्टकृद्वदिहांशभेदाभावादभिघारणस्य श्रौतेन हविरर्थत्वेनापेक्षामात्रप्रमाणकप्रतिपत्त्यर्थत्वबाधः, श्रौतविधेर्धारणाद्याक्षेपशक्तिकल्पनागौरवपरिहारार्थमेव फलमुखप्रतिपत्तिविधिकल्पनाऽनुमतेः । अत एव ज्ञानाद्याक्षेपशक्तिकल्पनागौरवपरिहारार्थमधिकारिसङ्कोचवत् सन्निहितहविस्सङ्कोचोपि न दोषाय । अत एव यत्र न प्रतिपत्तिः यथा द्वितीयतुषोपवापकपालादौ तत्र न तत्कल्पना । जाघन्यां तु वक्ष्यते । न चार्थिकप्रतिपत्तिविधेरपि धारणाक्षेपशक्तिकल्पनाऽऽवश्यकत्वे श्रौतविधेरेव तत्कल्पकत्वौचित्यमिति वाच्यम्, पूर्वाधिकरणवदेवानुमानिकतत्कल्पनस्यादोषत्वात् अनुमानस्य फलमुखत्वाच्च । अतश्च प्रतिपत्तिबलेनैवाक्षिप्तस्य धारणस्योपजीवनाद्विनिगमनाविरहेण सन्निहितसर्वहविष्षु अभिघारणोपपत्तावपि न कालान्तरीयहविरर्थे धारणमिति । अत एव प्राजापत्यवपानां ऋतुपशुभिस्सह करणपक्षे "सहपशूनालभते वपानामभिघृतत्वाय" इति लिङ्गं ब्रह्मसामकालीनत्वपक्षे तदभावं दर्शयति । स्पष्टं च "सव्या वा एतर्हि वपा यर्ह्यनभिघृता" इति रूक्षत्वाख्यं सव्यत्वं तस्मिन् पक्षे दर्शयति । न चाभिघारणान्तरेण रूक्षत्वनिवृत्तिः, तस्य तावन्मात्रानिवर्तकत्वेन रूक्षताया अनिवर्तनात् ॥१४

(१५)–समानयनं तु मुख्यं स्यात्, लिङ्गदर्शनात् ॥ ४० ॥ वचने हि हेत्वसामर्थ्ये ॥

दर्शपूर्णमासयोः प्रयाजार्थं जुह्वां चतुर्गृहीतं विधाय "अष्टावुपभृति गृह्णाति प्रयाजानूयाजेभ्यस्तत्" इति वचनेनौपभृतं विधाय पुनर्ध्रुवायां चतुर्गृहीतं विहितम् । तत्रैव च "अतिहा-

येडो बर्हिः प्रतिसमानयते जुह्वामौपभृतम्" इति श्रुतम्। तत्र किं प्रयाजास्समानयनस्य तत्संस्कृताज्यस्य च प्रयोजकास्तदर्थं चेदमुभयं उत ते अप्रयोजका अनूयाजा एव तु तयोः प्रयोजकास्तदर्थं चेदमुभयमिति चिन्तायां—"प्रयाजानूयाजेभ्यस्तत्" इति द्वन्द्वान्ते श्रुतस्य बहुवचनस्य प्रत्येकं सम्बन्धादुद्देश्यगतस्याप्यप्राप्तत्वेनानुवादायोगादौपभृतस्य न्यायत एव सर्वप्रयाजार्थत्वप्रतीतेः प्रयाजार्थस्यार्धस्य सर्वप्रयाजादौ समानीतत्वाद्बर्हिःप्रयाजकाले उपभृत्यनूयाजार्थस्यैव सत्त्वेन तस्यैवेदं समानयनं तत्संस्कारार्थमनूयाजप्रयुक्तं न तु प्रयाजप्रयुक्तम्। अत एव जौहवस्याप्यविशेषेण सर्वप्रयाजार्थत्वादौपभृतेन विकल्पः। "त्रिरित प्राचीनान् प्रयाजान् यजति" इति त्ववयुत्यानुवाद इति प्राप्ते—

कालविशिष्टसमानयनस्यानूयाजीयाज्यसंस्कारकत्वेऽदृष्टार्थत्वापत्तेर्विशिष्टविधिगौरवात् 'त्रिः' इत्यस्यावयुत्यानुवादत्वापत्तेश्च प्रयाजार्थस्येदं समानयनम्। तच्च "जुह्वा जुहोति" इति वचनादर्थप्राप्तमेवेति तदनुवादेन कालमात्रमनेन विधीयते। अतश्च "प्रयाजानूयाजेभ्यः" इत्यत्र प्रयाजाभ्यां अनूयाजेभ्यः इति विग्रहे न दोषः। अत एव जौहवमपि परिशेषादाद्यप्रयाजत्रयार्थमिति न विकल्पप्रसङ्गोऽपि। एवं चातिथ्यायामिडान्तत्वेन अनूयाजाथा अभावेऽपि च "चतुर्गृहीतान्याज्यानि" इति बहुवचनं जौहवौपभृतचतुर्गृहीतयोः प्रयाजेषु समुच्चयाद्ध्रौवचतुर्गृहीतमादाय सङ्गच्छते। इतरथा तयोर्विकल्पादनूयाजाभावे ध्रौवमादाय चतुर्गृहीतद्वित्वापत्तेर्बहुवचनानुपपत्तिः। अतश्च प्रयाजद्वयं समानयनस्य तत्संस्कृताज्यस्य च प्रयोजकमिति सिद्धम्। सूत्रादौ तु समानयनपदं तत्कालीनप्रयाजद्वयपरं आज्यसंस्कारकस्य समानयनस्याज्यप्रयोजकत्वसिद्धान्तानुपपत्तेः ॥ १५ ॥

(१६)—तत्रोत्पत्तिरविभक्ता स्यात् ॥ ४२ ॥ तत्र जौहवमनुयाजप्रतिषेधार्थम् ॥ ४३ ॥ औपभृतं तथेति चेत् ॥ ४४ ॥ स्याज्जुहूप्रतिषेधान्नित्यानुवादः ॥ ४५ ॥

एवं तावदौपभृतस्य प्रयाजार्थत्वमङ्गीकृत्य प्रयोज्यत्वं विचारितम् । तदेवाक्षिप्य समाधीयते । "चतुर्जुह्वां गृह्णाति, अष्टावुपभृति गृह्णाति, चतुर्ध्रुवायां गृह्णाति" इत्यसंयुक्तान्याज्यानि लिङ्गप्रकरणाभ्यां यावत् सर्वप्राकरणिकद्रव्यापेक्षकार्यार्थत्वेन विनियुज्यन्ते तावत् "चतुर्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्, अष्टावुपभृति गृह्णाति अनूयाजेभ्यस्तत्, सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्" इत्यादिवचनैस्तत्तत्कार्यार्थत्वेन विनियोगादौपभृतस्यानूयाजमात्रार्थत्वम् । यत्तु "अष्टावुपभृति गृह्णाति प्रयाजानूयाजेभ्यस्तत्" इति वचनं, तत्र प्रयाजत्वानूयाजत्वयोरुद्देश्यतावच्छेदकत्वे वाक्यभेदापत्तेरनूयाजानां प्रयाजोत्तरत्वानुवादमात्रमिति प्राप्ते—

उभयतोऽप्यनुवादत्वावश्यकत्वे समानयनादिविध्यदृष्टार्थत्वाद्यनुरोधेन शुद्धानूयाजवचनस्यैवानुवादत्वम् । न वा वाक्यभेदः गृहैकत्वाधिकरणव्युत्पादितकौस्तुभोक्तरीत्या "अध्वर्युयजमानौ वाचं यच्छतः" इतिवदवाक्यभेदात् । अतश्चौपभृतं प्रयाजानूयाजार्थमिति सिद्धम् ॥ १६ ॥

(१७)—तदष्टसङ्ख्यं श्रवणात् ॥ ४६ ॥ अनुग्र-

हाञ्च जौहवस्य ॥ ४७ ॥ द्वयोस्तु हेतुसामर्थ्यं श्रवणं च समानयने ॥ ४८ ॥

"अष्टावुपभृति" इत्यनेनाष्टसङ्ख्याकं एकं ग्रहणं विधीयते, उत चतुस्सङ्ख्याकग्रहणद्वयमिति चिन्तायां—श्रुतत्वादष्टत्वसङ्ख्यैव विवक्षिता, न चतुस्सङ्ख्याद्वयं, लक्षणापत्तेः। न चानारभ्याधीतेन "चतुर्गृहीतं जुहोति" इत्यनेनानिर्दिष्टद्रव्यकसर्वहोमानुवादेन चतुर्गृहीतविधानात्प्रयाजादिष्वपि तत्प्राप्तेः प्रयाजानूयाजार्थचतुर्गृहीतद्वयोद्देशेन उपभृत्पात्रमात्रस्यात्र विधिप्रतीतेरष्टपदं चतुष्कद्वयलक्षणार्थमिति वाच्यं, अनारभ्यविधिना जुहोतिचोदनाचोदितप्रधानभूतहोमोद्देशेन चतुर्गृहीतविधानेऽपि प्रयाजादिषु यजतिचोदनाचोदितेषु प्रक्षेपाख्यहोमस्य तदीयद्रव्यसंस्कारकत्वेन तमुद्दिश्य चतुर्गृहीतविधानानुपपत्तेः। अत एवोपांशुयाजादौ "चतुर आज्यस्य गृह्णन् आह" इत्यादिविध्यन्तरादेव ध्रुवादितश्चतुर्गृहीतविधानम्। अस्तु वैतादृशविषयेऽपि तत्प्राप्तिः, तथाऽपि वाचनिकेन प्रामाणिकेन चाष्टत्वेन बाधात्तस्य प्रयाजाद्यतिरिक्तविषयत्वमेवावश्यकम्। न च होमाङ्गभूतचतुस्सङ्ख्यायाः प्रधानाश्रितत्वादङ्गाश्रितया ग्रहणाङ्गभूतयाऽष्टसङ्ख्यया बाधासम्भवः। उभयोरपि ग्रहणाङ्गत्वात्। अस्तु वा चतुस्सङ्ख्याया होमाङ्गत्वं, तथाऽपि होमस्याप्यत्राङ्गत्वादेव न तदङ्गचतुस्सङ्ख्याया बलवत्त्वम्।

किञ्च होमोद्देशेन चतुर्गृहीतविधाने प्रतिहोमव्यक्ति तद्भेदापत्तेर्यावत्प्रयाजानूयाजव्यक्तिभेदेन चतुर्गृहीतभेदात् तावच्चतुर्गृहीतोद्देशेनैकपात्रविधावष्टत्वानुपपत्तिः। न हि तवाज्यभागयोरिवावयवशो होमे किञ्चिन्नियामकमस्ति। अस्तु वा तत्, तथाऽपि यथैवा-

वयवशो होमेऽपि चतुर्गृहीतद्वयस्य प्रयाजानूयाजसाधनत्वाविघातः, तथैवाष्टसङ्ख्याग्रहणेऽनुष्ठितेऽपि तदन्तर्गतत्वेन चतुष्कद्वयस्यापि सत्त्वादुभयोरपि सङ्ख्ययोस्साधनत्वाविघातः ।

किञ्चैवं तव प्रयाजद्वयानूयाजत्रयेऽपि मिलित्वैकं चतुर्गृहीतमवयवशः प्राप्येतेत्यष्टत्वानुवादानुपपत्तिः । अतस्तत्सङ्ख्याकग्रहणसंस्कृताज्यान्येवैतैर्वाक्यैस्तत्कार्योद्देशेन विधीयन्ते । न चास्मिन् मतेऽपि प्रतिप्रधानं भेदप्रसङ्गः, विनियोगवाक्यानुसारेण तथाप्राप्तावपि पृथगुत्पत्तिवाक्यवैयर्थ्यापत्त्या तथोत्पन्नस्यैकैकस्यैवावयवशो विनियोगाङ्गीकारात् । अतोऽष्टत्वं विवक्षितमेवेति प्राप्ते—

"चतुर्गृहीतान्याज्यानि भवन्ति" "न ह्यत्रानूयाजान् यक्ष्यन् भवति" इत्यातिथ्यायामिडान्तायां श्रुतस्य चतुर्गृहीतबहुत्वे अनूयाजसामान्याभावरूपस्य हेतोरेव लक्षणातात्पर्यग्राहकतयाऽष्टत्वमविवक्षितम् । अयं हि न "तेन ह्यन्नं क्रियते" इतिवदर्थवादः, अपि तु लक्षणाद्यभावाद्धेतुविशिष्टचतुर्गृहीतबहुत्वविधिरेव चतुर्थचतुर्गृहीतनिवृत्तिफलकः । अतश्च तद्बलेन व्याप्तिकल्पनायां यत्रयत्रानूयाजसामान्याभावोऽन्यत्रापि, तत्र चतुर्थचतुर्गृहीतनिवृत्तिरूपसाध्यसिद्धिः । अतश्च व्यतिरेकमुखेन चतुर्थं चतुर्गृहीतमनूयाजार्थं इतरच्च प्रयाजार्थमिति सिद्धं भवति । तच्चाष्टत्वस्य चतुष्कद्वयलक्षणार्थत्वे उपपद्यत इति तत्सिद्धिः । इतरथाऽनूयाजाभावेऽप्यष्टगृहीतस्यानिवृत्तत्वेन जौहवध्रौवरूपचतुष्कद्वयस्यैव प्राप्तेर्बहुत्वानुवादानुपपत्तिः, कथञ्चित्प्राप्तावपि वा समस्तवाक्यवैयर्थ्यम् । न च वाचनिकबहुत्वविधेरेवायमर्थवादः, हेतुपरत्वे सम्भवति स्तुतिलक्षणायां प्रमाणाभावात् । वस्तुतस्तु—नाष्टपदेऽपि लक्षणा, हेतुबलेनैवार्धस्यानूयाजार्थत्वे अर्धस्य प्रयाजार्थ-

त्वे चावगते आतिथ्यादावनूयाजाभावेनैवाष्टत्वस्य बाधोपपत्तेः। अस्तु वा सा ॥

प्रयोजनं—पूर्वपक्षे प्रयाजद्वयार्थे अर्धन्यूनसमानयनं, अष्टगृहीतस्य "समं स्यादश्रुतत्वात्[1]" इति न्यायेन पञ्चस्वपि विभागात्। सिद्धान्ते त्वर्धं समानेयम् ॥ १७ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
चतुर्थस्याध्यायस्य प्रथमः पादः.

अथ चतुर्थाध्यायस्य द्वितीयः पादः.

(१)—स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् ॥ १ ॥ जात्यन्तराच्च शङ्कते ॥ २ ॥ तदेकदेशो वा स्वरुत्वस्य तन्निमित्तत्वात् ॥ ३ ॥ शकलश्रुतेश्च ॥४॥ प्रतियूपं च दर्शनात् ॥ ५ ॥ आदाने करोतिशब्दः ॥ ६ ॥

दैक्षे पशौ "यूपस्य स्वरुं करोति, स्वरुणा पशुमनक्ति" इति श्रुतम्। तत्र स्वरुशब्दवाच्यस्याप्रसिद्धत्वादाद्यवाक्येन स्वरुकर्मिका भावना विधीयते। तत्र च साधनीभूतद्रव्यापेक्षायां "तत्र यः प्रथमश्शकलः परापतेत् स स्वरुः" इति वचनेन शकलस्य साधनत्वावगमात् इतिकर्तव्यतापेक्षायां यूपपदेन तद्धर्मलक्षणयाऽ-

---

1 १०-३-१३.

अनप्रोक्षणादयो विधीयन्ते । अथवा यथैव यूपावयवकत्वं सि-
द्धान्ते षष्ठ्यर्थस्तथैव मन्मते यूपधर्मकत्वं सम्बन्धषष्ठ्यर्थ इति
न लक्षणाऽपि । एवमुत्पन्नस्य च द्वितीयवाक्येन विनियोगः ।
अस्तु वा द्वितीयवाक्याक्षिप्तस्वरुकर्मकभावनानुवादेन यूपधर्ममा-
त्रविधिरिति न विशिष्टविधिरपि । न चैवं शकलशब्दस्य ससम्ब-
न्धिकत्वादेवोत्तरार्धादिवत् यूपीयत्वोपपत्तेरप्रयोजकत्वापत्तिः, स्व-
तन्त्रकाष्ठाप्रयोजकत्वेऽपि स्वरुनिष्ठाञ्जनप्रोक्षणादिधर्मप्रयोजकत्वोप-
पत्तेः । अत एव धर्मप्रयोजकत्वेन काष्ठान्तरप्रयोजकत्वशङ्कायां
तन्निवर्तकत्वेन "यदन्यस्य वृक्षस्य स्वरुं कुर्यादन्यैस्य लोकमन्वा-
रोहयेयुः" इति निन्दाऽपि सङ्गच्छते । धर्मप्रयोजकत्वेऽपि च
यूपैकादशिन्यां "यथाऽऽनुपूर्व्यं स्वरुभिः पशून् समञ्ज्य" इति
यूपभेदेन स्वरुभेददर्शनं नानुपपन्नम् । न चैवमपि षष्ठ्या यूपाव-
यवकत्वसम्बन्धेनाप्युपपत्तेर्यूपधर्मकत्वरूपसम्बन्धपरत्व एव निया-
मकाभावः, शकलकरणकत्वादेव यूपीयत्वसिद्धेराद्यवाक्यवैयर्थ्या-
पत्तेरेव नियामकत्वादिति प्राप्ते—

न यूपधर्मकत्वसम्बन्धषष्ठ्यर्थः, आनुशासनिकयूपावयवत्व_
सम्बन्धस्यैव तदर्थत्वोपपत्तेः । न च शकलश्रुत्यैव प्राप्तत्वात्तद्वि-
धिवैयर्थ्यं, एतद्विध्यभावे यूपपदरहितानां परश्वादानवनगमनवृ-
क्षछेदनस्थाण्वाहुत्यादीनां यूपार्थत्ववत् स्वर्वर्थत्वस्यापि सम्भवेन
शकलश्रुतेर्वृक्षप्रतियोगिकतयैवोपपत्तेः । अत एव यथाशक्तिप्रयो-
गादौ यूपाभावेऽपि स्वर्वर्थमेव वनगमनादिसिद्धिः । पञ्चारत्नि-
त्वसिद्ध्यर्थं द्वितीययूपछेदनादि "यूपं छिनत्ति" इत्यादिवाक्ये-
न विहितं यूपाभावे परं निवर्तताम् । न तु वनगमनाद्यपि ।
अतस्तन्निवृत्तिफलकयूपानुनिष्पन्नत्वासिद्ध्यर्थं यूपावयवत्वविधिर-
र्थवानेव । अत एव यूपानुनिष्पन्नप्रथमशकलनाशे येन केन चि-

त्काष्ठेनाञ्जनं पशोः । तेन प्रोक्षणादेस्स्वर्वर्थत्वे प्रमाणाभावान्न स्वरुस्तेषां प्रयोजकः । सूत्राणि च सुधीभिरस्मिन्नेवार्थे व्याख्येयानि । न तु भाष्यकारोक्ते ॥ १ ॥

(२)–शाखायां तत्प्रधानत्वात् ॥ ७ ॥

दर्शपूर्णमासयोश्शाखामधिकृत्य "प्राचीमाहरति" इति श्रुतम् । तत्र प्राचीशब्दस्तावत् दिग्विशेषवाची "प्राचीमुदेति सविता" इति प्रयोगात् । देशवाची वा, न तु तद्देशस्थशाखावाची । अतश्चोपक्रमस्थप्रातिपदिके लक्षणापेक्षया वरं द्वितीयैव सप्तम्यर्थे व्याख्यातुं युक्ता । प्रतिशब्दाध्याहारो वा । कर्मापेक्षायां च प्रकृतत्वादेव शाखा तत्त्वेन सम्बध्यते । प्राग्देशस्य पूर्वोत्तरावध्यपेक्षायां प्रत्यक्षोपस्थितत्वात्सामर्थ्याच्च वनाविहारदेशौ तत्त्वेन सम्बध्येते । तेन वनात् विहारोपलक्षितप्राचीं प्रतिशाखामाहरतीतिवाक्यार्थः । न तु वृक्षस्य प्राचीं शाखामिति । तथात्वे छिनत्तीति स्यात् न त्वाहरतीति प्राप्ते—

प्रधानभूतविभक्तौ लक्षणायाः प्रतिशब्दाध्याहारस्य वा कर्माध्याहारपूर्वोत्तरावध्यध्याहारसहकृतस्य कल्पनापेक्षया एकस्मिन् प्रातिपदिक एव प्रकृतशाखालक्षणया वाक्यार्थोपपत्तेः, प्राक्त्वस्य च वृक्षावयवविशेषत्वरूपशाखात्वेनैवोपस्थितवृक्षावधिकतयाऽप्युपपत्तेश्शाखावाद एवायम् । तेन वृक्षस्य प्राग्देशभवां प्राचीं शाखां छित्त्वाऽऽहरतीत्यर्थः । प्रयोजनानुरोधात्तु विहारदेशं प्रतीति लभ्यते । शाखायां प्राग्देशभवत्वमात्रविधानफलकत्वाच्च लाघवम् । तव तु शाखाहरणोद्देशेनैव प्राग्देशभवविहारावधिकत्वविधाने गौरवम् । याज्ञिकास्तु दिग्वादमेव वदन्ति ॥ २ ॥

(३)–शाखायां तत्प्रधानत्वादुपवेषेण विभागात्स्याद्वैषम्यं तत् ॥ ८ ॥ श्रुत्यपायाच्च ॥ ९ ॥

तत्रैव "शाखामाच्छिनत्ति, शाखामाहरति, मूलतश्शाखां परिवास्योपवेषं करोति" इति श्रुतम्। तत्र शाखाशब्दस्तावत् आद्यवाक्ययोस्समूलस्यैव वाचको न त्वग्रमात्रस्य, अतस्तृतीयवाक्येऽपि तत्पर एव, तदर्थं च परिवासनमग्रमूलविभागार्थम्। अतस्तृतीयवाक्ये मूलत इति पदं द्वितीयार्थे तृतीयार्थे वा तसिं व्याख्याय 'उपवेषं करोति' इत्यत्रान्वेति। न त्वपादानार्थकं सत् परिवासने। तथात्वे अग्रस्याप्युपवेषत्वप्रसङ्गेन मूलत इत्यस्योत्तरत्रान्वयावश्यकत्वात्। अतः परिवासनेनाग्रं मूलं च शाखापदाभिधेयं विभज्य मूलमुपवेषसंज्ञमुपादत्ते इति तृतीयवाक्यार्थः। तस्य च विनियोगापेक्षायां अग्रस्य वत्सापाकरणादौ मूलस्य कपालोपधानादौ वचनाद्विनियोगः। अत एवोभयमपि छेदनाहरणपरिवासनादीनां प्रयोजकम्। अस्तु वा शाखाशब्दोऽग्रमात्रवाची तथाऽपि मूलत इति द्वितीयार्थे परिवासनस्य कर्मेति परिवासनमुभयप्रयुक्तम्। ल्यपा वा मूलापादानकपरिवासनमुपवेषकरणार्थं विधीयते इति सोपि तत्प्रयोजक इति प्राप्ते—

मूलत इति तसिः पञ्चम्यर्थक एव। सर्वविभक्त्यर्थकानुशासनं तु लाक्षणिकम्। अन्यथा विशिष्य पञ्चम्यर्थकत्वानुशासनवैयर्थ्यप्रसङ्गात्। अतो मूलापादानकपरिवासनं द्वितीयाश्रुत्या शाखासंस्कारकमेव। न तु वाक्यादुपवेषकरणाङ्गं, न वा उभयसंस्कारकं, उद्देश्यानेकत्वप्रसङ्गाच्च अतश्शाखाशब्दोऽपि मूलापादानकपरिवासनसंस्कार्यतया श्रुताग्रमात्रवाची, छेदनादि-

वाक्येऽपि तद्वाच्येव। समूलच्छेदनादिकं तु मूलापादानकपरिवासनसिद्ध्यर्थं न विरुध्यते। अत एव वत्सापाकरणादौ शाखापदेनैवाग्रविनियोगः। अतो मूलं परिवासनाङ्गमेव। एवं च व्यवहितकल्पनाऽपि न प्रसज्यते। अत एव परिवासनानुनिष्पन्नमूलस्यैवोपवेषरूपसंज्ञान्तरकरणम्। अग्रस्य शाखापदेनैव सर्वत्र विनियोगेन संज्ञान्तरवैयर्थ्यापत्तेः। अत एव न व्यवहितकल्पनाया आवश्यकत्वम्। अतस्संज्ञाकरणमात्रफलक उपवेषं करोतीत्ययमनुवादो ल्यबन्तापेक्षितक्रियान्तरप्रदर्शनार्थः। अतो न मूलं छेदनादीनां प्रयोजकम्॥

प्रयोजनं—पौर्णमास्यां शाखाऽभावे येन केनचित् काष्ठेन कपालोपधानं न तूपवेषकरणम्॥ ३॥

(४)—हरणे तु जुहोतिर्यागसामान्यात् द्रव्याणां चार्थविशेषत्वात्॥ १०॥ प्रतिपत्तिर्वा शब्दस्य तत्प्रधानत्वात्॥ ११॥ अर्थेऽपीति चेत्॥ १२॥ न तस्यानधिकारादर्थस्य च कृतत्वात्॥ १३॥

अत्रैव "सूक्तवाकेन प्रस्तरं प्रहरति" इति "सहशाखया प्रस्तरं प्रहरति" इति च श्रुतम्। तत्राद्यवाक्ये तावन्मान्त्रवर्णिकदेवतासम्बन्धाद्धोमविधिरित्युक्तम्। न तु द्वितीयवाक्यविहितप्रहरणानुवादेन प्रस्तरमुद्दिश्य सूक्तवाकविधिरिति तन्त्रसारोक्तं युक्तं, यागस्यापि विधौ वाक्यभेदापत्तेः, यागविधायकवाक्यान्तरकल्पने गौरवाच्च। अतश्च द्वितीयवाक्ये प्रहरतिना होममनूद्य शाखासाहित्यमात्रविधिः, सहशब्दस्य निपातत्वेन परस्प-

रान्वयव्युत्पत्तेश्च न शाखा साहित्यं चेति विधेयानेकता। अतश्च यथैव होमे प्रस्तरो गुणभूतः एवं शाखाऽपि। तत्र त्वेतावान् विशेषः—प्रस्तरस्य द्वितीयया प्रक्षेपांशं प्रति प्रतिपाद्यत्वावगमान्न त्यागांशस्तस्याक्षेपक इत्युक्तम्। शाखायास्तु वत्सापाकरणादाविव गुणत्वस्यैवावगतेः प्रस्तरहोमः प्रयोजक एवेति पौर्णमास्यामपि तदर्थं शाखोत्पादनीयेति प्राप्ते—

आद्यवाक्ये सूक्तवाकान्वयानुरोधेन प्रहरतिना होमलक्षणायामपि द्वितीयवाक्ये प्रहरतिना तल्लक्षणायां प्रमाणाभावात्प्रहरणस्यैव शाखासाहित्यसम्बन्धमात्रं क्रियते। अतश्च यथैव प्रहरणं प्रति प्रस्तरस्य कृतार्थस्य संस्कार्यत्वं, तथा शाखायाः कृतार्थत्वाविशेषात्। न च तृतीयया तस्याः करणत्वावगतिः, सहशब्दयोगेन तस्याः करणत्वानभिधायकत्वात्। न चैवं शाखां प्रहरतीत्येव वक्तव्यत्वापत्तेः प्रस्तरादिपदवैयर्थ्यं, प्रस्तरप्रहरणकालीनैतत्प्रहरणसिद्ध्यर्थत्वात्। अत एव प्रस्तरप्रहरणकालविशिष्टप्रहरणान्तरस्यैव शाखोद्देशेनात्र विवक्षिततया विधानं, न तु प्रस्तरप्रहरणव्यक्तेरेव शाखोद्देशेन विनियोगः, तथात्वे यथाशक्तिप्रयोगादौ प्रस्तराभावेऽपि शाखाप्रहरणानापत्तेः। अतश्च प्रतिपत्तित्वात्प्रहरणमपि न शाखायाः प्रयोजकम्। तेन पौर्णमास्यां न शाखोत्पादनम्। यथा तु प्रस्तरप्रहरणव्यक्तावेव शाखाया न गुणत्वं तथा षष्ठे[1] वक्ष्यते ॥ ४ ॥

---

(५)–उत्पत्त्यसंयोगात्प्रणीतानामाज्यवद्विभागस्स्यात् ॥ १४ ॥ संयवनार्थानां वा प्रतिपत्तिरितरासां तत्प्रधानत्वात् ॥ १५ ॥

---

[1] ६-६-१४.

तत्रैव "अपः प्रणयति" इत्यनेन विहितप्रणयनसंस्कृतानामपां "प्रणीताभिर्हवींषि संयौति" इति वचनेन संयवनार्थत्ववत्[1] अन्ते "अन्तर्वेदि प्रणीता निनयति" इति निनयनार्थत्वेनापि विनियोगादुभयप्रयुक्तत्वम्। न च निनयनवाक्येऽपि द्वितीयानिर्देशात्प्रतिपत्तित्वाशङ्का। कुशलेनाध्वर्युणा यावत्संयवनोपयोगिनामेवापां प्रणयनेन शेषाभावात्प्रतिपत्तित्वानुपपत्तेः। अतस्सक्तुन्यायेन[2] निनयनस्यार्थकर्मत्वात्प्रयोजकत्वमिति प्राप्ते—

द्वितीयासंयोगादाकीर्णकराणां प्रतिपत्तिरेवेयम्। न च शेषाभावः तस्यावर्जनीयत्वात्। अनन्यथासिद्धप्रतिपत्तेरेव धारणप्रयोजकत्वाच्च। अतस्संयवनमेव प्रयोजकम्। अत्र चाग्नेयादिहविः पाकत्वेनैव संयवनोद्देश्यता। तेन चर्वादावपि प्रणीता भवन्त्येव। अत एवाभ्युदितेष्टौ दधिपयसोरपि प्रणीता वक्ष्यन्ते। वस्तुतस्तु—कपालं प्रति स्वोष्मजन्यपाकत्वेनेव पिण्डसंयवनत्वेनैवोद्देश्यता अतिप्रसक्तधर्मेण तदङ्गीकारे प्रमाणाभावात्। दधिपयसोः प्रणीताधर्मोस्तु कृत्वा चिन्तया। याज्ञिकास्तु चर्वादावपि प्रणीताः कुर्वन्ति ॥

प्रयोजनं संयवनोत्तरं प्रणीतानाशे निनयनार्थं तदनुत्पत्तिः ॥५

---

(६)—प्रासनवन्मैत्रावरुणाय दण्डप्रदानं कृतार्थत्वात् ॥ २६ ॥ अर्थकर्म वा कर्तृसंयोगात्स्रग्वत् ॥ १७ ॥ कर्मयुक्ते च दर्शनात् ॥

सोमे "दण्डेन दीक्षयति" इत्यनेन दण्डस्य दीक्षाऽभिव्यञ्जकत्वं विधाय "क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति" इति श्रुतम्।

[1] त्वेनविनियोगवत्. पा. [2] २-१-९.

तत्र पूर्ववदेव द्वितीयासंयोगान्मैत्रावरुणसम्बन्धिदानं दण्डप्रतिपत्तिः चतुर्थी षष्ठ्यर्थलक्षिका । "वेदविदे गां ददाति" इतिवद्वा प्राधान्याभावेऽपि सम्प्रदानत्वार्थिकैव । अत एव दीक्षितदण्डस्य दानमात्रेण प्रतिपत्तिसिद्धेर्नावश्यं स एव दण्डो "दण्डी प्रैषानन्वाह" इत्यनेन प्रैषानुवचने विनियुज्यते । तेन न प्रैषानुवचनं दण्डदानस्य प्रयोजकमिति निरूढपश्वादावपि न तदनुष्ठेयमिति प्राप्ते—

"कर्मणा यमभिप्रैति स सम्प्रदानम्" इति स्मृत्या क्रियां प्रति व्याप्यमानं कर्मकारकं प्रत्यपि सम्प्रदानस्य व्याप्यमानत्वावगतेर्विधिबलेन कस्यचिद्व्याप्यमानस्येप्सितत्वे कल्प्यमाने व्याप्यव्याप्यस्य सुतरां व्याप्यत्वमिति न्यायेन मैत्रावरुण एव तदवगतेस्तस्यैवोद्देश्यत्वम् । सम्भवति च मैत्रावरुणस्योपयोगादुद्देश्यत्वम् । वेदविदादौ तु बाधात् स्वर्गादेरेवोद्देश्यता । दृष्टं चालम्बनं दण्डस्य प्रयोजनमिति नादृष्टार्थत्वमपि । न चैवं "दण्डं" इति द्वितीयाऽनुपपत्तिः, सक्तुवत् करणत्वलक्षणार्थत्वात् । यत्तु—मूले अनीप्सितकर्मत्वेन तदुपपत्तिरित्युक्तं, तत् जुहोतेरपि "तृतीया च होश्छन्दसि" इत्यादिस्मृत्या सकर्मकत्वावगतेस्सक्तुष्वपि तदापत्तेरनीप्सितकर्मत्वेऽपि चोद्देश्यानेकत्वनिमित्तकवाक्यभेदापरिहारस्य कौस्तुभ एवोक्तत्वादुपेक्षितम् । अस्तु वा दण्डस्यानीप्सितकर्मत्वेनैवान्वयः सम्प्रदानस्य तु सत्यपि प्राधान्ये सम्प्रदानत्वेनैवान्वयान्न द्विकर्मकत्वापत्तिरित्यपि बोध्यम् । अतश्च दण्डविशिष्टदानस्योपयोगापेक्षायां "दण्डी प्रैषानन्वाह" इत्यादिना प्रैषानुवचनार्थत्वेन विनियुज्यते । अतो निरूढपश्वादौ दीक्षासोमक्रयाभावेऽपि दण्डदानानुष्ठानं तस्य प्रैषानुवचनप्रयुक्तत्वान्नानुपपन्नम् ॥

इदं त्विह वक्तव्यं—दानस्य दण्डं प्रत्यर्थकर्मत्वेऽपि दीक्षादण्डस्य कथं दानाङ्गत्वं, न हि स्वत्वत्यागे कृते यजमानेन स्वयं पुनर्व्यवहर्तुं शक्यम् । न चैतावदेव दण्डकार्यं दीक्षाऽभिव्यञ्जकालम्बनं न प्राप्तिः, येनोपादानलाघवानुरोधेन प्रकृत एव गृह्येत। न च दानविध्यनुरोधेन कार्यसङ्कोचः तस्य लौकिकदण्डेनाप्युपपत्तेः प्रतिपत्तित्वे तु कृष्णविषाणावदेव युक्तस्तत्सङ्कोच इति ॥

अत्र ब्रूमः—श्रौतविधेरर्थकर्मत्वेऽप्यस्मदुक्तप्रयाजशेषाभिघारणन्यायेन[1] आर्थिकदानप्रतिपत्तिविध्यन्तरकल्पनया प्रकृतेऽपि कार्यसङ्कोचोपपत्तिः । न चात्र मध्ये प्रतिपत्त्यपेक्षाभावेन कल्पकाभावात्तन्न्यायवैलक्षण्यं, दानविधेर्दण्डान्तरप्रयोजकत्वशक्तिकल्पनाभिया कार्यसङ्कोच मङ्गीकृत्यापि मध्ये तदपेक्षोपपत्तेः । दृष्टश्च लोके अन्यानुरोधेनाप्यवश्यापेक्षितविषये स्वकार्यसङ्कोचेन अकाल एव तदुत्कर्षः । शक्यते चात्र स्वत्वत्यागांशस्य मैत्रावरुणोपकारकत्वाभावात् तदंशे दण्डप्रतिपत्त्यर्थत्वं वक्तुम् । स्वस्वत्वात्यागेऽपि समर्पणमात्रेणापि प्रैषानुवचनोपपत्तेः । अतश्च प्रतिपत्त्यनुरोधेन दीक्षितदण्डस्य तद्विषयत्वासिद्धिः । अत एव सत्रे सर्वेषां दण्डानां दानं, एवं च परप्रयुक्तदण्डोपजीवित्वान्न श्रौतदानविधेः प्रैषानुवचनादेर्वा दीक्षितदण्डसत्त्वे दण्डान्तराक्षेपकत्वं, तन्नाशादौ तु दण्डान्तराक्षेपकत्वमक्षाभ्यञ्जनन्यायेन इष्टमेव । श्रौतदानविधावेकत्वश्रवणादेकदण्डदानमेव मैत्रावरुणोपकारकमिति सत्रे प्रैषानुवचने एक एव दण्ड इत्यपि बोध्यम् । इदं च दीक्षितदण्डप्रापकवचनस्य पार्थसारथ्यादिमीमांसकैरलिखितत्वात्तदभावमभिप्रेत्योक्तम् ॥

---

[1] ४-१-१४.

वस्तुतस्तु—तैत्तिरीयशाखायां "यद्दीक्षितदण्डं प्रयच्छति" इति सार्थवादकवाक्यान्तरश्रवणात् 'क्रीते' इति दीक्षितपदरहितवाक्ये प्रतिपत्तिविध्यन्तराकल्पनेऽपि न क्षतिः, तैत्तिरीयवाक्येनैव मैत्रावरुणपदाश्रवणेन दानस्य प्रतिपत्तित्वसिद्धेः। क्रीतवाक्ये तु मैत्रावरुणपदश्रवणेन तत्प्राधान्यावगतेः तदुपकारार्थत्वमेव। अतश्च तैत्तिरीयवाक्ये यच्छतेस्सम्प्रदानापेक्षायां क्रीतवाक्ये स्वतन्त्रदण्डाक्षेपशक्तिकल्पनागौरवपरिहारार्थं च परस्परापेक्षतया दीक्षितदण्डस्यैव मैत्रावरुणोपकारार्थत्वसिद्धिः। न च तैत्तिरीयवाक्ये क्रीतवाक्यविहितदण्ड एव दीक्षासम्बन्धविधानोपपत्तेः न प्रतिपत्तिविधायकत्वमिति वाच्यं, तथात्वे दण्डोद्देशेन दीक्षितत्वविधानेऽपि एकप्रसरताभङ्गापत्तेः दानस्य अर्थकर्मत्वे प्रमाणाभावः। प्राप्तदानानुवादेन कालमैत्रावरुणरूपोभयविधाने वाक्यभेदापत्तिः, अत उभयत्रापि दानविधिः, तत्र च दीक्षितपदयुक्तवाक्ये प्रतिपत्तिविधिरेव, सम्प्रदानाश्रवणात् दीक्षितपदश्रवणाच्च। क्रीतवाक्ये तु उक्तयुक्त्या अर्थकर्मत्वमेव। उभयत्र प्रयोजनं पूर्ववत्॥

वस्तुतस्तु क्रीतवाक्येऽपि प्रैषानुवचनोपयोगिदण्डसंस्कारकत्वमेव दानस्येति दण्डस्यापीप्सितकर्मत्वमेव। न त्वेतावता दण्डप्रतिपत्तित्वं, उपयोक्ष्यमाणसंस्कारस्य न्याय्यत्वात्। मैत्रावरुणस्य तु सम्प्रदानत्वेनैवान्वय इति न कश्चिद्दोषः। सत्रे प्रैषादौ दण्डैकत्वं तु दण्डी प्रैषानन्वाह इत्यत्र प्रथमातिक्रमे कारणाभावादेकवचनान्तेन व्युत्पत्तिमङ्गीकृत्य समर्थनीयमिति दिक्॥ ६॥

---

(७)–उत्पत्तौ येन संयुक्तं तदर्थं तत् श्रुतिहेतुत्वात् तस्यार्थान्तरगमने शेषत्वात्प्रतिपत्तिस्स्यात् ॥

सोमे "कृष्णविषाणया कण्डूयते" इति कण्डूयनाङ्गत्वेन कृष्णविषाणां विधाय पुनराम्नातं "नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति" इति । तत्र निनयनवत् प्रासनं प्रतिपत्तिरेव द्वितीयासंयोगात् । न च दक्षिणादानोत्तरकालमपि दीक्षितस्य कण्डूयनसम्भवात् कृतकरत्वाभावात् न प्रतिपत्त्यर्हता, अनन्यथासिद्धप्रतिपत्तिविधिबलादेव दक्षिणादानप्राक्कालभाविकण्डूयनस्यैव कार्यत्वावधारणात् । न च प्रतिपत्तिमात्रे कार्यस्य जातत्वेन संस्कारवैयर्थ्यापत्तेः विनियोगभङ्गेन सक्तुवदर्थकर्मत्वमेव स्यादिति वाच्यं, जातेऽपि कार्ये उपयुक्तादि क्व निक्षिप्तव्यमित्यपेक्षाऽस्त्येवेति प्रतिपत्तिनियमविधेरुपयोगोपपत्तेः, तज्जन्यनियमादृष्टस्य चोत्पत्त्यपूर्वे जातेऽपि तदव्यवहितकार्योत्पत्त्युपयोगियागापूर्वनिष्ठयोग्यताजनन एवोपयोगः । न त्वेतदकरणस्य तत्कार्यनाशकत्वकल्पनं प्रयाजादावप्यकरणस्याग्नेयादिकार्यानुत्पादकत्वकल्पनापत्तेः, अकरणत्वादेः कारणतावच्छेदकत्वकल्पने गौरवाच्चेत्यादि कौस्तुभे अपूर्वाधिकरणे क्षुण्णम् । अत एवाहिताग्नेः परिधानीये कर्मणि पात्रासादनादिरूपप्रतिपत्तेरप्यैहिककर्मातिरिक्तकर्माङ्गत्वस्यैव फलबलेन कल्पनादैहिकफलोत्पत्तावपि न क्षतिरित्यपि तत्रैव क्षुण्णम् ॥ ७ ॥

---

(८)–सौमिके च कृतार्थत्वात् ॥ २० ॥ अर्थकर्म वाऽभिधानसंयोगात् ॥ २१ ॥ प्रतिपत्तिर्वा

तन्न्यायत्वाद्देशार्थाऽवभृथश्रुतिः ॥ २२ ॥

सोम एव "वारुणेनैककपालेन अवभृथं यन्ति" इत्यनेन अवभृथसंज्ञकं कर्म विधाय "यत्किञ्चित्सोमलिप्तं तेनावभृथं यन्ति" इति श्रुतम् । तत्र तृतीयया सोमलिप्तस्य करणत्वावगमात् तस्य च यागेऽन्वयासम्भवेऽप्यवभृथं प्रत्युपपत्तेः न द्वितीयार्थ-लक्षणया प्रतिपत्तिकर्मत्वम् । न च प्रतिपत्त्यपेक्षत्वात् दृष्टार्थत्व-लाभाय तल्लक्षणायामपि न दोषः, निषादस्थपत्यधिकरणन्या-येन[1] लक्षणानुपपत्तेः । अतोऽवभृथ एव सोमलिप्तस्य करणत्वम् । न चोत्पत्तिशिष्टैककपालावरोधादनिवेशः । अवभृथसंज्ञककर्मा-न्तर एव गुणप्रमाणके निवेशोपपत्तेः । यत्तु कैश्चिद्भावना-भेदमात्राङ्गीकारेण तस्मिन्नेवावभृथे समुच्चयेन निवेशः पूर्वपक्षितः। तत् वाजिनेऽपि तथाऽऽपत्तेरुपेक्षितम् । अतोऽवभृथद्वयस्यापि दीक्षोन्मोचनरूपैकार्थत्वेन विकल्पापत्तेर्द्रव्याणामपि विकल्पः । अ-दृष्टार्थत्वे तु तन्त्रेणानुष्ठानात् समुच्चय इति प्राप्ते—

कर्मान्तरत्वे अवभृथशब्दस्य नामातिदेशकत्वे गौणत्वाप-त्तेर्वाचकत्वे अनेकशक्तिकल्पनाप्रसङ्गाद्देवताऽभावेन च अरूप-त्वापत्तेः वारुणेनेत्यनुषङ्गस्य देशलक्षणयाऽप्युपपत्तावन्याय्यत्वात् यागरूपधात्वर्थ एव सोमलिप्तप्रतिपत्तित्वेन विधीयते । एवं च न धात्वर्थाविवक्षा परपदार्थसम्बन्धविधानं कर्मान्तरत्वादिकल्पना चाश्रिता भवति । न च तेनेत्यनेन करणत्वं, त्यागे कर्मत्वल-क्षणानुशासनिकसहयोगतृतीयाङ्गीकारेण साहित्यमात्रोक्तौ क-र्मत्वेनैव तदाश्रयणात् लक्षणाया अप्रसक्तेः । अवभृथपदं परं देशलक्षणार्थमिति न कश्चिद्दोषः ॥ ८ ॥

---

[1] ६-१-१२.

(९)–कर्तृदेशकालानामचोदनं प्रयोगे नित्यसमवायात् ॥ २३ ॥ नियमार्था वा श्रुतिः॥२४ तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसंयोगात्॥२५ संस्कारे च तत्प्रधानत्वात् ॥ २६ ॥

तत्र कर्तारो अध्वर्य्वादयः कालाः पौर्णमास्यादयः देशाः समादयः द्रव्याणि व्रीह्यादीनि गुणाः शुक्लादयः संस्काराः अवघातादयः तत्तद्वाक्ये श्रुताः कर्मचोदनयैव आक्षेपेण प्राप्तत्वान्न विधीयन्ते, अतो न ते कर्मविधिभिर्नियमेन प्रयुज्यन्ते इत्याशङ्काभासे प्राप्ते यावदाक्षेपेणानियताः प्राप्यन्ते तावद्वचनेन नियमफलकविधिकरणान्नियमेनैव प्रयोजकत्वम् । नियमविधिप्रकारश्च सर्वोऽप्यनागतावेक्षणन्यायेन अत्र, कौस्तुभे च मन्त्राधिकरण एव प्रदर्शितः ॥ ९ ॥

---

(१०)–यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात् ॥ २७ ॥ तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकस्स्यात् ॥ २८ ॥

प्रसङ्गात् यागादिपदार्था विध्यनुष्ठाप्याः के इति विचार्यन्ते । यत्र प्रक्षेपाङ्गको देवतोद्देशपूर्वको द्रव्यत्यागो विधीयते[1] स यागपदार्थः प्रयाजादिषु प्रक्षेपसिद्ध्यर्थमाद्यं विशेषणं तत्र यागाक्षेपेणैव प्रक्षेपसिद्धेः । शक्यतावच्छेदकं चोक्तविधत्यागत्वसमव्यापकं जातिरूपमखण्डोपाधिरूपं वा सामान्यमित्युक्तमेव[2] । प्रक्षे-

---

[1] अनुष्ठीयते. पा.

[2] भावार्थाधिकरणे.

पप्रधानक उक्तविधस्त्यागो होमपदार्थः। सम्प्रदानस्वत्वापादनको द्रव्यत्यागो दानपदार्थः । उभयत्रापि शक्यतावच्छेदकं तत्तद्धर्मसमव्यापकं पूर्ववदेव सामान्यम् । एतत्सूत्रव्याख्यानान्तराणि गतार्थत्वान्न लिखितानि ॥ १० ॥

(११)–विधेः कर्मापवर्गित्वादर्थान्तरे विधिप्रदेशस्स्यात् ॥ २९ ॥ अपि वोत्पत्तिसंयोगादर्थसम्बन्धोऽविशिष्टानां प्रयोगैकत्वहेतुस्स्यात् ॥ ३० ॥

सोमे—"यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्य" इति श्रुतम् । तत्र देवदत्तस्य गौर्यज्ञदत्ताय प्रदीयतामितिवत् यदातिथ्यायां बर्हिस्तत्तत आच्छिद्य उपसदाद्यर्थे विधीयते, तेनातिथ्यया बर्हिष उपादानमात्रं प्रयुज्यते, अन्य धर्माः आस्तरणादि कार्ये चेतराभ्यामिति प्रथमः पक्षः ॥

उपादानमात्रस्य आतिथ्याप्रयुक्तत्वे अप्राकृतकार्यकारित्वापत्तेरतिदेशप्राप्तधर्मादिलोपे प्रमाणाभावाच्च आच्छिद्य विधानानुपपत्तेरातिथ्यायामुपयुक्तायाः बर्हिर्व्यक्तेरेव उभयोद्देशेन निरिष्टकोपदेशः। ततश्च बर्हिर्धर्माणां आतिथ्यार्थं कृतानां तदपूर्वोत्पत्तौ नाशात्तस्यामेव व्यक्तौ उपसदाद्यर्थे पुनःपुनरुपादानवर्जं करणम् । यद्यपि च कृतोपकारप्राकृताधारपुनश्श्रवणबलादुपसदामपूर्वत्वं वक्ष्यते। तथाऽपि प्रकृतौ बर्हिषोऽङ्गप्रधानसाधारणत्वाच्चाधारार्थमेव तत्करणं, बर्हिर्व्यक्तेरपि च तेनैव सम्बन्धेनोपसदुद्देशेन विधानं, इतरथा अप्राकृतकार्यकारित्वापत्तेः । बर्हिःप्रतिपत्तेस्तु दाहाख्यायाः प्रकृतावुत्पत्त्यपूर्वनिष्ठयोग्यतासम्पादकतयैव तस्य नाशात् अग्नीषोमीयान्ते करणेऽपि नातिथ्योपसदर्थत्वम् । सि-

द्धान्तेऽप्येवम् । खण्डेष्टित्वाद्वा तयोस्तल्लोपः । तेन निरिष्टकोपदेश इति द्वितीयः ॥

विना वचनमन्यत्रोपयुक्तस्य अन्यत्रोपदेशो शिष्टाचारविरोधात् अतिदेशप्राप्तलवनादिबाधे प्रमाणाभावाच्च आतिथ्याप्रकरणपठित-तदङ्गाश्ववालादिबर्हिर्धर्माणामुभयोरतिदेशो वाचनिक इति तृतीयः॥ अस्मिन् पक्षे न त्रिष्वपि व्यक्त्यैक्यम् ॥

सिद्धान्तस्तु—बर्हिःपदे धर्मलक्षणायां प्रमाणाभावात् त्रिष्वपि व्यक्त्यैक्यविधानम् । ततश्चातिथ्योपक्रमे लूयमानं बर्हिस्त्रितयसाधारणमिति तत्र क्रियमाणा धर्मा अपि प्रतिपत्तिवर्जं सर्वसाधारणाः । न चाश्ववालादिधर्माणां प्रकरणेन तन्मात्रार्थत्वापत्तेः प्रसङ्गेनोपकारकत्वेऽपि इतरार्थत्वे प्रमाणाभावः, आश्ववालादिवाक्यानामेतद्वाक्याव्यवधानेन त्रितयापूर्वसाधनीभूतैतद्व्यक्तेरेवोद्देश्यत्वात् । अत्र च लक्षणया एतात्त्वमेवोद्देश्यतावच्छेदकमतो न वाक्यभेदः । बर्हिःपदेन तद्व्यक्त्यैक्यं लक्षणया विधीयते । न चैवं लक्षणाद्वयावश्यकत्वे धर्मातिदेशपक्षात्को विशेषः । जहत्स्वार्थलक्षणातो विशेषात्, आश्ववालादिधर्माणामुपसदाद्यर्थत्वस्य वाक्यीयत्वेन प्राकरणिकातिथ्यार्थत्वबाधापत्तेश्च । अतस्तदुद्देशेनापि विधाने त्रिष्वपि पदेषु त्रित्वरूपोद्देश्यतावच्छेदकलक्षणाया आवश्यकत्वाच्च । यथा च व्यासज्यवृत्तिधर्मस्योद्देश्यतावच्छेदकत्वेऽपि एकैकविकारेऽतिदेशः तथा कौस्तुभे ग्रहैकत्वाधिकरणे[1] निरूपितम् ॥ ११ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
चतुर्थाध्यायस्य द्वितीयः पादः.

---

[1] ३-१-७.

अथ चतुर्थाध्यायस्य तृतीयः पादः.

(१)—द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादस्स्यात् ॥१॥ उत्पत्तेश्चातत्प्रधानत्वात् ॥ फलं तु तत्प्रधानायाम् ॥ ३ ॥

अनारभ्य "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति" इति श्रुतं द्रव्यं, सोमे "यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते" इति श्रुतस्संस्कारः, "वर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजानूयाजा इज्यन्ते वर्म यजमानस्य भ्रातृव्यस्याभिभूत्यै" इति श्रुतं कर्म च नापापश्लोकश्रवणादिरूपफलार्थं, कामशब्दाद्यभावेन वर्तमानापदेशस्य फलपरत्वानुपपत्त्या अर्थवादत्वस्यौदुम्बराधिकरणे[1] साधितत्वात् । न च स्तुतिपरस्याप्यस्य लक्षणया फलपरत्वं, एकस्यार्थद्वयपरत्वे वाक्यभेदात् । न च रात्रिसत्रवदुपस्थितत्वेन कामपदयुक्तपदान्तरकल्पनया फलपरत्वं, तद्वदिह वाक्यादिप्रमाणेन जुह्वाद्यर्थत्वस्यावगततया फलाकाङ्क्षाविरहात् । न च कर्मोदाहरणे प्रकरणगम्यक्रत्वर्थत्वापेक्षया स्ववाक्योपस्थितफलपदकल्पनायामेव वैमृधवल्लाघवमिति वाच्यं, विजातीयफलकल्पनातः क्लृप्तक्रतूपकारस्यैव फलत्वौचित्यात् । इष्यत एव हि प्रबलप्रमाणोपस्थितसाकाङ्क्षावश्यकवैकृताङ्गत्यागेनैव दुर्बलनिराकाङ्क्षप्राकृताङ्गग्रहणं विकृतौ क्लृप्तत्वमात्रेण । अतो नैते फलप्रयुक्ताः उभयप्रयुक्ता वा । अपि तु क्रतुप्रयुक्ता एवेति फलकामनायामसत्यामप्यनुष्ठेयाः । औदुम्बराधिकरणसिद्धस्याप्यस्यार्थस्य प्रयुक्तत्वरूपप्रयोजनसूचनार्थं पुनरुक्तिः ॥ १ ॥

[1] १-२-२.

(२)—नैमित्तिके विकारत्वात्क्रतुप्रधानमन्य-त्स्यात् ॥ ४ ॥

काम्यं गोदोहनादि कामाभावे नित्यप्रयोगे उपस्थित-त्वेऽपि न ग्राह्यम् । तथा "बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य" इति ब्राह्मणाद्य-धिकारकत्वे निमित्ते द्वादशाहसम्बन्धिब्रह्मसामस्तोत्रोद्देशेन वि-हितं बार्हद्गिरादि नैमित्तिकं च निमित्ताभावे अनुलोमाधिकारके प्रयोगे न ग्राह्यं, निमित्ताभावेऽप्यनुष्ठाने निमित्तसम्बन्धस्य वै-यर्थ्यापत्तेः । न च कामाभावे तत्साधनानुष्ठाने फलानुत्पत्तावपि क्रतुसाद्गुण्योपपत्तेर्न कश्चिद्विरोध इति वाच्यं, तस्य क्रत्वर्थत्वे प्रमाणाभावेन तदनुष्ठाननैयत्ये प्रमाणाभावात् । क्रत्वपेक्षायाश्च अर्थाक्षिप्तयत्किञ्चित्साधनग्रहणेऽपि निवृत्त्युपपत्तेः । अत एव प्र-बलप्रमाणेनाङ्गत्वेऽवगतेऽपि प्राकृताङ्गानां विकृत्यङ्गत्ववदस्यापि नि-त्यप्रयोगार्थत्वमित्यपास्तम् । यदा तु कामनिमित्तसम्बन्धरहितं वारणाभीवर्ताद्याम्नातमेव, तदा कः प्रसङ्गः काम्यनैमित्तिकग्रह-णस्य । यत्र तु तन्नाम्नातं तत्रार्थाक्षिप्तस्य यस्यकस्यचिद्ग्रह-णम् । सिद्धोऽप्ययमर्थः प्रयोज्यत्वरूपप्रयोजनकथनार्थमुच्यत इति न विरोधः ॥ २ ॥

(३)—एकस्य तूभयत्वे संयोगपृथक्त्वम् ॥ ५ ॥ शेष इति चेत् ॥ ६ ॥ नार्थपृथक्त्वात् ॥

यत्र तु विध्यन्तरं "दध्ना जुहोति" इत्यादिश्रुतं, तत्र का-म्यस्यापि द्रव्यान्तरेण विकल्पः । द्रव्यान्तरविध्यभावे तु तस्यैव ग्रहणम् । न च "दध्ना जुहोति" इत्यादि दध्यादेरुत्पत्तिवि-धिः, उक्थ्यव्यूढादिवदस्यालौकिकत्वाभावात् । नापि काम्यदध्या-

देशाश्रयविधिः, तस्य प्रकरणलभ्यत्वेन वैयर्थ्यात् । अतो नित्य-प्रयोगे अङ्गताबोधार्थमेव स विधिरिति तस्योभयप्रयुक्तत्वम् ॥ ३ ॥

(४)–द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्मस्स्यात् ॥ ८ ॥ पृथक्त्वाद्व्यवतिष्ठेत ॥ ९ ॥

सोमे "पयो व्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य" इति श्रुतम् । ज्योतिष्टोमापूर्वसाधनीभूतब्राह्मणादिरूपाधिकारिसंस्कारार्थत्वेन विहितं पयोव्रतादि तत्प्रयुक्तमित्यविवादमेव । अत्र च न बार्हद्गिरादिवत् ब्राह्मणस्य निमित्तत्वं, दृष्टविधया तस्योद्देश्यत्वे सम्भवति निमित्तत्वकल्पने प्रमाणाभावात् । अत एव रागप्राप्तभक्षणद्वारैव पयोनियमात् यस्य रोगादिना अनशनप्रसक्तिः तस्य न पयःप्रयोजकतेति ध्येयम् ॥४॥

(५)–चोदनायां फलाश्रुतेः कर्ममात्रं विधीयेत न ह्यशब्दं प्रतीयते ॥ १० ॥ अपिवाऽऽम्नानसामर्थ्याच्चोदनार्थेन गम्यते अर्थानां ह्यर्थवत्त्वेन वचनानि प्रतीयन्ते अर्थतो ह्यसमर्थानामानन्तर्येऽप्यसम्बन्धः तस्माच्छ्रुत्येकदेशः ॥ ११ ॥ वाक्यार्थश्च गुणार्थवत् ॥ १२ तत्सर्वार्थमनादेशात् ॥ १३ ॥ एकं वा चोदनैकत्वात् ॥ १४ ॥ स स्वर्गस्सर्वान्प्रत्यवशिष्टत्वात् ॥ १५ ॥ प्रत्ययाच्च ॥ १६ ॥

"विश्वजिता यजेत" इत्येकाहकाण्डपठितविश्वजिदादावश्रु-

तफलके भावनाया भाव्यापेक्षायां समानपदश्रुत्युपनीतोपि यागो न भाव्यः, ततोऽप्यन्तरङ्गविधिश्रुत्यवगतप्रवर्तकत्वबलेन पुरुषार्थस्यैव भाव्यत्वावगतेः, तृतीयान्तनामधेयसामानाधिकरण्येन यागस्य करणत्वावगतेश्च । अतोऽश्रुतेऽपि फले तद्वाचककामपदान्तफलपदाध्याहारेण पुरुषार्थफलकत्वमेव । तच्च फलमध्याहृतमपि वेदाकाङ्क्षया अध्याहृतत्वाद्वैदिकमेव । वेदतुल्यं वा । तत्फलमेकमेव कल्प्यते न सर्वाणि, एककल्पनयैव निराकाङ्क्षत्वात् । तदप्येकं स्वर्ग एव, न तु पुत्रपश्वादि "यन्न दुःखेन सम्भिन्नम्" इत्यादिवाक्यात् स्वर्गशब्दस्य सुखविशेषमात्रवाचित्वेन विजातीयस्वर्गत्वस्यैव जन्यतावच्छेदकत्वे लाघवात्, पुत्रादीनां सुखसाधनतया पुरुषार्थत्वस्य विलम्बोपस्थितिकत्वाच्च । स्वर्गस्य बहुभिः प्रार्थ्यमानतया शास्त्रस्य महाविषयत्वलाभाच्च । लाघवाविशेषेऽपि च न सुखत्वस्य ऐहिकामुष्मिकसाधारणस्य जन्यतावच्छेदकत्वं, स्वरसतो दुःखासम्भिन्नसुखस्यैवेच्छाविषयत्वाद्दुःखसम्भिन्नसुखस्य फलत्वानुपपत्तेः, व्याप्यधर्मेण जन्यत्वसम्भवे व्यापकधर्मेण अन्यथासिद्धत्वाच्च, व्यभिचारेण सुखत्वस्य स्वर्गत्ववदेव कार्यतावच्छेदकत्वानुपपत्तेश्च । अतो विश्वजित्त्वावच्छिन्नकारणतानिरूपितजन्यतावच्छेदकत्वं विजातीयस्वर्गत्वस्यैव युक्तम् । मोक्षोऽपि च यदि दुःखध्वंसरूपः, तदा पापक्षयादिवदेव न विश्वजिज्जन्यः जन्यतावच्छेदकगौरवात् । यदि त्वानन्दावाप्तिरूपः तदा तस्यज्ञानैकजन्यत्वान्न विश्वजिज्जन्यत्वम् । यदाऽपि "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति वचनात्कर्ममात्रजन्यत्वं, ज्ञानकर्मसमुच्चयो वा प्रामाणिकः तदाऽपि "त्यक्त्वा कर्मफलासङ्गम्" इत्याद्युपक्रमोपसंहारपर्यालोचनया कर्मशब्दस्य सर्वकर्मपरत्वावसायादश्रुतफलकविश्वजिदादिमात्रपरत्वे प्रमाणाभावः । न चैवमपि

कर्मान्तरसाधारण्येन अस्यापि तत्फलकत्वोपपत्तेः विश्वजिद्वाक्यस्य चोत्पत्तिपरत्वेनापि चरितार्थत्वात्फलकल्पनानुपपत्तिरिति वाच्यं, उक्तवाक्येन कल्पनालाघवानुरोधेन क्लृप्तप्रयोगविधीनामेव कर्मणां मोक्षफलकत्वावगतेः अक्लृप्तप्रयोगकस्य विश्वजिदादेर्ग्रहणे वैरूप्यप्रसङ्गेन विश्वजिद्वाक्येऽपि प्रयोगविधिसिद्ध्यर्थं कर्मफलकल्पनाया आवश्यकत्वात् । एतेन "विविदिषन्ति यज्ञेन" इत्यादिवाक्यात् "कर्मणा पितृलोकः" इत्यादिवाक्याद्वा विविदिषामात्रार्थत्वं पितृलोकमात्रार्थत्वं वा विश्वजिदादेरपास्तम् । अत एव प्रयोगान्तरकल्पनाभियैव न प्रयाजादीनामेव विविदिषार्थत्वम् । एतेन "धर्मेण पापमपनुदति" इत्यादिवाक्येन पापक्षयफलकत्वं विश्वजितोऽपास्तम् । तस्य नित्यस्थले निमित्तप्रयुक्तनैमित्तिकानुषाङ्गिकत्वेन विश्वजिति प्रयोजकत्वकल्पने वैरूप्यापत्तेः ॥ ९ ॥

(६)—क्रतौ फलार्थवादमङ्गवत्कार्ष्णाजिनिः ॥
फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात् ॥
अङ्गेषु स्तुतिः परार्थत्वात् ॥ १९ ॥

"ज्योतिर्गौरायुः" इत्यादिवाक्योत्पादितानि सौत्यानि कर्माणि विधाय "प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति" इति श्रुतम् । तत्र रात्रिसत्रादौ पूर्ववत् स्वर्गकल्पने स्वर्गोपस्थितिः तद्वाचकपदोपस्थितिः कामपदान्ततत्कल्पना चेति गौरवापत्तेः लाघवात् श्रुतप्रतिष्ठादेरेव भाव्यत्वकल्पनम् । तत्र त्वियं व्यवस्था यत्र श्रुतानामेव पदानां लक्षणया फलपरत्वसम्भवः यथा उदाहृतवाक्ये तिप्रत्ययस्य लडर्थकत्वं कल्पयित्वा भविष्यत्कालवृत्तित्वेन साध्यत्वावगतौ प्रतिष्ठादिस्वाभाव्यादीप्सितत्वसिद्ध्या

भाव्यत्वं, धातोरेव वा सन्नन्तत्वं परिकल्प्य इच्छाविषयत्वावगतौ स्वर्गादिवदेव साध्यत्वावगतिः। तत्र प्राथमिकफलापेक्षायां श्रुतवाक्यस्यैव लक्षणया फलपरत्वे प्रमिते पश्चात् स्तुत्यपेक्षायामप्राप्तबललब्धविधेरेव स्तावकत्वम्। यत्र तु श्रुतेष्वर्थवादपदेषु न स्तावकत्वकल्पनं विना फलपरत्वमात्रेणोपपत्तिः "यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति" इत्यादौ, तत्र तेषां स्तावकत्वमेव। फलापेक्षायां तु उपस्थितपदसमानजातीयपदान्तरस्यैव कामपदयुक्तस्य कल्पनेति सर्वदा न स्वर्गप्रयुक्तत्वम् ॥ ६ ॥

(७)—काम्ये कर्मणि नित्यस्स्वर्गो यथा यज्ञाङ्गे क्रत्वर्थः ॥ २० ॥ वीते च कारणे नियमात् ॥ २१ ॥ कामो वा तत्संयोगेन चोद्यते ॥ २२ ॥ अङ्गे गुणत्वात् ॥ २३ ॥ वीते च नियमस्तदर्थम् ॥ २४ ॥

यत्र श्रुतब्रह्मवर्चसादिफलकेष्वपि शास्त्रस्य महाविषयत्वलाभार्थं स्वर्गफलकल्पना, ब्रह्मवर्चसादिकं तु आयुरादिवदानुषङ्गिकं, तत्र किं वाच्यं रात्रिसत्रे इति शङ्कां मन्दविषन्यायेन शिष्यहितार्थं परिहर्तुं सूत्रम् ॥ फलाकांक्षायाः श्रुतफलेनैव शान्तेरुद्देश्यानेकत्वनिमित्तवाक्यभेदप्रसङ्गाच्च न स्वर्गकल्पना। महाविषयत्वाभावस्तु विशेषश्रवणे न दोषः। आयुरादौ प्रमाणद्वयसत्त्वादानुषङ्गिकत्वेऽपि प्रकृते तदनुपपत्तेश्च ॥ ७ ॥

(८)—सार्वकाम्यमङ्गकामैः प्रकरणात् ॥ २५ ॥ फलोपदेशो वा प्रधानशब्दसंयोगात् ॥ २६

"एकैकस्मै कामायान्ये यज्ञक्रतव आह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः, एकैकस्मै कामायान्ये यज्ञक्रतव आह्रियन्ते सर्वेभ्यो दर्शपूर्णमासौ" इति श्रुताभ्यां वचनाभ्यां संयोगपृथक्त्वन्यायेन[1] सर्वफलार्थत्वं, न तु तत्तत्प्रकरणस्थगुणकामानामपि दर्शादिप्रयोज्यत्वात्तदभिप्रायेणानुवादत्वं, वैयर्थ्यात् औपचारिकत्वाङ्गीकारे तादर्थ्यस्य प्रमाणाभावाच्च । अतोऽप्राप्तार्थकत्वादेव विधिभावनावाचिपदाध्याहारेण सर्वफलार्थत्वेन विनियोगः । न चैवं स्वर्गार्थत्वबोधकविधिवैयर्थ्यं, गोबलीवर्दन्यायेन भिन्नविषयकत्वकल्पनयाऽभ्युदयशिरस्कत्वोपपत्तेः ।

अत्र चाविशेषात्सर्वाणि फलानि ज्ञेयानि । न त्वर्थवादगतान्यशब्दस्य सदृशवाचित्वात् ज्योतिष्टोमदर्शपूर्णमाससदृशसोमयागान्तरेष्ट्यन्तरजन्यफलमात्रपरस्तत्र तत्र यथायोगं सर्वशब्दः,/ अर्थवादस्य स्तुत्यर्थत्वेनैवोपपत्तौ हारियोजनगतसर्वशब्दन्यायेन सङ्कोचकत्वानुपपत्तेः । अत एव सर्वशब्दस्य सर्वनामत्वाद्वैदिकफलमात्रपरत्वमपि नाशङ्क्यं, वैदिकानामपि पूर्वमनुपस्थितत्वात् । कथञ्चिदुपस्थितेर्लौकिकेष्वप्यविशेषाच्च । यानि तु शशविषाणप्राप्त्यादीनि प्रमाणेन केनाप्यप्रसिद्धानि तेषां न सर्वशब्देन ग्रहणम् ॥

यत्त्वतीन्द्रियार्थापरोक्षज्ञातृत्वलक्षणसार्वज्ञ्यादेरपि न सर्वशब्देन ग्रहणं तस्य लोकवेदयोः क्वचिदप्युपायान्तरजन्यत्वादर्शनादित्युक्तं तन्त्रसारतन्त्ररत्नादौ, तत् "प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानं, भुवनज्ञानं सूर्ये संयमात्" इत्यादिपातञ्जले "चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि । मां तत्र मनसा ध्यायन् विश्वं

[1] ४-३-३

पश्यति चक्षुषा" इत्यादिपुराणेषु च सिद्धिमात्रे योगधारणाविशेषस्य साधनत्वेनोक्तत्वादुपेक्षितम्, निरतिशयसार्वज्ञ्यस्याजन्यत्वेऽपि भुवनज्ञानादेस्सम्भवेन ग्रहणोपपत्तेः । नचैवं मन्वादीनामपि सर्वज्ञत्वोपपत्तेस्स्मृतीनां वेदमूलकत्वानापत्तिः, अष्टकास्वर्गसाधनत्वस्य प्रमाणान्तरेणासिद्धौ योगेनापि द्रष्टुमशक्यत्वात् ॥ ८ ॥

(९)—तत्र सर्वेऽविशेषात् ॥ २७ ॥ योगसिद्धिर्वाऽर्थस्योत्पत्त्यसंयोगित्वात् ॥ २८ ॥

एकस्मिन् प्रयोगे किं सर्वाणि फलान्युत्पद्यन्ते उतैकमिति चिन्तायां सर्वत्वस्यैवोद्देश्यतावच्छेदकत्वेन कार्यतावच्छेदकत्वात् कारणेन च तदवच्छिन्नोत्पत्तिनियमात् सर्वाण्युत्पद्यन्ते ।

अस्तु वा तच्छब्दादाविव पुत्रत्वादिनैवोद्देश्यता सर्वत्वं च तद्विशेषणत्वादविवक्षितं, तथाऽप्येकस्मिन्नपि प्रयोगे कारणसत्त्वात् सकलकार्योत्पत्तौ बाधकाभावः । न ह्येकं कारणं कार्यद्वयं नोत्पादयति, एकस्मादपि घटादेः रूपरसक्रियाद्यनेकोत्पत्तिदर्शनात् । एककार्यतावच्छेदकावच्छिन्नोत्पत्तौ तदवच्छिन्नान्तरस्यानुत्पत्तिदर्शनात् पुत्राद्यन्तरं नोत्पद्यतां कार्यतावच्छेदकान्तरावच्छिन्नस्य तु पश्वादेर्युगपत्क्रमेण वोत्पत्तौ न किञ्चिद्बाधकम् । न च सर्वेषां युगपत्सर्वस्य कामनाभावादनुत्पत्तिः, कामनायाः कर्माङ्गत्वे फलं प्रति जनकत्वे वा प्रमाणाभावेन तदभावेऽप्युत्पत्तौ बाधकाभावात् । प्रवृत्तिं प्रति परं फलेच्छायाः कारणत्वादन्यतमफलेच्छामात्रेणैव प्रवृत्तौ जातायां कारणसत्त्वेन सर्वकार्योत्पत्तौ न किञ्चिद्बाधकम् । अत एव विध्यवगतसमीहितसाधनत्वमप्यन्यतरफल एव समीहितत्वबोधनेनोपपन्नम् । न च सर्वफ-

लोत्पत्तौ तेषां भोक्तव्यत्वेन मोक्षानुपपत्तिरिति तन्त्रसारोक्तं युक्तं, ज्ञानेन तदपूर्वाणां नाशात् । यदा तु स्वर्गवाक्यवैयर्थ्यापत्तेः तस्यैव मुख्यफलत्वं अन्येषां तु "एकैकस्मै कामाय" इत्यर्थवादात् अन्ये क्रतव एकैकस्मै अयं तु नैकस्मा एव किन्तु सर्वेभ्योऽपीत्यर्थावगतेरानुषङ्गिकत्वमिति तन्त्रसारोक्तमाश्रीयते तदा तेषां कामनाभावेऽप्यायुरादिवदुत्पत्तौ न किञ्चिद्बाधकम् ॥

वस्तुतस्तु–स्वर्गवाक्यस्याभ्युदयशिरस्कत्वेनाप्युपपत्तेरर्थवादस्य च साध्यसमुच्चायकत्ववत् मुख्यत्वसमुच्चायकत्वस्याप्युपपत्तेरिदं मतमुपेक्षितमिति पूर्वोक्तयुक्त्यैव सर्वोपपत्तिः ।

अस्तु वा अकाम्यमानस्यानुत्पत्तिः तथाऽपि यत्र द्वित्राणामेव फलानां कामना तत्र तावतामुत्पत्तिः केन निवार्या । न चायमेव सिद्धान्त इति तन्त्रसारोक्तं युक्तं, भाष्यादिष्वकथनेनापसिद्धान्तात् । अत एव यद्यप्यनुपस्थितत्वान्न पुत्रत्वादिकमुद्देश्यतावच्छेदकं, सर्वशब्दस्य विशेष्यसाकाङ्क्षत्वान्न सर्वत्वमपि, अपि तु पूर्ववाक्ये कामशब्दोपादानात्तस्यैव सर्वनाम्ना सर्वशब्देन परामर्शात् कामनाविषयत्वमेवोद्देश्यतावच्छेदकं कार्यतावच्छेदकं चेत्याश्रीयते, तथाऽपि यत्र समूहालम्बनात्मिकाऽनेकविषयिणी कामना तत्र तावतामुत्पत्तिरनिवार्यैवेति प्राप्ते—

उक्तयुक्त्या प्रवृत्तिप्रयोजककामनाविषयत्वमेवोद्देश्यतावच्छेदकम् । अनुष्ठानोत्तरभाविकामनाविषयत्वावच्छिन्नोत्पत्तिवारणाय प्रवृत्तिप्रयोजकतया क्लृप्ताया एव कामनाया उद्देश्यतावच्छेदककोटिप्रवेशार्थं प्रवृत्तिप्रयोजकेति कामनाविशेषणम् । ततश्चानुष्ठानोपक्रमे या कामना तद्विषयत्वावच्छिन्नस्यैकस्यैवोत्पत्तिर्नान्यस्य । न च समूहालम्बनस्थले विषयताया व्यासज्यवृत्तित्वादनेकोत्प-

त्तिप्रसङ्गः, समूहालम्बनज्ञान इव समूहालम्बनेच्छायामपि प्रत्येकमेव विषयत्वस्यावश्यकत्वात्। इतरथा तादृशाकारणात् समूहालम्बनात्मकयोरेव स्मृतियत्नयोरुत्पत्त्यापत्तेः। अत एव कार्यतावच्छेदकावच्छिन्नस्यैकस्यैवोत्पत्तिनियमादेकमृदादिभ्यो घटान्तरानुत्पत्तिवत्फलान्तरस्याप्यनुत्पत्तिरित्येकप्रयोगे एकमेव फलम्। निमित्तस्थले च तस्यैव प्रवृत्तिप्रयोजकत्वात् पापक्षयकामनायास्तु तत्त्वाभावेन पापक्षयस्योक्तविधकार्यतावच्छेदकावच्छिन्नत्वाभावाद्युगपन्नित्यकाम्यप्रयोगे पापक्षयेण सह स्वर्गादिफलोत्पत्तावपि न क्षतिः। अत एव यत्र स्वातन्त्र्येण विविदिषापरमेश्वरप्रीत्याद्यर्थत्वेन तत्तद्विधिबलेन यज्ञाद्यनुष्ठानं तत्र कारणसत्त्वेन स्वर्गाद्युत्पत्तौ प्रसक्तायां 'त्यक्त्वा कर्मफलासङ्गं' इत्यादिस्मृत्या फलान्तरद्वेषस्यापि तत्राङ्गत्वेन विधानादितरफलाभावविशिष्टविविदिषादेरेव वा 'अकामस्सर्वकामो वा' इत्यादिना फलत्वाभिधानान्न तदुत्पत्तिः। सार्वकाम्यवाक्येन पश्वाद्यन्यतरः स्वर्गकामवाक्येन स्वर्ग इति तु इष्टमेव। इदमपि स्वर्गवाक्यस्य प्रयोजनमित्यपि बोध्यम्॥

प्रयोजनं तत्तत्कामोल्लेखः॥

एवं वा—स्वर्गस्तावदामुष्मिक एव,

"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं यत्तत्सुखं स्वःपदास्पदम्"॥

इति वाक्यशेषादवगतस्य निरतिशयप्रीतिरूपस्य तस्येह जन्मन्यसम्भवात्, मन्त्रार्थवादादौ देशविशेषभोग्यत्वप्रसिद्धेश्च। पशुपुत्रादीनां त्वैहिकामुष्मिकत्वं, न तु केवलामुष्मिकत्वम्। तत्रापि भोगप्रतिबन्धकदुरितसत्त्वे आमुष्मिकत्वम्। तदभावे त्वैहिकत्वमेव।

न च कर्मणां शरीरारम्भद्वारैव फलसाधनतेत्यत्र किञ्चिन्नियामकमस्ति, येन केवलामुष्मिकत्वं भवेत्। न चैषां कैवलैहिकत्वं, इह जन्मनि पुत्रपशुराज्यादिसत्त्वे तदयोग्यत्वेऽपि वा जन्मान्तरे तन्मे स्यादिति कामनाया दुरपह्नवत्वात्। अतो मुमूर्षूणामपि पश्वाद्यर्थं चित्राद्यनुष्ठेयमेव। यत्र तु वृष्ट्यादावैहिक एव कामना तत्र केवलैहिकत्वम्॥

अस्तु वा वृष्ट्यादेरपि तादृशकामनासत्त्वे उभयरूपत्वम्। केवलैहिकत्वं तु पुत्रगतपूतत्वादौ आहवनीयादौ च द्रष्टव्यम्॥९॥

(१०)—समवाये चोदनासंयोगस्यार्थवत्त्वात्॥२९॥ कालश्रुतौ काल इति चेत्॥३०॥ नासमवायात्प्रयोजनेन स्यात्॥३१॥

"अग्निं चित्वा सौत्रामण्या यजेत" "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत" इत्यग्निवाजपेयप्रकरणे श्रुतम्। तत्र प्रकरणान्तरन्यायेन[1] प्रसिद्धसौत्रामणिबृहस्पतिसवापेक्षया कर्मान्तरमेव तत्तद्धर्मकं अग्निवाजपेयपूर्वकालकत्वविशिष्टं विधीयते। तस्य च फलापेक्षायां प्रकरणादिना अग्निवाजपेयाङ्गत्वमविवादमेवेति तत्तत्प्रयुक्तत्वं तत्तत्कर्मान्तरस्य। समाप्तेऽपि बृहस्पतिसवाद्यतिरिक्ताङ्गविशिष्टवाजपेयादिप्रयोगे तदुत्तराङ्गमिदं फलानुकूलयोग्यतायाः परमापूर्वनिष्ठाया जननार्थं न विरुध्यते। अत्र च पूर्वपक्षो निर्बीजो गतार्थश्चेति नातीव तत्रादरः। तत्तदधिकरणादेः प्रयोजनमात्रं तु शिष्यहितार्थं कथ्यत इति द्रष्टव्यम्। एवमन्यत्रापि यत्र पूर्वपक्षानुक्तिस्तत्रेदमेव प्रयोजनं द्रष्टव्यम्॥१०॥

---

[1] २-३-११.

(११)–उभयार्थमिति चेत् ॥ ३२ ॥ न शब्दैकत्वात् ॥ ३३ ॥ प्रकरणादिति चेत् ॥ ३४ ॥ नोत्पत्तिसंयोगात् ॥ ३५ ॥

दर्शपूर्णमासयोः "संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपति" इति श्रुतो वैमृधोऽपि प्रकरणादुभयोर्दर्शपूर्णमासयोरङ्गम् । न च वाक्येन पौर्णमासीमात्राङ्गत्वावगमः, वाक्यस्थपौर्णमासीशब्दस्य ल्यप्प्रत्ययोपात्तकालप्रतियोगिसंस्थापदवाच्यसमाप्तिविशेषणत्वेनाङ्गिपरत्वाभावात् । तत्त्वे वा संस्थाप्येतिपदस्य साकाङ्क्षत्वापत्तेः । न च फलापेक्षायामन्यार्थमप्युपात्तस्योपस्थितत्वाद्रात्रिसत्रप्रतिष्ठावत्तद्वाचकपदान्तरकल्पनया पौर्णमासीमात्रार्थत्वमिति वाच्यं, प्रयाजादिवत् प्रकरणेनोभयार्थत्वक्लृप्तौ भ्रातृव्याभिभूतिवदेव पदान्तरकल्पनानुपपत्तेः । अतस्स्वतन्त्रकालविधानात्पौर्णमास्युत्तरकालमेव तद्दिने क्रियमाणोऽयमुभयाङ्गमुभयप्रयुक्त इति प्राप्ते—

प्रयाजेष्वक्लृप्तभ्रातृव्याभिभूतेः कल्पने गौरवाद्युक्तं विलम्बोपस्थितिकस्यापि क्लृप्तक्रतूपकारस्यैव फलत्वम् । प्रकृते तु पौर्णमास्युपकारस्यापि क्लृप्तत्वाद्युक्तं स्ववाक्योपस्थिततत्पदकल्पनया वाक्येनैव तन्मात्राङ्गत्वम् । अतश्चात्र पौर्णमासीप्रयोगसमाप्त्युत्तरकालविशिष्टं कर्मैव पौर्णमास्युद्देशेन विधीयते । न चैवं तस्यापि विकृतित्वादतिदेशेन "य इष्ट्या" इत्यादिवचनेन वा अमावास्याकालत्वापत्तिः, अनुशब्देन पौर्णमास्यानन्तर्यस्यापि विधेयत्वेन तद्बाधात् । न चैवमनुनिर्वाप्य देविकाहविर्वत् प्रधानमात्रोत्तरत्वस्यैवापत्तेः प्रयोगबाहिर्भावानापत्तिः । "संस्था-

व्य" इत्यस्य वैयर्थ्यापत्तेः। "यच्छक्नुयात्तद्दद्यात्" इति दक्षिणाभेदाम्नानाच्च प्रयोगभेदस्य सङ्कर्षे वक्ष्यमाणत्वात्॥

उपयोगस्तु परमापूर्वजननानुकूलायां फलानुकूलायामेव वा समुदायापूर्वनिष्ठायां योग्यतायां द्रष्टव्यः॥

प्रयोजनं पूर्वपक्षे अमावास्यायां तन्त्रमध्ये वैमृधः कार्य इति तन्त्रसारः। तत्र स्वतन्त्रकालक्रमयोराम्नानात्। अतोऽमावास्याविकारेष्वतिदेशः प्रयोजनम्। यद्वा तु पार्वणहोमवदस्यापि विकृतावतिदेशो नेष्यते तदा सङ्कल्पे उभयोरुल्लेखः। सिद्धान्ते पौर्णमासस्यैवेति द्रष्टव्यम्॥ ११॥

(१२)–अनुत्पत्तौ तु कालस्स्यात्प्रयोजनेन सम्बन्धात्॥ ३६॥

सोमे "प्रहृत्य परिधीन् हारियोजनं जुहोति" "आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति" इति श्रुतम्। तत्र प्रहरणं तावत् द्वितीयया परिधिसंस्कारकं, परिधयश्च यद्यपि न सोमयागाङ्गं तथाऽपि तदङ्गसवनीयाद्यङ्गत्वेन प्राप्ता एवेति तेषां फलवत्त्वम्। अतश्च हारियोजनस्यापि यद्यपि नेदमुत्पत्तिवाक्यं, तथाऽपि तदुत्पत्तिवाक्ये फलाश्रवणात् तस्य परिधिप्रहरणाङ्गत्वम्। यद्यपि चायं सोमयागाभ्यास एव, तथाऽपि एतदभ्यासस्य परिधिप्रहरणाङ्गत्वं अभ्यासान्तराणां स्वर्गाद्यर्थत्वेऽपि उद्गात्रपच्छेदनिमित्तपुनःप्रयोगस्येव न विरुध्यते। एवं द्वितीयवाक्ये अनूयाजाः यद्यपि न सोमयागे प्रकृताः तथाऽपि तदङ्गसवनीयाद्यङ्गत्वेन सन्त्येव फलवन्तः। आग्निमारुतशस्त्रस्य तु यावत् प्रकरणात्क्रत्वङ्गत्वं कल्प्यते तावत् वाक्येनैवानूयाजाङ्गत्वम्। न चात्र वैमृधवत्पदान्तरकल्पनाऽपि, अङ्गभूतकालविशेषणत्वेनैवा-

ङ्गत्वोपपत्तेः। न च वैमृधवदस्यानुत्पत्तिवाक्यत्वादुत्पत्तिवाक्ये च फलापेक्षायां प्रकरणात्क्रत्वङ्गत्वकल्पनेति मूलोक्तं युक्तं, उत्पत्तिवाक्ये तदपेक्षायामपि इष्टसामान्यस्य भाव्यत्वमङ्गीकृत्य वाक्यान्तरेण विनियोगोपपत्तौ दुर्बलप्रमाणेन अङ्गत्वकल्पनानुपपत्तेरिति प्राप्ते—

हारियोजनस्य तावज्ज्योतिष्टोमत्वेनैव स्वर्गादिरूपस्य फलस्य क्लृप्तत्वाच्च वैमृधन्यायेन[1] पदान्तरकल्पनया प्रहरणाङ्गत्वे प्रमाणमस्ति। आग्निमारुतस्य तु यद्यपि न विशिष्य वाक्येन क्रत्वङ्गत्वं, तथाऽपि "द्वादशशस्त्रोऽग्निष्टोमः" इत्याद्यनन्यथासिद्धलिङ्गोपष्टब्धप्रकरणवशेनैव क्रत्वङ्गत्वसम्भवे वाक्येनाङ्गत्वकल्पनायोगः॥

वस्तुतस्तु प्राप्तानूयाजोद्देशेन ऊर्ध्वत्वस्य आग्निमारुतस्य च विधौ वाक्यभेदापत्तेः परस्परान्वयित्ववादिनां प्राचामपि विशेषणविधिकल्पनागौरवापत्तेर्नानेन वाक्येन आग्निमारुतस्यानूयाजाङ्गत्वेन विधानम्। अत एव "आग्निमारुतादूर्ध्वं" इत्यत्र पदद्वयेन लक्षणया तत्प्रतियोगिकोर्ध्वकाल एवानूयाजोद्देशेन विधीयते। "दर्शपूर्णमासाभ्यामिष्ट्वा" इत्यादौ तु तृतीयान्तस्य इष्टेरर्थेनैवान्वयान्न लक्षणेति ध्येयम्॥

वस्तुतस्तु न प्रकृतेऽपि लक्षणा, "तां चतुर्भिः" इतिवद्विशिष्टभावनाबोधेऽपि ऊर्ध्वत्वमात्रविधिफलकतया विधेयानेकत्वाभावात्॥

प्रयोजनं पूर्वपक्षे सवनीयविकारे सोमयागानङ्गे हारियोजनाग्निमारुतयोः करणम्। सिद्धान्ते नेति ॥ १२॥

[1] ४-३-११.

(१३)–उत्पत्तिकालविशये कालस्स्याद्वाक्यस्य तत्प्रधानत्वात् ॥ ३७ ॥

सोमप्रकरण एव "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इति श्रुतम्। तत्र यद्यपि फलार्थतया सोमयागस्य क्लृप्तत्वात् प्रकृतप्रत्यभिज्ञाबलेन न कर्मान्तरत्वाशङ्का, तथाऽपि प्रकरणान्तरन्यायेन[1] दर्शपूर्णमासधर्मकस्यैव कर्मान्तरस्य फलवत्सोमयागोद्देशेन विधेयपूर्वकालविशेषणतया विधानम्। न चात्र वाक्यभेदः परस्परान्वयस्य व्युत्पन्नत्वादिति प्राप्ते—

"सर्वेभ्यो दर्शपूर्णमासौ" इत्यादावाख्यातासमानाधिकरणत्वेन व्यवहितपरामर्शकत्वस्य कौस्तुभादौ स्थापितत्वात् कर्मान्तरत्वानुपपत्तेः स्वफलप्रयुक्तदर्शपूर्णमासपूर्वकालकत्वस्यैव सोमयागोद्देशेन विधानमिति कालार्थ एवायं संयोगः॥

प्रयोजनं पूर्वपक्षे सोमारम्भात्पूर्वस्मिन् पर्वणि दर्शपूर्णमासधर्मकं कर्मान्तरं सद्यस्कालं कृत्वा द्व्यहकालं दर्शो वा पूर्णमासो वा कार्यः। सिद्धान्ते नेति ॥ १३ ॥

(१४)–फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात् ॥ ३८ ॥ अङ्गानां तूपघातसंयोगो निमित्तार्थः ॥ ३९ ॥

वैश्वानरेष्टिस्तावत् पूतत्वाद्यार्थवादिकफलार्था, सत्यपि निमित्तसंयोगेनाकरणे प्रत्यवाये भावनाभाव्यत्वेन पापक्षयापेक्षया पूतत्वादेरेव लघुभूतस्यान्वयात्। सा च पुत्रगतपूतत्वादिफलप्रयुक्ता, उत कर्तृगतपूतत्वादिफलप्रयुक्तेति चिन्तायां—

[1] २-३-११.

विधिना कर्तृसमीहितस्यैवाक्षेपात् आत्मनगतात्मनेपदेन चाग्निप्रयोज्यफलस्यात्मगामित्वावगतेरिष्टिकर्तर्येव फलम् । न च "यस्मिन् जाते" इत्यादिना धर्मिग्राहकप्रमाणेन पूतत्वादेः पुत्रगतत्वावसायः, तस्यापि "स तेजस्वी" इति सर्वनाम्ना निर्वपतिकर्तुरेव समानाधिकरणविभक्तिनिर्दिष्टस्य परामर्शेनाविरोधित्वादिति प्राप्ते—

यच्छब्दसमभिव्याहारे सति, तच्छब्दस्य तदर्थपरामर्शित्वनियमेन पुत्रगतपूतत्वादेरेव फलत्वावसायात्, तस्यापि कर्तृसमीहितत्वेन विध्यात्मनेपदयोरविरोधात् पुत्रगतपूतत्वादिप्रयुक्तैव सा । अकरणे प्रत्यवायस्तु कर्तृनिष्ठ एव ।

प्रयोजनं पुत्रमरणेऽपि जातेष्टिः पितरि फलसंस्कारश्च पूर्वपक्षे । सिद्धान्ते नेति ।(उल्लेखो वा)॥

एवं वा—इयमिष्टिः पुत्रजननानन्तरमेव कार्या, सप्तम्या जननस्य निमित्तत्वावगमेन निमित्तानन्तरं नैमित्तिकस्योचितत्वात् । न चात्र सप्तम्या जननोत्तरकालविधिरिति तन्त्रसारोक्तं युक्तं, "पुत्रे" इति सामानाधिकरण्यानुपपत्तेः । अतो 'भिन्ने' इतिवत् निमित्तपरैव सप्तमी । सापेक्षत्वाच्च हविरार्तिन्यायेनोभयविवक्षा । यद्यपि पुत्रमात्रं निमित्तं स्यात्, तथाऽपि निमित्तानन्तर्यलाभेन नैमित्तिकस्य शौचकालबाधेनाप्यनन्तरमेव करणम् । न च स्तन्यपानाभावे पुत्रमरणेन शेषिविरोधापत्तिः, जातकर्माङ्गभूतस्य घृतमधुप्राशनपूर्वकवैधप्राथमिकदक्षिणस्तनप्राशनस्योत्तरकालत्वेऽपि रागतो यत्किञ्चित्प्राशनस्य सम्भवेन मरणानापत्तेः। न च जननानन्तर्यस्य जातकर्मण्यप्यावश्यकत्वाद्विनिगमनाविरहः, प्रत्यक्षश्रुतिविहितस्यैव नियामकत्वादिति प्राप्ते—

जातकर्मणो नाळच्छेदपूर्वभावविधानात् अच्छिन्ननाळस्य प्राशननिषेधादिष्टेर्जननानन्तरमेव करणे मरणापत्तेश्शेषिविरोधापत्त्या उत्कर्षः । न च निमित्तश्रुत्यनुरोधेन स्मार्तनिषेधस्यानाहिताग्निपरत्वं, भूतनिमित्तस्थले निमित्तस्य नैमित्तिकानुष्ठापनमात्रे विधेस्तात्पर्येणानन्तरानुष्ठानस्यासति बाधके उत्सर्गसिद्धत्वेन निमित्तश्रुत्यविरोधान्निषेधसङ्कोचानुपपत्तेः ॥

वस्तुतस्तु—निमित्तत्वमनन्तरमवश्यानुष्ठापकत्वरूपमेव । अन्यथा भेदनहोमादेरपि पदार्थगतक्लृप्तक्रमबाधानुरोधेन अन्ते करणापत्तेः । जातकर्मनामकरणादौ मलमासादावनुष्ठानानुपपत्तेश्च । अतो निमित्तश्रुतिविरोधेऽपि जातकर्मणोऽपि निमित्तानन्तर्यश्रवणादवश्यमन्यतरस्य तद्बाधे निषेधस्यापि सङ्कोचापत्त्या जातेष्टावेव तद्बाधः । वरं हि स्मार्तानामप्यनेकेषां बाधे श्रौतस्याप्येकस्य बाधः, प्रमेयबलाबलस्य बलवत्त्वात् । अतो यत्रैवैतादृशं बलवद्बाधकं विशिष्य कालविधिर्वा तत्रैवागत्याऽऽनन्तर्यघटितमेव निमित्तत्वं लक्षणया आश्रीयते । अतश्च तत्रातिदेशेन प्राप्तानां सामान्यविहितानां वा शौचकालादीनां बाधे प्रमाणाभावादाशौचापगमे मलमासादिरहिते शुद्धे पर्वणि जातेष्टिः कार्या॥

(१५)—प्रधानेनाभिसंयोगादङ्गानां मुख्यकालत्वम् ॥ ४० ॥ अप्रवृत्ते तु चोदनात् तत्सामान्यात्स्वकाले स्यात् ॥ ४१ ॥

बृहस्पतिसवो वाजपेयोत्तरं शरद्येव कार्यः । यद्यपि हि क्त्वाप्रत्ययेन नानन्तर्यमभिधीयते, पूर्वकालमात्रे स्मरणात्, तथाऽपि औपदेशिकशरत्कालस्य साङ्गप्रधाने विहितत्वेनाङ्गिः

प्रयाजादिष्वग्नेरिवातिदेशिकस्य वसन्तादिकालस्य बाधोपपत्तिः। एवं सौत्रामण्यपि चयनाङ्गत्वात्तदुत्तरकालमेव कार्या। न तु पर्वणि यागप्रयोगोत्तरकालीने, तदानीं चयननियमादृष्टस्य नष्टत्वेन सौत्रामण्या अनुपयोगात्। न हि सा क्रत्वङ्गं, धातुसम्बन्धाधिकारविहितेन क्त्वाप्रत्ययेन चयनमात्राङ्गत्वप्रतीतेरिति प्राप्ते—

शरत्कालस्य वाजपेयप्रयोगविशेषणत्वेन विधेयत्वात् "वाजपेयेनेष्ट्वा" इति तृतीयया बृहस्पतिसवस्य तत्प्रयोगबहिर्भावावगतेस्तत्र शरद्विध्यभावात्कालापेक्षायां नामातिदेशप्राप्तवसन्तादिबाधे प्रमाणाभावः।

एवं सौत्रामण्यामपि न पर्वबाधः, "अग्निं चित्वा" इत्यनेन हि चयनेन क्रत्वपूर्वसाधनीभूताग्नि संस्कृत्येत्यर्थावगतेः ऐंद्रशाचयनभावनोत्तरकालत्वसिद्धिः। न चानुपयोगः, चयनप्रयोज्यक्रत्वपूर्वोपयोगेऽपि चयनाङ्गत्वोपपत्तेः। न त्वेतावता क्रत्वङ्गत्वमिति तन्त्रसारोक्तं मन्तव्यं प्रमाणाभावात्। "क्रत्वङ्गत्वं वा चित्यङ्गत्वेनोपपद्यते" इति सङ्कर्षसूत्रं तु क्रत्वपूर्वोपयोगाभिप्रायं व्याख्येयम्। अत एतेऽपि कालप्रयोजकाः॥१५॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
चतुर्थाध्यायस्य तृतीयः पादः.

अथ चतुर्थाध्यायस्य चतुर्थः पादः.

(१)—प्रकरणशब्दसामान्याच्चोदनानामनङ्गत्वम् ॥१॥ अपि वाऽङ्गमनिज्यास्स्युस्ततो विशिष्टत्वात् ॥२॥

राजसूयप्रकरणे इष्टिपशुसोमयागाः अयागाश्च होमविदेवनाद्यस्सर्वे फलाकाङ्क्षा अपि श्रुता न स्वाराज्येन फलेन सम्बध्यन्ते, भावार्थाधिकरणन्यायेन[1] यजेरेव फलभावनाकरणत्वादयागानां तदङ्गत्वौपपत्तेः । राजसूयपदस्य यजिसामानाधिकरण्येन तन्मात्रनामत्वाच्च । न च राजा सोमः सूयते अभिषूयते अस्मिन्निति व्युत्पत्त्या राजसूयशब्दस्य सोमयागमात्रवाचित्वात् तेषामेव फलसम्बन्धोऽस्त्विति वाच्यं, राज्ञा क्षत्रियेण सूयते निष्पाद्यते इति व्युत्पत्त्या सर्वेष्वप्युपपन्नत्वेन यजिसङ्कोचे प्रमाणाभावात् । अत एव राजा क्षत्रियः सुनोति स्नाति यत्रेति व्युत्पत्त्या अभिषेचनीयस्यैव तन्माहेन्द्रस्तोत्रकालाभिषेकवत्त्वसम्बन्धेन राजसूयपदप्रसिद्धेस्तस्यैव फलसम्बन्ध इत्यप्यपास्तं, उक्तव्युत्पत्त्या सर्वपरत्वसम्भवे यजिसङ्कोचे प्रमाणाभावात् अतस्सर्वे यागा एव फलप्रयुक्ता इति विदेवनादीनां तद्विकृतावतिदेशः ॥ १ ॥

(२)—मध्यस्थं यस्य तन्मध्ये ॥ ३ ॥ सर्वासां वा समत्वाच्चोदनातस्स्यान्न हि तस्य प्रकरणं देशार्थमुच्यते मध्ये ॥ ४॥

विदेवनादीनामङ्गत्वे सिद्धे सन्निधानादवान्तरप्रकरणाद्वा अभिषेचनीयमात्राङ्गत्वस्य तृतीय[2] एव निराकृतत्वात् सर्वराजसूयाङ्गत्वस्यैव महाप्रकरणादवगतेः सर्वप्रयुक्तत्वम् । तार्तीयाधिकरणप्रयोजनकथनार्थं चेदमाधिकरणम् ॥ २ ॥

(३)—प्रकरणाविभागे च विप्रतिषिद्धं ह्युभ-

---

[1] २-१-२.   [2] ३-३-७.

यम् ॥ ५ ॥ अपि वा कालमात्रं स्याददर्शनाद्विशेषस्य ॥ ६ ॥

राजसूय एव "सौम्यश्चरुर्बभ्रुर्दक्षिणा" इति विधाय "पुरस्तादुपसदां सौम्येन प्रचरन्ति" इति श्रुतम् । तत्रापि सत्यप्युपसदां राजसूयान्तर्गतदशपेयाख्यसोमयागाङ्गतया फलवत्त्वे षष्ठ्याः पुरस्ताच्छब्दस्य वैयर्थ्यप्रसङ्गेन "षष्ठ्यतसर्थप्रत्ययेन" इति सूत्रानुसाराद्दिग्योगनिमित्तायास्तादर्थ्यपरत्वाभावात् सौम्यस्य तदर्थत्वानुपपत्तेः, वैमृधवत् पदान्तरकल्पनया तदर्थत्वस्य चानुत्पत्तिवाक्यतयाऽनुपपत्तेः, उत्पत्तिवाक्ये च फलापेक्षायां सामान्यविधिनाऽपि क्लृप्तेन स्वाराज्यफलार्थत्वस्यैवावसायात्कालार्थ एव संयोगः ॥

वस्तुतस्तु उत्पत्तिवाक्यत्वेऽपि प्रवर्ग्यन्यायेन [1]उपसन्निष्ठफलवत्त्वज्ञानस्य स्वाराज्यवाक्याधीनत्वात्तदर्थत्वमेव युक्तम् । अतस्सौम्यः फलप्रयुक्त एव पाठक्रमात्पूर्वपठितकर्मानन्तरकर्तव्यत्वेन प्राप्तोऽतिदेशप्राप्तोपसत्पूर्वं विधीयते । ततश्च न तद्विकृतौ कर्तव्यः । पूर्ववच्चास्यापि तद्विकृतौ कर्तव्यता प्राप्ता अपोद्यत इति सङ्गतिः । तेन सङ्गत्यभावादिदमधिकरणं विदेवनाधिकरणात्पूर्वं द्रष्टव्यमिति तन्त्रसारोक्तिरपास्ता । आचार्योक्तत्वादिति हेतूक्तिस्तु अनुपलब्धिबाधितैव ॥ ३ ॥

(४)—फलवद्वोक्तहेतुत्वादितरस्य प्रधानं स्यात्॥

"वैश्वदेवीं साङ्ग्रहणीं निर्वपेद्ग्रामकामः" इति प्रकृत्य "आमनमस्यामनस्य देवाः" इति "तिस्र आहुतीर्जुहोति" इति

[1] ३-३-१२.

श्रुतम्। तत्रामनहोमानां साङ्ग्रहणीष्टयङ्गत्वं, तस्याः विकृतित्वेन प्रकरणाभावेऽपि सन्निधानादेव तदङ्गत्वोपपत्तेः। "यत्प्रयाजानां पुरस्ताज्जुहुयाद्बहिरात्मन सजातानां दध्याद्यदनूयाजानामुपरिष्टाज्जुहुयात् स्वर्गं लोकमपक्रामेत् मध्ये जुहोति" इति प्राकृताङ्गमध्यवृत्तित्वश्रवणेन प्रकरणाद्वा[1] तदुपपत्तेश्च। वस्तुतस्तु आकाङ्क्षाऽनुवृत्तौ प्रमाणाभावान्नेदं प्रकरणमिति ध्येयम्।

एवं प्रयोजनवत्त्वोपपत्तौ च न ग्रामकामपदानुषङ्गेण स्वतन्त्रफलार्थत्वकल्पना, प्रमाणाभावात् इष्ट्यङ्गपरिधिपरिधानाङ्गभूतवैशेषिकमन्त्रैर्व्यवायाच्च। अतस्साङ्ग्रहणीप्रयुक्ता एवैते। न तु सौम्यवत् फलार्थाः। अतस्सर्वदैव प्रयाजानूयाजमध्ये कर्तव्याः। न तु ग्रामान्तरकामनायामेव ॥ ४ ॥

(५)—दधिग्रहो नैमित्तिकः श्रुतिसंयोगात् ॥८॥ नित्यश्च ज्येष्ठशब्दात् ॥ ९ ॥ सार्वरूप्याच्च ॥ १० ॥ नित्यो वा स्यादर्थवादस्तयोः कर्मण्यसम्बन्धाद्भङ्गित्वाच्चान्तरायस्य ॥११

सोमे "यां वै कांचिदध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आवृश्च्येते प्राजापत्यं दधिग्रहं गृह्णीयात्" इति दधिग्रहो नैमित्तिक एव। यद्यपि चायं यच्छब्दो न निमित्तत्वप्रतिपादकः, देवतापदसमभिव्याहृतस्य अन्तरायनिष्ठनिमित्तत्वाप्रतिपादकत्वात्. देवतायाश्चान्तरायान्वितायां नित्यायाः स्वरूपेण निमित्तत्वायोगाच्च, तथाऽपि देवतान्तरायनिमित्तदोषपरिहारफ-

[1] प्रकरणादपीति. पा.

लवत्त्वावगमात्तस्य च कादाचित्कत्वान्नैमित्तिकत्वं, अर्थवादान्वयार्थं पदान्तराध्याहारस्यावश्यकत्वाद्वा नैमित्तिकत्वम् । "ज्येष्ठो ह वा एष ग्रहाणां यद्दधिग्रहः" इति तु वैगुण्यपरिहारार्थत्वेनापि श्रेष्ठत्वादुपपन्नमिति प्राप्ते—

न तावदार्थवादिकं फलं पर्णमयीन्याय[1]विरोधात् । अर्थवादान्वयस्तु यत्र देवताभावे प्रधानस्यैव लोपापत्तेस्तन्निमित्तिकमपि वैगुण्यं परिह्रियते तत्रेतराङ्गवैगुण्यपरिहारे प्रधानसाद्गुण्ये वा का सम्भावनेत्येवं नानुपपन्नः । न चान्तरायजनितवैगुण्यध्वंसस्य कृप्तत्वेन तं प्रत्येवार्थवादिकस्य जनकत्वस्य कल्पनयोपपत्तौ द्वारीभूतादृष्टांशकल्पने गौरवमिति वाच्यं, ज्येष्ठत्वसंस्तवस्याङ्गस्यानुपपत्तेः, पक्षद्वयेऽप्यन्यतरार्थवादस्यानाङ्गस्यावश्यकत्वेन प्रकरणपाठस्य पाक्षिकत्वपरिहारार्थमन्तरायार्थवादस्यैव तदौचित्याच्च । लाघवस्य प्रमाणानुग्राहकत्वेन प्रमाणविरोधे अकिञ्चित्करत्वात् । अतो देवतान्तरायनिमित्तवैगुण्यस्य दधिग्रहेण परिहर्तुमशक्यत्वान्नित्यमेवाङ्गं दधिग्रहः ॥ ५ ॥

(६)—वैश्वानरश्च नित्यस्स्यान्नित्यैस्समानसङ्ख्यत्वात् ॥ १२ ॥ पक्षेवोत्पन्नसंयोगात् ॥ १३ ॥

अग्नौ "यो वै संवत्सरमुख्यमभृत्वाऽग्निं चिनुते यथा सामिगर्भोऽवपद्यते तादृगेव तदार्तिमार्च्छेत् वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेत्" इति श्रुतौ यागस्तु आलस्यादिना संवत्सरपर्यन्तमुख्यधारणासम्भवे प्रायश्चित्तरूपो नैमित्तिक एव, कर्तृ-

[1] ४-३-१.

समानाधिकरणेन यच्छब्देन क्रियाकर्तृत्वस्य उद्देश्यत्वावगमा- न्निमित्तत्वप्रतीतेः। अतो भेदनहोमादिवदयं संवलितक्रतुनिमि- त्तोभयप्रयुक्तः ॥ ६ ॥

(७)–षड्चितिः पूर्ववत्स्यात् ॥ १४ ॥ ताभिश्च तुल्यसङ्ख्यानात् ॥१५॥ अर्थवादोपपत्तेश्च ॥ १६ ॥ एकचितिर्वा स्यादपवृक्ते हि चोद्यते निमित्तेन ॥ १७ ॥ विप्रतिषेधात्ताभिस्स- मानसङ्ख्यत्वम् ॥ १८ ॥

तत्रैव "योऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्ति अथ षष्ठीं चितिं चिनुते" इति श्रुता षष्ठी चितिरपि उपक्रमस्थकर्तृसमानाधिकरणयच्छब्दबलेनाप्रतिष्ठायाः निमित्तत्वा- वगतेर्नैमित्तिक्येव । यस्तूपसंहारे षष्ठीमिति षण्णां पूरणार्थकः प्रत्ययः, सोऽभिधानापेक्षः, न त्वनुष्ठानापेक्षः, पञ्च चितयः पूर्व- मभिहिताः इदानीमियं षष्ठी अभिधीयते इति । तस्मादग्निच- यनोत्तरमप्रतिष्ठायां निमित्ते एकैव चितिरदृष्टार्था, चयनाङ्गतया प्रयोगभेदेन प्रतिष्ठाफलार्थं वा विधीयते ॥ ७ ॥

(८)–पितृयज्ञस्स्वकालत्वादनङ्गं स्यात् ॥ १९ तुल्यवच्च प्रसङ्ख्यानात् ॥ २० ॥ प्रतिषिद्धे च दर्शनात् ॥ २१ ॥

अनारभ्य श्रुतं "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन च- रन्ति" इति। तत्रायं पिण्डपितृयज्ञो दर्शेष्ट्यङ्गं, अमावास्या-

पदेन कर्मवाचिना "तत्र जयान् जुहुयात्" इतिवत् वाक्याद्दर्शाङ्गत्वप्रतीतेः। यद्यपि चायं कालेऽपि मुख्यः, तथाऽपि फलकल्पनाभियाऽत्र कर्मपरत्वमेव युक्तम् ॥

वस्तुतस्तु यद्यपि काल एव मुख्यः कर्मणि तद्योगान्निरूढलक्षणा, प्रकृते च[1] कालपर एव, अपराह्णसामानाधिकरण्यात्। तथाऽपि "तस्मात्पितृभ्यः पूर्वेद्युः करोति" इति वाक्ये दर्शेष्टिपूर्वेद्युःकालश्रवणात् वैमृधन्यायेन[2] दर्शेष्टेरुपस्थितत्वात्तदङ्गत्वमिति प्राप्ते —

अमावास्याशब्दस्य कर्मवाचित्वं भवतैव निराकृतम्। लक्षणा तु प्रमाणाभावात्कालसामानाधिकरण्यविरोधाच्च दूरतोऽपास्तैव। पूर्वेद्युर्वाक्यमपीष्टेरनुपस्थितत्वान्न तत्प्रतियोगिककालं विधत्ते, अपि तु तिथिद्वैधे पूर्वेद्युःकालं

"यथाऽस्तं सविता याति पितरस्तामुपासते"

इति प्राप्तमनूद्य देवतामात्रम्। केचित्तु द्वैधे चन्द्रदर्शनात्पूर्वेद्युरिति व्याख्याय खण्डपर्वणि परेद्युः पितृयज्ञमनुतिष्ठन्ति। सर्वथा न दर्शाङ्गं पितृयज्ञः। एवं च "पौर्णमासीमेव यजेत भ्रातृव्यवान्नामावास्यां हत्वा भ्रातृव्यममावास्यया यजेत पिण्डपितृयज्ञेनैवामावास्यायां प्रीणाति" इति दर्शेष्ट्यभावेऽपि पिण्डपितृयज्ञदर्शनं सङ्गच्छते। एतद्बलेनैव च "पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानो देवेभ्यः प्रतनुते" इत्यादिपिण्डपितृयज्ञार्थवादे यज्ञोपस्थितावपि न क्षतिः।

यत्तु "न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः"[3] इति मनुवचनं तत् श्राद्धं कृष्णपक्षश्राद्धं दर्शेन अमावास्यया विना

---

[1] दृश्यते च इति—पा. [2] २०-३-११. [3] मनु. ३-२८२.

आहिताग्नेर्न भवति अनाहिताग्नेरिव तिथ्यन्तरेष्विति व्याख्येयम्। न तु दर्शेन दर्शेष्टिं विना श्राद्धं पितृयज्ञो न भवतीत्येवं व्याख्येयं, दर्शपदे लक्षणायां प्रमाणाभावात्। तेनायं स्वर्गार्थ इति मूलानुयायिनः ॥

वस्तुतस्तु—अकरणे सप्तहोतृहोमरूपप्रायश्चित्तस्य आपस्तम्बादिभि[1]स्स्मरणात् ज्योतिष्टोमादिक्रतुभिस्तुल्यवद्गणनाच्च नित्य एवायम् ॥

प्रयोजनं दर्शाभावेऽपि करणं, तद्विकारेषु च नातिदेशः ॥

यत्तु भाष्यकारेण पौर्णमास्यामाधाने कृते अग्निमामावास्यायां दर्शेष्ट्यभावात् पूर्वपक्षेऽकरणमित्युक्तं, तत् द्वादशरात्रिषु पवमानेष्टिपक्षे आधानोत्तरदिने पौर्णमासकालाभावे च बोध्यम्। यदा तु तदुत्तरदिने कालसत्त्वं पौर्णमासस्य, तदा आधानदिन एव सेष्टिसान्वारम्भणीयं पौर्णमासस्यान्वाधानं कृत्वा श्वोभूते पौर्णमासेनेष्ट्वा अग्निमदर्शेष्ट्यङ्गतयैव पितृयज्ञानुष्ठाने न कश्चिद्विरोधः ॥ ८ ॥

(९)—पश्वङ्गं रशना स्यात्तदागमे विधानात् ॥२२॥ यूपाङ्गं वा तत्संस्कारात् ॥२३॥ अर्थवादश्च तदर्थवत् ॥२४॥

सवनीयस्य सन्निधौ "आश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययति" इति श्रुतेन वचनेन पशुत्रयसाधारणयूपपरिव्याणापेक्षया यूपपरिव्याणान्तरं सवनीयाङ्गतया प्रकरणान्तरन्यायेन[2]

[1] 'महाहविर्होता इत्यादि' इत्यधिकम्. [2] २-३-११.

अभ्यासाद्वा यूपदार्ढ्यप्रयोजनकं विधीयते । आश्विनोत्तरकालता उपनिष्क्रमणं च पाठादर्थाच्च प्राप्तमनूद्यत इत्युक्तमेव । अतश्च "आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति" इत्युत्पत्तिवाक्ये पुनश्श्रुतं परिव्याणं न यूपसंस्कारार्थं वैयर्थ्यापत्तेः । किन्तु यूपमिति द्वितीया सप्तम्यर्थे। 'परिवीय' इत्यस्य कर्माकाङ्क्षायां 'पशुं' इत्यस्यानुषङ्गः, तथा च त्रिवृत्करणकयूपाधिकरणकपशुसंस्कारकपरिव्याणोत्तरकालविशिष्टयागविधानात् पश्वर्थमेव परिव्याणं पश्वनपक्रमणार्थमिति प्राप्ते—

द्वितीयया परिव्याणस्य दृष्टविधयैव यूपार्थत्वे सम्भवति लक्षणानुषङ्गयोः प्रमाणाभावः । न च वैयर्थ्यं, रशनाधर्माणां दर्भमयीत्वादीनामेतत्परिव्याणसाधारण्यसिद्ध्यर्थमनुवादत्वस्य तृतीये[1] साधितत्वात् । अन्यथा रशनाधर्माणामौपसत्थ्येऽहन्यनुष्ठीयमानयूपपरिव्याणाङ्गत्वस्यैवानुष्ठानसादेश्यादाप्तौ अप्राकृतकार्येकार्ये तत्परिव्याणार्थत्वासिद्धेः । सति त्वस्मिन् त्रिवृत्करणकयूपपरिव्याणानुवादे, तद्बलेनैव प्रकृतयागीययूपव्यक्तिसम्बन्धिपरिव्याणमात्रस्यैवोद्देश्यत्वावगमात्साधारण्यसिद्धिः ।

अस्तु वा निर्वपतिवदेव प्रकृतिलिङ्गसादृश्येन प्राकृतपरिव्याणातिदेशसिद्ध्यर्थमस्मिन् परिव्याणे त्रिवृत्त्वानुवादः । सर्वथा न परिव्याणान्तरं पशुसंस्कारार्थम् ॥

प्रयोजनं—यूपे द्वैरशन्यसत्त्वेऽपि पशावपि द्वैरशन्यं पूर्वपक्षे प्रकृतौ विकृतौ च । सिद्धान्ते नेति ॥ ९ ॥

(१०)—स्वरुश्चाप्येकदेशत्वात् ॥ २५ ॥ निष्क-

---

[1] ३-६-१०.

यश्च तदङ्गवत् ॥ २६ ॥ पश्वङ्गं वाऽर्थकर्मत्वात् ॥ २७ ॥ भक्त्या निष्क्रयवादस्स्यात् ॥ २८ ॥

"यूपस्य स्वरुं करोति" इति षष्ठ्या स्वरोः यूपार्थत्वावगमात् "स्वरुणा पशुमनक्ति" इत्यञ्जनं प्रतिपत्तिः "यत्किञ्चित्सोमलिप्तं तेनावभृथं यन्ति" इतिवदिति प्राप्ते—

स्वरोर्यूपार्थत्वे अदृष्टार्थत्वापत्तेः षष्ठ्याश्चावयवव्यतिरेकनिमित्तत्वेनाप्युपपत्तेः 'स्वरुणा' इति तृतीयादिबलात् पश्वञ्जनार्थत्वमेव। सोमलिप्ते त्ववभृथपदे गौणत्वाद्यनेकदोषाभया तदङ्गीकरणमित्युक्तमेव [1] ॥

प्रयोजनं पूर्वपक्षे एकयूपके पशुगणे एकस्यैव पशोस्समञ्जनम्। सिद्धान्ते तु सर्वेषामिति।

पार्थसारथिमते तु प्रयाजशेषाभिघारणन्यायेन [2] आघारनियमस्य पशुसंस्कारार्थत्वापत्तेः पूर्वपक्षेऽपि सर्वेषामञ्जनप्रसङ्गात् प्रयोजनानुपपत्तिरिति भाष्यविरोधोऽपि ॥ १० ॥

(११)—दर्शपूर्णमासयोरिज्याः प्रधानान्यविशेषात् ॥ २९ ॥ अपि वाऽङ्गानि कानिचित् येष्वङ्गत्वेन संस्तुतिस्सामान्यतो ह्यभिसंस्तवः ॥ ३० ॥ तथा चान्यार्थदर्शनम् ॥ ३१ अविशिष्टं तु कारणं प्रधानेषु गुणस्य वि-

---

[1] ४-२-८.

[2] ४।१।१४

द्यमानत्वात् ॥ ३२ ॥ नानुक्तेऽन्यार्थदर्शनं परार्थत्वात् ॥ ३३ ॥ पृथक्त्वे त्वभिधानयो- र्निवेशः श्रुतितो व्यपदेशाच्च तत्पुनर्मुख्य- लक्षणं यत्फलवत्त्वं तत्सन्निधावसंयुक्तं त- दङ्गं स्यात् भागित्वात्कारणस्याश्रुतश्चान्य- सम्बन्धः ॥ ३४ ॥ गुणाश्च नामसंयुक्ता वि- धीयन्ते नाङ्गेषूपपद्यन्ते ॥ ३५ ॥ तुल्या च कारणश्रुतिरन्यैरङ्गाङ्गिसम्बन्धः ॥ ३६ ॥ उ- त्पत्तावभिसम्बन्धस्तस्मादङ्गोपदेशस्स्यात् ॥ ३७ ॥ तथा चान्यार्थदर्शनम् ॥ ३८ ॥

प्रयाजादिसाधारण्येन "दर्शपूर्णमासाभ्यां स्वर्गकामो यजे- त" इत्यनेन राजसूयवत् यजिना न फलसम्बन्धः । किन्त्वाग्ने- यादीनां षण्णामेव, दर्शपूर्णमासनाम्ना आग्नेयादिषड्यागेष्वेव प्र- सिद्धार्थकेन यजेरवच्छेदात् । यथा च दर्शपूर्णमासनाम्नः प्रसि- द्धार्थकत्वं तथोपपादितं पौर्णमास्यधिकरणे [1] । तदधिकरणप्रयो- जनकथनार्थं त्विदमधिकरणं प्रयुक्तिसिद्ध्यर्थं न विरुध्यते । राजसूयनाम्नश्च यथा प्रकृतसर्वयागपरत्वं तथा तदधिकरणे [2] स्प- ष्टमेव । अतश्च प्रयाजादीनामङ्गत्वाद्विकृतावतिदेशः ॥ ११ ॥

(१२)—ज्योतिष्टोमे तुल्यान्यविशिष्टं हि कारणम् ॥

गुणानां तूत्पत्तिवाक्येन सम्बन्धात्कारण-

---

[1] २-२-३.

[2] ४-४-१.

श्रुतिस्तस्मात्सोमः प्रधानं स्यात् ॥ ४० ॥
तथा चान्यार्थदर्शनम् ॥ ४१ ॥

"ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यनेन स्वर्गफलसम्बन्धो न सोमयागस्यैव, अपि तु प्रायणीयादीनां सर्वेषामेव, यागत्वाविशेषेण सर्वेषामेव यजिना फलोद्देशेनोपादानात्, सर्वेषां ज्योतिष्टोमनामत्वाविशेषाच्च । न च स्ववाक्ये विहितस्यैव ज्योतिष्टोमसंज्ञकस्य फलोद्देशेन विधानादितरेषां तदङ्गत्वमिति वाच्यं, अग्नीषोमीयाद्यपेक्षयाऽत्र कर्मान्तरे प्रमाणाभावात् । अत एवैतद्वाक्यावहितकर्मणोऽप्रासङ्गत्वादग्नीषोमीयाद्यनुवादेन च सोमविधानायोगात्सोमवाक्येऽपि सोमविशिष्टयागस्यैव विधानम् ॥

न च विशिष्टविधिगौरवभिया लाघवसहकृतवाक्यान्तरोपात्तगुणादेव ज्योतिष्टोमवाक्ये कर्मविध्यङ्गीकारः, तथात्वे नित्यवाक्येऽपि कर्मान्तरस्य विनिगमनाविरहेणापत्तौ सोमवाक्य एव उत्पत्त्यन्वयिगुणेन विशिष्टविध्यङ्गीकारस्य न्याय्यत्वात् । अतश्च प्रकृतत्वाविशेषात राजसूयवत् सर्वेषां फलसम्बन्धः । न च "एतानि वाव ज्योतींषि य एतस्य स्तोमाः" इति वाक्यशेषात् सोमयागस्यैव ज्योतीरूपत्रिवृदादिस्तोमसम्बन्धेन ज्योतिष्टोमनाम्नस्तत्रैव प्रसिद्धार्थकत्वात् दर्शपूर्णमासपदवद्यज्यवच्छेदकत्वोपपत्तेस्तस्यैव फलसम्बन्धोपपत्तिरिति वाच्यं, एतस्यार्थवादत्वेन गौणतयाऽप्युपपत्तौ अर्थान्तरवाचिनो ज्योतिश्शब्दस्य स्तोमवाचित्वाभावात्, ज्योतीरूपस्तोमाङ्गकत्वस्य फलसम्बन्धोत्तरकालीनत्वेनाविशेषात् ॥

न च "ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोति" इत्यनेन वचनेन स्तोत्रोपाकरणस्य सोमयागाङ्गभूतग्रहग्रहणाद्यङ्ग-

त्वावगमात् स्तोमानामपि स्वसाध्यस्तोत्रोपाकरणद्वारा सोमयागसम्बन्धावगतेर्विशेषकत्वोपपत्तिरिति वाच्यं, उपाकरणस्य दृष्टविधया स्तोत्रोपकारकत्वेन द्वितीयया च स्तोत्राङ्गत्वावगतेरस्य कालार्थत्वात्। न च कालद्वारैव सम्बन्धेन विशेषकत्वं, कालस्य फलसम्बन्धोत्तरापेक्षत्वात् तस्य च स्तोत्रगतफलवत्त्वज्ञानाधीनत्वात् तस्यापि च यागगतफलवत्त्वबोधकवाक्याधीनत्वेन तत्प्रवृत्तेः पूर्वमेतद्वाक्यप्रवृत्त्यभावेनैव तत्सम्बन्धावगतेर्नाम्नो विशेषकत्वाभावात् ॥

यद्यपि च पदार्थानां प्राप्तत्वेन अस्य वाक्यस्य क्रमविधायकत्वं स्यात्, तथाऽपि "वेदं कृत्वा वेदिं करोति" इतिवत् श्रौतक्रमाविधायकत्वात् तस्य च प्रातिस्विकविधिविधेयत्वेनेतरक्रमवत् प्रयोगविधिविधेयत्वाभावेऽपि क्रमस्यानुष्ठानावगमोत्तरापेक्षत्वात् तस्य च फलवत्त्वज्ञानोत्तरकालीनत्वेन उक्तविधया न विशेषकत्वमिति प्राप्ते—

क्रमादेरुत्तरकालमाकाङ्क्षायामपि निराकाङ्क्षत्वज्ञानाभावमात्रेण वाक्यस्य पूर्वप्रवृत्त्युपपत्तेः तेन च कालस्य क्रमस्य वा विधेयत्वेन विशिष्य तद्घटितसम्बन्धस्य सोमयागेऽवगमान्नाम्नः प्रसिद्धार्थकत्वेन तस्यैव फलसम्बन्धावगमेन प्राधान्यं, अन्येषां तदङ्गत्वमिति तद्विकृतावतिदेशः ॥

तदेवं प्रयोज्यवर्गो निरूपितः ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
चतुर्थस्याध्यायस्य चतुर्थः पादः.
अध्यायश्च समाप्तः.

अथ पञ्चमाध्यायस्य प्रथमः पादः.

(१)-श्रुतिलक्षणमानुपूर्व्यं तत्प्रधानत्वात् ॥१॥

तदेवमङ्गप्रधानसाधारण्येन प्रयोज्यवर्गे निरूपितेऽधुना प्रयोगाश्रितः क्रमो निरूप्यते । एकादशे हि अङ्गानां प्रधानानां चैकेनैव प्रयोगविधिना विधानमिति वक्ष्यते । अतश्चैकविधिविधेयत्वेन सर्वसाहित्यस्य विवक्षितत्वादेकेन कर्त्रा युगपत्सर्वकरणाशक्तेरवश्यम्भाविनि कस्मिंश्चित्क्रमे नियामकानि श्रुत्यर्थपठनस्थानमुख्यप्रवृत्त्याख्यानि षट् प्रमाणानि निरूपयिष्यन्ते । तत्र क्रमो नाम अव्यवहितोत्तरत्वरूपमानन्तर्यम् । तच्चैकप्रतियोगिकमेकवृत्ति । यथा "वेदं कृत्वा वेदिं करोति" इत्यत्र वेदकरणप्रतियोगिकमानन्तर्यं वेदिकरणवृत्ति । अत्र च दर्शपूर्णमासोत्तरत्वस्यापि सोमाङ्गत्वात्तद्व्यावृत्त्यर्थमव्यवहितेति विशेषणम् । तत्र दर्शपूर्णमासपूर्वकालिकत्वमात्रं क्त्वाप्रत्ययार्थः । न त्वव्यवहितत्वांशोऽपि । न च सोमविधेस्तदपेक्षा, येन अव्यवधान एव तत्पर्यवस्येत्, सोमविधेर्भिन्नप्रयोगविधिविधेयदर्शपूर्णमासप्रतियोगिकक्रमानपेक्षत्वात् । अतस्तत्रोत्तरकालत्वमेव विधेयं, न क्रमः । क्रमश्च सर्वत्रोत्तरपदार्थाङ्गं, तस्यैव काहं कर्तव्य इत्यपेक्षणात् । न तु पूर्वपदार्थाङ्गं, मदुत्तरं कः पदार्थः कर्तव्य इत्यपेक्षायाः क्वचिदप्यनुदयात् । पूर्वपदार्थस्तु प्रतियोगितया क्रमविशेषणं दर्शपूर्णमासादिरिव पूर्वकालतायाः । एतेनोभयपौर्वापर्यरूपोपि क्रमः पदार्थद्वयाङ्गमिति केषांचिदुक्तमपास्तं, प्रमाणाभावात् । अस्तु वा "प्रथमभक्षः" इत्यादौ प्राथम्यं पूर्वपदार्थाङ्गमेव ।

तत्तत्पदार्थानन्तरं तत्तत्पदार्था इत्येवमनेकपदार्थवृत्तिपौर्वापर्यसमुदायरूपविततिरेव क्रम इति तु मूलोक्तः पक्षोऽशाब्दत्वात् विकृतौ क्वचिदेकपदार्थलोपे तावत्पदार्थवृत्तिपौर्वापर्यसमुदायस्यासम्भवात्, व्युत्क्रमेणानुष्ठानेऽपि वैगुण्यानापत्तेरुपेक्षितः।

अस्य च क्रमस्य प्रयोज्यनिष्ठत्वात्तन्निरूपणोत्तरमारम्भः। तन्नियमे च षट् प्रमाणानि श्रुत्यादीनि। तेषां लक्षणानि तत्तन्निरूपणावसरे वक्ष्यन्ते। तत्र श्रौतः क्रमः प्रातिस्विकविधिना विधीयते, आर्थादिक्रमास्तु प्रयोगविधिनैवेति मूलानुयायिनः। वस्तुतस्तु—श्रौतक्रमस्थले क्त्वादिनाऽवगतेरुत्पन्नस्य वाक्येन विनियोगः, क्रमान्तरे तु अर्थादिनोत्पन्नस्य प्रकरणादिकल्पितश्रुत्या विनियोगः। प्रयोगस्तु सर्वत्रैवाङ्गान्तरवत्प्रयोगविधिनैव। इदं च तत्रतत्र स्फुटीकरिष्यते। युज्यते च क्रमस्यापि द्रव्यगुणादिवत् पदार्थविशेषणत्वेन विधानम्।

तदिह श्रुतिर्नाम वृत्त्या क्रमबोधकः क्लृप्तशब्दः। स चाथशब्दादिः। तत्राथशब्दस्यानन्तर्यवाचित्वं शक्त्यैव। क्त्वाप्रत्ययादीनां तु पूर्वकालादिवाचिनामपेक्षानुरोधात्क्रमपरत्वं लक्षणया। अर्थादिषु कल्प्यशब्दस्यैव क्रमबोधकत्वात् क्लृप्तेति विशेषणम्। तत्र "वषट्कर्तुः प्रथमभक्षः" इत्यादौ क्रमविशिष्टभक्षविधानात् प्रथमपदोक्तक्रमस्य वाक्याद्भक्षाङ्गत्वम्। "वेदं कृत्वा" इत्यादौ तु वेदिकरणस्य वाक्यान्तरेण प्राप्तत्वात्तदनुवादेन क्त्वाप्रत्ययोक्तक्रममात्रविधानाद्वाक्यादेव तदङ्गत्वम्। यत्र तु क्रमस्य पाठादिप्रमाणेन सम्भवत्प्राप्तिकता, धात्वर्थश्च सम्भवत्प्राप्तिकोपि भावार्थाधिकरणन्यायेन[1] प्रयोजनान्तरार्थं विधीयते,

---

[1] २-१-२.

तत्र क्रमबोधिका श्रुतिरप्यनुवाद एव, न तु क्रमे प्रमाणं, विशिष्टविधिगौरवापत्तेः, यथा "ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयात् यः कामयेत यथापूर्वं प्रजाः कल्पेरन्" "हृदयस्याग्रेऽवद्यति अथ जिह्वायाः अथ वक्षसः" इत्यादौ । अत्र हि ग्रहणावदानादिरेव फलार्थं हृदयादिमात्रहविष्ट्वसिद्ध्यर्थं च विधीयत इति वक्ष्यते । यत्र तु धात्वर्थस्य क्लृप्तप्रमाणेन प्राप्त्यभावेऽपि कथञ्चित्सम्भवत्प्राप्तिकस्य पुनर्विधाने न किञ्चित्प्रयोजनं, विधेयान्तरं च नान्यत्किञ्चित्, तत्र क्रम एव श्रुत्युक्तो विधीयते, यथा सत्रात्मके द्वादशाहे "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं, ततो होतारं, ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्धिनो दीक्षयति—ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः, ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति—आग्नीध्रं ब्रह्मणः, प्रतिहर्तारमुद्गातुरच्छावाकं होतुः, ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति—पोतारं ब्रह्मणस्सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः, ततस्तमन्यो ब्राह्मणो दीक्षयति ब्रह्मचारी वाऽऽचार्यप्रेषितः" इति वाक्ये । अत्र हि न दीक्षायास्स्वरूपेण तत्तत्संस्कारकत्वेन वा विधिः, अतिदेशप्राप्तत्वात् । प्रकृतौ हि यजमानसंस्कारार्था दीक्षा अतिदेशेनैव सत्रे प्राप्यते, सत्रे च "ये यजमानास्त ऋत्विजः" इति वचनेन ऋत्विक्कार्योद्देशेन यजमानविधानाद्ब्रह्मादीनां यजमानत्वेनैव प्रतिप्रधानावृत्तिन्यायेन तत्र तत्तत्संस्कारकत्वप्राप्तेः । न च ऋत्विक्कार्ये यजमानविधानादेव वरणादिनिवृत्त्या ब्रह्मत्वाद्यप्राप्तिः, तद्विधानेन वरणादिनिवृत्तावपि ऋत्विक्त्वनिवृत्तौ प्रमाणाभावेनाध्यवसायमात्रेणैव ब्रह्मत्वादेरुपपादितत्वात् । न च तेन प्राप्स्यमानाया अपि दीक्षायाः अपूर्वत्वाद्यर्थं पुनश्श्रवणं, ब्रह्मादिप्राप्त्यर्थमतिदेशस्यावश्यकतया निवारयितुमशक्यत्वात् ।

न च दीक्षास्वध्वर्युविधिः, अतिदेशादेव सिद्धेः । न च दीक्षान्तरेऽध्वर्युनिवृत्त्या प्रतिप्रस्थात्रादिविधानं, अध्वर्युदीक्षायामध्वर्योः "चित्पतिस्त्वा पुनातु" इतिमन्त्रवर्णविरोधादेवाप्राप्तेः। न वाऽध्वर्युकर्तृकत्वानुरोधेनोहेन मन्त्रप्रयोगः, कर्तुस्साङ्गप्रधानाङ्गत्वेन चरमापेक्षितत्वेन च कर्त्रनुरोधेन त्वापद्बाधायोगात् । अतो मन्त्रमनूहितमेव प्रयुज्याध्वर्युकर्तृकत्वबाधावश्यंभावे "इतरमन्यस्तेषां यतोऽविशेषस्स्यात्" इति न्यायेन अध्वर्युपुरुषाणामाद्यः प्रतिप्रस्थातैवाध्वर्युदीक्षायां प्राप्नोति । ब्राह्मणाच्छंस्यादिदीक्षासु तु अध्वर्योः "न पूतः पावयेत्" इति वचनेन सत्रप्रकरणपठितेन दीक्षासु दीक्षाख्यसंस्काररहितपुरुषकर्तृविधायकेन पर्युदासात् प्रतिप्रस्थातृप्राप्तिस्सुलभैव । एवं प्रतिप्रस्थात्रादिदीक्षासु नेष्टुः प्रतिप्रस्थात्रनन्तरस्य, नेष्ट्रादिदीक्षासु चोन्नेतुर्नेष्ट्रनन्तरस्य प्राप्तिर्न्यायादेवेति न विधेयान्तराशङ्का । अतः क्रम एवात्राप्राप्तस्तत्तद्दीक्षोद्देशेन विधीयते श्रौतक्त्वाप्रत्ययोक्तः ततःपदोक्तश्च । अत एव एतानि द्वादश वाक्यानि श्रौतक्रमविधायकानि । अर्धित्वाद्युद्देश्यतावच्छेदकमङ्गीकृत्य षडेव वा । उन्नेतृदीक्षावाक्ये तु वैकल्पिकब्रह्मचारिविधानाद्धृदयादिन्यायेन पाठादेव क्रमसिद्धेः 'ततः' इत्यनुवादः । निपातत्वाच्च वाशब्दस्य ब्रह्मचारिविशेषणत्वेऽपि न वाक्यभेदः । अभावपक्षे च ब्राह्मणानामेवार्त्विज्यविधानाद्ब्राह्मण इत्यनुवादः । ब्रह्मचारिणश्च आचार्याधीनत्वस्मृतेः आचार्यप्रेषित इत्यपि ।

यत्तु मूले विततिरूपक्रमपक्षमङ्गीकृत्य सर्वस्याप्यस्यैकवाक्यत्वमित्युक्तं, तत् अशाब्दाया विततेर्विधेयत्वायोगादनेकदीक्षोद्देशेन विधाने च वाक्यभेदापत्तेः उन्नेतृदीक्षायां कर्तृविधेरावश्यकत्वाच्चोपेक्षितम् ।

वस्तुतस्तु आनन्तर्यरूपक्रमपक्षेऽपि तत्तत्संस्कार्यविशिष्टदीक्षोद्देशेन क्रमविधाने वाक्यभेदापत्तेः संस्कार्यमात्रोद्देशेन विधौ च दीक्षानिष्ठत्वालाभादुन्नेतृवाक्य एव तदुद्देशेन कर्तृविधिः। इतरस्तु सर्वोऽपि पदसमुदाय औचित्यतस्तुत्यर्थोऽनुवादः। कर्तुर्दीक्षानिष्ठत्वलाभस्त्वनुवादबलादिरापदस्यैव नानुपपन्नः एवं च सर्वस्याप्येकवाक्यत्वलाभः। क्रमस्त्वनुवाद एव तादृशपाठादवधेयः। निषादस्थपत्यधिकरणन्यायेन[1] श्रूयमाणवाक्ये वाक्यभेदाभावेन पाठगम्यानेकवाक्यकल्पनस्यादोषत्वात्। अन्यथा हृदयादिवाक्येष्वपि विशिष्टविध्यापत्तेः। न च पाठक्रमस्य श्रुतिक्रमस्य च कश्चिदनुष्ठाने विशेषः। अतो मूलोक्तश्रुतिक्रमोदाहरणमनादरणीयमिति ध्येयम् ॥ १ ॥

(२)–अर्थाच्च ॥ २ ॥

अर्थः प्रयोजनम्। तच्च व्युत्क्रमेऽनुपपद्यमानत्वात्क्रमे प्रमाणम्। यथा "अग्निहोत्रं जुहोति यवागूं पचति" इत्यत्र यवागूपाकस्य पाठक्रमात् पश्चात्करणे पाकसंस्कृताया यवाग्वा होमरूपस्य "यवाग्वाऽग्निहोत्रं जुहोति" इतिवचनसिद्धस्य प्रयोजनस्यानिष्पत्तेः, पाकस्य च यवागूत्पादकत्वेऽपि अनुपयुक्तायास्तस्याः प्रयोजनत्वानुपपत्तेस्तदन्यथाऽनुपपत्त्या पूर्वं पाकः पश्चाद्धोमः। न च "तृतीया च होश्छन्दसि" इति स्मरणात् होः कर्मणि तृतीया चकाराद्द्वितीया चेत्यर्थकात् 'यवाग्वा जुहोति' इत्यत्र यवाग्वास्तृतीयया कर्मत्वावगमेन होमस्य प्रयोजनत्वासिद्धिः। तथात्वेऽपि यवाग्वा उपयोगाभावेन होमवाक्य एव सक्तुन्यायेन विनियोगभङ्गाङ्गीकारात्। पाकस्य तु दृष्टार्थत्वात्संस्कारकर्मत्वमेव।

---

[1] ६-१-१३.

वस्तुतस्तु करणत्व एव तृतीयायाश्शक्तिः। कर्मत्वे त्वानुशासनिकी लक्षणा। न चात्र तद्बीजमस्ति। अत एव यत्र चतुरवत्तादावुपयोगक्लृप्तिस्तत्रैव चतुरवत्तेन जुहोति इत्येतादृशवाक्यसत्त्वेऽपि कर्मत्वप्रतीतिरित्येतत्परं स्मरणम्।

अत्र चार्थोपस्थितः क्रमः प्रयोगविधिनैव विधीयते। एवं पाठादिष्वपीति प्राञ्चः। अङ्गान्तरवत्तु अर्थकल्पितश्रुत्या विनियोगः, प्रयोगमात्रं प्रयोगविधिनेत्यपि शक्यं वक्तुम्।

वस्तुतस्तु प्रयोजनवशेन पदार्थानुष्ठाने विहिते आनुषङ्गिकः क्रम इति न तदंशे विधानमिति ध्येयम्। अर्थोऽपि क्रमनियामक इति प्राञ्चः। वस्तुतस्तु अर्थाविरोधिपाठस्थलेऽन्यलभ्यत्वादनुवाद एव। विरोधिपाठस्थले चापूर्वस्यैव तस्य ज्ञापक इत्यप्यनुसन्धेयम्॥ २॥

(३)–अनियमोऽन्यत्र ॥ ३ ॥

यत्रोक्तवक्ष्यमाणक्रमनियामकप्रमाणाभावस्तत्रानियम एव। यथा प्रयाजानुमन्त्रणानां 'वसन्तमृतूनां प्रीणामि' इत्यादीनां 'एको मम' इत्यादीनां च शाखाभेदेनाम्नातानां परस्परम्॥

अत्र हि यद्यपि वसन्तादिप्रकाशकानां न देवताकल्पकत्वं, उभयाकाङ्क्षाप्रमाणकाङ्गभावयाज्यामन्त्रकल्प्यसमिदादिदेवताऽवरोधे अन्यतराकाङ्क्षाप्रमाणकाङ्गभावानुमन्त्रणमन्त्रेण तत्कल्पनानुपपत्तेः। एवं 'एको मम' इत्यादीनामपि न फलकल्पकत्वं, निर्ज्ञातपारार्थ्यात्, श्रुत्यविनियुक्तत्वाच्च। न चोत्कर्षः, प्रयाजानुमन्त्रणसमाख्ययाऽत्रैवान्वयेनान्यत्र सामान्यसम्बन्धबोधकप्रमाणाभावात्। अतश्च मनोतामन्त्रवल्लक्षणया प्रयाजीयक्रतूपकाराख्यफलदेवताकाशकत्वेऽपि भिन्नकार्यत्वात्समुच्चय एवोभयोरेकैकस्मिन् प्रयाजे।

यत्तु तन्त्ररत्नादौ अदृष्टार्थत्वेन समुच्चयाभिधानं तत् दृष्टार्थत्वसम्भवे तदयोगात्—

मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत् ।
शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम् ।

इत्यनुमन्त्रणलक्षणानुपपत्तेश्चोपेक्षितम् । तत्र चैकैकस्मिन् प्रयाजे द्वयोर्द्वयोर्मन्त्रयोः पठ्यमानयोर्न क्रमनियमः, प्रमाणाभावात् । ननु समित्प्रयाजे नियामकाभावेऽपि येन क्रमेण समिदनुमन्त्रितः तेनैव तनूनपातादयोपि, प्रवृत्तिक्रमादिति चेन्न, प्राजापत्यपशुषु हि एकप्रयोगविधिपरिगृहीतेषु पदार्थानुसमये सति प्रकृतौ पाठेन क्लृप्तक्रमयोरुपाकरणनियोजनयोः औपदेशिकपशुसाहित्यानुरोधेन षोडशक्षणव्यवधानेऽपि तदधिकव्यवधाने प्रमाणाभावात् येनैव क्रमेणोपाकरणं तेनैव क्रमेण नियोजनमिति प्रवृत्तिक्रमो युक्तः । प्रकृते तु एकप्रयाजगतयोर्नानाशाखास्थानुमन्त्रणयोः पाठाद्यभावेनाक्लृप्तक्रमत्वात् सत्यपि च सर्वप्रयाजानामेकप्रयोगविधिपरिग्रहे पदार्थानुसमयासम्भवादेकैकस्मिन् प्रयाजे द्वयोर्द्वयोर्मन्त्रयोः पठनीयत्वान्न प्रयाजान्तरीयमन्त्रस्य प्रयाजान्तरीयमन्त्रेण प्रवृत्तिक्रमः । न च नानाशाखास्थयोः क्लृप्तक्रमत्वाभावेऽपि एकशाखास्थानां पञ्चानामपि मन्त्राणां पाठेन क्लृप्तक्रमत्वाच्छाखान्तरीयेणाप्यनियतव्यवधाने प्रवृत्तिक्रमबाधापत्तिः, पञ्चानां मन्त्राणां पञ्चप्रयाजाङ्गत्वेनैकशेष्यङ्गत्वाभावादवान्तरप्रयोगविधिभेदेन भिन्नप्रयोगविधिपरिगृहीतानां पाठेन क्रमानियमात् । दृश्यते च पाशुकानूयाजानामैष्टिकपिष्टलेपफलीकरणहोमस्य च महाप्रयोगैकत्वेऽपि भिन्नावान्तरप्रयोगविधिपरिगृहीतत्वेनाक्लृप्तक्रमत्वम् । तस्मादनियमः ॥ ३ ॥

(४)—क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात् ॥ ४ ॥ अशाब्द इति चेत्स्याद्वाक्यशब्दत्वात् ॥ ५ ॥ अर्थकृते वाऽनुमानं स्यात् क्रत्वेकत्वे पदार्थत्वात् स्वेन त्वर्थेन सम्बन्धः तस्मात्स्वशब्दमुच्येत ॥ ६ ॥ तथा चान्यार्थदर्शनम् ॥ ७ ॥

पदार्थबोधकवाक्यपाठक्रमोऽपि पदार्थक्रमनियामकः । न च विधीनां तत्तत्पदार्थविधायकत्वात् क्रमस्य च स्वाध्यायत्वसिद्ध्यर्थत्वेनाध्ययनविध्युपयुक्तत्वान्न पदार्थक्रमनियामकत्वं, पदार्थानामनुष्ठानकाले स्मारकापेक्षायां मन्त्रादीनामुपस्थितत्वेन स्मारकत्वनियमात् तत्क्रमेणैवानुष्ठानक्रमनियमोपपत्तेः । अत एव यत्र मन्त्राम्नानं, तत्र तत्क्रम एव नियामकः । यत्र तु न तत्, तत्र विधायकत्वेनोपयुक्तस्यापि विधिवाक्यस्यैवोपस्थितस्य स्मारकत्वेन नियमात् तत्क्रमस्यापि पदार्थक्रमनियामकत्वम् । पाठोपस्थितस्य च क्रमस्य विनियोजकवाक्यकल्पनयाऽङ्गत्वेऽवगते प्रयोगविधिना प्रयोगविधानम् । लक्षणे पदार्थबोधकत्वं च क्वचिदनुष्ठेयपदार्थबोधकत्वं, क्वचिच्च तत्सम्बन्धिद्रव्यदेवतादिबोधकत्वम् । तेन च द्विविधेनाप्यनुष्ठेयपदार्थक्रमनियमः । अत एव देवताबोधकयाज्यादिक्रमादपि यागक्रमः । अतः पाठोपि क्रमनियामकः अपेक्षितत्वात् । अत एव यत्र च न क्रमापेक्षा यथा सान्नाय्यादौ एकप्रयोगविधिपरिग्रहेऽपि सम्प्रतिपन्नैकदेवताकत्वेन सहानुष्ठानात् । यत्र वा भिन्नप्रयोगविधिपरिग्रहः यथा तत्तत्काम्यकर्मणां, तत्र न पाठो नियामकः । तत्र तु स्वाध्यायत्वसिद्ध्यर्थ एवोपयुज्यत इति द्रष्टव्यम् ॥ ४ ॥

(५)–प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात् ॥ ८ ॥ सर्वमिति चेत् ॥ ९ ॥ नाकृतत्वात् ॥ १० ॥ क्रत्वन्तस्त्वदिति चेत् ॥ ११ ॥ नासमवायात् ॥ १२ ॥

*एवं "सप्तदश प्राजापत्यान् पशूनालभते" इत्यादौ एकैकस्मिन् पशावुपाकरणादीनां पदार्थानामावर्तनीयानां पदार्थानुसमयस्य वक्ष्यमाणत्वात्[1] आद्य उपाकरणपदार्थो येन क्रमेण कृतस्तेनैव क्रमेण नियोजनादिद्वितीयप्रभृतिपदार्थाः कर्तव्याः । अन्यथा प्रकृतिप्राप्तस्य उपाकरणनियोजनयोरव्यवहितानन्तर्यस्यौपदेशिकपशुसाहित्यानुरोधेन षोडशक्षणव्यवधानेऽप्यधिकक्षणव्यवधानापत्तेः । अत्र ह्युत्पत्तिवाक्ये, "वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति" इति प्रयोगवाक्ये च साङ्गानां सप्तदशयागानां साहित्यावगमादङ्गसाहित्यानुरोधेनैकैकाङ्गेन सप्तदशयागानां युगपदुपकर्तव्यत्वावगतेरावर्तनीयाङ्गेषु चैकेन कर्त्रा युगपदुपकारासम्भवादवश्यं षोडशक्षणव्यवधानेऽपि तदधिकव्यवधाने औपदेशिकसाहित्यस्यातिदेशिकानन्तर्यस्य च बाधस्स्पष्ट एव । अत एव केषुचित्पशुषु न्यूनक्षणव्यवधानमपि दोष एव । अतः पूर्वपदार्थक्रम एव प्रयोगविध्यवगतप्रत्यासत्त्यनुगृहीतोत्तरपदार्थक्रमनियमे प्रमाणम् । अत्र पूर्वेत्युपलक्षणम् । उत्तरपदार्थप्रवृत्तिक्रमेणापि पूर्वपदार्थक्रमनियमस्य न्यायतौल्येन वक्ष्यमाणत्वात् ।[2]

अयं च प्रवृत्तिक्रमोऽनुष्ठानकालीनोपि प्रयोगविधिप्रवृत्तेः पूर्वमपेक्षावशादवगम्यमानस्तदवगम्यप्रत्यासत्त्यनुगृहीतः पदार्थो-

[1] इहैवाध्याये द्वितीयपादाद्याधिकरणे.

[2] ५-१-७.

न्तरक्रमं बोधयति । ततश्च तद्विनियोजकवाक्यकल्पनया तस्याङ्गत्वेऽवधारिते प्रयोगविधिना प्रयोगविधानम्। तदुत्तरं च प्रयोगविधेः पर्यवसानमिति ध्येयम् ।

न चेदं सर्वं साहित्यानुरोधेन स्यात्, तत्रैव च प्रमाणाभावः बोधकशब्दाभावादिति वाच्यं, एकेन पदेनानेकोपस्थितौ क्रियान्वये एककालावच्छिन्नत्वरूपसाहित्यस्यानुभूयमानस्य शाब्दत्वसिद्ध्यर्थं लक्षणाङ्गीकारात् । प्रतीयते हि शतावधानवांश्चैत्रः, पृथिव्यां राजानो बहव इत्यादौ बहुत्वावच्छिन्नानामवधानादीनां चैत्राद्यन्वयोऽसति बाधके एककालावच्छिन्नः । अतः प्राजापत्यपदादौ तल्लक्षणेत्यपि ध्येयम् ॥ ५ ॥

(६)–स्थानाच्चोत्पत्तिसंयोगात् ॥ १३ ॥

स्थानं च क्रमनियमे प्रमाणम् । तच्च क्लृप्तक्रमकपूर्वपदार्थोपस्थितिः । सा चैकसम्बन्धिदर्शनेनापरसम्बन्धिस्मरणमिति न्यायेनोत्तरपदार्थस्य झडित्युपस्थापिका । अतस्तत्साहित्येन विहितानामन्येषां पदार्थानां तदनन्तरानुष्ठानसिद्धिः । यथा प्रकृतौ अग्नीषोमप्रणयनानन्तरमौपवसथ्याहे दैक्षः पशुः, आश्विनग्रहग्रहणोत्तरकालं च सौत्याहे सवनीयः, उदयनीयानन्तरं सुत्योत्तरमनूबन्ध्यः । साद्यस्के च सर्वमग्नीषोमप्रणयनादि सौत्येऽहन्येव क्रियते । तद्वाचनिकातिदेशाच्छ्येनेऽपि । तत्र च "सह पशूनालभते" इति श्रुतम्। तच्च प्रधानेनात्यन्तप्रत्यासत्तिलाभादाश्विनोत्तरमेवेति स्थितं तृतीये[1] । अतश्चाश्विनस्योपस्थापकस्य सत्त्वात्सवनीयस्यैव स्थानात्प्रथमत उपाकरणं न तु दैक्षस्य, तदुपस्थापकस्य भ्रष्टत्वेन स्थानाभावात् । प्राकृतपाठस्य च व्यव-

---

[1] ३-८-२२.

धायकपदार्थान्तरसत्त्वेन नियामकत्वाभावात् । अत एवोपाकरणोत्तरभाविनियोजनादिपदार्थेषु प्रधानसहितेष्वपि प्रवृत्त्यैव क्रमसिद्धेर्न स्थानोदाहरणता । प्रधाने स्थानाभावाच्च नोपाकरणे मुख्यक्रमाशङ्का । अतस्स्थानादेव सवनीयस्य प्रथममुपाकरणं, तदुत्तरं दैक्षस्य, तदुत्तरमनूबन्ध्यस्य, प्रकृतिदृष्टपौर्वापर्यस्यैव नियामकान्तराभावे नियामकत्वाङ्गीकारात् । अत्रापि स्थानावगतस्य क्रमस्य कल्पितवाक्येन विनियोगेऽवगते प्रयोगविधिना प्रयोगविधानम् ॥ ६ ॥

(७)–मुख्यक्रमेण वाऽङ्गानां तदर्थत्वात् ॥ १४ ॥

मुख्यक्रमोऽप्यङ्गक्रमनियमे प्रमाणम् । मुख्यत्वं च प्रधानत्वम् । यत्र ह्यनेकेषां साङ्गानां प्रधानानां सहकर्तव्यता, तत्र प्रयोगविधिनाऽङ्गप्रधानयोस्साहित्यावगतावपि प्रधानान्तरसाहित्यानुरोधेन यावदनुज्ञातव्यवधानस्वीकारेऽपि तदधिकव्यवधाने प्रमाणाभावात् प्रधानप्रत्यासत्त्यनुग्रहाय मुख्यक्रमेणैवाङ्गे क्रमनियमः । अत एव प्रवृत्तौ अङ्गनिरूपितप्रत्यासत्त्यनुग्रहो बीजं, मुख्यक्रमे तु प्रधाननिरूपितप्रत्यासत्त्यनुग्रहो बीजमिति तयोर्भेदो, वैपरीत्येन बलाबलं चेति वक्ष्यते ।

मुख्यक्रमोदाहरणं च चित्रायागे "सारस्वतौ भवत एतद्वै दैव्यं मिथुनं यत्सरस्वती सरस्वांश्च" इति वाक्यविहितप्रधानद्वयक्रमात्तन्निर्वापक्रमः । अत्र हि द्रव्यसामानाधिकरण्याभावेऽपि सम्बन्धसामान्यवाचिनस्तद्धितस्य 'दैव्यं' इति वाक्यशेषाद्देवतापरत्वोपपत्तेः द्विवचनेन देवताकल्पितयागद्वयं विधीयते । अत एव न यागद्वयेऽपि सरस्वानेव देवता । अर्थवादस्य विरूपैकशेषतात्पर्यग्राहकत्वेन सरस्वतीसरस्वद्देवत्यत्वावगमात् । न चैव-

मपि सरस्वती च सरस्वांश्च सरस्वन्तौ, सरस्वन्तौ देवते ययोस्ते इति व्युत्पत्त्या एकैकस्य द्विदेवत्यत्वं किं न स्यादिति वाच्यं, एकैकदेवत्ययाज्याऽनुवाक्यापाठेनैकैकदेवत्यत्वावगतेः। अत एव प्राजापत्यवत्सम्प्रतिपन्नदेवताकत्वाभावेन मन्त्रपाठक्रमात्प्रधानक्रमे सति मुख्यक्रमेणैव तन्निर्वापयोः क्रमः॥

वस्तुतस्तु तुल्यन्यायितया पूर्वपदार्थप्रवृत्तेरिवोत्तरपदार्थप्रवृत्तेरपि पूर्वपदार्थक्रमनियामकत्वस्योक्तत्वात् प्रकृते च याज्याऽनुवाक्यादिरूपोत्तरपदार्थप्रवृत्त्यैव निर्वापक्रमोपपत्तेर्यद्यपि नेदं मुख्यक्रमस्यासङ्कीर्णमुदाहरणं, तथाऽपि दध्नः पूर्वं शाखाहरणादयो धर्माः पठिताः पश्चादाग्नेयस्य निर्वापादयः, याज्याऽनुवाक्ययोस्तु विपरीतः पाठः। ततश्च भूतभाविप्रवृत्तिद्वयवशात् प्रयाजशेषाभिघारणेऽनियमप्रसक्तौ मुख्यक्रमेणाग्नेयस्य प्रथममभिघारणं पश्चाद्दध्न इत्युदाहरणं वक्ष्यमाणं[1] द्रष्टव्यम्॥७॥

(८)—प्रकृतौ तु स्वशब्दत्वाद्यथाक्रमं प्रतीयेत॥

तदेवं षट् प्रमाणानि निरूपितानि। तेषां चाद्याधिकरणोक्तक्रमेण पारदौर्बल्यं द्रष्टव्यं न तु सूत्रक्रमेण। तत्र श्रुतिविरोधेऽर्थस्यैवान्यथाकल्पनाद्दौर्बल्यम्। अर्थविरोधे पाठस्य वक्ष्यते। एवं वैकृतपाठविरोधे प्राकृतस्थानबाधोऽपि। प्राकृतक्लृप्तस्थानविरोधे प्रधानप्रयोगविध्याश्रितमुख्यक्रमस्य दौर्बल्यं वक्ष्यत एव। मुख्यक्रमविरोधे प्रवृत्तिक्रमस्य दौर्बल्यमपि तथैव।

तदिह पाठक्रममुख्यक्रमयोर्बलाबलं चिन्त्यते—दर्शपूर्णमासयोराग्नेयोपांशुयाजाग्नीषोमीयरूपमुख्यक्रमादाज्यस्योपांशुयाजीयस्य प्रथमं निर्वापः। पश्चादग्नीषोमीयद्रव्यस्य। पाठक्रमात्तु विप-

[1] ५-४-२.

रीतः क्रमः । तत्र पाठस्य स्मारकवाक्यवृत्तित्वेन प्रत्यक्षत्वाच्छीघ्रोपस्थितेश्च बलवत्त्वम् । मुख्यक्रमस्तु मुख्ययोरेव प्रथमं केनापि प्रमाणेनावगम्य तदपेक्षया तत्साहित्यसम्पत्तये कल्प्यमानो विलम्बित इति दुर्बलः ॥ ८ ॥

(९)—मन्त्रतस्तु विरोधे स्यात्प्रयोगरूपसामर्थ्यात् तस्मादुत्पत्तिदेशस्सः ॥ १६ ॥

पाठयोस्तु मन्त्रब्राह्मणगतयोर्मन्त्रपाठो बलीयान्, न तु ब्राह्मणपाठः, तस्योत्पत्तिविनियोगविधिगतत्वेन प्रथमोपस्थितत्वेऽपि पाठस्य स्मारकक्रमविधयैव क्रमनियामकत्वोक्तेर्मन्त्रसत्त्वे च तस्यैव स्मारकतया विधानोपयुक्तस्यासमर्थस्य च विधेस्स्मारकत्वाभावान्मन्त्रपाठक्रम एव बलीयान् । तेन याज्याऽनुवाक्यादिमन्त्रपाठक्रमादाग्नेयस्य प्रथमानुष्ठानं, पश्चाच्चोपांशुयाजोत्तरमग्नीषोमीयस्य । न तु ब्राह्मणपाठक्रमादग्नीषोमीयस्य प्रथमं पश्चादुपांशुयाजोत्तरमाग्नेयस्य । अत एव तत्र पाठक्रमस्स्वाध्यायादावुपयुज्यते ॥ ९ ॥

(१०)—तद्वचनाद्विकृतौ यथाप्रधानं स्यात् ॥ १७ ॥ विप्रतिपत्तौ वा प्रकृत्यन्वयाद्यथाप्रकृति ॥ १८ ॥

इदानीमातिदेशिकपाठक्रमापेक्षया विकृतौ मुख्यक्रमस्य बलाबलं चिन्त्यते । अध्वरकल्पायां "आग्नावैष्णवमेकादशकपालं निर्वपेत्, सरस्वत्याज्यभागा स्यात्, बार्हस्पत्यश्चरुः" इति श्रुतम् । अत्र सत्यपि वाक्यत्रयेण यागत्रयविधाने "एतयैव यजेताभिचर्यमाणः" इति वाक्यान्तरेणाभिचारनिरासाख्यफलोद्देशेन सहि-

तानां विधानात् त्रयाणामप्येकप्रयोगविधिपरिग्रहः । अत्राद्यस्य यागस्य द्विदेवत्यत्वौषधद्रव्यकत्वादैन्द्राग्नाग्नीषोमीयान्यतरविध्यन्तः । केचित् समानाक्षरताद्धितान्तपदकत्वसादृश्यादग्नीषोमीयस्यैवेति वदन्ति । द्वितीयस्याज्यद्रव्यकत्वादुपांशुयाजविध्यन्तः । तृतीये एकदेवताकत्वादौषधद्रव्यकत्वादाग्नेयाविध्यन्तः । तत्राज्यद्रव्यकयागधर्मापेक्षया आग्नावैष्णवस्य धर्माः आतिदेशिकपाठमुख्यक्रमयोरविरोधादेव प्रथमतः कार्याः, बार्हस्पत्यस्य तु मुख्य क्रमात्पश्चात्कार्याः उतातिदेशिकपाठक्रमात्पूर्वमिति चिन्तायां—मुख्यक्रमस्यौपदेशिकप्रयोगविध्युन्नीतत्वेनौपदेशिकत्वात्सत्यप्यतिदेशोत्तरकालकत्वे शरादिवद्बाधोपपत्तेर्मुख्यक्रमस्य बलवत्त्वमिति प्राप्ते—

प्रयोगविधेरौपदेशिकत्वेऽपि स्वरूपेण मुख्यक्रमस्य कल्प्यत्वाच्छरन्यायानुपपत्तेः कल्पनायां चापेक्षामूलत्वेन प्रयोगविध्युपजीव्यप्राथमिकातिदेशप्रापितपाठक्रमेणैवाकाङ्क्षाया उच्छेदाच्छयेनादावातिदेशिकनानाऋत्विक्त्वादिवदेवातिदेशिकपाठक्रमप्रापितक्रमस्यैव बलीयस्त्वम् । तदेतत्सिद्धमपि चोदकस्य प्रयोगविध्यपेक्षया बलवत्त्वस्पष्टीकरणार्थं क्रमलक्षणे पुनरुच्यत इति मन्तव्यम् । न चैवमाग्नावैष्णवबार्हस्पत्यधर्माणामपि प्राकृतक्लृप्तक्रमेणैवानुष्ठानापत्तेर्याज्ञिकानां वैकृतमुख्यक्रमानुरोधेनाग्नावैष्णवस्य प्रथमं निर्वापाद्यनुष्ठानं विरुध्येतेति वाच्यं, प्रकृतौ हि यत्र पाठादिप्रमाणकः क्रमस्तत्र तत्पदार्थानन्तरं तत्पदार्थः कार्य इति विशिष्यैव वाक्यकल्पनं, मुख्यक्रमे तु लाघवात् धर्मिग्राहकप्रमाणबलाच्च आद्यप्रधानधर्मानन्तरमुत्तरप्रधानधर्मा अनुष्ठेया इत्येव कल्पनं, न तु विशिष्य, न वाऽऽग्नेयत्वादिप्रवेशः । अत एव विकृतावपूर्वाङ्गप्रवेशेऽपि न वाक्यान्तरकल्पनमित्यपि लाघवम् ।

एवं प्रवृत्तिक्रमेऽपि क्लृप्तक्रमकाङ्क्षप्रवृत्तिक्रमेणेतरे पदार्थाः कर्तव्या इत्येव वाक्यकल्पनम्। अतश्च विकृतावपि आद्यप्रधानधर्मानुष्ठानोत्तरमेव द्वितीयप्रधानधर्मानुष्ठानमिति आग्नावैष्णवस्य प्रथमं निर्वापः पश्चाद्वार्हस्पत्यस्य। एवं साद्यस्क्रे स्थानगम्यक्रमकोपाकरणस्य वाचनिकातिदेशवत्यां कस्यांचिद्विकृतौ वाचनिकोपाकरणव्यत्यये व्यत्यस्तोपाकरणप्रवृत्त्यैव नियोजनादिक्रमः। एवं च केषांचिदेतादृशविषयद्वयेऽपि याज्ञिकाचारे मूलं चिन्त्यमिति प्रकृतिक्लृप्तक्रमेणैव सिद्धान्तकरणं मूलस्योक्तत्वादुपेक्ष्यम्। अत आतिदेशिकपाठविरोध एव मुख्यक्रमादेर्दौर्बल्यमिति स्थितम्॥ १०॥

(११)—विकृतिः प्रकृतिधर्मत्वात्तत्काला स्याद्यथाशिष्टम्॥ १९॥ अपि वा क्रमकालसंयुक्ता सद्यः क्रियेत तत्र विधेरनुमानात्प्रकृतिधर्मलोपस्स्यात्॥ २०॥ कालोत्कर्ष इति चेत्॥ २१॥ न तत्सम्बन्धात्॥ २२

चातुर्मास्येषु साकमेधस्तृतीयं पर्व। तत्र कार्तिक्यां पौर्णमास्यां काश्चिदिष्टयो विहिताः। तास्तु वक्ष्यमाणेनैव न्यायेन 'य इष्ट्या' इति वाक्यवशेनान्येष्टिवत् सद्यस्काला एवेत्यविवादम्। यानि तु "द्व्यहं साकमेधेन यजेत" इति वचनेन तत्पूर्वदिनकर्तव्यानि कर्माणि "अग्नयेऽनीकवते प्रातरष्टाकपालं निर्वपेत्, मरुद्भ्यस्सान्तपनेभ्यो मध्यंदिने चरुं, मरुद्भ्यो गृहमेधिभ्यस्सर्वासां दुग्धे सायमोदनम्" इत्येवंविधवाक्यत्रयविहितानि, तानि किं द्व्यहकालानि उत? सद्यस्कालानीति क्रमविशेषोपयिकतया सन्देहे—

प्रकृतिप्राप्तत्वात् द्व्यहकालत्वम्। न चात्रान्यविकृतीष्टिन्यायः, तत्र हि 'य इष्ट्या' इत्यादिवाक्येन साङ्गप्रयोगस्य पौर्णमास्यादिकालविधानादातिदेशिकद्व्यहकालत्वानुग्रहे च तद्बाधप्रसङ्गायुक्तं सद्यस्कालत्वम् । प्रकृते तु प्रातरादिकालकत्वस्य दिनद्वयेऽपि सम्भवात् द्व्यहकालत्वमेव । अतश्च त्रयोदश्यां प्रातरादिकालेषु त्रयाणामप्यन्वाधानं कृत्वा चतुर्दश्यां प्रातरादिकालेषु यागा इति द्रष्टव्यम् । कर्ममध्ये कर्मान्तरारम्भस्तु "द्व्यहं साकमेधेन" इति वचनान्नैव दुष्यति । यदि तु प्रसङ्गसिद्धिराशङ्क्येत, तदाऽस्तु त्रयोदश्यां प्रातस्सकृदेवान्वाधाय चतुर्दश्यां प्रातरादिकालेषु यागाः । अङ्गानुष्ठानं तु पूर्वाङ्गानामनीकवत्या सह, उत्तराङ्गानां सान्तपनीयया । गृहमेधीयस्य त्वपूर्वत्वादेव नाङ्गापेक्षा। अन्वाधानं त्वाज्यभागार्थमिति द्रष्टव्यम् ।

केचित्तु एकादशीप्रभृति द्व्यहकाले पृथक्प्रयोगमिष्टित्रयं पूर्वपक्षे कर्तव्यमिति वदन्ति. तेषां 'द्व्यहं साकमेधेन' इति वचनानुपपत्तिरिति प्राप्ते--

एकस्मिन् प्रातरादिकाले विहितस्य साङ्गतत्तत्प्रयोगस्य द्व्यहकालत्वपक्षे औपदेशिककालैकत्वबाधापत्तेस्सद्यस्कालत्वम् । न च सायंप्रातश्शब्दयोरव्ययत्वेनैकवचनान्तत्वे प्रमाणाभावः, एकवचनान्तमध्यंदिनपदप्रायपाठादेवैकवचनान्तत्वनिर्णयोपपत्तेः। 'द्व्यहं साकमेधेन' इति साङ्गस्यैव द्व्यहकालत्वश्रुतेश्च । अतश्च विशेषणस्यैकत्वस्य विवक्षितत्वात्सद्यस्काला एवैता इष्टयः ॥ ११ ॥

(१२)-अङ्गानां मुख्यकालत्वाद्यथोक्तमुत्कर्षे स्यात् ॥ २३ ॥ तदादि वाऽभिसम्बन्धात्तदन्तमपकर्षे स्यात् ॥ २४ ॥

दैक्षे पशौ प्रकृतितो हविरासादनोत्तरभाविनां प्रयाजाना-मपकर्षः "तिष्ठन्तं पशुं प्रयजति" इति वचनेन श्रुतः। तथा सवनीये हविरुद्वासनोत्तरभाविनामनूयाजानामुत्कर्षः "आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति" इति श्रुतः। तौ किमुत्कर्षापकर्षौ तन्मात्रविषयौ उत तदन्तस्यापकर्षस्तदादेश्चोत्कर्ष इति चिन्तायां—

प्रयाजादिग्रहणस्योपलक्षणत्वे प्रमाणाभावात्पूर्वोत्तरपदार्थानां च प्रयाजाद्यनङ्गत्वेन तदुत्कर्षापकर्षयोरुत्कर्षापकर्षशङ्काऽनुपपत्तेस्तत्तत्पदार्थानां प्रधानप्रत्यासत्तिबाधापत्तेश्च तन्मात्रस्यैवोत्कर्षापकर्षाविति प्राप्ते—

प्रकृतौ पाठादिक्रमेण पदार्थानां क्लृप्तक्रमत्वात्पूर्वपदार्थोपस्थापितस्यैव चोत्तरपदार्थस्यानुष्ठेयत्वावगतेः श्रुतवचनयोस्तन्मात्रविषयत्वेऽप्यनूयाजोत्तरपदार्थस्य सूक्तवाकादेरनूयाजानन्तर्यानूयाजोपस्थापितत्वादिधर्मानुग्रहलोभेनोत्कर्षः। न च प्रधानप्रत्यासत्त्यनुरोधेन तदभावः, तस्याः प्रयोगविधिना क्लृप्तप्रमाणगम्यक्रमानुरोधेनैव प्रकृताविव विकृतावपि कल्पनीयत्वात्। एवमपकर्षेऽपि प्रयाजादीनामाघारादिरूपपूर्वपदार्थानन्तर्यस्य तदुपस्थापितत्वस्य च बाधे प्रमाणाभावेन पूर्वभाविनामपि तदुपपत्तेः। न चापकर्षे पूर्वभाविनां काचित्क्षतिः, प्रधानप्रत्यासत्तेः प्रकृताविवाकिञ्चित्करत्वात्। न चापकर्षे हविरासादनानन्तरं क्रियमाणपदार्थस्य सामिधेन्यादेस्तदानन्तर्यतदुपस्थापितत्वादिरूपधर्मबाधापत्तेरपकर्षानुपपत्तिः, तद्बाधस्योत्तरकालिकप्रतीतिकत्वेनाविरोधात्। सामिधेनीनां तु प्रयाजाङ्गत्वादपि हविरासादनानन्तर्यादिबाधेऽप्यदोषः ॥ १२ ॥

(१३)–प्रवृत्त्या कृतकालानाम् ॥ २५ ॥ शब्दविप्रतिषेधाच्च ॥ २६ ॥

सोमे सुत्यायां प्रातरनुवाकप्रैषं "प्रातर्यावभ्यो देवेभ्यो होतरनुब्रूहि" इत्येवंविधं होत्रे दत्वा "प्रतिप्रस्थातस्सवनीयान्निर्वपस्व इति प्रैष्यति" इति प्रैषं विधाय होत्रा प्रातरनुवाकेऽनूच्यमानेऽध्वर्योरुपास्तिर्विहिता आ प्रातरनुवाकसमाप्तेः। सा च वचनादेव वैकल्पिकी। ततः "अथ यत्र होतुरभिजानात्यभूदुषारुशत्पशुः इति प्रचरण्यां स्रुचि चतुर्गृहीतं जुहोति" इत्यादिना प्रचरणीहोमादिकान् सौमिकान् पदार्थान् विधाय सवनीयहविर्विधिः। ततो बहिष्पवमानाद्यन्ते 'अग्नीदग्नीन् विहर' 'बर्हिस्स्तृणीहि' 'पुरोडाशानलङ्कुरु' इति प्रैषस्समाम्नातः। तत्र सवनीयहविष्षु धानादिषु दार्शिकविध्यन्ते निर्वापप्रोक्षणालङ्करणादिरूपे प्राप्ते निर्वापान्तस्य प्रैषविधानादपकर्षः, अलङ्करणादेश्चोत्कर्षो निर्विवाद एव। मध्यतनानां प्रोक्षणादीनां तु अलङ्करणात्प्रागेव करणं, न तु निर्वापोत्तरं, प्रधानाङ्गानां प्रचरणीहोमादीनां क्लृप्तकालकत्वेन तैर्व्यवधानादिति प्राप्ते—

प्रोक्षणादीनां निर्वापरूपपूर्वपदार्थोपस्थापितानामतिक्रमे प्रमाणाभावान्निर्वापोत्तरमेव करणम्। न च सौमिकैर्व्यवधानं, उपास्तिपक्षे तावत्प्रधानाङ्गभूतायामुपास्तावध्वर्युकर्तृकत्वस्यावश्यकत्वादतिदेशप्राप्तनिर्वापसमानकर्तृकत्वानुरोधाच्च प्रोक्षणादौ 'इतरमन्यः' इति न्यायेन [1]प्रतिप्रस्थातृकर्तृकत्वावगतेस्सौमिकस्य व्यवधायकत्वानुपपत्तेः। न चैवं सति 'निर्वपस्व' इति प्रैषे प्रोक्षणादिलक्षणापत्तिरित्यादितन्त्ररत्नोक्तदूषणावकाशः, न्यायेनैव

[1] ३-८-१०.

तत्प्राप्त्यङ्गीकारेण लक्षणादावापादकाभावात् । उपास्त्यभावपक्षे तु यद्यप्यध्वर्युरेवातिदेशप्राप्तः प्रोक्षणादौ कर्तेति निर्वापेण भिन्नकर्तृकेन न शक्यते प्रोक्षणादिकमुपस्थापयितुं, तथाऽप्यध्वर्योरपि निर्वापे प्रैषद्वारा प्रयोजककर्तृत्वेन समानकर्तृकत्वोपपत्तेर्युक्तमेव निर्वापोपस्थापितत्वं प्रोक्षणादौ । न चास्मिन् पक्षे प्रधानाङ्गप्रचरणीहोमादिभिर्व्यवधानं, तस्य 'अभूदुषा' इत्यादिप्रातरनुवाकपरिधानीयकालकत्वेन प्रोक्षणाद्युत्तरत्वात्, प्रातरनुवाकर्चामपि बहुतरत्वेन तन्मध्य एवैष्टिकपदार्थसमाप्त्युपपत्तेश्च ॥

यत्त्वत्र तन्त्ररत्नस्वरसादन्यैरपि वक्ष्यमाणामैष्टिकपदार्थानां बहुत्वात्प्रचरणीहोमकालविधिरुपास्तिपक्षाभिप्रायेणेत्युक्तं, तत् प्रचरणीहोमस्योपास्त्यभावपक्षे कालविध्यभावे 'प्रतिप्रस्थातः' इत्यादिप्रैषोत्तरभाविपाठक्रमेण क्लृप्तक्रमकाणां प्रचरणीहोमादीनां प्रधानाङ्गतया क्रमबाधे प्रमाणाभावात्प्रोक्षणादीनां सौमिकपदार्थोत्तरत्वस्य प्रतिप्रस्थातृकर्तृकत्वस्य वाऽऽपत्तेरुपेक्षितम् । इतरथा उपास्तिपक्षेऽपि तस्या एव प्रतिप्रस्थातृकर्तृकत्वापत्त्या प्रोक्षणादौ तदनापत्तेश्च ।

यत्तु ऐष्टिकानां बहुत्वात् 'अभूदुषा' इत्येतदुत्तरमपि तदापत्तेः प्रचरणीहोमकालवाक्यस्य सङ्कोच इत्युक्तं, तदस्तुनाम तथा, तथाऽपि यावन्त एवैष्टिकास्तत्कालावधि कर्तुं शक्यास्तावतां पूर्वं करणापत्तेरन्येषां च तदुत्तरं प्रतिप्रस्थात्रा वा करणोपपत्तेर्वाक्यसङ्कोचे प्रमाणाभावः । वस्तुतस्तु सर्वे पूर्वं कर्तुं शक्या एवेत्युक्तम् ॥ १३ ॥

(१४)–असंयोगात्तु तदेव प्रतिकृष्येत ॥ २७ ॥

सौमिकाग्नीषोमप्रणयनानन्तरं पश्वङ्गतया 'यूपं छिनत्ति'

इत्युत्पन्नं यूपच्छेदनं 'दीक्षासु यूपं छिनत्ति' इत्यनेनापकृष्टं प्रयाज-न्यायेन[1] प्राचोऽपि पदार्थान् अग्नीषोमप्रणयनादीनपकर्षतीति प्राप्ते–

भिन्नप्रयोगविधिपरिगृहीतत्वेनात्र पाठस्य क्रमानियामकत्वात् महाप्रयोगविध्यैक्येऽपि वा उत्पत्तिविधिवेलायां प्रयोज्यत्वानवगमेन क्रमानाकांक्षत्वात् पाठस्य क्रमाकल्पकत्वेन बद्धक्रमत्वाभावाद्दीक्षाकालविधिवाक्ये च प्रयोज्यत्वावगमेन तत्रैव क्रमापेक्षतया भिन्नप्रयोगविधिपरिगृहीतैरपि सोमाङ्गदीक्षाकालीनपदार्थैः पाठेन क्रमकल्पनात्तत्रैव सप्तहोतृहोमानन्तरं यूपच्छेदनमात्रं यूपोत्पादकधर्ममात्रं वाऽपकृष्य कार्यम् । न तु तदन्तापकर्षः ।

एतेन यूपच्छेदनस्य दीक्षान्ते करणमिति केषांचिदुक्तमपास्तम् । 'दीक्षासु यूपं छिनत्ति' इत्यस्य सप्तहोतृहोमानन्तरं पठितत्वात् ॥ १४ ॥

(१५)–प्रासङ्गिकं च नोत्कर्षेदसंयोगात् ॥२८॥

सवनीयपशुतन्त्रं सवनीयहविष्षु प्रसज्यते । दैक्षपशुतन्त्रं च पशुपुरोडाशे इति वक्ष्यते[2]। प्रसङ्गे च ये उपकाराः प्रयाजानूयाजादिजन्यास्तन्त्रितो लब्धास्तज्जनकीभूतपदार्थांशे नातिदेशः, अपेक्षाऽभावात्, ये तु न लब्धाः आज्यभागपिष्टलेपफलीकरणहोमादिजन्याः, तत्पदार्थांशेऽस्त्येवातिदेश इत्यपि वक्ष्यते[3]।

तदिह पाशुकानूयाजानां दैक्षे हृदयादियागोत्तरत्वात् सवनीये चाग्निमारुतशस्त्रोत्तरत्वात्तत्पूर्वभाविसवनीयहविःपशुपुरोडाशादीनामङ्गभूताः पिष्टलेपफलीकरणादिहोमाः किमनूयाजोत्तरमुत्कृष्टव्याः उत नेति चिन्तायां–

[1] ५-१-१२ [2] १२-१-१. [3] १२-१-२.

प्रकृतौ दर्शपूर्णमासयोः पिष्टलेपफलीकरणहोमानां परप्रयुक्तानूयाजैरेव बद्धक्रमत्वादिहापि सत्यपि भिन्नप्रयोगविधिपरिग्रहे अङ्गभूतस्यान्याङ्गभूतानुयाजोत्तरत्वस्यापि सम्भवेनोत्कर्षे प्राप्ते—

न तावद्विकृतावेव क्रमक्लृप्तिः, भिन्नप्रयोगविधिपरिग्रहात्, पुरोडाशादिप्रयोगविधिना विहितानां पिष्टलेपफलीकरणहोमेडाभक्षणानां व्यवधायकाभावात्, व्यवधायकाभावविशिष्टप्रकृतिदृष्टपौर्वापर्यस्य क्रमकल्पकत्वेनोत्कर्षे तत्क्रमबाधप्रसङ्गाच्च, पाशुकप्रयोगविधिविहितानां समिष्टयजुःपत्नीसंयाजानामुक्तप्रमाणेनैव क्रमक्लृप्तेस्तद्बाधस्यापि प्रसङ्गाच्च। नापि प्रकृतितो अनूयाजोत्तरत्वक्लृप्तिः, प्रकृतौ हि पाठकल्पितवाक्येन क्रमनियम एव विधीयते न तु क्रमोऽपि, तस्य प्रयोगविध्याक्षेपादेव प्राप्तेः। अतश्च प्रकृते भिन्नप्रयोगविधिपरिगृहीतानां सामान्यतः क्रमस्याप्राप्तौ तदाश्रितस्य नियमस्याप्राप्तिः। न ह्यत्राक्षेपात्पूर्वमेवावघातविधिवत्प्रवृत्त्यङ्गीकारेण पाठकल्पितवाक्यस्य क्रमविधायकत्वमेवेति शक्यं वक्तुं, तद्वदिह पाठकल्प्यस्य विधेः क्लृप्तत्वाभावेन समतया आक्षेपप्रतिबन्धायोगात्। इतरथा दधियागपयोयागयोरपि पाठेन क्रमापत्तेः। अतश्च प्रकृतितोऽप्यनूयाजोत्तरत्वस्याप्राप्तेः पुरोडाशाद्यङ्गेडाभक्षणोत्तरमेव पिष्टलेपफलीकरणहोमौ॥ १५॥

(१६)—तथाऽपूर्वम्॥ २१॥

दर्शपूर्णमासयोः हविरभिवासनोत्तरं वेदिकरणमाम्नातम्। तस्य "पूर्वेद्युरमावास्यायां वेदिं करोति" इति वचनेनापकर्षश्रुतः पूर्वभाविनोपि हविरभिवासनादीनपकर्षेत, एकप्रयोगवि-

धिपरिगृहीतत्वेन पाठस्य क्रमकल्पकत्वात्, अमावास्यापदस्य कर्मपरत्वे लक्षणाप्रसङ्गेन कालपरत्वावसायाद्धविरभिवासनोत्तरभाविवेदिकरणविधेरेव पौर्णमास्यङ्गताबोधकत्ववद्दर्शाङ्गत्वबोधकत्वाच्च । न च कालद्वयविधाने वाक्यभेदः, सामर्थ्यात् "वेदं कृत्वा वेदिं करोति" इति श्रुतवेदकरणानन्तर्यबलेनैव च पूर्वेद्युत्वस्य प्राप्तत्वेनानुवादात् । प्रधानप्रत्यासत्तिलाभात् पौर्णमास्या अतीतत्वाच्च दार्शिकवेदिकरण एवायं कालविधिः । अतश्च पौर्णमाससाधारण्येन पाठस्य क्रमकल्पकत्वावश्यंभावात् अत एव च यूपच्छेदनवैलक्षण्यात्तदन्तापकर्षे प्राप्ते—

कालपरत्वेऽपि कालविधेः प्रयोगविधित्वेन दार्शिकवेदिकरणस्य तत्रैव प्रयोज्यत्वावगमात् तदवगमोत्तरं च क्रमापेक्षायां पाठस्य नियामकत्वासम्भवात् श्रौतक्रमान्तरसत्त्वाच्च न हविरभिवासनेन बद्धक्रमत्वम् । अतश्च पाठोपि परिशेषात्पौर्णमासविषय एव । यदि तु खण्डपर्वणि चतुर्दश्यां प्रातरन्वाधानदिने वेदिकरणसिद्ध्यर्थं लक्षणामप्यङ्गीकृत्यामावास्यापदेन कर्मैवोच्येत, तदा दार्शिकवेदिकरणस्यायमेव विनियोगविधिरिति हविरभिवासनेन दार्शिकवेदिकरणस्य सुतरां न बद्धक्रमता । न चैवं पूर्वेद्युःकालविशिष्टवेदिकरणस्य दर्शाङ्गतया वाक्येन विनियोगात् प्रकरणेन पौर्णमासाङ्गत्वायोगः, वेदेस्सर्वसाधारण्येन तत्करणस्याप्यङ्गतयाऽपेक्षासहकृतपौर्णमासप्रकरणेन गर्दभाभिधान्यामादानस्येवाक्षेपोपपत्तेः । अत एव वाक्येन श्रुत्या वोभयत्र न प्रकरणस्यार्थाक्षेपस्य वा बाधः, तयोः पूर्वेद्युःकालमन्त्ररूपगुणमात्रविधिकल्पकतया क्रियाविधिफलकत्वाभावात् । अतो न प्रकृते तदन्तापकर्षः ॥ १६ ॥

(१७)–सान्तपनीया तूत्कर्षेदग्निहोत्रं सवनवद्वैगुण्यात् ॥ ३० ॥ अव्यवायाच्च ॥ ३१ ॥ असम्बन्धात्तु नोत्कर्षेत् ॥ ३२ ॥ प्रापणाच्च निमित्तस्य ॥ ३३ ॥ सम्बन्धात्सवनोत्कर्षः॥

दैवान्मानुषाद्वा प्रतिबन्धान्मध्यंदिनक्रियमाणसान्तपनीयाया उत्कर्षे स्वकालेऽग्निहोत्रहोमः कर्तव्यो न वेति चिन्तायां—स्वकालकरणे सान्तपनीयार्थं प्रणीतस्याग्नेः पुनः प्रणयनासम्भवान्मन्त्रवत्प्रणयनलोपेन वैगुण्यापत्तेः, कालस्य च पदार्थगुणत्वेन प्रयोगविधिविशेषणतयोत्तरकालप्रतीतिकत्वेन च लोपेऽपि वैगुण्याभावादुत्कर्ष इति प्राप्ते—

अनुपादेयत्वात्कालस्य नित्ये यथाशक्ति उपादेयाङ्गत्यागस्यैव तदनुरोधेन षष्ठे वक्ष्यमाणत्वात् प्रणयनलोपेनापि कालानुग्रह एव न्याय्यः। सायंप्रातःकालस्य जीवनरूपनिमित्तविशेषणत्वेन सुतरामनुग्राह्यत्वाच्च।

वस्तुतस्तु—अग्निहोत्रस्यान्यतः प्रणयनजन्योपकारलाभे तदनाक्षेपकत्वस्य दर्शादौ क्लृप्तत्वात्तल्लोपेऽपि न वैगुण्यम्। अतस्स्वकाल एवाग्निहोत्रं कृत्वा सान्तपनीया कर्तव्येति सान्तपनीयाङ्गानां नैव क्रम आदरणीयः। अत्र च सान्तपनीयेत्युपलक्षणं प्रारब्धकर्ममात्रस्य। अग्निहोत्रेत्यप्यावश्यकमात्रस्य। अनावश्यकविषये "अप वा एतद्यज्ञस्य छिद्यते यदन्यस्य तन्त्रे विततेऽन्यस्य तन्त्रं प्रतायते" इति निषेधात्। न चैवमनीकवत्युत्कर्षेऽपि मध्यंदिने सान्तपनीयापत्तिः, तथात्वे सान्तपनीयाया

अनीकवत्युत्तरकालत्वस्यैकप्रयोगविध्यवगतस्य प्रणयनस्य च बाधेन वरमेकस्यैव मध्यंदिनकालस्य बाधः।

केचित्तु निमित्तविशेषणीभूतकालस्यैवानुग्राह्यत्वं न तु कालमात्रस्येत्यङ्गीकृत्य सान्तपनीयायाः काम्यचन्मध्येऽनावश्यकत्वादकरणमिति वदन्ति। तत्तु चातुर्मास्यानामपि नित्यत्वान्माध्यंदिनस्यापि निमित्तविशेषणत्वापत्तेरुपेक्षितम् ॥ १७ ॥

(१८)–षोडशी चोक्थ्यसंयोगात् ॥ ३५ ॥

दैवान्मानुषाद्वाऽपराधादेवोक्थ्येषूत्कृष्टेषु षोडशिस्तोत्रमुत्कृष्यते न वेति चिन्तायां—"समयाध्युषिते सूर्ये षोडशिनस्स्तोत्रमुपाकरोति" इति वचनविहितसमयाध्युषितकालबाधे प्रमाणाभावादनुत्कर्षः। न च "तं पराञ्चमुक्थ्येभ्यो गृह्णाति षोडशिनम्" इति वचनेन ग्रहणे उक्थ्यपरभावस्य विहितत्वात् स्तोत्रस्य च "ग्रहं वा गृहीत्वा" इति वचनेन ग्रहणोत्तरकालत्वात् तदनुरोधेन समयाध्युषितकालबाधः, 'तं पराञ्चम्' इत्यनेन षोडशियागाभ्यासस्यैवोक्थ्यपरभावविधानेन ग्रहणस्य स्तोत्रपूर्वकालत्वेऽपि बाधकाभावात्। अत एव तत्र गृह्णातिर्निर्वपतिवद्यागपर एव।

अस्तु वा ग्रहणपरः, तथाऽपि तैत्तिरीयशाखायां षोडशिनस्सवनत्रयेऽप्याम्नानात् सवनान्तरविषयकं 'तं पराञ्चम्' इति वाक्यम्।

अस्तु वा एतदपि सर्वविषयं, तथाऽपि 'ग्रहं वा' इत्यस्य सामान्यविषयत्वादुक्थ्योत्तरकालग्रहणेऽपि समयाध्युषिते स्तोत्रकरणे न कश्चिद्विरोधः।

यदि तु सामान्यविशेषरूपबाधस्य यथाऽवस्थितशास्त्रार्थविषयत्वेन दैवाद्यपराधेऽप्रवृत्तेस्सर्वपदार्थानां तुल्यबलत्वमुच्येत, तथाऽप्युक्थ्यपरभावस्य क्रमत्वेनोपादेयत्वात् पूर्वाधिकरणन्यायेन बाधोपपत्तेस्समयाध्युषितकालानुग्रहो न्याय्य एव। न च कालस्याङ्गाङ्गत्वेन प्रधानाङ्गक्रमापेक्षया दौर्बल्यं, उभयोरप्यङ्गाङ्गत्वात्। न च ग्रहणस्यात्रावदानवत्प्रदानोपक्रमता, तद्वदिहैकपदार्थत्वाभावादिति प्राप्ते—

ग्रहणस्य षोडशियागाभ्यासकल्पकत्वेनान्तरङ्गत्वात् तत्क्रमस्य प्राबल्यम्। वस्तुतस्तु 'तं पराञ्चं' इत्यस्यापि कालपरत्वमेवेत्यन्तरङ्गतद्बाधोऽन्याय्य एव। न च ग्रहणस्योत्तरकालंकरणेऽपि स्तोत्रस्यैव कालानुग्रहश्शङ्क्यः, तथात्वे स्तोत्रे ग्रहणोत्तरकालत्वस्य प्रधानप्रत्यासत्तेश्च बाधप्रसङ्गेनैकस्यैवास्य समयाध्युषितकालबाधस्य न्याय्यत्वात्। अतस्तस्याप्युत्कर्ष इति सिद्धम् ॥ १८ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
पञ्चमस्याध्यायस्य प्रथमः पादः.

अथ पञ्चमाध्यायस्य द्वितीयः पादः.

(१)—सन्निपाते प्रधानानामेकैकस्य गुणानां सर्वकर्म स्यात् ॥ १ ॥ सर्वेषां वैकजातीयं कृतानुपूर्वत्वात् ॥ २ ॥

यत्रानेकेषां प्रधानानामङ्गानां वा एकेन प्रयोगविधिनोपसंहारात्साङ्गानां साहित्यावगमस्तत्र दर्शपूर्णमासप्राजापत्यादौ कि-

मेकैकस्य प्रधानस्य सन्निपत्योपकारकाङ्गकाण्डं कृत्वेतरस्य कर्तव्यमित्येवं काण्डानुसमयः, अथवा एकैकमङ्गमेकैकस्य कृत्वेतरस्य कर्तव्यमित्येवं पदार्थानुसमय इति चिन्तायां—

प्रधानप्रत्यासत्त्यनुग्रहात् प्रकृतितः परस्परसंश्लिष्टानामेवोपाकरणनियोजनादीनामेकैकस्मिन् पशौ प्राप्तत्वाच्च काण्डानुसमय एव । एकप्रयोगत्वं त्वारादुपकारकाङ्गाभिप्रायेणेति न कश्चिद्विरोध इति प्राप्ते—

प्रत्यक्षवचनेनैकस्मिन् काले साङ्गानां सर्वेषां प्रयोगविधानात्प्रधानसाहित्यवदङ्गेष्वपि साहित्यावगमादेकैकाङ्गेन सर्वप्रधानानां युगपदुपकर्तव्यमित्यर्थावगमेनैकमुपाकरणाख्यमङ्गं सर्वपशूनां कृत्वा नियोजनं कार्यम् । प्रधानप्रत्यासत्तिस्तु प्रत्यक्षवचनावगतोक्तसाहित्यानुरोधेनैव कल्पनीया । उपाकरणानन्तरमेव च नियोजनमिति यथाप्रकृत्येवानुष्ठानम् । आवृत्तानावृत्तत्वं तु प्रधानसाहित्यानुरोधेनेति न कश्चिद्विरोधः । अतः पदार्थानुसमयः । प्रवृत्तिक्रमविचारस्त्वेतदधिकरणोत्तरं द्रष्टव्यः ॥ १॥

(२)—कारणादभ्यावृत्तिः ॥ ३ ॥

यत्र तु प्रधानविरोधः यथा—अश्वप्रतिग्रहेष्ट्यां शते वा सहस्रे वाऽश्वदाने तावत्सु पुरोडाशेषु श्रप्यमाणेषु यदि सर्वेषामधिश्रयणं कृत्वोद्वासनं क्रियेत ततो दह्येरन्, ततस्तत्र काण्डानुसमय एव कतिपयाङ्गानाम् ।

यस्त्वत्र वार्तिके निमित्तगतस्य यावत्त्वस्याविवक्षितत्वान्नैमित्तिकगतस्य च तावत्त्वबहुत्वादेः पृष्ठशमनीयन्यायेन[1] अनु-

---

[1] १०-२-१३.

वाक्यगतत्वेनाविवक्षितत्वात्साहित्यबोधकवचनाभावेनानेकेष्वप्यभ्व-दानेषु प्रत्येकप्रयोगेणैव वारुणेष्टिकर्तव्यत्वावगतेर्भाष्यस्थमेतदुदा-हरणं साहित्यबोधकवचनान्तरसम्भावनयेत्युक्तम्। तन्न, "सत्रा-दुदवसाय पृष्ठशमनीयेन यजेरन्" इत्यत्र हि उदवसानसमा नकर्तृकत्वबलेनैव पृष्ठशमनीये बहुत्वादेः प्राप्तत्वाद्युक्ता साहित्या विवक्षा। प्रकृते तु निमित्तसमसङ्ख्याकत्वस्यैव तावच्छब्दार्थ स्य नैमित्तिकविशेषणतयाऽप्राप्तस्य विधेयत्वाद्युक्तमेवानेकनिमि-त्तसन्निपाते नैमित्तिकसाहित्यम्। तावच्छब्दाभावे हि युगपदने-कनिमित्तसन्निपाते तन्त्रेण नैमित्तिकीष्टिरेकैव प्रसज्येतेति युक्त एव तावच्छब्दार्थविधिः। यत्रापि हि पुरुषार्थतया न क्रत्वन्तः पातित्वं यथा—युगपदनेकचण्डालादिस्पर्शादावनेकग्रहदाहादौ च, तत्रापि नैमित्तिकस्य सकृदनुष्ठानं किमुत क्रतुप्रयोगमध्यवर्ति-तदङ्गवारुणेष्टेः। अतश्चाग्नेयादिभेदेऽपि प्रयाजाद्यङ्गतन्त्रत्ववत् युग-पदनेककपालभेदने होमतन्त्रत्ववच्च वारुणेष्टेस्तन्त्रत्वप्रसक्तौ नि मित्तसमसङ्ख्याकत्वविधानेन तावत्त्वप्रतीतावप्येकप्रयोगविधिपरि-गृहीतत्वेन साहित्यप्रतीतेर्युक्तमेवोदाहरणत्वम्। तत्र चाराद्दुप-कारकेषु बहुधा प्रसङ्ग एव। सन्निपातिषु बहुधा पदार्थानुस-मय एव। क्वचिदेव तु प्रधानविरोधे काण्डानुसमयः। प्रदाने तु सम्प्रतिपन्नदेवताकत्वात्तन्त्रत्वमेव। पुरोडाशमात्रे तु निमित्तस-मसङ्ख्याकत्वं प्राजापत्यवदिति द्रष्टव्यम्॥२॥

(३)—मुष्टिकपालावदानाञ्जनाभ्यञ्जनवपनपाव-नेषु चैकेन ॥४॥ सर्वाणि त्वेककार्यत्वा-देषां तद्गुणत्वात् ॥५॥

पदार्थानुसमयप्रसङ्गात् कियानेकः पदार्थ इति चिन्त्यते। किमेकैकमुष्टिनिर्वाप एकः पदार्थस्तेन चाग्नेयाग्नीषोमीयनिर्वापयोरनुसमयः, किं वा चतुर्मुष्टिनिर्वाप एकः पदार्थस्तावता चानुसमय इति चिन्तायां—एकैकमुष्टिनिर्वापे यत्नसमाप्तेर्मन्त्रसत्त्वाच्च तस्यैवैकपदार्थत्वमिति प्राप्ते—

अङ्गपर्यायः पदार्थशब्दः, तस्यैव प्रयोगविधिना विधानात्, विहितस्यैवाङ्गत्वम् । न चैकमुष्टिनिर्वापो विहितः, किन्तु चतुर्मुष्टिनिर्वाप एव, "चतुरश्चतुरो मुष्टीन्निर्वपति" इति विधानात्। अत्र हि अर्थप्राप्तनिर्वापानुवादेन न गुणमात्रविधानं सङ्ख्यामुष्ट्युभयविधाने वाक्यभेदात्, पुरोडाशमात्रपर्याप्तव्रीहिमतः पृथक्करणरूपनिर्वापस्य नियमेनाप्राप्तत्वाच्च । अतश्चतुर्मुष्टिनिर्वापेणैवानुसमयः। अत एव वीप्साऽप्युपपद्यते । एवं "कपालानुपदधाति अष्टौ दक्षिणतः एकादशोत्तरतः" इति सङ्ख्यादिविशिष्टोपधानविधानात्सर्वकपालोपधानेनानुसमयः। यद्यपि च कपालगतबहुत्वमुद्देश्यविशेषणत्वादविवक्षितं, तथाऽप्यष्टत्वादिसङ्ख्याया उपधानविशेषणत्वाद्विवक्षोपपत्तिः । यद्यपि च तत्तन्मन्त्रादिभेदादेकैकोपधानविधिरपि कश्चिदुन्नाव्येत तथाऽपि वक्ष्यमाणकृष्णाजिनास्तरणन्यायेन एकपदार्थत्वं सर्वोपधानस्य द्रष्टव्यम् । अत आग्नेयस्य सर्वाण्युपधायाग्नीषोमीयस्योपधेयानि। एवं "द्विर्हविषोऽवद्यति" इत्यत्रापि द्वित्वविशिष्टावदानविधानात द्विरवदानेनानुसमयो न त्वेकैकावदानेन । न च "मध्यादवद्यति, पूर्वार्धादवद्यति" इति वाक्याभ्यामेव द्विरवदानप्राप्तेस्तद्विधिवैयर्थ्यम् । एतद्विध्यभावे चतुरवत्तवाक्यस्थचतुस्सङ्ख्या मध्यात् द्विः पूर्वार्धात् द्विः इत्येवं हविष एव सम्पाद्येत। एतत्सत्वे तु तद्द्विराधाद्युपस्तरणाभिधारणाभ्यामिति तद्वाक्यस्था चतुस्स-

ङ्क्याऽनुवाद एव । इदं च साान्नाय्यविषयं द्विरवदानानुसमय-
कथनम् । आग्नेयादौ तु अवदानादिप्रदानान्तेनानुसमयस्य व-
क्ष्यमाणत्वात् । सान्नाय्ये तु उपस्तरणाभिघारणयोस्तन्त्रत्वात्
दध्नो द्व्यवदानं गृहीत्वा पयसो ग्राह्यम् । कल्पसूत्रेषु तु पयसो
द्व्यवदानं गृहीत्वा पश्चाद्दध्न इत्युक्तम् । तैत्तिरीयश्रुतौ ताद्द-
शक्रमस्य वाचनिकत्वात् । होमस्तन्त्रेणैव सम्प्रतिपन्नदेवताक-
त्वात् । एवमञ्जनाभ्यञ्जनवपनपावनेष्वपि तत्तद्विधिसत्त्वान्नैकेन ने-
त्रेण शरीरावयवेन वाऽनुसमयः, अपित्वनेकयजमानकेऽहीने ए-
कत्र नेत्रद्वयेऽप्यञ्जनं कृत्वा यजमानान्तरे तत्कार्यं सर्वावयवोपे-
ताभ्यञ्जनादिना च प्रत्येकमनुसमयः । सत्रे तु 'अध्वर्युर्गृहपतिं
दीक्षयित्वा' इत्यादिना तत्तत्संस्कारकदीक्षोत्तरकालत्वविधानात्
काण्डानुसमय एव ॥ ३ ॥

(४)–संयुक्ते तु प्रक्रमात्तदङ्गं स्यादितरस्य तद-र्थत्वात् ॥ ६ ॥

सान्नाय्यवदाग्नेयाग्नीषोमीयादौ भिन्नदेवत्येऽपि द्व्यवदाने-
नानुसमय इति प्राप्ते—

'चतुरवत्तं जुहाति' इत्यनेनावत्तोद्देशेन होमाख्यसंस्कारविधा-
नादर्थादेवावदानप्राप्तेः "द्विर्हविषोऽवद्यति" इत्यनेन द्वित्वमात्र-
विधानादुक्तविधचतुरवत्तहोमस्यैवैकपदार्थत्वेनावदानादिप्रदाना-
न्तेनानुसमयः ।

वस्तुतस्तु—अवत्तस्योद्देश्यत्वेन ततः पूर्वमवदानादिप्राप्तेर्दुरु-
पपादत्वात् द्व्यवदानवाक्ये चावदानमात्रे द्वित्वविधानेऽलङ्कर-
णन्यायोज्यावदानेऽपि द्वित्वप्राप्त्यापत्तेर्हविरुद्देशेनैव द्वित्ववि-

धाने होमादावपि तदापत्तेर्हेविर्विशिष्टोद्देशेन तद्विधाने च वा-
क्यभेदापत्तेरवश्यं द्वित्वविशिष्टावदानविधिस्वीकारेऽप्युपस्तरणा-
दिविधिन्यायेन दृष्टार्थत्वलाभाय चतुरवत्तहोमविध्युपपादकत्व-
स्याप्यङ्गीकारादवदानादिप्रदानान्तस्यैवैकपदार्थत्वावगमेन तेनैवा-
नुसमयः ॥ ४ ॥

(५)—वचनात्तु परिव्याणान्तमञ्जनादि स्यात् ॥
॥ ७ ॥ कारणाद्वाऽनवसर्गस्स्यात् यथा
पात्रवृद्धिः ॥ ८ ॥ न वा शब्दकृतत्वान्न्या-
यमात्रमितरदर्थात्पात्रविवृद्धिः ॥ ९ ॥

यूपधर्मा अञ्जनोच्छ्रयणसम्मानपरिव्याणादयो यूपगणेऽति-
देशप्राप्ताः पृथक्पदार्था अपि न प्रत्येकमनुसमेयाः "अञ्जनादि-
परिव्याणान्तं यजमानो यूपं नावसृजेत्" इति प्रकृतावनवसर्गस्य
विहितस्येहाप्यतिदेशात् । न चानेन रागप्राप्ते कादाचित्के यूप-
संयोगे सति त्यागनिषेधविधिः, पाक्षिकत्वाद्यापत्तेः । अपि तु
संयोगाभावाभावरूपसंयोगाख्यस्यानवसर्गस्यैव सहायार्थं नियम-
विधिः । अतश्च तदनुरोधेन सत्रातिरिक्ते यूपगणे तावत् का-
ण्डस्यानुसमयः । सत्रे तु येनकेनापि यजमानेन धारणसम्भ-
वात्पदार्थानुसमय एव । अन्यत्रापि तावदतिरिक्तपदार्थानां प्र-
त्येकमेवानुसमयः ॥ ५ ॥

(६)—पशुगणे तस्य तस्यापवर्जयेत्पश्वेकत्वात्॥
१० ॥ दैवतैर्वैककर्म्यात् ॥ ११ ॥ मन्त्रस्य
चार्थवत्त्वात् ॥ १२ ॥

प्रकृतौ साम्नाय्ये अवदानादिप्रदानान्तस्यैकपदार्थत्वादतिदेशेन दैक्षेऽपि तथैव प्राप्तौ "दैवतान्यवदाय न तावत्येव होतव्यं सौविष्टकृतान्यवद्यति, सौविष्टकृतान्यवदाय न तावत्येव होतव्य ऐडान्यवद्यति" इति वचनेन क्रमान्यत्वविधायिना पदार्थभेदावगतिः । न ह्यसम्बन्धिपदार्थान्तरव्यवधाने प्राकृतैकपदार्थता सम्पद्यते । अतश्चैकदेवत्ये पशुगणे प्राजापत्यन्यायेन दैवतावदानादिना प्रत्येकमनुसमयः । अन्ते च तन्त्रेण देवताहोमः न च प्रकृतावेकस्य पशोर्दैवताद्यवदानत्रयमानन्तर्येण कृतमितीहापि तथैव कार्यमिति शङ्क्यं, प्राजापत्यन्यायेनैव पश्वेकत्वस्य प्रकृतावार्थिकत्वेन चोदकविरोधाभावात् । अत एव यत्र विभिन्नदेवताके पशुगणे चोदकाविरोधस्तत्रावदानत्रयं होमं चैकस्य कृत्वा परस्याप्यवदानत्रयपूर्वकप्रदानान्तं कार्यम । स्विष्टकृदिडाभक्षणे तु तन्त्रेणैव । तत्रापि पदार्थानुसमये द्वितीयहोमस्यातिदेशप्राप्तैडावदानानन्तर्यबाधापत्तेः ॥

वस्तुतस्तु असम्बन्धिपदार्थान्तरव्यवधानेऽपि पश्चावत्तहोमसम्पादकत्वेन दैवतावदानस्यापि प्रदानावयवत्वोपपत्तेर्विभिन्नदेवताकस्थलेऽपि दैवतावदानादिप्रदानान्तेनानुसमयः । एकदेवताके तु पदार्थावयवानामेवानुसमय इति न कोऽपि विरोधः ॥

(७)—नानाबीजेष्वेकमुलूखलं विभवात् ॥१३॥ विवृद्धिर्वा नियमानुपूर्वस्य तदर्थत्वात्॥१४ एकं वा तण्डुलभावाद्धन्तेस्तदर्थत्वात् ॥१५

राजसूये—"अग्नये गृहपतयेऽष्टाकपालं कृष्णानां व्रीहीणां सोमाय वनस्पतये श्यामाकं चरुम" इति नानाबीजेष्टिराम्नाता ।

तत्रातिदेशप्राप्तानि कृष्णाजिनास्तरणोलूखलाधिवर्तनव्रीजावापाव-घातपरावपनविवेचनफलीकरणपात्र्यधिकरणकतण्डुलप्रक्षाळनानि तत्तद्विधिविहितत्वेन पृथक्पदार्थत्वात्प्रत्येकमनुसमेयानि। न ह्यत्र द्व्यवदानस्यावत्तहोमविध्याक्षिप्तत्ववत्सर्वेषामवघातविध्याक्षिप्तत्वं, येनैकपदार्थत्वं शङ्क्येत, तद्व्यतिरेकेणाप्यवघातसम्भवात्। नापि सर्वेषामेवावघातपदार्थत्वं, उलूखलमुसलसंयोगविशेषस्यैव सर्वौषधावघातवत्तत्पदार्थत्वात् अतः प्रत्येकानुसमये प्राप्ते—

तत्तद्विधिविधेयत्वेऽपि पृथक्पदार्थत्वेऽदृष्टार्थत्वापत्तेस्सर्वेषामेषां तण्डुलनिष्पत्तिफलकावघातविधिशेषत्वेनैव विधेयत्वादेकपदार्थत्वावगतेस्तावताऽनुसमयः एवं सत्यूलूखलमप्येकमेवेति सिध्यति पात्री च। इतरथा हि कृष्णाजिनमुसलशूर्पाणामेकत्वेनोपकारकत्वसम्भवेऽप्युलूखलपात्र्योर्भेदावश्यंभावात्। तस्मात्कृष्णाजिनास्तरणादिपात्रे तत्प्रक्षाळननिनयनान्तेनानुसमयः। उत्करे तत्प्रतिपत्तिस्तु तन्त्रेणेति विवेकः। एवं कृष्णाजिनास्तरणादिपेषणान्तेन तस्याप्यनुसमयः, तेषामपि पेषणविध्येकवाक्यतया एकपदार्थत्वात्।

नन्वत्र किं अनुसमेयपदार्थानां पदार्थत्वं, न तावदनुष्ठेयत्वं, एकमुष्टिनिर्वापादावतिव्याप्तेः। नापि विहितत्वघटितमङ्गत्वं, द्रव्यादावतिव्याप्तेः। नापि क्रियात्वविशेषितं तत्, उपस्तरणकृष्णाजिनास्तरणादावतिव्याप्तेः। नापि परानवयवत्वे सति निरुक्तक्रियात्वं, अवयवत्वस्यापि निर्वक्तुमशक्यत्वात्। दृष्टविधया क्रियान्तरोपकारकत्वमिति चेत् अवघातस्यापि दृष्टविधया यागपेषणाद्युपकारत्वेनावयवत्वापत्तावघातादिपेषणान्तेनानुसमयापत्तेः, अवघातकालीनतदङ्गजपादिमन्त्राणामदृष्टविधयोपकारकत्वेनावयवत्वानापत्तेश्च। किञ्च सत्यप्यवयवत्वे कृष्णाजिनास्त-

रणोपस्तरणादीनां विहितत्वे ऽङ्गत्वेन प्रयोगविध्युपसङ्ग्रहेण सा-हित्यावगतेः प्रत्येकानुसमयः किं न स्यात् । एवं द्व्यवदान-स्यापि होमवद्धविस्संस्कारकत्वात् पेषणावघातन्यायेन प्रत्येका-नुसमयः किं न स्यादिति चेन्न, सत्यपि कृष्णाजिनास्तरणा-दीनां स्वतन्त्रविधिविधेयत्वे अङ्गत्वेन प्रयोगविधिप्रयोज्यत्वे वा अवघाताद्यङ्गत्वेन तद्द्वारैव प्रयोज्यत्वावगमात् तदनुसमयेनैवानु-समय इति न प्रत्येकमनुसमयः, प्रत्येकं साहित्यानवगतेः । एवं परावपनादिप्रक्षाळननिनयनान्तानामपि तण्डुलरूपावघातफलो-पयोगितयाऽवघातार्थत्वान्न पृथक्पदार्थता । अत एवादृष्टार्थमपि तदङ्गं न पृथक्पदार्थः । एवमुपस्तरणादेरपि स्रुच्यसंसर्गद्वारा होमार्थत्वान्न स्वातन्त्र्येण प्रयोज्यतेति न पृथगनुसमयः । द्व्यव-दानस्य च हविस्संस्कारकस्याप्यवत्तोद्देशेन होमविधानाल्लाघवे-नावत्तहोमस्यैव प्रयोज्यत्वेऽवदानांशेऽपि पृथक्प्रयोज्यत्वाकल्प-नात् न पृथक्पदार्थत्वम् । अत एव पदार्थत्वं नाम स्वात-न्त्र्येण प्रयोगविधिविषयत्वं, पदार्थावयवत्वेन सम्मतानां हि कृष्णाजिनास्तरणादीनां नावघातादिनिष्ठप्रयुक्तिविषयत्वज्ञानं विना प्रयुक्तिविषयत्वं ज्ञायते, अवघातादीनां तु नान्यनिष्ठप्रयुक्तिवि-षयत्वज्ञानोत्तरकालत्वनियतं तज्ज्ञानं, प्रयोगविधिनाऽङ्गप्रधानोभ-यविशिष्टभावनाप्रयुक्तिज्ञापनेनाङ्गप्रयुक्तेरपि प्रधानप्रयुक्त्यन्यथाऽ-नुपपत्तिप्रसूतत्वाभावात् । अतश्च यत्प्रयुक्त्यन्यथाऽनुपपत्तिं विनैव यत्प्रयुक्तविषयत्वज्ञानं स ततः पदार्थान्तरमिति सि-द्धम् ॥ ७ ॥

(८)–विकारे त्वनुयाजानां पात्रभेदोऽर्थभेदा-त्स्यात् ॥ १६ ॥

दैक्षे पशौ अनूयाजानां "पृषदाज्येनानूयाजान् यजति" इति पृषदाज्यं श्रुतम् । प्रयाजानां तु शुद्धमेवाज्यं प्रकृतिप्राप्तम् । प्रकृतौ चोपभृत्येकस्मिन्नेव पात्रे प्रयाजाङ्गभूतं चतुर्गृहीतं गृहीत्वा तस्मिन्नेव काले अनूयाजार्थं चतुर्गृहीतं गृहीतमासीत् । अत्रापि तथैव ग्रहणे प्रयाजाज्यस्य दधिसंसर्गेणोत्पवनावेक्षणयोरदृष्टार्थत्वप्रसङ्गेनाप्राकृतकार्यकारितापत्तेः, समानयनवेलायां प्रयाजाज्यस्य न्यूनत्वापत्तेश्च । अतोऽवश्यं पात्रैकत्वमनुगृह्य क्रमो बाध्यतां विपरीतं वेति चिन्तायां—पात्रैकत्वस्य श्रुतत्वात्पदार्थत्वाच्च बाधानुपपत्तेः क्रमस्यैव मन्त्रपाठकल्प्यत्वेन पदार्थगुणत्वेन च दौर्बल्यात् शिष्टकोपाधिकरणन्यायेन बाधः । एवं "अष्टावुपभृति" इत्येतद्वाक्यावगम्यचतुष्कद्वयसाहित्यबलकल्प्यैककालत्वस्यापि । न च प्रकृतौ तयोः क्लृप्तकल्प्यत्वादिना बलाबलेऽपि विकृतावतिदेशेन प्राप्तयोस्तयोस्समत्वान्न बलाबलमिति शङ्कयं, क्लृप्तकल्प्यत्वादिरूपबलाबलस्य विकृतावसम्भवेऽपि पदार्थतद्गुणत्वादिकृतबलाबलस्य विकृतावपि नियामकत्वोपपत्तेः । सम्भवति विकृतौ नियामकान्तरासत्त्वे प्राकृतस्यापि बलाबलस्य सप्तदशशरावे चरौ चतुस्सङ्ख्यामुष्टिनिष्ठप्राथम्यजघन्यत्वस्येव नियामकता । अतस्तस्मिन्नेव पात्रेऽनूयाजकरणवेलायां पृषदाज्यग्रहणमिति प्राप्ते—

पात्रैकत्वस्य पदार्थत्वेऽप्यनुष्ठयपदार्थमात्रवृत्तिक्रमस्य तद्धर्मत्वाभावात् प्रत्युत साक्षाद्ग्रहणाङ्गभूतक्रमकालाद्यपेक्षया ग्रहणाङ्गभूतपात्राङ्गैकत्वस्य अङ्गगुणविरोधन्यायेन दौर्बल्यात्तदैवोपभृद्द्वयं सम्पाद्य शुद्धं दधिसंस्कृतं च चतुर्गृहीतद्वयं ग्राह्यम् ॥ ८ ॥

(९)–प्रकृतेः पूर्वोक्तत्वादपूर्वमन्ते स्यान्न ह्यचो-

दितस्य शेषाम्नानम् ॥ १७॥ मुख्यानन्तर्यमात्रे यस्तेन तुल्यश्रुतित्वादशब्दत्वात्प्राकृतानां व्यवायस्स्यात् ॥ १८ ॥ अन्ते तु बादरायणस्तेषां प्रधानशब्दत्वात् ॥ १९ ॥ तथा चान्यार्थदर्शनम् ॥ २० ॥

"अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपलं निर्वपेत्" इति नक्षत्रेष्टिं विधाय "सोऽत्र जुहोति" इत्युपहोमा विहिताः। प्रकृतौ च प्रधानस्विष्टकृतोर्मध्ये वाचनिका नारिष्टहोमास्समाम्नाताः॥

तदत्रोपहोमानां नारिष्टेभ्यः पूर्वमनुष्ठानं, औपदेशिकप्रधानपाठक्रमेण प्रधानानन्तर्यस्य विहितत्वात्। उपहोमानामौपदेशिकत्वेन नारिष्टेभ्यः प्रथममन्वितत्वाच्चेति प्राप्ते—

उपकारकसाकाङ्क्षया विकृतिभावनया क्लृप्तोपकारकाणामातिदेशिकानामङ्गानां प्रथमं गृहीतत्वेनोपहोमानामन्यतराकांक्षया पश्चादन्वयादतिदेशस्य च प्रधानवाक्यशेषत्वस्यैव लाघवादभ्युपगमेनोपहोमानामातिदेशिकाङ्गयुक्तप्रधानोत्तरमेव पाठेन क्रमावगतेः पश्चादेव करणम्। तत्रापि ब्राह्मणतर्पणान्ते कर्तव्यत्वे प्राप्ते "मध्ये जुहोति" इति वचनेनोपहोमसमाख्यया च अत्रेति स्थाननिर्देशाच्च नारिष्टेभ्योऽनन्तरं कार्याः ॥ ९ ॥

(१०)—कृतदेशात्तु पूर्वेषां स देशस्स्यात्तेन प्रत्यक्षसंयोगात् न्यायमात्रमितरत् ॥२१॥

राजसूये अभिषेचनीयसोमयागानन्तरं प्राग्दशपेयात् वि-

देवनादयोऽभिषेकान्ता राजसूयधर्माः "अक्षैर्दीव्यति, राजन्यं जिनाति, शौनश्शेपमाख्यापयति, अभिषिच्यते" इत्यादिभिर्विहिताः। तत्राभिषेकस्तावत् वचनादेव "माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यते" इत्यभिषेचनीयमाहेन्द्रकालेऽपकृष्टः। तदपकर्षेऽपि च न तत्पूर्वपठितानामपि विदेवनादीनामपकर्षः, वेदिकरणन्यायेन अपूर्वाणामेषां बद्धक्रमत्वाभावात् अभिषेचनीयोत्तरमपि च पाठस्य सत्त्वेन पूर्ववत्प्राकृताङ्गोत्तरमेव करणमिति प्राप्ते—

पूर्वं प्रयाजादिवत् बद्धक्रमत्वाक्लृप्तावपि इदानीमेव प्रत्यक्षेण पाठेनैकराजसूयप्रयोगविधिपरिगृहीतानां विदेवनाद्यभिषेकान्तानां बद्धक्रमत्वोपपत्तावभिषेचनीयपाठेन। प्राकृताङ्गानामानुमानिकत्वेन तैस्सह विदेवनादीनां भिन्नप्रयोगविधिपरिगृहीतानां क्रमकल्पनानुपपत्तेरभिषेकापकर्षेणापकर्ष एव विदेवनादीनाम् ॥ १०

(११)–प्राकृताच्च पुरस्तायत् ॥ २२ ॥

दीक्षणीया ज्योतिष्टोमप्रकरणे समाम्नाता, चयनं चानारभ्याधीतं वैकल्पिकं सोमयागाङ्गं, तत्प्रकरणे च सावित्रहोमोखासम्भरणादयश्चयनाङ्गभूता धर्माश्श्रुताः, पश्चाच्च सचयनज्योतिष्टोमाङ्गदीक्षणीयाप्रयोगोद्देशेन केचिद्गुणाश्श्रुताः।

तदत्र दीक्षणीयायास्सामान्यतस्सोमप्रकरणाम्नातदीक्षणीयापूर्वपदार्थैस्सह पाठेन बद्धक्रमत्वावगमाच्चयनप्रकरणे दीक्षणीयाया गुणमात्रश्रवणेन पाठाभावाच्च सावित्रादीनामागन्तुकानां दीक्षणीयादिनकृत्यान्ते निवेश इति प्राप्ते—

गुणेनापि गुणिन उपस्थितेस्तद्वाक्ये गुणिन उद्देश्यतया सङ्कीर्तनाच्च गुणगुणिनोरेकस्थानत्वावगतेः प्रत्यक्षेण विशेषरूपेण

च पाठेन सामान्यरूपस्य पाठस्य बाधात् पूर्वं सावित्र्यादयः पश्चाद्दीक्षणीयेति सिद्धम् ॥ ११ ॥

(१२)–सन्निपातश्चेद्यथोक्तमन्ते स्यात् ॥२३॥

तत्रैव दीक्षणीयागुणश्रवणोत्तरं रुक्मप्रतिमोचनादि चयनाङ्गं श्रुतम् । ज्योतिष्टोमप्रकरणे च सामान्यतो दीक्षणीयोत्तरं दीक्षितसंस्कारा दण्डदानादयः ।

तदत्रापि विशेषपाठेन सामान्यपाठस्य बाधात् दीक्षणीयोत्तरं रुक्मप्रतिमोचनादि कृत्वा ततो दीक्षितसंस्कारा इति प्राप्ते—

विशेषपाठस्य पश्चाद्भावमात्रबोधनेनान्यथासिद्धस्यावर्जनीयतयाऽप्युपपत्तौ दीक्षणीयाऽऽनन्तर्यानियामकत्वात्सामान्यपाठेन क्लृप्तक्रमान् दीक्षितसंस्कारानेव दीक्षणीयाऽनन्तरं कृत्वा तद्दिनकृत्यान्ते रुक्मप्रतिमोचनादिकं कार्यम् ॥ १२ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां पञ्चमस्याध्यायस्य द्वितीयः पादः.

अथ तृतीयः पादः.

(१)–विवृद्धिः कर्मभेदात्पृषदाज्यवत्तस्य तस्योपदिश्येत ॥ १ ॥ अपि वा सर्वसङ्ख्यत्वाद्विकारः प्रतीयेत ॥ २ ॥

विकृतौ "एकादश प्रयाजान् यजति षडुपसदः" इत्यादिवैकृती अनेकव्यक्तिवृत्त्यधिकसङ्ख्या श्रुता । सा प्रतिप्रधानं गुणावृत्तिन्यायेन पृषदाज्यादिवदेकैकस्मिन् प्रयाजादौ प्रत्येकमभिसम्बध्येतेति एकैक एकादशवारमावर्तनीय इति प्राप्ते—

द्वित्वादिसङ्ख्यायाः पृथक्त्वनिवेशित्वादेकैकस्मिन् पञ्चस्वपि वा पृषदाज्यवदावृत्तिं विना एकादशत्वानुपपत्तेरुत्पन्नवाक्यगतत्वेन च कर्मभेदकत्वायोगादावश्यके जघन्ये प्रयाजपदे प्रयोगलक्षणया सङ्ख्याविधौ वरं सहितैरेव प्रयाजैस्तल्लक्षणात् सहितप्रयाजप्रयोगाणां सहितानामेवोद्देशात् सर्वसम्पाद्या सङ्ख्येति प्राञ्चः । वस्तुतस्तु—प्रयोगोनाम न पदार्थान्तरं येन लक्षणा स्यात् अपि तु प्रयाजानामेव व्यक्त्यन्तरम् । अतश्च यथैव प्रकृतौ "पञ्च प्रयाजाः" इत्यादौ तत्तद्व्याप्यजात्यवच्छिन्ना एव व्यक्तयः प्रयाजत्वरूपव्यापकजात्यवच्छेदेनोच्यन्ते तथाऽत्राप्येकादशत्वादिसङ्ख्यासम्पत्त्यर्थं तावद्व्यक्तीनामुक्तौ क्व लक्षणा, अतस्तदभावेऽपि व्यापकधर्मावच्छिन्नोद्देशेन विहितैकादशत्वादिसङ्ख्याऽनेकत्र व्यासज्यवृत्तित्वस्वाभाव्याद्व्यक्त्यन्तराण्याक्षिपन्ती लाघवात्प्रकृतिक्लृप्तव्यक्त्यधिकव्यक्तीः षडेवाक्षिपति नाधिका इति सर्वसम्पाद्यत्वसिद्धिः । न चैवं प्रयोगलक्षणाभावे "तिस्र आहुतीः" इत्यादाविव व्यक्तिभेदापत्तिः । तत्र विधेयतावच्छेदकविजातीयहोमत्वस्यैकस्य पूर्वमक्लृप्तत्वेन भेदप्रतियोगितावच्छेदकतया त्रयाणामेव तेषां कल्पनयोपपत्तौ तत्तद्व्यक्तित्वस्य प्रतियोगितावच्छेदकीभूतस्य विधेयतावच्छेदकत्वकल्पने गौरवात्, प्रकृते तु क्लृप्तप्रयाजत्वस्योद्देश्यतावच्छेदकत्वात् सङ्ख्यायाश्च विधेयत्वान्न काचित्कल्पनेति वैषम्यम् ॥ १ ॥

(२)–स्वस्थानात्तु विवृद्धयेरन् कृतानुपूर्व्यत्वात्॥

तत्र प्रयाजैकादशत्वादिसङ्ख्या स्वसम्पत्त्यर्थं व्यक्त्यन्तराण्याक्षिपन्ती चतुर्थोत्तमप्रयाजजातीयान्येवाक्षिपति, तदङ्गभूतयोः प्राकृततदङ्गदेवताप्रकाशकयोरपूर्वयोः प्रैषयोर्मध्ये षण्णामन्येषामप्राकृतदेवत्यमन्त्राणां पशावाम्नानात् । तद्यदि आद्यानां त्रयाणामभ्यासस्स्यात् ततो मन्त्राणामपकर्षापत्तिः, समिद्यागत्वस्यानुपस्थितिश्च । अतस्सन्निधानविशेषाच्चतुर्थोत्तमप्रयाजयोरेव चतुश्चतुर्वारमावृत्तिः । उभयत्राभ्यासत्रये च प्राकृतदेवताबाधो लक्षणया वा तद्देवताप्रकाशनमित्यन्यदेतत् । एवमनूयाजेष्वपि मन्त्रलिङ्गवशादेव प्रथमानुयाजस्याद्याश्चत्वारो दशमश्च । द्वितीयस्याष्टमपर्यन्तं पञ्चमप्रभृत्यभ्यासः । नवमैकादशौ तृतीयस्येति। यत्र तु न किञ्चिद्गमकं तत्र विषमसम्पाद्यसङ्ख्याकस्थले अवश्यकल्प्याया अधिकाया आवृत्तेरन्तिमविषयत्वात्सर्वस्याप्यन्तिमविषयकत्वमेवेत्यपि वक्ष्यते । यत्र तु समसङ्ख्याकैवाऽऽवृत्तिः यथा तिसृषु उपसत्सु षट्त्वश्रवणे तत्रैकैकस्या द्विरावृत्त्याऽपि षट्त्वसम्पत्तौ नान्तिमाया एव चतुरावृत्तिः समुदाये विहितकार्यान्यथाऽनुपपत्त्या कल्प्यमानाया आवृत्तेः सर्वविषयत्वौचित्यात् । तत्र च त्रिरनुवाकः पठ्यतामित्यादौ सम्पूर्णानुवाकस्यावृत्तिदर्शनेन प्रकृतेऽप्युपसत्त्रयमेकवारं कृत्वा पुनः कार्यमिति दण्डकलितवदावृत्तिरिति प्राप्ते—

प्रथमद्वितीययोर्हि तृतीयातः पूर्वं करणं क्लृप्तं तत् दण्डकलितवदावृत्तौ बाध्येत । अतः प्रथमां द्विः कृत्वा द्वितीयां च द्विरभ्यस्य तृतीयाऽपि तथैव कार्येति स्वस्थानविवृद्धिरेवेति सिद्धम् ॥ २ ॥

(३)—समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्यास्स्युर्द्यावापृथिव्योरन्तराले समर्हणात् ॥ ४ ॥ तच्छब्दो वा ॥ ५ ॥ उष्णिक्ककुभोरन्ते दर्शनात् ॥ ६ ॥

पञ्चदशसामिधेनीनां यत्र "एकविंशतिमनुब्रूयात्" इत्यत्राधिका सङ्ख्या श्रुता, तत्रागमेन सङ्ख्यापूरणं दशमे वक्ष्यते। तदत्रागम्यमानानामृचां यद्यपि न्यायेनान्ते निवेशः प्रसज्यते, तथाऽपि "इयं वै समिध्यमानवती असौ समिद्धवती यदन्तरा तद्धाय्या" इति द्यावापृथिव्यन्तराळत्वेन स्तुतस्य च समिध्यमानवतीसमिद्धवत्यन्तराळस्याप्रातिबलकल्पितविधिविहितस्य सत्त्वात्तदन्तराळ एव सर्वासामागम्यमानानां निवेशः । न च धाय्यापदपरिभाषितानामेव मन्त्रविशेषाणां तदन्तराले निवेशोऽन्येषां त्वन्त इति वाच्यं, धीयमानत्वयोगेन सर्वेषामेव धाय्यापदवाच्यत्वादिति प्राप्ते—

नायं यौगिकः स्तोत्रादावागम्यमानास्वपि धाय्याशब्दप्रयोगापत्तेः, पाणिनिना सामिधेनीष्वेव धाय्यापदस्यानुशिष्टत्वाच्च। अतो रूढ एवायम्। सोपि यत्रैव वेदे "पृथुपाजवत्यौ धाय्ये" इत्यादिना परिभाषितस्तत्रैव । तेषामेव चान्तराळे निवेशः । अन्येषां त्वन्त इति । अत एव त्रैधातवीयायामधाय्याशब्दितायाः "अग्ने त्री ते" इत्यस्या ऋचः "त्रिष्टुभा परिदधाति" इत्यन्ते निवेशदर्शनमुपपद्यते ॥ ३ ॥

(४)—स्तोमविवृद्धौ बहिष्पवमाने पुरस्तात्प-

पर्यासादागन्तवस्स्युस्तथा हि दृष्टं द्वादशाहे ॥ पर्यास इति चान्ताख्या ॥ ८ ॥ अन्ते वा तदुक्तम् ॥ ९ ॥ वचनात्तु द्वादशाहे ॥ १० ॥ अतद्विकारश्च ॥ ११ ॥ तद्विकारेऽप्यपूर्वत्वात् ॥ १२ ॥

प्रकृतौ बहिष्पवमाने त्रयस्तृचाः स्तोत्रीयोऽनुरूपः पर्यासश्चेत्येवं संज्ञाः । त्रिवृद्धस्तोमकायां विकृतौ बहिष्पवमाने ऋगागमो वक्ष्यते ।

तत्रागम्यमानानामृचां प्राक्पर्यासान्निवेशः । पर्यासशब्दस्य नदीपर्यासः क्षेत्रपर्यासः इत्यादावन्तवचनत्वेन प्रसिद्धेस्समाख्ययैवान्तिमस्थानत्वावगतेस्तदबाधार्थं प्राक्पर्यासादागन्तूनां निवेशकल्पनात् । अत एव द्वादशाहे पार्ष्ठिके द्वितीयेऽहनि पञ्चदशस्तोमके स्तोत्रीयानुरूपौ पठित्वा वृषण्वन्तौ तृचौ समाम्नाय पश्चात्पर्यासः पठित इति प्राप्ते —

प्रकृतिक्लृप्तस्यानुरूपानन्तर्यस्य पर्यासे बाधे प्रमाणाभावात् समाख्यायाश्च प्रकृतौ पाठप्राप्तान्तिमस्थानकत्वानुवादकत्वेन स्थानविधिकल्पकत्वाभावादन्त एवागन्तूनां निवेशः । द्वादशाहे पार्ष्ठिके द्वितीयेऽहनि तु वाचनिकं वृषण्वतोस्तृचयोः प्राक्पर्यासादनुष्ठानम् । तदपि तयोरेव । तद्विकारेष्वन्येषामागमस्त्वन्त एव ॥

(५)—अन्ते तूत्तरयोर्दध्यात् ॥ १३ ॥ अपि वा गायत्रीबृहत्यनुष्टुप्सु वचनात् ॥ १४ ॥

यत्र तु विवृद्धस्तोमकेष्वेव क्रतुषु उत्तरयोर्माध्यंदिनार्भवपवमानयोर्वक्ष्यमाणस्सामागमः, तत्र स नान्ते अनारभ्याधीतेन "त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् अत्र ह्येवावपन्ति अत एवोद्वपन्ति" इति वचनेनाप्राप्तिबललब्धविधिशक्तिकेन गायत्र्यादिष्वेव सामावापविधानात् । अतो नान्त इति प्रत्युदाहरणमात्रमिदम् ॥ ५ ॥

(६)—ग्रहेष्टकमौपानुवाक्यं सवनचितिशेषस्स्यात् ॥ १५ ॥ क्रत्वग्निशेषो वा चोदितत्वादचोदितानुपूर्वस्य ॥ १६ ॥

यानि प्राकरणिकानि ग्रहणान्यैन्द्रवायवादीनि तानि यथापाठमेव व्यवस्थितानीति न तेषु चिन्ता । यानि त्वनारभ्याधीतानि तेष्वपि यत्रांश्वदाभ्यादौ प्राकरणिको विनियोगस्तत्रापि विधिपाठबलादेवानुष्ठानासिद्धेर्न चिन्ताविषयत्वम् । अत एव न तयोरन्ते करणं, अपि तु प्रातस्सवन एव धाराग्रहेभ्यः पूर्वमेव । यत्र त्वनारभ्याधीतमेव तेषां यागाङ्गतयाऽपि विनियोजकं वाक्यं तत्र ग्रहणस्य यागाभ्यासोपकारकस्य सामर्थ्यादभ्याससमुदायात्मकसवनद्वारकतयैव यागाङ्गत्वात् द्वारभूतसवनभेदेन प्रतिसवनं ग्रहणानुष्ठानं निर्वापाङ्गस्य मन्त्रस्येव मुष्टिरूपद्वारभेदेन । एवमनारभ्याधीतानां "चित्रिणीरुपदधाति" इत्यादीनामपि प्रतिचिति भेदेनानुष्ठानम् । चित्रिण्यादीष्टकानां ह्यनारभ्याधीतानामप्युपधानसंस्कृतानामुपयोगापेक्षायां "तस्मादग्निचित्सर्वमायुरेति" इत्याद्यर्थवादवशादग्न्यङ्गत्वप्रतीतावप्यग्निपदाभिधेयस्थण्डिलारम्भकचितिद्वारकतयैव तदङ्गत्वावगतेः प्रतिचित्या-

वृत्तिः । 'यां कां चन' इतिवचनं तु प्राकरणिकेष्टकाभिप्रायमिति प्राप्ते—

ऐन्द्रवायवादिग्रहणवदेवाभ्याससम्पादनद्वारा यागोपकारकत्वस्यैव सिद्धेस्सवनारम्भस्यानुषङ्गिकत्वेऽपि द्वारत्वे प्रमाणाभावान्न प्रतिसवनमावृत्तिः, अपि त्वन्त एवानुष्ठानम् । एवं चित्रिण्यादेरपि न प्रतिचित्यनुष्ठानम् ॥ ६ ॥

(७)—अन्ते स्युरव्यवायात् ॥ १७ ॥ लिङ्गदर्शनाच्च ॥ १८ ॥ मध्यमायां तु वचनाद्ब्राह्मणवत्यः ॥ १९ ॥

चित्रिण्यादीनां तु "यां कां चन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यात्" इति वचनेन मध्यमचितावुपधानम् । अत्र ह्यभिपूर्वस्य जानातेः प्रत्यक्षज्ञानवाचित्वाद्वाक्यस्यार्थवत्त्वाच्च प्रत्यक्षब्राह्मणविहितेष्टकोद्देशेन मध्यमचितिरूपदेशविधानम् । उपधानं तु प्रकरणप्राप्तमाश्रयः । प्रत्यक्षब्राह्मणवत्त्वं इष्टकावाचिश्रुतशब्दविनियुक्तमन्त्रोपधेयत्वमित्युक्तमेव भूमाधिकरणे । न च प्रत्यक्षब्राह्मणवत्त्वस्योद्देश्यविशेषणता, तच्छब्देन विशिष्टपरामर्शकेन विशिष्टोद्देशोपपत्तेः । अतो मध्यमचितावेवोपधानम् । न चेदं प्राकरणिकविषयं, अविशेषात् ॥ ७ ॥

(८)—प्राग्लोकंपृणायास्तस्यास्सम्पूरणार्थत्वात् ॥ २० ॥

मध्यमायामपि प्राकरणिकेष्टकोपधानानन्तरमेवोपधानं चित्रिण्यादीनां न तु प्राग्लोकंपृणायाः, आगन्तुकत्वात् । न च

"यदेवास्योनं यच्छिद्रं तदेतया पूरयति लोकं पृण छिद्रं पृण" इति वचनेन लोकंपृणायाः पूरणार्थत्वावगमात् तस्या अन्ते निवेशावगतेः ततः प्राङ्निवेशश्चित्रिण्यादीनां, लिङ्गादेव मन्त्रस्य छिद्रपूरणार्थत्वे अस्य वचनस्य तदर्थत्वविधायकत्वाभावात् । कथञ्चिन्मन्त्रस्य तद्विधायकत्वेऽपि इष्टकायास्तदर्थत्वे प्रमाणाभावाच्च । अस्तु वा मन्त्रे छिद्रपूरकत्वस्येष्टकायास्तत्पूरकत्वं विनाऽनुपपत्तेस्तस्या अपि तत्, तथाऽपि तस्य चित्यन्तरेऽपि सावकाशत्वान्न चित्रिण्यादीनामन्ते निवेशन्यायस्य निरवकाशस्य बाधः। न च लोकंपृणाया अपि प्रत्यक्षब्राह्मणवत्त्वान्मध्यमचितिमात्रविषयत्वं, इतिकरणविनियुक्तत्वेनास्य मन्त्रस्येष्टकावाचिश्रुतपदविनियुक्तत्वाभावात् । न च तथाऽपि तत्तच्चित्यवान्तरप्रकरणपाठितत्वे तत्रैव निवेशापत्तेश्चयनमहाप्रकरणपाठितत्वे चान्तिमचितावेव निवेशापत्तेः कथं सावकाशत्वमिति वाच्यं, पूरणार्थत्वे लिङ्गादेव द्वारभेदेन भेदोपपत्तेस्सर्वविषयत्वादिति प्राप्ते-

चित्रिण्यादीनामन्ते निवेशे लोकंपृणायाश्छिद्रपूरणरूपफलस्यैव बाधापत्तेर्वरं पूर्वपठितेष्टकोपधानोत्तरत्वरूपक्रमबाधेन चित्रिण्यादीनां लोकंपृणायाः प्राङ्निवेशः ॥ ८ ॥

(९)—संस्कृते कर्म संस्काराणां तदर्थत्वात् ॥ अनन्तरं व्रतं तद्भूतत्वात् ॥ २२ ॥ पूर्वं च लिङ्गदर्शनात् ॥ २३ ॥ अर्थवादो वा अर्थस्य विद्यमानत्वात् ॥ २४ ॥ न्यायविप्रतिषेधाच्च ॥ २५ ॥

आधानस्य नैरपेक्ष्येणोत्पत्तिवाक्येऽग्निनिष्पादकत्वावगमात् आधानमात्रेणैवाग्निनिष्पत्तिरिति सिद्धत्वादग्नीनामाधानमात्रानन्तरमेवोत्तरक्रतूनां प्रवृत्तिः। पवमानेष्टयस्तु यदि भाष्यकारमतादग्न्यङ्गं तदा सिद्धेष्वेवाग्निषु स्वोत्तरभाविक्रतूपयोगितया संमार्गवत् संस्कारविशेषाधायकाः। यदि तु वार्तिककारमतादाधानाङ्गं तदा बृहस्पतिसववदेता अग्नीनां स्थापिकाः इति केषांचित्क्रतूनामाधानानन्तरमेव करणेऽपि न पवमानेष्टीनां वैयर्थ्यापत्तिः। "अग्निं वै सृष्टमग्निहोत्रेणानुद्रवन्ति" इति पवमानेष्टिभ्यः प्रागेवाग्निहोत्रप्रवृत्तिं दर्शयति। अतश्च "आहिताग्निर्नक्लिन्नं दार्वभ्यादध्यात्" इत्याद्याहिताग्निव्रतवदेवाधानोत्तरमेव क्रतुप्रवृत्तिरिति प्राप्ते—

भाष्यकारमते तावत् तत्तद्वाक्ये नैरपेक्ष्यश्रवणेऽपि एकस्योत्पादकत्वमितरस्य संस्कारकत्वमित्यत्र प्रमाणाभावः। प्रत्युत पवमानेष्टीनामेव स्वविनियोजकवाक्ये आहवनीयोत्पादकत्वावगतेराधानस्य गुणवाक्यावगताहवनीयोत्पादकत्वं विलम्बोपस्थितिकम्। न चैवमुभयोरुत्पादकयोर्विकल्पः, "सद्यो निर्वपेत् द्वादशरात्रिष्वनुनिर्वपेत्" इत्यादिकालविधिवशादेव समुच्चयसिद्धेः।

वार्तिकमते तु साङ्गस्यैवाधानस्योत्पादकत्वात् न तदभावेऽग्निसिद्धिः। न च स्थापकत्वं, बृहस्पतिसववत् पवमानेष्टीनामाधानप्रयोगबहिर्भावेऽपि तद्वदाधानकरणकभावनाबहिर्भावस्याश्रुतत्वेन स्थापकत्वकल्पनानुपपत्तेः। अतः पवमानेष्टिव्यतिरेकेणाहवनीयनिष्पत्तेरभावात् तदनन्तरमेवाग्निहोत्रादीनि। आहिताग्निव्रतेषु तु आधानोत्तरमेव पुरुषस्याहिताग्निपदवाच्यत्वोपपत्तेस्तदनन्तरं करणम्।

यत्तु निदर्शनमुक्तं तत् तूष्णींहोमस्य आधानाङ्गभूतस्य स्तुत्यर्थं नाग्निहोत्रस्य पूर्वप्रवृत्तिसूचकम्। तूष्णींहोमो हि नाग्निहोत्रहोमः प्रमाणाभावात् । नाप्यग्निहोत्रधर्मकः, अर्थवादगतस्य नाम्नोऽनतिदेशकत्वात् । एतद्धोमस्याप्याधानद्वाराऽग्निप्रयोजकस्याग्निसम्बन्धित्वाविशेषात् प्रायणीयादिपदवदनतिदेशकत्वाच्च । अतोऽपूर्वस्यैव होमस्येयं स्तुतिरिति नाग्निहोत्रस्य पूर्वप्रवृत्तौ लिङ्गम् । भिन्नप्रयोगपरिगृहीतानामपि च पौर्वापर्यमात्रं प्रसङ्गान्निरूपितम् । व्यवहिताव्यवहितसाधारण्येन पौर्वापर्यमेवाध्यायार्थ इत्यपि ध्येयम् ॥ ९ ॥

(१०)—सञ्चिते त्वग्निचिद्युक्तं प्रापणान्निमित्तस्य ॥ २६ ॥ क्रत्वन्ते वा प्रयोगवचनाभावात् ॥ २७ ॥ अग्नेः कर्मत्वनिर्देशात् ॥ २८ ॥

'वर्षति न धावेत्' इत्यादीन्यग्निचिद्व्रतान्यामरणं वर्षमात्रं वा चयने निमित्ते पुरुषार्थतया आधाने निमित्ते आहिताग्निव्रतवदेव विहितानि । अत्र व्रतपदश्रवणादेवोभयत्रापि सङ्कल्पलक्षणा पुरुषार्थत्वं च वाचनिकफलश्रवणात् द्रष्टव्यम । तदिदमग्निचिद्व्रतं भूतचयनमात्रस्यैव भूताधानवन्निमित्तत्वाच्चयनमात्रे कृते कर्तव्यमाहिताग्निव्रतवदिति प्राप्ते—

कर्मणि भूत इति चानुवर्तमाने 'अग्नौ चेः' इति सूत्रेण कर्तरि चिनोतेः क्विप्प्रत्ययविधानात् कर्मत्वाद्यन्यथाऽनुपपत्त्या च भावनाक्षेपादग्निकर्मकचयनकरणकभावनाया एव भूताया निमित्तत्वावगतेरग्निशब्दवाच्यस्य च ज्वलनाख्यस्याग्नेः स्वरूपेण चयनकर्मत्वाभावाच्चयननिष्पादितस्थण्डिलाधारत्वद्वारा कर्मत्वावगतेः

राधारतायाश्च साङ्गयागसमाप्तिं यावदनिष्पत्तेः क्रत्वन्त एवाग्नि-कर्मकचयनकरणकभावनाया भूतत्वावगतेस्तदन्ते एवाग्निचिह्नानि। अहिताग्निपदे तु यद्यपि क्तप्रत्ययेन तथैव लक्षणया भावनावगतेस्तस्या एव भूताया निमित्तत्वावगमः तथाऽपि ज्वलनाख्यस्याग्नेराधानकर्मत्वस्य स्वजन्यावान्तरापूर्वाधारत्वेनैव वाच्यत्वात्तादृशस्य चाधानान्त एव निष्पत्तेस्तदन्त एवाहिताग्निव्रतानि । न ह्यत्राहवनीयत्वादिना कर्मत्वं श्रुतं येन पवमानेष्ट्यन्ते तन्निष्पत्तिश्शङ्क्येत ॥ १० ॥

(११)—परेणावेदनाद्दीक्षितस्स्यात्सर्वैर्दीक्षाभिसम्बन्धात् ॥ २९ ॥ इष्ट्यते वा तदर्था ह्यविशेषार्थसम्बन्धात् ॥ ३० ॥ समाख्यानं च तद्वत् ॥ ३१ ॥

'आग्नावैष्णवमेकादशकपालं निर्वपेत् दीक्षिष्यमाणः' इति दीक्षणीयेष्टेस्तावद्दीक्षार्थत्वं लृट्प्रत्ययस्य क्रियार्थायां क्रियायामुपपदे विहितस्य श्रवणादवगम्यते । "दण्डेन दीक्षयति मेखलया दीक्षयति कृष्णविषाणया दीक्षयति' इत्यादिना तृतीययैव दण्डादीनां दीक्षार्थत्वम् । न च दण्डादीनामभिव्यक्त्यर्थत्वं, दीक्षाऽभिव्यक्तेरश्रुतत्वात् अनेकेषु दीक्षयतिपदेषु तल्लक्षणायां प्रमाणाभावाच्च । किञ्चादृष्टरूपयमनियमपरिग्रहानुकूलयोग्यतारूपाया दीक्षाया अभिव्यक्तिर्न तावदनुमित्यात्मिका, दण्डादीनां व्यभिचरितत्वात्। नापि स्मरणात्मिका सम्बन्धित्वस्य प्रागज्ञानात् । अस्तु वा दीक्षणीयाया एव दीक्षोत्पादकत्वं, तथाऽपि न तदन्ते दीक्षितधर्मा यमनियमादयः। तत्र 'दीक्षितोऽसि दीक्षितवादं वद स-

त्यमेव वद माऽनृतम्' इत्याद्यावेदनप्रेषणदण्डादिदानोत्तरमेव यमनियमपरिग्रहविधानात्। इतरथा आवेदनस्यादृष्टार्थत्वापत्तेः। अत एव यमनियमपरिग्रह एव दीक्षेति पार्थसारथिलेखनमप्यपास्तम्। आवेदनप्रैषे दीक्षासम्बन्धोत्तरकालं यमनियमपरिग्रहाभिधानात् स्वयमेव दीक्षाया अदृष्टरूपत्वाभिधानाच्च। अतो दण्डादीनामपि दीक्षार्थत्वात्सर्वान्ते सा। न चैवं नैरपेक्ष्यश्रवणाद्विकल्पापत्तिः अदृष्टार्थतयैकप्रयोगविधिपरिग्रहेण समुच्चयावगतौ अवान्तरकार्ये नैरपेक्ष्योपपत्तेरिति प्राप्ते—

दीक्षणीयावाक्ये 'दीक्षिष्यमाणः' इति लृट्प्रत्ययश्रवणेन तस्या दीक्षार्थत्वं तावदवगतम्। दण्डादीनां हि णिजन्तदीक्षयतिपदश्रवणान्न दीक्षार्थत्वमवगम्यते अपि तु तदनुकूलव्यापारार्थत्वमेव प्रथममवगम्यते पश्चात्तु तत्सम्बन्धात् प्रयोज्यव्यापाररूपदीक्षार्थत्वं दण्डेन घटं कारयतीत्यादिवत् कथञ्चित्कल्प्येत। न च शीघ्रावगतदीक्षणीययैव कृतार्थत्वान्न दीक्षाया दण्डादिजन्यत्वकल्पनावसरः। सिद्धरूपत्वाच्च दण्डादीनां न क्रियाव्याप्यत्वज्ञानमन्तरेण दीक्षार्थत्वज्ञानसम्भवः। न च प्रथमावगतप्रयोजकव्यापारार्थत्वमेव वचसैव कारयतीत्यादिवत् तर्ह्यस्त्विति वाच्यं, तथात्वे साक्षाद्दीक्षणीयार्थत्वाङ्गीकारे अदृष्टार्थत्वापत्तेः तद्वरं दीक्षायाः फलीभूतयमनियमपरिग्रहोपयोगिदीक्षितत्वज्ञानजनकतयैव दीक्षणीयार्थत्वं दीक्षार्थत्वमेव वाऽङ्गीकर्तुमुचितं अगन्मेति मन्त्रस्य यागफलप्रकाशकतया यागाङ्गत्वमिव। अत एव परम्परासम्बन्धस्य सम्बन्धिविधयैव बोधोपपत्तेर्न लक्षणाऽपि। ज्ञानजनकत्वं च स्मारकविधया। सम्बन्धस्य च मानान्तरादनवगमेऽपि विध्यन्यथानुपपत्त्यैवावगमात् स्मारकत्वोपपत्तिः। तत्तद्विध्यन्तरैरेव च दण्डादीनां धारणकण्डूयनादिरूपक्रियाविधाना-

ज्ञाक्रियाविघ्नानां स्मारकत्वसम्भव इति शङ्कनीयम् । अत एव तत्तत्क्रियार्थानामप्येषां दीक्षाभिव्यञ्जकत्वमप्यानुषङ्गिकम् । अत एव दण्डादीनां दीक्षाभिव्यक्तौ समुच्चयः। अत इष्ट्यन्त एव दीक्षा, तदन्त एव दीक्षितधर्माः 'दीक्षितो न जुहोति, न दीक्षितस्यान्नमश्नीयात्' इत्यादयः। न चैवमावेदनवैयर्थ्यमभिव्यक्तिवैयर्थ्यं चेति वाच्यं, तद्विध्याम्नानबलेन तत्प्रैषपठितधर्माणामेव तदुत्तरत्वप्रतीतेः ॥ ११ ॥

(१२)—अङ्गवत्क्रतूनामानुपूर्व्यम् ॥ ३२ ॥ न वा सम्बन्धात् ॥ ३३ ॥ काम्यत्वाच्च ॥ ३४ आनर्थक्यान्नेति चेत् ॥ ३५ ॥ स्याद्विद्यार्थत्वाद्यथा परेषु सर्वस्वारात् ॥ ३६ ॥

काम्यानामुद्भित्सौर्यादीनां नैमित्तिकानां च भेदनहोमादीनां समिदादिवदेव पाठक्रमात् क्रमे प्राप्ते उपायप्रवृत्तित्वावच्छिन्नं प्रति फलेच्छायाः कारणत्वात् नैमित्तिकानुष्ठानस्य च निमित्ताधीनत्वात्तदनुरोधेनैव क्रमावगतेर्न पाठस्य नियामकता। वस्तुतस्तु यत्रैकप्रयोगविधिपरिग्रहोऽनेकेषां तत्रैव क्रमापेक्षायां पाठादीनां नियामकता। न तु यत्र भिन्नप्रयोगविधिपरिग्रहः। अत एव तादृशस्थले पाठः पारायणादावुपयुज्यते ॥ १२ ॥

(१३)—य एतेनेत्यग्निष्टोमः प्रकरणात् ॥३७॥ लिङ्गाच्च ॥ ३८ ॥

स्थिते भिन्नप्रयोगपरिगृहीतानां क्रमानियमे क्वचिद्वचनात्पौ-

र्वापर्यं यथा "एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः य एतेनानिष्ट्वाऽथान्येन यजते गर्तपत्यमेव तद्भवति" इति । तत्रैतच्छब्दो यद्यपि ज्योतिष्टोममात्रपरामर्शी, तथाऽपि न सर्वसंस्थस्य ग्रहणं, अपि तु अग्निष्टोमसंस्थस्यैव, संस्थान्तराणामन्यशब्देनाभिधानस्याग्निमाधिकरणे वक्ष्यमाणत्वेन तास्वपि ज्योतिष्टोमोत्तरत्वस्यावश्यकत्वात् परिशेषादेवाग्निष्टोमसंस्थस्य पूर्वं करणसिद्धेः अत एवातिरात्रसंस्थाकस्य 'अतिरात्रमेके प्रथममाहरन्ति' इति वचनादेव प्रथमं करणम् । अस्तु वाऽग्निष्टोमसंस्थाकज्योतिष्टोमपरामर्शकत्वमेवैतच्छब्दस्य, अग्निष्टोमसंस्थामभिप्रेत्यैव ज्योतिष्टोमे सकलधर्मविधानात् । अत एव 'तस्य नवातिशतं स्तोत्रीयाः' इत्युपपद्यते, अग्निष्टोमसंस्थाकज्योतिष्टोम एव हि तावत्यस्स्तोत्रीयाः न संस्थान्तरयुक्ते । एवं चातिरात्रप्रथमाहारोत्तरमपि अग्निष्टोमसंस्थां कृत्वैवोद्भिदादयः कार्या इति द्रष्टव्यम् ॥

(१४)—अथान्येनेति संस्थानां सन्निधानात् ॥ ३९॥ तत्प्रकृतेर्वाऽऽपत्तिविहारौ हि न तुल्येषूपपद्येते ॥ ४० ॥ प्रशंसा वा विहरणाभावात् ॥ ४१ ॥ विधिप्रत्ययाद्वा न ह्यकस्मात् प्रशंसा स्यात् ॥ ४२ ॥

एतच्छब्दार्थे निरूपिते अन्यशब्दार्थो निरूप्यते । अन्यशब्दस्य पूर्वप्रकृतादितरद्यत्सन्निहितं तद्वाचित्वात् संस्थानां च सन्निहितत्वेन तास्वेवाग्निष्टोमोत्तरत्वस्य विधिरिति प्राप्ते—

न तावत्संस्थानां प्रकरणेन सन्निधानं विकृतित्वात् । अ-

धिकारोपि ज्योतिष्टोमस्यैव 'एष वाव' इत्यादिवाक्यशेषे तस्यैव सङ्कीर्तनाच्च । यज्ञानां ज्योतिष्टोमोद्भिदादीनां मध्ये अग्निष्टोमसंस्थाक एव प्रथममित्युक्ते अन्येषामप्युद्भिदादीनां यज्ञपदेनोपादानाच्च । न चैवं संस्थानामयज्ञत्वादग्रहणं तास्वप्याश्रयस्य यज्ञत्वात् । अतश्चाग्निष्टोमसंस्थाकज्योतिष्टोमान्यतद्विकारमात्रे तदुत्तरकालत्वविधिः । न च ज्योतिष्टोमे यज्ञान्तरापेक्षया प्राथम्यमेव प्रकरणानुग्रहाय विधीयतामिति वाच्यं 'एष वाव' इत्यस्यार्थवादत्वेनाविधायकत्वात् । 'अथान्येन' इत्यनेन तृतीयविधिप्रकारलिप्सया यागान्तरेष्वेवाग्निष्टोमपूर्वकालकत्वस्य तदुत्तरकालत्वसमनियतस्य विधानसंभवे प्रकरणबाधस्यादोषत्वाच्च । न च प्रकरणान्तरन्यायेनात्र कर्मान्तरत्वशङ्का 'एष वाव' इत्यनेनार्थवादेनोद्भिदादीनां यज्ञान्तराणां सन्निहितत्वात् । न च तत्रैव कर्मान्तरत्वशङ्का, तस्योत्तरकालत्वाक्षिप्तप्राथम्यस्तावकत्वेनोपादेयत्वसामानाधिकरण्येन विधेयत्वानाक्षेपकतया कर्मान्तरानाक्षेपकत्वात् । अतस्सिद्धमग्निष्टोमसंस्थाकज्योतिष्टोमान्यतद्विकारमात्रे तदुत्तरकालत्वविधिरिति ॥ १४ ॥

(१५)—एकस्तोमे वा क्रतुसंयोगात् ॥ ४३ ॥
सर्वेषां वा चोदनाविशेषात् प्रशंसा स्तोमानाम् ॥ ४४ ॥

ननु "यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति यः पञ्चदशः स तं यस्सप्तदशः स तं य एकविंशः स तम्" इति वाक्यशेषे एकस्तोमकानामेव सङ्कीर्तनात्तेषामेवान्यशब्देन ग्रहणात्तत्रैवोत्तरकालत्वविधिः अक्ताधिकरणन्यायेनोचितेति चेन्न, वाक्य-

शेषस्यान्यथाऽप्युपपत्तेः। यो हि त्रिवृत्स्तोमः प्रकृतावनुष्ठितश्चोदकेनान्यं यज्ञक्रतुमापद्यते प्राप्नोति स स्तोमस्तं यज्ञक्रतुं अभ्यस्तत्वाद्दीपयतीति तस्यार्थः। सम्भवति च स्तोमान्तरसत्त्वेऽपि त्रिवृदादेरपि सत्त्वात् अनेकस्तोमकक्रतुदीपकत्वं पुत्रान्तरसत्त्वेऽप्येकस्य गुणवत्त्वविवक्षया पितृदीपकत्ववत्।

वस्तुतस्तु गुणविशेषस्य प्रकृतेऽविद्यमानत्वात्त्रिणवादिमात्रस्तोमकक्रतौ च त्रिवृदादेरभावेन दीपकत्वानुपपत्तेर्वाक्यशेषस्य क्रतुविशेषोपस्थापकत्वेऽपि विधौ प्रतिप्रधानावृत्तिन्यायेन सर्वविषयत्वप्रतीतेः सन्देहाभावेनाक्ताधिकरणन्यायाभावान्न वाक्यशेषस्य विधिसङ्कोचकत्वकल्पनावसरः। अतस्त्रिवृदादिग्रहणं ज्योतिष्टोमीयाङ्गमात्रोपलक्षणं तदङ्गमात्रस्य तद्विकृतावभ्यस्तत्वेन तद्विकृतिदीपकत्वात् तदुत्तरकालत्वस्तुत्युपपत्तेः। अत एवान्यपदेन न सौर्यादिग्रहणं तत्र सौमिकाङ्गाभ्यासाभावात्, अतस्तद्विकृतिमात्रस्य तदुत्तरकालतेति सिद्धम्॥ १९॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
पञ्चमस्याध्यायस्य तृतीयः पादः.

अथ पञ्चमाध्यायस्य चतुर्थः पादः.

(१)–क्रमको योऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्च॥ १॥

तदेवं निरूपितेषु क्रमप्रमाणेषूत्तरोत्तरस्य दौर्बल्यं प्रागे-

वास्माभिर्निरूपितम्। सुबोधत्वात्तु न सूत्रकारेणोच्यते। शिष्यानुग्रहार्थं तु कचिदुच्यते। श्रुतिविरोधे पाठस्य दौर्बल्यं यथा—'आश्विनो दशमो गृह्यते तं तृतीयं जुहोति' इति। अत्र पाठात् "ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति, आश्विनं गृह्णाति" इत्येवंविधादाश्विनग्रहणस्य तृतीयस्थाने प्राप्तस्य दशमश्रुत्या दशमस्थाने अनुष्ठानम्। 'तं तृतीयम्' इति तु पाठप्राप्तानुवाद एव, प्रवृत्तेः पाठेन बाधात्। एवमर्थेनापि पाठस्य बाधः। यथा—'अग्निहोत्रं जुहोति, यवागूं पचति' इति। व्याख्यातपूर्वमिदम्॥ १॥

(२)—अवदानाभिघारणासादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात्॥ २॥ यथाप्रदानं वा तदर्थत्वात्॥ ३॥ लिङ्गदर्शनाच्च॥ ४॥

एवं मुख्यक्रमेण प्रवृत्तिक्रमस्य बाधः। यथा—दध्नः पाठादर्थाच्च पूर्वं धर्मा दोहनादयः, पश्चादाग्नेयस्य निर्वापादयः। तत्प्रवृत्तिक्रमेण च हविरासादनप्रयाजशेषाभिघारणस्विष्टकृदवदानादीन्यपि कर्तव्यत्वेन प्राप्तानि मुख्यक्रमात् प्रथममाग्नेयस्य कार्याणि पश्चाद्दध्नः। प्रधानानां हि पाठादेव प्रथममाग्नेयस्य पश्चात् सान्नाय्यस्यानुष्ठानम्। यद्यपि च आसादनादीनां याज्यानुवाक्याप्रवृत्तिक्रमात्तादृशानुष्ठानमपि प्रसज्यत इति भूतभाविप्रवृत्तिक्रमाभ्यासनियमप्रसक्तौ मुख्यक्रमस्य नियामकत्वमात्रमिति नेदं विरोधोदाहरणं संभवति। तथाऽप्यन्यदेतादृशोदाहरणं मृग्यम्। दूषकताबीजं तु मुख्यक्रमे प्रधानप्रत्यासत्त्यनुग्रहः। प्रवृत्तिक्रमे त्वङ्गानां परस्परप्रत्यासत्तिः। अतस्तस्य बाधः। अत्र

न प्रधानावदानमुदाहरणं तस्य प्रदानैनैकपदार्थत्वस्य स्थापितत्वात् ॥ २ ॥

(३)–वचनादिष्टिपूर्वत्वम् ॥ ५ ॥ सोमश्चैकेषामग्न्याधेयस्यर्तुर्नक्षत्रातिक्रमवचनात्॥६। तदन्तेनानर्थकं हि स्यात् ॥ ६ ॥ तदर्थवचनाच्च नाविशेषात्तदर्थत्वम् ॥ ७ ॥ अयक्ष्यमाणस्य च पवमानहविषां कालनिर्देशात् आनन्तर्याद्विशङ्का स्यात् ॥ ८ ॥ इष्टिरयक्ष्यमाणस्य तादर्थ्ये सोमपूर्वत्वम्॥९

आधानप्रकरणे "यस्सोमेन यक्ष्यमाणोऽग्निमादधीत नर्तुं पृच्छेन्न नक्षत्रम्' इति श्रुतम्। न च तेन सोमस्याधानानन्तर्यं विधातुं शक्यं, आनन्तर्यस्याश्रवणात् वाक्यभेदप्रसङ्गाच्च। अतो विहितकालानादरमात्रमाधानोद्देशेन विधीयते। 'सोमेन यक्ष्यमाणः' इति त्वनुवादः। तेन 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इत्येतद्वाक्यविहितदर्शपूर्णमासोत्तरकालत्वमेव सोमस्येति प्राप्ते—

आधानमात्रोद्देशेन विहितकालानादरविधाने 'सोमेन यक्ष्यमाणः' इत्यस्य वैयर्थ्यापत्तेः। आधानकर्तुश्च सर्वस्यापि सोमयागाधिकारित्वात् विशेषणस्य व्यावर्त्याभावेन वैयर्थ्यापत्तेः सोमेनाधानानन्तरं यक्ष्यमाणोऽग्निमित्यर्थावगतिः। न च रथकाराधानव्यावृत्त्यर्थं विशेषणोपपत्तेः नानन्तर्यकल्पना युक्तेति वा-

न्यं 'यक्ष्यमाणः' इत्यद्यतनवाचिप्रत्ययश्रवणेनानन्तर्यस्याकल्पनीयत्वात् रथकाराधानस्यादृष्टार्थत्वेनाग्निमिति द्वितीयानुपपत्तेश्च। रथकाराधाने कालानादरस्य 'यदहरेवैनम्' इति वचनेनैव सिद्धतया तस्य प्रसक्त्यभावेन निवारणीयत्वानुपपत्तेश्च। अतोऽत्र सोमाव्यवहितपूर्वकालीनाधाने निमित्ते विहितकालानादरो विधीयते। कर्तृसमानाधिकरणेन भाष्यकारोदाहृतेन यच्छब्देन निमित्तत्वावगतेः सकलकारकाणामन्वयस्य व्युत्पन्नत्वाच्च न विशिष्टोद्देशे वाक्यभेदः। अतश्च सिद्धवन्निर्देशान्यथानुपपत्त्या कल्पितेन विध्यन्तरेण 'उपरि हि देवेभ्यो धारयति' इतिवत् सोमाङ्गतया आधानानन्तर्यं विधीयते।

अथवा "अपहतपाप्मानः ऋतवः असौ खलु वाव आदित्य उद्यन्नेषां पाप्मानमपहन्ति तस्माद्यदहरेवैनं श्रद्धोपनमेत् अथादधीताथ यजेत" इति वचने 'अथ यजेत' इत्यनेन आधानानन्तर्यं सोमे विधीयते 'यजेत' इत्यनेन सोमस्यैव परामर्शात्। अत एव 'अथादधीत' इत्यनेनाधान एव कालबाध इति वक्ष्यते। अतश्च न निमित्तश्रुत्यन्यथानुपपत्त्याऽपि विध्यन्तरकल्पना। अत एवेष्टिपूर्वत्व एव यदेष्ट्युत्तरमग्निविनाशादिनिमित्ताधानाव्यवहितोत्तरसोमकरणं तदा सोमे कालानादरविधानोपपत्तेर्न विध्यन्तरकल्पनया विकल्पाङ्गीकरणं युक्तमित्यपास्तम्। प्रत्यक्षविधिनैवापूर्वाधानानन्तर्यस्य विहितत्वात्। न हि 'अथादधीत' इत्यत्र पुनराधानप्रसङ्गोऽस्ति तस्य निमित्तवशवर्तित्वेन तत्र कालानादरविधिवैयर्थ्यात्। अतश्चापूर्वाधानानन्तर्य एव कालानादरविधानादिष्टिपूर्वत्वस्य सोमपूर्वत्वेन युक्त एव विकल्पः।

केचित्तु 'सोमेन यक्ष्यमाणः' इति भिन्नं वाक्यं 'नर्तु

पृच्छेत्' इति भिन्नं, तत्राद्येन प्रकरणात् तृतीयविधिप्रकारे लाघवाद्याधानोद्देशेन सोमाव्यवहितपूर्वकालता विधीयते सूम-पूर्वकालत्वमात्रविधाने वाक्यवैयर्थ्यात् । अतश्च वाचनिकेन सोमपूर्वत्वेनेष्टिपूर्वत्वस्य विकल्प इत्याहुः । तन्न वाक्यभेदे प्रमाणाभावात् आधानाङ्गभूतसोमपूर्वत्वेन सोमाङ्गभूतेष्टिपूर्वत्व-स्य विकल्पापादनायोगाच्च । किञ्चैवमस्मिन्नेव वाक्ये विशि-ष्टाधानविधिः आधानमात्रविधिर्वाऽस्तु 'सोमेन यक्ष्यमाणः' इत्यस्य 'ऐन्द्रवायवाग्रान्' इतिवदनुवादोपपत्तेः । न चेष्टापत्तिः वसन्तादिवाक्यानां निमित्तार्थत्वापत्तेः । न च यच्छब्दस्य धात्वर्थांश एव विधिप्रतिबन्धकत्वं न विशेषणांशे इत्यत्र प्र-माणमस्ति प्राप्तमात्र एव तस्य प्रतिबन्धकत्वात् । न चास्या-धानोत्पत्तिविधित्वे अग्निमित्येकवचनादाधानस्यैकाग्न्युत्पादकत्वा-पत्तिः अग्निगतस्यैकत्वस्य बहुत्वस्य वोद्देश्यगतत्वेन प्रमाणा-न्तरसिद्धसङ्ख्योपलक्षणार्थत्वात् अनेकाग्न्युत्पादकत्वं तु 'आय-तनेषु सम्भारान् निदधाति' इत्यायतनबहुत्वविवक्षाबलादित्युक्तं ग्रहैकत्वाधिकरणे कौस्तुभे । किञ्चैवं विहितकालानादरः शु-द्धाधानेऽपि स्यात् न सोमाव्यवहितपूर्वाधान एव । उत्तरा-धिकरणवक्ष्यमाणरीत्या कालानादरस्य सोमाङ्गत्वेऽपि च इष्टि-पूर्वत्वपक्षेऽपि स्यात् न सोमपूर्वत्वपक्ष एव । अतश्चास्मदुक्त-प्रकार एव श्रेयान् । आधानानन्तर्येऽपि न पवमानेष्टिभिर्न वाऽ-धिकारपशुना व्यवधानं तेषां सोमोपकारकत्वात् । अत एव सोमाधानपक्षे पवमानेष्टीनां सद्य एव करणं सोमेनायक्ष्यमा-णस्यैव संवत्सरादिकालाम्नानात् ॥ ३ ॥

(४)–उत्कर्षात् ब्राह्मणस्य सोमस्स्यात् ॥१०॥

पौर्णमासी वा श्रुतिसंयोगात् ॥ ११ ॥ सर्वस्य वैककर्म्यात् ॥ १२ ॥ स्याद्वा विधिस्तदर्थेन ॥ १३ ॥ प्रकरणात्तु कालस्स्यात् ॥

एवं स्थिते कल्पद्वये "आग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वाऽग्नीषोमीयो भवति यदेवादः पौर्णमासं हविः तत्तहर्येनु निर्वपेत्" इति वचनेन ब्राह्मणकर्तृकत्वे निमित्ते एकदेशोत्कर्षेण समस्तदर्शपूर्णमासोत्कर्षप्रतीतेः ब्राह्मणस्य सोमपूर्वत्वमेव । न हि समस्तयागसाध्यत्वेन श्रुतं फलमेकदेशाद्भवितुमर्हति । न च सोमोत्तरं तन्त्रेण सकृत्क्रियमाणोत्कृष्टहविर्मात्रसहकृतपूर्वयागेभ्यः फलसिद्धिः 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन' इत्यनेन दर्शपूर्णमासपदवाच्यसर्वयागोत्तरत्वस्यैव सोमे विहितत्वेन तथा कल्पनानुपपत्तेः । 'दर्शपूर्णमासाभ्यां' इति तृतीयाबलेन परमापूर्वोत्पत्तेरप्यवगतत्वाच्च । अतः इतरयोः क्षत्रियवैश्ययोः कल्पद्वयं इष्टिपूर्वत्वमेव वेति प्रथमः पक्षः ॥

द्वितीयस्तु नैकदेशोत्कर्षेण सर्वदर्शपूर्णमासोत्कर्षः प्रमाणाभावात् । सान्नाय्यानधिकारिणः ऐन्द्राग्नविध्यनुपपत्त्या फलवाक्ये सर्वसाहित्यस्याविवक्षितत्वाच्च । अतो यस्य यावत्स्वधिकारस्तस्य तावद्भ्य एव फलसिद्धिः । अतश्च ब्राह्मणस्याप्युत्कृष्टहविर्भिन्नदर्शपूर्णमासयागकरणोपपत्तेः कल्पद्वयं, उत्कर्षः परं पौर्णमासीस्थहविर्मात्रस्य विधावविशेषश्रुतस्योद्देश्यपरस्य पौर्णमासपदस्यार्थवादेन सङ्कोचानुपपत्तेः यदेवेत्यनेन साकल्यप्रतीतेश्चेति प्राप्ते—

पौर्णमासीमात्रस्थत्वेनात्र पौर्णमासपदव्यपदेशादाग्नेयस्योभयत्र विद्यमानत्वेन विशिष्य तात्पर्यग्राहकाभावे व्यपदेशानुपपत्तेः प्रत्युतोपक्रमस्थार्थवादस्यैवाग्नीषोमीयहविर्मात्रतात्पर्यग्राहकस्य सत्त्वेन तस्यैवोत्कर्षः। यदेवेत्यनेकापेक्षं तु वचनं उपांशुयाजस्याग्नीषोमदेवताकत्वात् तदभिप्रायेण न विरुद्ध्यते। अत्र च सोमोत्तरकालत्वविधौ उद्देश्यसमर्पकं पदं समभिव्याहृतसर्वबाचितच्छब्द एव। न त्वदःपदम्, अग्नीषोमपदं हविःपदं वा। तस्यार्थवादस्थत्वेन पौर्णमासपदवत्तच्छब्दार्थतात्पर्यग्राहकत्वात् विशिष्टोद्देशे वाक्यभेदप्रसङ्गाच्च। उद्देश्यतावच्छेदकमपि च नाग्नीषोमदेवताकहविष्ट्वं, तथात्वे यागे उत्तरकालताया अङ्गताऽनापत्तेः। नापि तद्देवताकयागत्वं तद्देवताकप्रकृतयागत्वं वा तद्देवताकत्वस्य विशेषणत्वे तद्विकृतौ देवतान्तरयुक्तायां सोमोत्तरत्वस्यातिदेशानापत्तेः। उपलक्षणत्वे च विष्णुप्रजापतिदेवत्वस्याप्युपांशुयाजस्य सोमोत्तरत्वापत्तेः। किन्त्वग्नीषोमदेवतानिष्ठकारणतानिरूपितकार्यतावच्छेदकीभूतो यस्तदपूर्वसाधनतावच्छेदकव्याप्योधर्मस्तद्वत्त्वम्। अस्ति हि व्रीहियवादिवैकल्पिकसाधनस्थले व्यभिचारपरिहारायाग्नेयत्वोपांशुयाजत्वादिव्याप्यो धर्म इत्युक्तं तेषामर्थाधिकरणे कौस्तुभे। तस्य यद्यपि नान्यत्रावघातादिसंस्कारविधावुद्देश्यतावच्छेदककोटिप्रविष्टत्वं गौरवात्, तथाऽप्यत्रार्थवादवशात् तस्योद्देश्यत्वाविघातः। अतश्च विष्णुप्रजापतिजन्यतावच्छेदकव्याप्यधर्मयोर्व्यापकधर्मोपांशुयाजत्वस्य च स्वव्याप्यस्याप्यग्नीषोमजन्यतावच्छेदकत्वाभावात् नोद्देश्यतावच्छेदकत्वम्। अग्नीषोमीयपुरोडाशे तु अपूर्वसाधनतावच्छेदकीभूतस्याग्नीषोमीययागत्वस्यैवाग्नीषोमजन्यतावच्छेदकत्वात्स्वव्याप्यत्वाच्च नोद्देश्यतावच्छेदकत्वव्याघातः। तत्तद्विकृतौ

देवतान्तरयुक्तायां तु तत्तद्विकृतित्वस्यैव तत्तद्देवताजन्यताव-च्छेदकस्य तत्तद्व्याप्यधर्मस्थानापन्नतयोक्तविधव्याप्यत्वसत्त्वान्नो-द्देश्यतावच्छेदकत्वव्याघात इति ध्येयम्। अत्र चानुपादेयगुणयो-गेऽपि न कर्मान्तरत्वाशङ्का, दर्शपूर्णमासप्रकरणपठितत्वात् ॥ ४ ॥

(५)—स्वकाले स्यादविप्रतिषेधात् ॥ १५ ॥ अपनयो वाऽऽधानस्य सर्वकालत्वात्॥१६ पौर्णमास्यूर्ध्वं सोमाद्ब्राह्मणस्य वचनात् ॥ १७ ॥ एकं शब्दसामर्थ्यात् प्राक् कृत्स्न-विधानात् ॥ १८ ॥

एवं 'यस्सोमेन यक्ष्यमाणोऽग्निमादधीत नर्तुं पृच्छेन्न न-क्षत्रम्' इत्यनेन विधीयमानः कालानादरोपि प्रकरणादाधानोद्देशे-नैव विधीयते न तु सोमोद्देशेन अङ्गगुणविरोधन्यायेनोपकार-के आधान एव कालबाधस्य न्याय्यत्वाच्च । तेन स्वकाले सोमं कुर्वता अव्यवहितपूर्वमाधाने क्रियमाणे नाधानकालप्रती-क्षा कार्या इति प्राप्ते—

अस्यामेव शाखायां 'यदहरेवैनं श्रद्धोपनमेदथादधीत' इति वचनान्तरेणाधानमात्रे कालानादरस्य विहितत्वात्तत एव सो-माव्यवहितपूर्वाधानेऽपि कालानादरप्राप्तेरनेन वाक्येन स्ववा-क्योपस्थितस्य सोमस्यैवोद्देश्यवाचकपदकल्पनयोद्देश्यत्वमिति तस्यैव कालानादरः । यत्तु शतपथे 'अपहतपाप्मानो वा' इ-त्यादिवचनेनोभयोरपि कालानादरविधानं तच्छाखान्तरत्वाद्दा-धानकालबाध इव न दोषः ।

वस्तुतस्तु तत्र 'अथ यजते' इति वचनेनाधानानन्तर्यमेव सोमस्य विधीयते 'अथादधीत' इति पूर्ववचनेन त्वाधान एव कालबाध इत्युक्तमेव । अत्र च 'अर्धमन्तर्वेदि' इतिवत् लक्षणया विहितकालमात्रस्यानादरविधानात् पौर्णमास्यादिपर्वणोऽप्यनादर इति केचित् । नञ्द्वयाम्नानवैयर्थ्यात्तु वाक्यभेदमप्यङ्गीकृत्य ऋतुनक्षत्रमात्रानादर एव । अन्यथा पञ्चाहत्वादेरपि बाधापत्तेरिति तत्त्वम् ॥ ५ ॥

(६)—पुरोडाशस्त्वनिर्देशे तद्युक्ते देवताभावात् ॥ १९ ॥ आज्यमपीति चेत् ॥ २० ॥ न मिश्रदेवतत्वादैन्द्राग्नवत् ॥ २१ ॥*

(७)—विकृतेः प्रकृतिकालत्वात्सद्यस्कालोत्तरा विकृतिः तयोः प्रत्यक्षशिष्टत्वात् ॥ २२ ॥ द्वैयहकाल्ये तु यथान्यायम् ॥ २३ ॥ वचनाद्वैककाल्यं स्यात् ॥ २४ ॥

'य इष्ट्या' इति वचनेन न तावत्प्रकृतीष्टौ पौर्णमास्यादिकालविधिः 'पक्षान्ता उपवस्तव्याः पक्षादयोऽभियष्टव्याः' इत्यादिव-

---

* अत्र—'पुरोडाशस्त्वनिर्देशे' इत्यादि सूत्रान्तराश्रयणेन भाष्यकारादिभिः सर्वस्याप्युपांशुयाजस्योत्कर्षाशङ्कानिरासपरत्वेनाधिकरणान्तररचनया योऽर्थः प्रतिपादितः सोऽत्र 'अतश्च विष्णुप्रजापती' (210 पु. 14 प.) इत्यनेन ग्रन्थेन प्रसङ्गादुक्त इति न पृथक्पूज्यपादैस्सूत्रलिखनेन प्रदर्शितः—इति शम्भुभट्टीयम् ॥

चनैस्तस्याः प्रतिपत्कालत्वविधानात् । अत एव 'पौर्णमास्यां पौर्णमास्या यजेत' इत्यादिवचनेषु पौर्णमास्यादिशब्दावपि आरम्भद्वारकौ पर्वप्रतिपत्समुदायलक्षकौ वा । अत एव प्रकृतौ द्व्यहकालत्वं प्राकरणिकम् । अतश्चेदमनारभ्याधीतं वचनं विकृतीष्टिविशेषपरम् । विकृतिपशुपरं च । अग्नीषोमीयस्यौपवसथ्येऽहनि विहितत्वात् । अतिदेशप्राप्तोऽपि च विकृतौ पौर्णमास्यादिकालो यथा पौर्णमासीविकाराणां पौर्णमास्यां करणं अमावास्याविकाराणां चामावास्यायां करणमित्येवं व्यवस्थया प्राप्तानामव्यवस्थार्थं तथा साङ्गानां तासां पौर्णमास्यादिकालविधानादातिदेशिकद्व्यहकालत्वबाधनार्थमपि । न च तत्तद्विकृतीनां तद्विधावेव प्रयोगस्य प्राप्तत्वादत्र प्रयोगविध्यभावेन प्रधानमात्र एव पौर्णमास्यादिकालविधानोपपत्तेः प्रतिपत्कालत्वादिबाधेऽपि चतुर्दश्यामन्वाधानकरणेन प्राकृतद्व्यहकालत्वबाधे प्रमाणाभाव इति वाच्यम् । कालस्य प्रयोगान्वयितया प्राप्तप्रयोगसम्बन्धित्वेन विधानादन्वाधानेऽपि पौर्णमास्यादिकालकत्वस्यौपदेशिकत्वात् । अतस्साङ्गमपि विकृतिप्रधानं पौर्णमास्यादिकाले कर्तव्यम् । तत्र पूर्णपर्वणि अपराह्णसन्धौ वा विकृतिं कृत्वा प्रकृतेरन्वाधानं निर्विवादमेव । अन्वाधाने प्रातःकालस्तूपदिष्टोऽपि अङ्गगुणत्वादातिदेशिकेनापि विकृतिप्रधानाङ्गप्रातःकालेन बाध्यते । पूर्वाह्णसन्धावपि औदयिकपर्वणः प्रकृत्यवरुद्धत्वात् पूर्वपर्वण्येवोपदिष्टपर्वकालत्वानुरोधेनातिदेशप्राप्तप्रातःकालं द्व्यहकालत्वं च बाधित्वा विकृत्यनुष्ठानं ततः प्रकृत्यन्वाधानमिति बोध्यम् । एवं सोमेऽपि पूर्वेद्युरेवाधिककालव्याप्तिलाभात् ।

यत्तु धूर्तस्वाम्यादिभिर्याज्ञिकैरावर्तनतत्पूर्वसन्ध्योः प्रकृत्य-

नुष्ठानानन्तरं सन्धिदिन एव विकृत्यनुष्ठानं पौर्णमास्यादिशब्दानां पर्वान्त्यक्षणवचनत्वात् । "यः परमो विप्रकर्षस्सूर्याचन्द्रमसोस्सा पौर्णमासी । यः परमस्सन्निकर्षस्सा अमावास्या" इति गोभिलसूत्रात् । अतश्च सन्निकर्षविप्रकर्षक्षणावच्छिन्नाहोरात्रस्यैव पौर्णमास्यमावास्यापदवाच्यत्वात्तस्य च पूर्वाह्णसन्धौ द्वितीयदिन एव सत्त्वात् तत्रैव विकृत्यनुष्ठानं, तदपि न प्रकृतेः पूर्वं तस्याः द्व्यहकालत्वेन विकृतौ सप्रङ्गसिद्ध्यापत्तेः । अतोऽगत्या प्रातःकालबाध एवेत्युक्तम् । तन्न "सोमस्य वै राज्ञोऽर्धमासस्य रात्रयः पत्नय आसन्तासाममावास्यां च पौर्णमासीं च नोपैत्" इत्याद्यर्थवादादापामरप्रसिद्धेः ज्योतिश्शास्त्रादिवशाच्च पौर्णमास्यादिशब्दानां तिथिवचनत्वात् न हि सूर्याचन्द्रमसोः परमसन्निकर्षविप्रकर्षक्षणावच्छिन्नाहोरात्रवाचित्वे पौर्णमास्यादिशब्दानां "पर्वणो यश्चतुर्थांशः आद्याः प्रतिपदस्त्रयः" इत्यादेर्व्यवहारस्य द्वैधे पूर्वविद्धापरविद्धाग्राह्यत्वत्याज्यत्वादिव्यवहारस्य च कथमप्युपपत्तिस्सम्भवति, द्वैधस्यैवाप्रसक्तेः । अतस्तिथिपरा एवैते शब्दाः । तिथिर्नाम अमासंज्ञकचन्द्रकलाव्यतिरिक्तचन्द्रकलानां मध्ये एकैकस्याः कलायास्सूर्यमण्डले नाद्यावयवविप्रकर्षादारभ्य अन्त्यावयवविप्रकर्षः आद्यावयवसन्निकर्षादारभ्यान्त्यावयवसंन्निकर्षो वा यावता कालेन जायते तावान्कालो यथाक्रमं शुक्लकृष्णपक्षगतः प्रतिपद्द्वितीयादिशब्दप्रतिपाद्यः ॥

> अमा षोडशभागेन देवि प्रोक्ता महाकला ।
> संस्थिता परमा माया देहिनां देहधारिणी ॥
> अमादिपौर्णमास्यन्ता या एव शशिनः कलाः ।
> तिथयस्तास्समाख्याताः षोडशैव वरानने ॥

तत्र पक्षावुभौ मासश्शुक्लकृष्णौ क्रमेण हि।
चन्द्रवृद्धिकरश्शुक्लः कृष्णश्चन्द्रक्षयात्मकः॥

पक्षत्याद्यास्तु तिथयः क्रमात्पञ्चदशैव ताः।
दर्शान्ताः कृष्णपक्षे तु पूर्णिमान्ताश्च शुक्लकाः॥

इत्यादिवचनात्। अत एव तिथिशब्दः प्रतिपदादिशब्दाश्च कलास्वेव शक्ताः। काले तन्निरूढलक्षणयेति ध्येयम्। एवं च पौर्णमास्यमावास्याशब्दावपि न योगेनान्तिमक्षणवचनौ तदवच्छिन्नाहोरात्रविषयौ वा। गोभिलसूत्रमप्युक्तविधसन्निकर्षविप्रकर्षकालोपलक्षणमेव व्याख्येयम्। तत्सिद्धं न विकृतीनां द्व्यहकालत्वमिति॥ ७॥

(८)–सान्नाय्याग्नीषोमीयविकारा ऊर्ध्वं सोमात् प्रकृतिवत्॥ २५॥

'नासोमयाजी सन्नयेत्' इत्यसोमयाजिनस्सान्नाय्यपर्युदासः तेन तस्याप्यग्नीषोमीयवत् सोमोत्तरत्वमेव। अतस्तदुभयविकारेष्वपि तद्देवत्येष्वन्यदेवत्येषु वा सोमोत्तरत्वमेव न ह्यत्रासोमयाजिनोऽधिकारपर्युदासो येन विकृतौ नातिदिश्येत। कर्तृसामानाधिकरण्यात्तु यागकर्तृत्वपर्युदास एव। अतश्च युक्तोऽतिदेशः। अत्र च दैक्षस्य नोदाहरणत्वं औपदेशिकसोमप्राक्कालत्वविधानात्। तद्विकाराणां च प्रकृतावनङ्गत्वान्न सोमोत्तरत्वनियमः। न चान्वाहार्यस्यैव प्रकृतावभावेऽपि प्रकृतिप्रकृतितो ग्रहणमिति वाच्यम्। अपेक्षितविषय एव तथाग्रहणेन सोमोत्तरत्वस्यानपेक्षितत्वात्। वस्तुतस्तु अपेक्षाया उपायान्त-

रेणापि निवृत्तमुपपत्तेः नान्वाहार्यांशेऽपि ग्रहणम् । अन्यथा पितृमेधविकारे होतृवरणस्याप्यतिदेशापत्तेः । न चैवं दैक्षविकाराणामनिर्दिष्टकालविशेषाणामौपसथ्यकालकत्वापत्तिः । तस्याङ्गत्वनिबन्धनतया तदभावेऽप्राप्तेः । अतस्तद्धिश्नविकाराणां सोमोत्तरत्वमेव ।

यत्तु याज्ञिकानां प्रागप्यनुष्ठानं तच्छाखान्तरे सान्नाय्याग्नीषोमीययोः प्रागपि विधानादवगन्तव्यम् । एवमैन्द्राग्नविकाराणामपि सोमप्राक्कालत्वमेवेति सूत्रं तस्याप्युपलक्षणमिति केचित् । वस्तुतस्तु 'असन्नयतः' इत्यस्य षष्ठ्यन्तस्य कर्तृसामानाधिकरण्याभावादधिकारिविशेषणत्वस्यैव प्राधान्यावगतेस्तस्य चानतिदेशात् युक्तं तद्विकाराणामनियतकालत्वम् ॥ ८ ॥

(९)–तथा सोमविकारा दर्शपूर्णमासाभ्याम् ॥

सोमे इष्टिपूर्वत्वमाधानाव्यवहितोत्तरत्वं च वैकल्पिकमङ्गम् । अतस्तद्विकारेषु तथैवातिदेशप्राप्तावपि इष्टिपूर्वत्वमेव । 'एष वाव प्रथमः' इति वाक्यविहितज्योतिष्टोमोत्तरत्वबलेनाधानाव्यवहितोत्तरत्वस्य तेषु कर्तुमशक्यत्वात् । अतश्चाधानानन्तर्यस्य प्रकृत्यवरुद्धत्वेनानतिदेशादिष्टिपूर्वकत्वमेवातिदेशिकं तेष्विति सिद्धं क्रमस्य वक्ष्यमाणकत्वम् ॥ ९ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
पञ्चमाध्यायस्य चतुर्थः पादः.
अध्यायश्च समाप्तः.

अथ षष्ठे अध्याये प्रथमः पादः.

(१)—द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः ॥ १ ॥ असाधकं तु तादर्थ्यात् ॥२॥ प्रत्यर्थं चाभिसंयोगात् कर्मतो ह्यभिसम्बन्धः तस्मात्कर्मोपदेशस्स्यात् ॥ ३ ॥

एवं सक्रमे प्रयोज्यवर्गे निरूपिते अधुना तत्राधिकारी निरूप्यते—तत्राधिकारो नाम फलभोक्तृत्वसमानाधिकरणं कर्तृत्वम् । श्राद्धादौ पित्रादेः ऋत्विजां चाधिकारव्यावृत्त्यर्थं विशेषणद्वयम् । न चैवं जातेष्टौ पितुः फलभोगाभावादधिकारानापत्तिः, सत्यप्यकरणे प्रत्यवाये करणस्य पूतत्वादिफलकत्वेन पापक्षयफलकत्वाभावादिति वाच्यम् । प्रवृत्तिप्रयोजकफलेच्छासमानाधिकरणकर्तृत्वस्यैव विवक्षितत्वात् जातेष्टिश्राद्धादावपि फलस्यान्यनिष्ठत्वेऽपि तदिच्छाया यजमाननिष्ठत्वादधिकाराविघातः । ऋत्विजामपि यजमानस्य फलं भूयादितीच्छायास्स्वनिष्ठकर्तृकत्वसमानाधिकरणत्वादधिकारापत्तिरतः प्रवृत्तीत्युक्तं दक्षिणाप्राप्तिर्मे भूयात् इतीच्छाया एव ऋत्विक्प्रवृत्तिजनकत्वेनोक्तविधेच्छायाः प्रवृत्तिप्रयोजकत्वाभावात् । अयं चाधिकारो विध्याक्षिप्तस्वेष्टसाधनत्वसमानाधिकरणस्वकृतिसाध्यत्वबललभ्यत्वाद्विधिप्र-

भाणकः। अयमेवाधिकारविधिरित्युच्यते। तत्र चाधिकारस्य इष्टरूपप्रवृत्तिफलघटितत्वात् तदेवेष्टरूपं फलं भावनायामस्ति न वेति प्रथमं विचार्यते। तत्र भावनाया भाव्यापेक्षायां पदश्रुत्या धात्वर्थस्यैव सर्वत्र भाव्यत्वं न स्वर्गादेः, अपितु तस्य साधनत्वमेव योग्यत्वात् पश्वादेरिव स्वर्गशब्दस्यापि 'चन्दनं स्वर्गः' इत्यादिप्रयोगात् द्रव्यवाचित्वमेव सुखविशेषभोगयोग्यदेशविशेषवाचित्वग्राहकस्यान्यपरत्वाच्च। कामशब्दस्त्वार्जनकामनानुवादः। अथ वा स्वर्गकामशब्दः कर्तृविशेषमेव यागाङ्गत्वेन विदधत् विशेषणीभूतां कामनामपि तदङ्गत्वेन विधत्ते इति न कश्चिद्विरोधः। न च विधिश्रुत्यनुरोधादिष्टभाव्यकत्वावगमः। विधेः प्रवृत्तिजनतस्वरूपयोग्यत्वस्यैव वाच्यत्वेन फलोपधाननैयत्याभावात् प्रवृत्तिविरहेऽप्यरण्यस्थदण्डवत् विधेः प्रवृत्तिजनकत्वोपपत्तेः। न हि फलोपहितप्रवृत्तिजनकत्वं विध्यर्थः, विधिशतश्रवणेऽपि केषांचित्प्रवृत्त्यदर्शनात्। अत एव प्रवृत्तिविषयस्येष्टसाधनत्वाक्षेपकत्वमपि विधेर्न प्रामाणिकम्। यदि तु प्रवृत्तिस्वरूपयोग्यत्वमात्रोक्तौ वाक्यस्य वैयर्थ्यापत्तिरशङ्क्येत, ततो यागस्य समानपदश्रुत्या भाव्यत्वावगमेऽपि यागे भ्रमप्रमासाधारणप्रवृत्तिकारणेष्टसाधनत्वज्ञानस्यैवाक्षेपात् भ्रमात्मकेष्टसाधनताज्ञानादेव प्रवृत्तिसिद्धेर्नेष्टसाधनत्वाक्षेपकत्वम्। अथवाऽस्तु 'स्त्रीकामः प्रायश्चित्तं कुर्यात्' इतिवत् स्वर्गकामनाया अपि निमित्तत्वम्। ततश्च निमित्ते नैमित्तिकाकरणे प्रत्यवायमात्रं न तु करणे किञ्चिदिष्टम्। अकरणे प्रत्यवायभियैव च पुरुषप्रवृत्तिसिद्धेर्न विधिवैयर्थ्यमपि। सर्वथा यागस्यैव भाव्यत्वेनेष्टसाधनत्वाभावात् न प्रवृत्तिप्रयोजकप्रवृत्तिविषयजन्यफलेच्छासमानाधिकरणकर्तृत्वरूपाधिकारसिद्धिरिति प्राप्ते—

न प्रवृत्तिस्वरूपयोग्यत्वमात्रं विध्यर्थः वैयर्थ्यापत्तेः । ना पीष्टसाधनत्वानुमितेर्भ्रमत्वं ज्ञानानां स्वतः प्रमाणत्वेन बाधकं विना भ्रमत्वानुपपत्तेः, अतश्चोत्सर्गसिद्धप्रमात्वनिर्वाहार्थं यागे इष्टसाधनत्वं विषयोऽपि वक्तव्य एवेति भावनायामिष्टभाव्यक-त्वं यागकरणकत्वं चापन्नमेव । यदपि कामनाया निमित्तत्व-मङ्गीकृत्य विधेरकरणजन्यप्रत्यवायाक्षेपकत्वेन प्रवर्तकत्वमित्युक्तं, तन्न—कामनायाः प्रवृत्तिजनकत्वेऽपि निमित्तत्वे प्रमाणाभावात्। 'स्त्रीकामः' इत्यादावपि न तस्याः निमित्तत्वं प्रायश्चित्ताकरणे प्रत्यवायान्तरप्रसङ्गात् । अपि तु प्रमाणान्तरसिद्धकामनाजनित-प्रत्यवायनाशार्थत्व मेवेति तत्रापीष्टसाधनत्वाक्षेपकत्वमेव विधेः। अत एव सर्वत्र नैमित्तिकस्थले अकरणे प्रत्यवायाक्षेपकत्वापेक्ष-या लाघवादिष्टसाधनत्वमेव विधिनाऽऽक्षिप्यते इति तद्वशाद्भा-वनाया इष्टभाव्यकत्वसिद्धिः । यथा चैवं सति नैमित्तिकस्थले पापक्षयभाव्यकत्वं तथा यावज्जीवाधिकरणे निरूपितम् । तच्चेष्टं स्वर्गपुत्रादि स्वर्गकामादिपदैस्समर्प्यते योग्यत्वात् कामशब्दयो-गाच्च । कामनाऽपि स्वरसतः फले, द्रव्ये त्वौपचारिकी । अत एव स्वर्गशब्दोऽपि श्रुतिस्मृतिपुराणादिवशात् दुःखासम्भिन्न-सुखभोगयोग्यदेशविशेषवाची आकृत्यधिकरणन्यायेन तादृशसु-खमात्रवाची वा, न तु चन्दनादिवाची तत्र ह्याधुनिकप्रयोग-स्यौपचारिकत्वात् । अत एव स्वर्गकामादिपदमपि लक्षणया स्वर्गपरं प्रथमा च कर्मत्वपरेति भावनान्वयोपपत्तेः नान्योपस-र्जनत्वेन स्वर्गस्य तदनन्वयाशङ्का । स्वर्गकामो वा अधिकारि-त्वेनान्वीयत इति स्वर्गादिवाचकद्वितीयान्तपदाध्याहारेण तद-न्वय इति केचित् । तन्न—फलापेक्षायाः प्राथमिकत्वात् लक्षणाया अध्याहारापेक्षया लघुत्वाच्च । एवं च बलवत्तरविधिश्रुत्याद्य-

नुरोधेन स्वर्गादेरेव भाव्यत्वावगतेस्सामान्यप्रवृत्ता पदश्रुतिरपि यागादेः करणत्वमेव लक्षणया प्रतिपादयतीति सिद्धः उक्ताधिकारः । अत्र चोक्तविधेच्छाफलान्यतरसमानाधिकरणं कर्तृत्वमधिकार इति बोध्यम् । तेन नित्यस्थले पापक्षयेच्छायाः प्रवृत्तिप्रयोजकत्वाभावेऽपि नाधिकारविघातः ॥ १ ॥

(२)–फलार्थत्वात् कर्मणश्शास्त्रं सर्वाधिकारं स्यात् ॥ ४ ॥ कर्तुर्वा श्रुतिसंयोगात् विधिः कात्स्न्र्येन गम्यते ॥ ५ ॥

सिद्धे अधिकारे स केषामिति चिन्त्यते । तत्र स्वर्गकामत्वाविशेषाश्चेतनमात्रस्याधिकारः । न च तिरश्चां स्वर्गादिकामनासम्भवः, परकीयेच्छाया अप्रत्यक्षत्वेन तदभावनिश्चयानुपपत्तेः । श्येनादीनामष्टम्युपवासादिदर्शनेन तदनुमानाच्च । न च साङ्गकरणासामर्थ्यादनधिकारः, शक्यमात्रस्यैव करणोपपत्तेरिति प्राप्ते—

भावनाया अंशत्रयान्वयोत्तरं पश्चाद्विधिबलेनाधिकारिकल्पनात् पूर्वावगतसाङ्गप्रधानानुष्ठानसमर्थ एवाधिकारी अतश्चासमर्थत्वादविद्यत्वादद्रव्यत्वान्न तिरश्चामधिकारः । विष्णुक्रमणाद्यसमर्थत्वाच्च न पङ्ग्वन्धबधिरमूकादीनाम् । देवादीनां तु विग्रहाद्यभावादेव नाधिकारः । ऋष्यादीनां तु अनादित्वात्संसारस्य प्रवरवरणादौ ऋष्यन्तरस्यापि सम्भवादधिकारोऽस्त्येवेति भाष्योक्तमनधिकारप्रतिपादनमनादरणीयम् ॥ २ ॥

(३)–लिङ्गविशेषनिर्देशात् पुंयुक्तमैतिशायनः॥

तदुक्तित्वाच्च दोषश्रुतिरविज्ञाते ॥ ७ ॥ जातिं तु बादरायणोऽविशेषात् तस्मात् स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात् ॥ ८ ॥ चोदितत्वाद्यथाश्रुति ॥ ९ ॥ द्रव्यवत्त्वात्तु पुंसां स्याद्द्रव्यसंयुक्तं क्रयविक्रयाभ्यां, अद्रव्यत्वं स्त्रीणां द्रव्यैस्समानयोगित्वात् ॥ १० ॥ तथा चान्यार्थदर्शनम् ॥ ११ ॥ तादर्थ्यात्कर्मतादर्थ्यम् ॥ १२ ॥ फलोत्साहाविशेषात्तु ॥ १३ ॥ अर्थेन च समवेतत्वात् ॥ १४ ॥ क्रयस्य धर्ममात्रत्वम् ॥ १५ ॥ स्ववत्तामपि दर्शयति ॥

क्रतुषु पुंस एवाधिकारः? उत स्त्रिया अपीति चिन्तायां 'स्वर्गकामः' इति पुल्लिङ्गश्रवणात् पुंस एव । न हीदमधिकारिविशेषणं कर्तृसमानाधिकरणत्वेन तद्विशेषणस्यास्याश्रुताधिकारिविशेषणत्वानुपपत्तेः । अतश्चाख्यातोपात्तैकत्ववदेव पुंस्त्वस्याप्यस्य विवक्षा नानुपपन्ना । किञ्चाद्रव्यत्वादपि स्त्रिया नाधिकारः

भार्या पुत्रश्च दासश्च त्रय एवाधनास्स्मृताः ।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥

इति वचनात् । 'शतमतिरथं दुहितृमते दद्यादार्षेयविवाहे गोमिथुनम्' इत्यादिना पित्रा भर्त्रे मौल्येन दासवत् विकी-

तत्वाच्च । अत एव 'गर्भेणाविज्ञातेन हतेन भ्रूणहा' इति यज्ञसाधनपुंगर्भहननशङ्कया भ्रूणपदवाच्ययज्ञहन्तृत्वलिङ्गमवकल्पते । अन्यथा स्त्रीत्वेन विज्ञातेऽपि यज्ञहन्तृत्वाविशेषात् अविज्ञातपदमनर्थकं स्यात् । तथा आत्रेयीं हत्वा भ्रूणहेति लिङ्गम् । आत्रेयी सगर्भा । अतः पुमानेवाधिक्रियते इति प्राप्ते—

यद्यपि कर्तृविशेषणं पुंस्त्वं तथाऽपि प्रमाणान्तरेण स्त्रियाः अधिकारावगतेर्विधिलाघवानुरोधेन साधुत्वार्थमवयुत्यानुवाद एव पुंस्त्वं, यथा 'वसन्ते ब्राह्मणः' इत्यादौ । प्रकृते त्वनपेक्षितत्वान्नास्य कर्तृविशेषणत्वं अपितु योग्यत्वादधिकारिविशेषणत्वमेव ततश्च तस्य फलं प्रत्यपि प्राधान्यादुद्देश्यत्वेन तद्विशेषणाविवक्षा ।

वस्तुतस्तु प्रथमापेक्षितत्वात् स्वर्गकामादिपदस्य फलपरत्वमेवेति क्व पुंस्त्वस्य विवक्षाप्रसक्तिः । न चाद्रव्यत्वं, कर्तनादिभिरर्जनसम्भवात् पित्रादिदत्तस्य दायस्य वा स्मृतिषूक्तत्वाच्च । 'धर्मे चार्थे च कामे च नातिचरितव्या' इति स्मृत्या पत्यार्जितस्याप्युभयसाधारणत्वाच्च । 'भद्रदा वा एताः परगृहाणामैश्वर्यमवरुन्धते' इति स्मरणाच्च । 'सं पत्नी पत्या सुकृतेन गच्छताम्' इत्यादिमन्त्रवर्णात् 'पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु' इति स्मरणाच्च पत्न्या अप्यधिकारः । 'पत्युर्नो यज्ञसंयोगे' इति स्मृतेः पत्नीशब्दस्य स्वामित्वाभावेऽनुपपत्तेश्च । यत्तु 'भार्या पुत्रश्च' इति वचनं क्रीतत्वादिवचनं च तत् 'न स्त्री स्वातन्त्र्यमर्हति' इति वचनान्तरानुसारादस्वातन्त्र्यपरम् । मौल्यदानं त्वदृष्टार्थं कन्यायां कन्यात्वातिरिक्तस्वत्वाभावस्य वक्ष्यमाणत्वेन तद्दानस्याप्यौपचारिकत्वाच्च । आत्रेयी च अग्निगो-

त्रोत्पन्ना न त्वासन्नगर्भा । सत्यपि च स्त्रियाः क्वचित्कर्माधिकारेऽसति गमकान्तरे जपादिसकलवैदिककर्मानधिकारादविज्ञातलिङ्गदर्शनं पुंवधे प्रायश्चित्तविशेषविधानार्थम् । तस्मात्सिद्धः स्त्रिया अप्यधिकारः ॥ ३ ॥

(४)—स्ववतोस्तु वचनादैककर्म्यं स्यात् ॥ १७ ॥ लिङ्गदर्शनाच्च ॥ १८ ॥ क्रीतत्वात्तु भक्त्या स्वामित्वमुच्यते ॥ १९ ॥ फलार्थित्वात्तु स्वामित्वेनाभिसम्बन्धः ॥ २० ॥ फलवत्तां च दर्शयति ॥ २१ ॥

सिद्धे द्वयोरप्याधिकारे किं दम्पती पृथक्पृथक् यजेयातां उत सहेति चिन्तायां स्वर्गकामपदोपात्तस्यैकत्वस्य पुंस्त्ववदविवक्षितत्वेऽप्याख्यातोपात्तस्य तस्य गुणभूतोपादेयकर्तृगामित्वेन विवक्षितत्वादेकैकशः प्रयोग इति प्राप्ते—

प्रत्येकप्रयोगे अन्यतरकर्तृकाज्यावेक्षणान्वारम्भणादिपदार्थलोपेन वैगुण्यापत्तेरन्यतरेणान्यतरस्य परिक्रियादिनोपादाने च फलभोक्तृत्वाभावात् स्वामित्ववाचिपत्नीयजमानशब्दप्रयोगानुपपत्तेरङ्गसाकल्यार्थं सहैव प्रयोगः । न ह्याज्यावेक्षणादीनां कर्तृसंस्कारकत्वं येन तत्तत्प्रयोगे व्यवस्था लभ्येत क्रतुधर्मत्वात्तूभयकर्तृकमेवेक्षणद्वयमदृष्टविधया क्रतोरङ्गम् । यत्र त्वन्यतररोगनिवृत्त्यर्थमेव दर्शादिप्रयोगः तत्रेतरस्य पत्नीत्वाद्यभावेऽपि गुणलोपे चेति न्यायेन परिक्रियाद्युपात्तेतरकर्तृकाज्यावेक्षणेऽपि न सर्वत्र तथा कल्पनायां प्रमाणमस्ति साहित्यस्य पुण्यफले-

ष्वपि स्मृत्यादिप्रमितत्वात् 'धर्मे च' इत्यादिवाक्यपर्यालोचनया च तयोस्संसृष्टद्रव्यत्वात् विभागप्रतिषेधाच्च सहैव प्रयोगः । अत एवोभयस्वत्वस्य संसृष्टत्वाद्द्रव्यत्यागे दक्षिणादानादौ चोभयोरेव कर्तृत्वम् । यत्तु भाष्ये द्वादशशते षड्भ्याशदेकेनापरेणापि तावदेवेत्येवं त्रिभागः कथितः स द्वादशशतस्यैव विहितत्वात्तत्राप्युभयोः संसृष्टस्वत्वोपपत्तेरुपेक्षितः । द्वादशशतद्वयनिवृत्तौ वा भाष्यतात्पर्यम् । यदपि तत्स्वास्स्यात्पुंस एव त्यागे कर्तृत्वं तस्या अप्यनुमतिद्वारा तदिति कैषांचिन्मतं तत् अनुमतेः फलसम्बन्धाश्रवणात् तद्वारकत्वे प्रमाणाभावेन पूर्वाधिकरणव्युत्पादिताधिकारभङ्गापत्तेरुपेक्षितम् । यत्त्वाख्यातोपात्तमेकत्वं सहाधिकारे नावकल्पत इति तन्न—एकवचनश्रवणादेव दम्पत्योर्व्यासज्यवृत्त्यैकस्यैव कर्तृत्वस्य कल्पनात् । इतरथा कर्तृभेदात् सत्रवद्विवचनाद्यापत्तेः अत एव क्रियाक्षिप्तयोः कर्तृत्वतदाश्रययोर्मध्ये आवश्यकत्वात् कर्तृत्वांश एव शाब्दत्वसिद्ध्यर्थं लक्षणामङ्गीकृत्य तत्रैवपार्ष्ठिकैकत्वाद्यन्वयः 'क्षौमे वसानौ' इत्यादौ त्वगत्या क्वचित्तदाश्रयेऽपि अत्र च कर्तृत्वं कृत्याश्रयत्वसमानियतमखण्डोपाधिरूपं द्रष्टव्यम् । न तु कृत्याश्रयत्वमेव तस्य प्रत्यात्मं कृतिभेदेन भेदात् व्यासज्यवृत्तित्वानुपपत्तेः । तस्मात्सहप्रयोगः ॥ ४ ॥

(५)—द्व्याधानं च द्वियज्ञवत् ॥ २२ ॥ गुणस्य तु विधानत्वात् पत्न्या द्वितीयशब्दस्स्यात् ॥ २३ ॥

आधानप्रकरणे 'क्षौमे वसानावग्निमादधीयाताम्' इति श्रुतम् ।

तेन चाधाने कर्तृद्वित्वविधानात् द्वौ पुमांसौ सस्त्रीकौ आधानेऽधिकारिणौ 'एतेन राजपुरोहितौ साम्राज्यकामौ यजेयाताम्' इतिवत्। न चात्र 'कुक्कुटावानय मिथुनं करिष्यामि' इतिवत् 'पुमान् स्त्रिया' इत्याद्यनुशासनानुरोधेन स्त्रीसद्वितीयतया विरूपैकशेषस्याप्युपपत्तेः वाक्यस्य क्षौमविधिमात्रपरत्वेनाप्युपपत्तावुत्पत्तिशिष्टकर्त्रैकत्वबाधानुपपत्तिरिति वाच्यं, सरूपैकशेषसम्भवे लक्षणापादकविरूपैकशेषस्यान्याय्यत्वात्। तथा हि—औकारस्तावत् द्वित्वं पुंस्त्वं चाभिधत्ते इत्यरुणैकहायनीवत् द्वित्वावच्छिन्ने पुंस्त्वं पुंस्त्वावच्छिन्ने द्वित्वमिति परस्परनियमात् पुंद्वयप्रतीतिस्सुलभा। विरूपैकशेषे तु पितरावित्यादौ मातृत्वादेः कुक्कुटावित्यादौ स्त्रीत्वस्य च प्रत्यायकाभावाल्लक्षणाऽऽवश्यकीति तस्य ततो दौर्बल्यम्। न च भवन्मतेऽप्युपक्रमस्थक्षौमपदे मलिनत्वसादृश्याद्गौणी 'टुक्षुशब्दे' इत्यनुशासनाद्वाऽवयवयोग इति जघन्यवृत्त्याश्रयणमनुवादवैयर्थ्यं उत्पत्तिवाक्यस्थैकवचनस्य साधुत्वमात्रार्थत्वमित्यनेकदोषतादवस्थ्यमिति वाच्यं, क्षौमवाक्य एवोभयविशिष्टाधानविधानाङ्गीकारात्। वसन्तादिवाक्ये तु ब्राह्मणादिकर्तृकत्वे निमित्ते वसन्तादिकालविधानम्। अत एव ब्राह्मणः इत्येकत्वं पुंस्त्वं चाविवक्षितम्। आदधीत इत्यपि च। ब्राह्मणो यदि शूद्रसहित आदधीत तदा वसन्त इत्येवं कादाचित्कब्राह्मणैकत्वानुवादः। तस्मात् द्वौ पुमांसौ सस्त्रीकावधिकारिणौ॥

यत्तु भाष्यादौ सरूपैकशेषसाधकं प्रमाणान्तरमुपन्यस्तं द्वन्द्वापवादत्वादेकशेषस्य द्वन्द्वार्थ एवार्थ इत्यवगम्यते, द्वन्द्वश्च 'युगपदधिकरणे द्वन्द्वो भवति' इति कात्यायनस्मरणात् युगपदधिकरणतावाची। अधिकरणं शब्दप्रतिपाद्योऽर्थः स यत्रानेको युगपदे-

केन पदेन बोध्यते तत्र द्वन्द्वः। तथा च धवखदिरावित्यत्र धवपदं लक्षणया खदिरसहितधवपरं इतरसहितधवपरमेव वा। इतरत्तु खदिरपदान्निर्णीयते। एवं खदिरपदमपि। सेयं युगपदधिकरणता। इतरेतरयोगोऽप्ययमेव। अस्मिन्नेवार्थे द्वन्द्वः। चकारस्य हि चत्वारोऽर्थाः समुच्चयान्वाचयेतरेतरयोगसमाहाराः। तत्र विभक्त्यर्थान्वये परस्परनिरपेक्षत्वेऽपि क्रियान्वये दण्डचक्रादिवत् परस्परसापेक्षत्वे सति समत्वं समुच्चयः। अतश्च नेतरेतरयोगे न विकल्पे न वा अन्वाचयेऽतिव्याप्तिः। यथा 'अहरहर्नयमानो गामश्वं पुरुषं च' इत्यादौ। अन्वाचये तु एकस्य प्रयोजकत्वमपरस्य नेति न साम्यं, यथा काष्ठान्याहर शाकं चाहरेति। इतरेतरयोगे तु व्यासज्यवृत्तिविभक्त्यर्थे परस्परसाहित्येनान्वयः। यथा 'अग्निश्च सोमश्च देवता' इत्यादौ। अत्र 'धवं च खदिरं च' इत्यादावितरेतरयोगविवक्षायां युगपदधिकरणवचनताऽऽवश्यकी। अन्यथा प्रत्येकं विभक्त्यर्थान्वयेनेतरेतरयोगस्य समुच्चयाद्भेदानापत्तेः। अत एव निरपेक्षयोरेकक्रियान्वयित्वं समुच्चय इति तन्त्ररत्नोक्तमपास्तम्। 'अमावास्यायां पौर्णमास्यां वा यजेत' इत्येकवाक्योक्तविकल्पे अतिव्याप्तेः। इतरेतरयोगसमाहारयोस्तु साहित्यस्य पदार्थान् प्रति गुणत्वप्रधानत्वकृतो विशेष इतरेतरयोगत्वं तुल्यम्। एषु चार्थेषु इतरेतरयोग एव द्वन्द्वः। अत एव चार्थानामनेकत्वेऽपीतरेतरयोगरूपचार्थे एव द्वन्द्व इति 'चार्थे द्वन्द्व' इति सामान्यसूत्रं महाभाष्यकारादिभिर्विशेषपरतया व्याख्यातम्। अतश्च युगपदधिकरणतावाचिद्वन्द्वापवादत्वादेकशेषस्यापि तद्वाचित्वप्रतीतेः 'वसानौ' इत्यत्र पुंद्वयप्रतीतिरिति ॥

तत्र विरूपैकशेषाङ्गीकारेऽपि स्त्रीसहितपुंसः पुंसहितस्त्रियाश्च

युगपदभिधानोपपत्तेः । न चैवं पुंद्वयं स्त्रीद्वयं चेति चतुष्टयापत्तिः धवखदिरद्वयवत् स्त्रीपुंद्वयोपपत्तेः । वस्तुतस्तु—कात्यायनोक्तं युगपदधिकरणतावाचित्वं पतञ्जलिभिरेव दूषितम् । तस्यायमाशयः धवपदे खदिरपदे च लक्षणायां प्रमाणाभावादितरेतरयोगस्य चशब्देनैव तात्पर्ये सति बोधोपपत्तेः । अत एव धवं च खदिरं चेत्यादौ तात्पर्यानुरोधेन धवखदिरवृत्तिव्यासक्तकर्मत्वे लक्षणेत्यपि ध्येयम् । द्वन्द्वे तु विभक्तेरेकत्वादेवेतरेतरयोगो लक्षणां विनैव निरवबाधः । यत्तु मित्रयोर्वरुणयोरिति वेदे काचित्कं विग्रहप्रदर्शनं तच्छान्दसम् । अत एव विभक्तेर्व्यासज्यवृत्तिधर्मपरत्वे द्वन्द्व एव तादृशस्थले तात्पर्यग्राहक इत्यपि बोध्यम् । किञ्च द्वन्द्वापवादत्वेऽप्येकशेषस्य न तदुत्तरविभक्तेर्व्यासज्यवृत्तिधर्मपरत्वं वचनान्वयस्य विभक्त्यर्थान्वयोत्तरकालीनत्वेन ततः पूर्वमेकशेषत्वग्राहकप्रमाणाभावात् । वस्तुतस्तु एकशेषानुशासनमपि परिभाषामात्रमेव सरूपद्वन्द्वनिराकरणार्थं एकप्रातिपदिकार्थस्यैव द्विवचनादिबलेनानेकत्वप्रतीत्युपपत्तेः । विरूपैकशेषे तु तात्पर्यग्राहकानुरोधेनानुशासनिकी औकारे लक्षणेति विशेषः । अतस्तद्भिया सरूपैकशेषस्यैवाङ्गीकारात् पुंद्वयाधिकार इति प्राप्ते—

वसन्तादिवाक्ये 'आदधीत' इत्येकवचनस्य पाक्षिकानुवादत्वापत्तेः ब्राह्मणद्वयकर्तृकाधाने वसन्तप्राप्तयनापत्तेश्च वसन्तादिवाक्येष्वेवाधानविधानम् । वसानवाक्ये तु एककर्तृत्वविशिष्टाधाने कर्तृद्वित्वक्षौमोभयविध्ययोगादानुशासनिकीं लक्षणामङ्गीकृत्य परं विरूपैकशेषोऽधिष्ठानलक्षणया । तस्मिन् द्वित्वान्वयोऽपि पार्ष्णिको युक्तस्समाश्रयितुम् । अत एव तत्र क्षौम-

मात्रं वसनक्रियोद्देशेन विधीयते । युक्तश्च कृदुपात्तभावनायामपि कारकसम्बन्धः । विधायकस्त्वाद्धातिपर एव प्रत्ययः । उपक्रमस्थक्षौमपदे श्रुत्यर्थलाभाय च विप्रकृष्टार्थस्यापि विधायकः । अन्यत्तु सर्वं प्रकरणप्राप्तत्वादनूद्यते । यद्यपि चोत्पत्तौ पुंस्त्वश्रवणात् स्त्रियमादाय द्वित्वं न प्राप्यते । तथाऽपि विशिष्टविधौ गौरवपरिहाराय वसानवाक्ये वाक्यभेदपरिहाराय च ब्राह्मणादेरधिकारित्वेनैवान्वयाङ्गीकारात् तस्य चोद्देश्यत्वेन तद्विशेषेण पुंस्त्वस्याविवक्षोपपत्तेः स्त्रियमादाय द्वित्वप्राप्त्याविघातः । द्विवचनं चात्राधिष्ठानानेकत्वमात्रपरम्, तेन पत्न्यनेकत्वेऽपि न कश्चिद्विरोधः । अत एक एव पुमान् स्त्रीसद्वितीय आधाने अधिकारी ॥ ५ ॥

(६)–तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात् ॥ २४ ॥

स्थिते स्त्रिया सहाधिकारे यत्र तावत्स्वत्वत्यागः श्रुतस्तत्प्रधानं दक्षिणादानादि तत् द्वाभ्यां कार्यमित्युक्तमेव । अत एव वरणादिद्वारा आर्त्विज्येष्वप्युभयोरपि प्रयोजककर्तृत्वम् । ये च फलिसंस्काराः कर्तृसंस्काराश्च ते फलित्वकर्तृत्वयोरविशेषादुभयोरपि । तत्रापि यत्र 'योक्त्रेण पत्नीं संनह्यति, मेखलया यजमानम्' इत्यादौ प्रतिनियतनिर्देशः तत्र 'अर्धमन्तर्वेदि' इतिवत् लक्षणया पुंस्त्वादेरप्युद्देश्यान्तर्भावाङ्गीकारेण सत्यप्युभयोरेकापूर्वसाधनत्वे व्यवस्थैव । विशेषनिर्देशाभावेऽपि च यत्र 'केशश्मश्रु वपते' इत्यादौ केशश्मश्रुणोश्शरीरसंस्कारार्थवपनं प्रत्युपादेयत्वेन द्वन्द्वावगतसाहित्यविवक्षा, तत्रापि पत्न्याश्श्मश्रुभावेन केशानां

न वपनं, न हि तत्केशश्मश्रुसंस्कारकम्, तेषामनुपयुक्तत्वात् अतस्तदपि यजमानस्यैव । अत एव यजमानानेकत्वे पत्न्यनेकत्वे द्विविधस्यापि प्रत्येकं करणम् । यत्र क्रत्वर्थेष्वाज्यावेक्षणादिषु प्रतिनियतनिर्देशस्तत्रोपादेयविशेषणस्य विवक्षितत्वात् तेन तेन प्रतिनियतेनैकेन च कर्त्रा करणम् । अत एव पत्न्यनेकत्वे सन्निहितया ज्येष्ठयैव । यत्र तु याजमानमिति विशेषसमाख्यया कर्तृनियमस्तत्र यजमानप्रातिपदिकस्योभयपरत्वोपपत्तेः विरूपैकशेषाङ्गीकारेण द्विवचनबहुवचनान्तविग्रहेण चोभयोरपि वैकल्पिकं कर्तृत्वमिति प्राप्ते—

यजमानशब्दस्य पुंस्येव प्रचुरप्रयोगाद्विरूपैकशेषद्विवचनान्तादिविग्रहस्यासति तत्तात्पर्यग्राहकप्रमाणेऽनाश्रयणीयत्वात् । प्रत्युत तदाश्रयणे तद्विषये ज्ञानाक्षेपशक्तिकल्पनापत्तेः प्रसिद्धज्ञानवन्तं पुमांसमादायैव समाख्योपपत्तेस्तस्यैव कर्तृत्वम् । यद्यपि स्वाध्यायविधौ लिङ्गविशेषानुपादानेन न स्त्रिया व्यावृत्तिप्रतीतिस्तथाऽप्युपनयनवाक्ये तदुपादानात्तत्र च तस्योद्देश्यविशेषणत्वेऽपि अष्टवर्षत्वादिवदेव 'तमध्यापयीत' इत्यत्र तच्छब्देन पुंस्त्वोपादानादध्ययने तद्व्यावृत्तिः । अत्र ह्यध्यापनस्य वृत्त्यर्थत्वेन रागप्राप्तत्वात् लक्षणया प्रयोज्यव्यापाररूपाध्ययन एव कर्तृविधिः । अत एवोपनयनवाक्ये तत्संस्कारकत्वेनाचार्यकर्तृकमुपनयनं माणवककर्तृकमुपगमनमेव वा नियम्यते । तेनाचार्यत्वसिद्धेरानुषङ्गिकत्वात्तामादायैवात्मनेपदोपपत्तेः । न चाचार्यत्वकरणे नयतेर्धातोरात्मनेपदं भवतीत्यनुशासनबलादुपनयनस्याचार्यत्वार्थत्वं, तस्य रागप्राप्तत्वेन विधिवैयर्थ्यात् । अत उपनयनविधौ लिङ्गस्याविवक्षायामप्यध्ययने तस्य विवक्षितत्वात् न

स्त्रिया अधिकारः । 'स्त्रीशूद्रद्विजबन्धूनां न त्रयी श्रुतिगोचरा' इति प्रतिषेधाच्च । अतश्च ज्ञानाक्षेपकल्पनाभिया यजमानस्येदमित्येव विग्रहात् तस्यैव तत्र कर्तृत्वम् ॥ ६ ॥

(७)—चातुर्वर्ण्यमविशेषात् ॥ २५ ॥ निर्देशाद्वा त्रयाणां स्यादग्न्याधेये ह्यसम्बन्धः क्रतुषु ब्राह्मणश्रुतिरित्यात्रेयः ॥ २६ ॥ निमित्तार्थेन बादरिस्तस्मात् सर्वाधिकारं स्यात् ॥ २७ ॥ अपि वाऽन्यार्थदर्शनात् यथाश्रुति प्रतीयेत ॥ २८ ॥ निर्देशात्तु पक्षे स्यात् ॥ २९ ॥ वैगुण्यान्नेति चेत् ॥ ३० ॥ न काम्यत्वात् ॥ ३१ ॥ संस्कारे च तत्प्रधानत्वात् ॥ ३२ ॥ अपि वा वेदनिर्देशादपशूद्राणां प्रतीयेत ॥ ३३ ॥ गुणार्थित्वान्नेतिचेत् ॥ ३४ ॥ संस्कारस्य तदर्थत्वात् विद्यायां पुरुषश्रुतिः ॥ ३५ ॥ विद्यानिर्देशान्नेति चेत् ॥ ३६ ॥ अवैद्यत्वादभावः कर्मणि स्यात् ॥ ३७ ॥ तथा चान्यार्थदर्शनम् ॥ ३८ ॥

यद्यपि कामश्रुतयोऽविशेषेण प्रवृत्तास्तथाऽपि तासां लाघवायाधानाध्ययनविधिसिद्धाग्निविद्योपजीविकत्वस्य द्वितीये साधितत्वाच्छूद्रस्य तदाक्षेपकल्पनानुपपत्तेस्तस्य वेदाक्षरश्रवणप्रतिषेधाच्च अपशूद्राणां त्रयाणामेवाधिकारो न शूद्रस्याग्निसाध्ये तदसाध्ये च वैदिककर्मणि । द्वितीयसिद्धस्यैव प्रयोजनार्थमधिकरणमिति नातीवात्र पूर्वपक्षादरः । अत एव सर्वत्र वेदे त्रयाणामेव वर्णानामनुकीर्तनम् । यत्तु 'पयोव्रतं ब्राह्मणस्य' इत्यादि वर्णत्रयमनुकीर्त्य 'मस्तु शूद्रस्य' इति कीर्तनं तत् मस्तु शूद्रस्यानधिकारिणो भक्ष्यमुचितं न तु ब्राह्मणादेरिति तन्निन्दया पयआदिस्तुतिः ॥ ७ ॥

(८)–त्रयाणां द्रव्यसम्पन्नः कर्मणो द्रव्यसिद्धित्वात् ॥ ३९ ॥ अनित्यत्वात्तु नैवं स्यादर्थाद्धि द्रव्यसंयोगः ॥ ४० ॥

अग्निविद्ययोरिव द्रव्यस्यापि प्रतिग्रहादिपुरुषार्थोपायविधिबलादेव लब्धतया क्रतुविधिभिरनाक्षेपात् परप्रयुक्तसिद्धद्रव्यवत एवाधिकारो न त्वसिद्धद्रव्यस्य तदार्जयित्वेति प्राप्ते—

प्रतिग्रहाद्युपायविधेरप्यनुज्ञाविधिमात्रत्वस्य स्थापितत्वात् द्रव्यस्य स्वतन्त्रविधिप्रयुक्तत्वाभावेन जीवनादिकार्येणेव क्रतुनाऽपि तदाक्षेपोपपत्तेः प्रतिग्रहादेरपि संयोगपृथक्त्वन्यायेन क्रत्वर्थत्वस्य स्थापितत्वात् प्रयाजादिवत् क्रतुनाऽपि तदाक्षेपोपपत्तेश्चाद्रव्योपि द्रव्यमार्जयित्वाऽधिक्रियत एव ॥ ८ ॥

(९)–अङ्गहीनश्च तद्धर्मा ॥ ४१ ॥ उत्पत्तौ नित्यसंयोगात् ॥ ४२ ॥

एवं चक्षुराद्यङ्गहीनोऽपि आज्यावेक्षणादिमति कर्मणि प्रतिसमाधाय चक्षुराद्यङ्गमधिक्रियते । अप्रतिसमाधेयाङ्गवैकल्ये तु काम्ये नाधिक्रियते । नित्ये तु यथाशक्तिन्यायादधिक्रियत एव । यत्तु पार्थसारथिना आहिताग्निश्चेन्नित्ये अधिक्रियत इत्युक्तं तदाधानस्यापि नित्यत्वेनोपेक्षितम् ॥ ९ ॥

(१०)–अत्रार्षेयस्य हानं स्यात् ॥ ४३ ॥

दर्शपूर्णमासयोः "आर्षेयं वृणीते एकं वृणीते द्वौ वृणीते त्रीन् वृणीते न चतुरो वृणीते न पञ्चाति वृणीते" इति श्रुतम् । तत्र तावदेकं विधायकं अन्ये अनुवादा इत्यविवादम् । अन्यथा सर्वेषां विधित्वे वाक्यभेदविकल्पयोरापत्तेः । अतः 'त्रीन् वृणीते' इत्येव विधिः 'एकं वृणीते द्वौ वृणीते' इत्यवयुत्यानुवादः त्रित्वस्तुत्यर्थः । 'न चतुरो वृणीते' इत्याद्यपि नित्यानुवादस्तदर्थ एव । अतश्च त्र्यार्षेयवत् पञ्चार्षेयोऽपि त्रीनेव वृणीयात् । एकद्व्यार्षेययोस्तु नास्मिन् पक्षे अधिकारः । अपि तु 'अथ हैके मनुवदित्येवैकार्षेयं सार्ववर्णिकं प्रतिदिशन्ति' इति वचनान्तरविहितमनुवत्पक्षाश्रयेण एव । तदेतद्भगवतो जैमिनेर्मतमृष्यन्तरैरभ्युपगतम् । तथा च कात्यायनः अनुवदति 'परस्तादर्वाञ्चि त्रीणि' इति । आपस्तम्बोऽपि 'त्रीन्यथर्षि मन्त्रकृतो वृणीत' इति तैस्तु पक्षान्तराण्यप्युक्तानि 'यावन्तो वा मन्त्रकृतः' इति कात्यायनः । "अपि वैकं द्वौ त्रीन् पञ्च वृणीते न चतुरो वृणीते न पञ्चाति

वृणीते" इत्यापस्तम्बः । 'यावन्तस्स्युः परं परं प्रथमम्' इत्याश्वलायनोऽपि । तेषां चायमभिप्रायः 'आर्षेयं वृणीते' इत्ययं विधिरितरेऽनुवादाः तत्स्तुत्यर्थाः । अतश्च 'त्रीन् वृणीते' इत्यप्यनुवाद एव ईदृशोऽयं वरणसामान्यविधिः यत् तत्तदार्षेयं प्रति तत्तत्सङ्ख्याक वरणं प्राप्यते इति स्तुतिः । इतरथा भवन्मते सामान्यवाक्ये नैव वरणविधिमभ्युपगम्याप्येकवाक्यत्वलाभाय पञ्चार्षेयस्यैवाधिकारापत्तेस्त्रयाणामप्येषामवयुत्यानुवादत्वापत्तिः । न चैवं चतुष्षडादीनामपि वरणप्रसक्तौ तन्निषेधेन वाक्यभेदापत्तिः एकद्वित्रिपञ्चार्षेयाणामेव प्रवराध्याये समाम्नानेन चतुष्षडादेरप्रसक्तेः । अतोऽस्मिन्नपिपक्षे वाक्यभेदाद्यनापत्तेरेकद्व्यार्षेययोरधिकारः । पञ्चार्षेयस्य च पञ्चानां वरणं न विरुद्धमिति । यत्तु—द्व्यामुष्यायणानामुभयतः कुलद्वयेऽपि वरणविधानादस्ति चतुष्षडादीनां प्राप्तिरिति तन्न, आश्वलायनेन द्व्यामुष्यायणाननुक्रम्य "तेषामुभयतः प्रवृणीते एकमितरतो द्वावितरतः द्वावेकतरतः त्रीनितरतः" इति आवश्यकश्रुत्यन्तरमूलकेनैव तन्निषेधात् । अतो 'भार्गवच्यावन' इत्यादिविशेषरूपेण वरणपक्षेऽपि मनुवत्पक्षवदेव एकद्व्यार्षेययोरप्याधिकार इति ऋष्यन्तरमतं बोध्यम् ॥ १० ॥

(११)—वचनाद्रथकारस्याधानेऽस्य सर्वशेषत्वात् ॥ ४४ ॥ न्याय्यो वा कर्मसंयोगात् शूद्रस्य प्रतिषिद्धत्वात् ॥ ४५ ॥ अकर्मत्वात्तु नैवं स्यात् ॥ ४६ ॥ आनर्थक्यं च संयोगात् ॥ ४७ ॥ गुणार्थेनेति चेत् ॥४८॥

उत्क्रमनिमित्तत्वम् ॥ ४९ ॥ सौधन्वना-स्तु हीनत्वात् मन्त्रवर्णात्प्रतीयेरन् ॥५०॥

त्रयाणां वर्णानामाधानं विधाय 'वर्षासु रथकार आदधीत' इति श्रुतम् । तत्र विद्याक्षेपशक्तिकल्पने गौरवापत्तेः ब्राह्मणादीनामेव रथकरणे निमित्ते आधानोद्देशेन वर्षाविधिरिति प्राप्ते—

रथकारशब्दस्य प्रसिद्धिबलेन सौधन्वनापरपर्याये जातिविशेषे रूढत्वात् तस्यैवायं कालविशिष्टाधानविधिः । न च तत्रापि योगेनैवोपपत्तौ रूढिकल्पनायां प्रमाणाभावः रथमकुर्वत्यपि सौधन्वने प्रयोगेण तद्बाधात् । न च प्रोक्षणीशब्दवद्योग्यतामात्रेण तदुपपत्तिः । योग्ये ब्राह्मणादावप्रयोगेण रूढिकल्पनाय अ आवश्यकत्वात् । रथकरणयोग्यतावच्छेदकमनुष्यत्वस्य कादाचित्कत्वाभावेन निमित्तत्वानुपपत्तेः रथकारपदवैयर्थ्यप्रसङ्गाच्च । अतः प्रसिद्धिबलात् सौधन्वन एव रथकारः । सुधन्वा च "व्रात्यात्तु जायते वैश्यात्सुधन्वाऽऽचार्य एव च" इत्यादिनोक्तः त्रैवर्णिकात्किञ्चिन्न्यूनो वेदानधिकृतो जातिविशेषः न तु शूद्रः । यद्यपि च रथकारपदं "माहिष्येण करण्यां तु रथकारः प्रजायते । महिष्योग्रौ प्रजायेते विट्छूद्राङ्गनयोर्नृपात् ॥ शूद्रायां करणो वैश्यात्" इत्यनेनोक्तेऽपि रूढं, तथाऽपि "ऋभूणां त्वा देवानां व्रतपते व्रतेनादधामीति रथकारस्यादध्यात्" इति वाचनिके मन्त्रे ऋभुशब्दप्रयोगात्तस्य च 'सौधन्वना ऋभवः' इति मन्त्रान्तरे सामानाधिकरण्यनिर्देशात् सौधन्वन एवात्र रथकारपदेनाभिधीयते । अतश्च तस्याविद्यत्वाद्विद्याक्षेपं

तावन्मात्रविषयमङ्गीकृत्यापि कर्तृकालोभयविशिष्टाधानान्तरमेव विधीयते। सर्वाधानेषु च प्रकरणात्साधारण्येनैव धर्मविधानम्। यद्यपि च विद्याभावादस्योत्तरक्रतुष्वनधिकारस्स्यात्तथाऽप्या-धानमात्रमरणिमथितलौकिकाग्निगुणकं कल्प्यस्वर्गफलकं सधर्म-कमनुष्ठेयम्। एवं चाहवनीयादेरनुपयोगादभावेन तदुद्देशेन विहि-तानां 'नक्तं गार्हपत्यमादधाति' इत्यादीनां धर्माणां लोपेऽपि एकस्मिन्नेव कुण्डे स्थण्डिले वा त्रिषु वा तेष्वग्न्याधानं इत-राङ्गयुक्तं कार्यमिति तन्त्ररत्नाभिप्रायः॥

मम तु प्रतिभाति—नास्याधानस्यार्थकर्मत्वं प्रमाणाभा-वात्। अग्निमित द्वितीयान्तपदे लक्षणादेरावश्यकत्वे रथका-रपदे योगाङ्गीकारस्यैव न्याय्यत्वाच्च अपित्वाहवनीयाद्युत्पादक-त्वमेव। न च तेषामनुपयोगः अविद्वत्तया क्रत्वधिकाराभा-वेन तत्रानुपयोगेऽपि "आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च' इति वचनविहिते दाहे उपयोगसम्भवात् न ह्ययं दाहः कर्मो-पयुक्ताहिताग्निशरीरप्रतिपत्त्यर्थः। येन कर्माभावेनाभावश्श-ङ्क्येत। तथात्वे आहिताग्निपदेनाधानस्यैवोपस्थितेस्तदङ्गत्व-स्यैवापत्तौ क्रत्वङ्गत्वानापत्तेः। न चेष्टापत्तिः। तथात्वे प्रति-पत्तिं विना आधानफलाहवनीयादेरनिष्पत्त्यापत्तेः। अतः फल-श्रवणादर्थकर्मैवेदमिति युक्तस्तत्राहवनीयादेरुपयोगः। पवमाने-ष्ट्यङ्गभूतपात्रसत्त्वाच्च यज्ञपात्रसमुच्चयेऽपि न क्षतिः। अत एव पवमानेष्ट्युत्तरं प्राक्क्रतुभ्यो मरणे अग्निभिः पात्रैश्च दाहः पवमानेष्टिभ्यः पूर्वं मरणे तु उक्तवचनबलादग्निभिरेव दाहः॥

(१२)—स्थपतिर्निषादस्स्यात् शब्दसामर्थ्यात्॥ ५१॥ लिङ्गदर्शनाच्च॥ ५२॥

'रौद्रं वास्तुमध्ये चरुं निर्वपेत्' इति प्रक्रम्य 'एतया निषाद-स्थपतिं याजयेत्' इति श्रुतम् । तत्र यद्यपि निषादः स्थपतिर्यस्य इति बहुव्रीहौ पदद्वयेऽप्यन्यपदार्थलक्षणेति स नाश्रीयते । तथाऽपि निषादानां स्थपतिरिति षष्ठीतत्पुरुषे तदभावाद्विद्याक्षेपश-क्तिकल्पनाभिया कर्मधारयानङ्गीकारेण स एवाश्रीयते । न च तत्रापि पूर्वपदे निषादसम्बन्धिनि लक्षणा, कारणाभावात् । यद्य-पि हि क्लृप्तावयवार्थयोगेनैवोपपत्तौ न समासे विशिष्टार्थशक्ति कल्पना प्रामाणिकी । तथाऽपि कर्मधारये अभेदस्येव षष्ठीतत्पु-रुषादावपि स्वस्वामिभावादिभेदसम्बन्धस्य संसर्गविधयैव भा-नोपपत्तेर्लक्षणायामनुपपत्त्यभावः । न च नैयायिकवदस्माकं नामार्थयोरभेदान्वय एवेत्यत्र प्रमाणमस्ति । राजा पुरुषोऽस्ती-त्यादौ सर्वत्र नामार्थस्य विभक्त्यर्थे तस्य चाख्यातार्थेऽन्वया-ङ्गीकारेण परस्परान्वयस्य समासातिरिक्ते क्वाप्यप्रसक्तत्वात् । अतस्समास एव प्रसक्तस्य तस्य संसर्गविधयैव भानोपपत्तेः न लक्षणेति प्राप्ते—

समानाधिकरणपदस्थले राजा पुरुषोऽस्तीत्यादौ क्रियान्व-योत्तरं पार्ष्ठिकान्वयस्याभेदसम्बन्धेनैवानुभवात् राज्ञः पुरुषोऽ-स्तीत्यादौ व्यधिकरणपदस्थले च भेदसम्बन्धेनैवानुभवाल्लाघवेन नामप्रयोज्यतदर्थान्वयबोधस्याभेदविषयकत्वमेवेति नियमकल्पनात् स्वस्वामिभावादिसम्बन्धस्य षष्ठीतत्पुरुषादौ संसर्गविधया भाना-नुपपत्तेरवश्यं पूर्वपदे स्वार्थसम्बन्धिलक्षणामङ्गीकृत्य तस्योत्तर-पदार्थेऽभेदेनान्वय इत्यङ्गीकार्यम् । अत एव नामप्रयोज्यनामा-र्थविशेष्यकनामार्थप्रकारकाभेदसंसर्गकबोधत्वावच्छिन्नं प्रत्येका-धिकरणवृत्तिप्रातिपदिकार्थतावच्छेदककनामद्वयसमभिव्याहारस्य द्वन्द्वभिन्ननामद्वयसमभिव्याहारस्य वा तन्त्रत्वमित्यपि बोध्यम् ।

तेन धवखदिरौ नीलघटावित्यादौ नाभेदबोध इत्यपि बोध्यम् । न चैवं समासे सम्बन्धिनोऽभेदेनान्वयाद्विग्रहे च राज्ञः पुरुष इत्यत्र षष्ठ्यर्थसम्बन्धस्य भेदेनान्वयात् वृत्तिवाक्ययोर्भिन्नार्थत्वापत्तेरेकविधानेनेतरनिवृत्त्यनापत्तौ विभाषासूत्रवैयर्थ्यापत्तिरिति वाच्यम् । एकतरबोधे इतरबोधस्यावश्यकत्वेनार्थैक्याभिप्रायात् । अतश्च षष्ठीतत्पुरुषे लक्षणापत्तेः निषादश्चासौ स्थपतिश्चेति कर्मधारय एवायम् । तेन तावद्विषये विद्यामाक्षिप्यानाहिताग्नेरपि निषादस्यैवाधिकारः । अत एव 'कूटं दक्षिणा स्वं हि तन्निषादानाम्' इति लिङ्गमपि सङ्गच्छते । तत्र च परप्रयुक्तोपजीवित्वादाहवनीयाद्यनाक्षेपेऽपि 'यत्र कचन होष्यन् स्यात् स पञ्चभूतसंस्कारान् कृत्वा लौकिकाग्निं प्रतिष्ठापयेत्' इति स्मृतिवचनेनाग्न्यन्तराभावे होममात्रोद्देशेन लौकिकाग्निविधानात्तमेव तत्तद्देशे स्थापयित्वा तस्मिन्निष्टिः कर्तव्येति ध्येयम् ॥ १२ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां षष्ठस्याध्यायस्य प्रथमः पादः.

अथ षष्ठस्याध्यायस्य द्वितीयः पादः.

(१)–पुरुषार्थैकसिद्धित्वात्तस्य तस्याधिकारस्स्यात् ॥ १ ॥ अपिचोत्पत्तिसंयोगो यथा स्यात्सत्त्वदर्शनं तथा भावो विभागे स्यात् ॥ २ ॥

'ऋद्धिकामास्सत्रमासीरन्' इत्यादावनेककर्तृकसत्रप्रयोगादेकं फलं सर्वैः कर्तृभिरवयवशो भुज्यते उत कृत्स्नमिति विचारे यद्यपि सर्वेषां प्रत्येकं कर्तृत्वं यदि वा दम्पत्योरिव व्यासक्तमुभयथाऽपि एकसत्रप्रयोगादनेकफलनिष्पत्तौ दर्शादावप्येकस्मादेव प्रयोगाद्युगपत् क्रमेण वा अनन्तस्वर्गोत्पत्त्यापत्तेरेकप्रयोगादेकफलोत्पत्तिनियमस्यावश्यं वाच्यत्वादेकमेव फलं सर्वैरवयवशो भुज्यत इति प्राप्ते—

न तावदेकस्य फलावयविनो मुख्यावयवास्सम्भवन्ति सुखादिरूपस्य तस्यावयवासम्भवात् । सत्रजन्यतावच्छेदकबुद्धित्वादेस्तावत्पुरुषनिष्ठबुद्धिषु व्यासज्यवृत्तित्वमात्रं परं वाच्यं, न च तत्र प्रमाणमस्ति श्रुतऋद्धिकामादिशब्दानां फलमात्रप्रतिपादनपरत्वात्, ऋद्धिकामकर्तृनिष्ठफलभोगप्रतिपादके कल्प्याधिकारविधावपि ऋद्धिकामनाया व्यासज्यवृत्तित्वस्य बाधितत्वेन व्यासज्यवृत्तिकामनात्वरूपातिरिक्तधर्माङ्गीकारे प्रमाणाभावाच्च प्रत्येकमेव ऋद्धिकामत्वावसायात् प्रत्येकमेव फलावगतिः । न हि तत्र बहुवचनान्तर्द्धिकामपदेन बहुत्वावच्छिन्नानामृद्धिकामत्वं प्रतिपाद्यते येन व्यासज्यवृत्तित्वावगतिर्भवेत् । अपितु ऋद्धिकामत्वावच्छिन्नानां बहुत्वं पशून् इत्यादिवत् । न च कर्तृत्वस्य व्यासक्तत्वात् फलवत्त्वस्यापूर्ववत्त्वस्य च व्यासक्तत्वम् । फलादौ कर्तृत्वसामानाधिकरण्यस्य प्रत्येकवृत्तित्वेऽप्युपपन्नत्वेनैतादृशनियमे प्रमाणाभावात्, अतश्च दम्पत्योर्व्यासज्यवृत्तिकर्तृत्वेऽपि अपूर्वं फलं च भिन्नमेव जन्यतावच्छेदकधर्मपर्याप्त्यधिकरणं वाच्यं, प्रकृते तु बहुवचनश्रवणेन कर्तृत्वभेदस्यैवावगतेः । न फलवत्त्वादेः व्यासज्यवृत्तित्वकल्पनावसरः । न चैकप्रयोगादनेकफ-

लानुत्पत्तिः। समवायसम्बन्धेनैव फलत्वावच्छिन्नं प्रति फलत्वेन प्रतिबन्धकत्वकल्पनादात्मान्तरे बाधकाभावात्। न चैवमपि प्रत्येकवृत्तित्वापेक्षया फलवत्त्वादेः व्यासज्यवृत्तित्वकल्पने गौरवादेरभावान्नियामकाभावः। जन्यतावच्छेदककाद्धित्वादेः व्यासज्यवृत्तित्वकल्पने तत्पर्याप्त्यधिकरणतावच्छेदकस्य सत्रे यावत्कर्तृनिष्ठतज्जन्यफलकूटत्वादेः कल्पनीयत्वेन गौरवापत्तेः तद्वरं सत्रजन्यफलत्वादेरेव तत्त्वकल्पनायां लाघवात् प्रत्येकमेव फलम्। प्रयोजनं सङ्कल्पे तादृशानुसन्धानम् ॥ १ ॥

(२)—प्रयोगे पुरुषश्रुतेः यथाकामी प्रयोगे स्यात् ॥ ३ ॥ प्रत्यर्थं श्रुतिभाव इति चेत् ॥ ४ ॥ तादर्थ्ये न गुणार्थताऽनुक्तेऽर्थान्तरत्वात् कर्तुः प्रधानभूतत्वात् ॥ ५ ॥ अपि वा कामसंयोगे सम्बन्धात्प्रयोगायोपदिश्येत प्रत्यर्थं हि विधिश्रुतिर्विषाणवत् ॥ ६ ॥ अन्यस्य स्यादिति चेत् ॥ ७ ॥ अन्यार्थेनाभिसम्बन्धः ॥ ८ ॥ फलकामो निमित्तमिति चेत् ॥ ९ ॥ न नित्यत्वात् ॥ १० ॥ कर्म तथेति चेत् ॥ ११ ॥ न समवायात् ॥ १२ ॥

'स्वर्गकामो यजेत' इत्याद्येकवचनश्रवणे मूले तावदेकत्वमविवक्षितं स्वर्गकामपदस्य स्वर्गमात्रपरत्वात्। अधिकारिपरत्वेऽपि वा तस्योद्देश्यत्वेन तद्विशेषणस्याविवक्षितत्वात्। अतश्च तत्सामानाधिकरण्यादाख्यातेऽपि तदविवक्षितम्। किञ्चाख्यातस्य प्राप्तिमात्रमर्थः। ततश्च यागेन स्वर्गं पुरुषः प्राप्नुयादित्यर्थः। तेन तत्रापि तस्योद्देश्यत्वाद्विशेषणस्याविवक्षा। अस्तु वा करोतिना विवरणाल्लिङः प्रवर्तनाभिधायित्वाच्चाख्यातस्य प्रवृत्तिरेवार्थः। तथाऽपि फलोद्देश्यकायास्तस्या लोकत एव प्राप्तत्वात्तत्र यागमात्रविधानेन तस्या अनुवाद्यत्वात्तद्विशेषणस्य तत्कर्तृविशेषणस्यैकत्वस्याविवक्षेति एको द्वौ बहवः कर्तार इति पूर्वः पक्षः कृतः। तत्फलोद्देश्यकस्य विजातीयस्य पुरुषप्रयत्नस्याप्राप्तत्वेन विधेयत्वेन तत्रतत्र स्थापितत्वात् तद्विशेषणस्य कर्त्रेकत्वस्य विवक्षोपपत्तेस्स्वर्गकामपदे तदविवक्षायामपि तत्सामानाधिकरण्ये बाधकाभावादुपेक्षितम्॥

अन्यथा पूर्वपक्षः रच्यते—आख्यातोपात्तैकत्वस्य विवक्षायामप्यनेकेषां कर्तृत्वं, तद्धि कर्तृत्वे अन्वेति न तु तदाश्रये। अन्यथा दम्पत्योर्व्यासज्यवृत्तिकर्तृत्वानुपपत्तेः। अतश्च तदाश्रयाणामनेकत्वस्य पत्नीरादायावश्यकत्वे पुरुषानादाय तत्करणे बाधकाभावादनेकेषामपि कर्तृत्वमिति प्राप्ते—

असति विशेषग्राहकप्रमाणे तदाश्रयस्यापि प्रथमातिक्रमे कारणाभावादेकस्यैव प्रतीतिरामुभाविकी। अत एव सन्ध्यावन्दनश्राद्धादावेकस्यैवाधिकारः। तत्र 'धर्मे च' इत्यादिवाक्यस्य प्रमाणान्तरसिद्धपत्न्यधिकारककर्ममात्रविषयत्वे पत्न्या अपि ग्रहणे प्रमाणाभावे पुरुषान्तरस्याप्रसक्तेः। यत्र तु पत्नीग्राहक-

प्रमाणसद्भावस्तत्र सत्यपि तासां कर्तृत्वाधिष्ठानत्वे पुरुषस्यैकस्यैव तत्, प्रथमातिक्रमे कारणाभावात्, 'स्वर्गकामो यजेत, यजमानः केशश्मश्रु वपते, मेखलया यजमानम्' इत्यादौ विना कारणं सुबुपात्तैकत्वस्य पाक्षिकानुवादत्वानुपपत्तेश्च । अतः पुरुष एक एवाधिकारी ॥ २ ॥

(३)—प्रक्रमात्तु नियम्येतारम्भस्य क्रियानिमित्तत्वात् ॥ १३ ॥ फलार्थित्वाद्वाऽनियमो यथाऽनुपक्रान्ते ॥ १४ ॥ नियमो वा तन्निमित्तत्वात्कर्तुस्तत्कारणं स्यात् ॥ १५ ॥

काम्यं कर्म कामनायां प्रक्रान्तं वीतायां फलेच्छायामवाप्ते वा फले प्रयोजकाभावात् न समापनीयमिति प्राप्ते—

सत्यं नास्ति फलरूपं प्रयोजकं तस्येच्छाविषयत्वेन प्रयोजकत्वात् । तथाऽपि प्रारम्भ एव प्रयोगसमाप्तेर्निमित्तम् । न च तत्र प्रमाणाभावः । शिष्टविगर्हणस्यैव प्रमाणत्वात् । शिष्टा हि प्रारब्धापरिसमापने प्राक्रमिकोऽयमिति विगर्हन्ते । तेन शिष्टाचारमूलभूतश्रुतौ प्रारम्भे निमित्ते प्रयोगसमाप्तेर्नैमित्तिकत्वेन विधानात्तस्या आवश्यकत्वम् । न च वस्तुतश्शास्त्रेण कामनाया एव प्रयोजकत्वावगमादाचारस्यास्य भ्रान्तिमूलकत्वमिति वाच्यम् । सर्वेषां शिष्टानां भ्रान्तिकल्पने प्रमाणाभावात्, 'देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत' इति प्रत्यक्षश्रुत्यैवाकरणे निन्दाप्रायश्चित्तयोर्विधानात्, प्रारम्भे निमित्ते प्रयोगसमाप्तेरावश्यकत्वावगमाच्च । अतः प्रयोजकान्तराभावेऽपि निमित्तव-

शात्समापनीयमेव । समापिते च तस्मिन् कारणसत्त्वात्फलमपि भवत्येव । एकफलप्राप्तावपि फलान्तरोपपत्तेः । न च कामना-रूपाङ्गाभावाद्वैगुण्याशङ्का । तस्याः प्रवृत्तित्वावच्छिन्नं प्रति कारणत्वमात्रत्वेनाङ्गत्वे प्रमाणाभावात्प्रवृत्तिपूर्वक्षणे तस्यास्सत्त्वाच्च । अन्यथा समापनोत्तरमिच्छाऽपगमेऽपि फलानुत्पत्तिप्रसङ्गात् ॥ ३ ॥

(४)—लोके कर्माणि वेदवत्ततोऽधिपुरुषज्ञानम् ॥ १६ ॥ अपराधेऽपि च तैश्शास्त्रम् ॥ १७॥ अशास्त्रात्तूपसम्प्राप्तिरशास्त्रं स्यान्न प्रकल्पकं, तस्मादर्थेन गम्येताप्राप्ते वा शास्त्रमर्थवत् ॥ १८ ॥

लौकिकस्य तु गृहरथकर्मादेरशास्त्रीयत्वादशास्त्रीयासमापने च शिष्टविगर्हणाभावात्प्रयोजकाभावेनासमापनम् । न च तस्यापि शिल्पश्रुतिमूलत्वाच्छास्त्रीयत्वम् । तस्याः अर्थसुखादिवशार्जिततया लोकमूलकत्वेन श्रुतिमूलकत्वाभावात् । यत्तु, गृहकरणाद्याश्रितं पुरुषार्थं नैमित्तिकं वास्तुशान्त्यादिकं 'आरे भग्ने इन्द्रबाहुर्बलव्यः, पायसं ब्राह्मणो भोजयितव्यः' इत्यादि च, तस्य शास्त्रीयत्वादिष्टमेव समापनम् ॥ ४ ॥

(५)—प्रतिषेधेष्वकर्मत्वात्क्रिया स्यात् प्रतिषिद्धानां विभक्तत्वादकर्मणाम् ॥ १९ ॥

शास्त्राणां त्वर्थवत्त्वेन पुरुषार्थो विधीयते
तयोरसमवायित्वात्तादर्थ्ये विध्यतिक्रमः ॥

'न कळञ्जं भक्षयेत्' इत्यादिषु किं? स्वर्गकामस्याधिकारः उत प्रवृत्तमात्रस्येति चिन्तायां—नञो निपातत्वेन क्रियान्वयनैयत्याभावात्क्रियान्वयाङ्गीकारे च प्रधानभूतायास्तस्या एवान्यथात्वापत्तेः, आनर्थक्यतदङ्गन्यायेन क्रियाविशेषणेष्वन्वयावगमात्, तत्रापि कळञ्जान्वये सुबन्तसम्बन्धेन नञ्समासापत्तेः, कळञ्जातिरिक्तभक्षणस्य च रागप्राप्तत्वेनाविधेयत्वात् पारिशेष्येण धातुसम्बन्धावगतेर्भक्षणाभावस्य च कर्तुमशक्यत्वेन प्रजापतिव्रतवदेव लक्षितस्य भक्षणाभावसङ्कल्पस्य विश्वजिन्न्यायेन स्वर्गार्थत्वेन विधानमिति प्राप्ते—

'तस्य व्रतम्' इत्युपक्रमानुसारात् प्रजापतिव्रतेषु लक्षणाङ्गीकारेऽपि प्रकृते लक्षणायां प्रमाणाभावात् प्रधानान्वयस्याभ्यर्हितत्वेन नञोऽभाववाचकस्य प्रतियोगितासंसर्गेण भावनायामेव स्वकारकविशिष्टायामन्वयः । न चान्यथात्वापत्तिः । पुरुषे भावनानुत्पत्तावपि प्रत्ययेन तस्या एव बोधनेनान्यथात्वाभावात् । अत एव निषेधस्थले लिङर्थभूतव्यापारस्य न विधिवाक्य इव प्रयोज्यत्वसम्बन्धेन भावनान्वयः । अपि तु नञस्तात्पर्यग्राहकस्य सत्त्वात् स्वप्रयोज्याभावप्रतियोगित्वेनेति तस्य निवर्तनारूपत्वसिद्धिः । कळञ्जभक्षणभावना निवर्तनाविषय इति तु मूलानुसार्यन्वयः, नञ्सहितस्य लिङादेर्निवर्तनायां लक्षणास्वीकारात् । स्वप्रयोज्यत्वं च प्रवृत्त्यभावे प्रवृत्तिविषयस्यानिष्टसाधनत्वज्ञानं विनाऽनुपपन्नमिति तस्य प्रत्यवायजनकत्वं कल्प्यते । तेन पुरुष-

मात्रस्यैव रागतः प्रवृत्त्युन्मुखस्य निषेधेष्वधिकारः । अत एव च प्रत्यवायसाधनीभूतस्यानुष्ठेयस्य भक्षणस्य रागत एव ज्ञातत्वात्तदनुष्ठाने सति प्रत्यवायोत्पत्त्युपपत्तेर्न तदंशे तन्निषेधांशे वाऽध्ययनविधिसिद्धज्ञानापेक्षाऽपि । यत्त्वत्र निवर्तनाप्रकारकथनं प्रकारान्तरेण तन्त्ररत्ने कृतं तदर्थवादाधिकरणे कौस्तुभ एव निरस्तम् । स्वोक्तरीतिश्च विस्तरेणोपपादिता ॥ ५ ॥

(६)—तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेरन् ॥ २१ ॥ अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन् ॥ २२ ॥

श्रौतेषु स्मृत्युक्तेषु च निषेधेषु, तथा स्मार्तेष्वेवानाग्निसाध्येषु अमन्त्रसाध्येषु विधिषूपनयनात्पूर्वमपि शक्तस्याधिकारः । स्मार्तविधावुपनयनादिनियमे प्रमाणाभावात् । उपनयनस्य वेदमात्राध्ययनाङ्गत्वात् । निषेधेषु तु जातमात्रस्याधिकारः 'ब्राह्मणो न सुरां पिबेत्' इतिवत् परप्रेरणादिजन्याया अपि भक्षणादिभावनाया निषेधात् । तत्र च स्मृत्याद्यध्ययनस्यानुपयोगादिति प्राप्ते—

स्मृत्यध्ययनस्यापि 'ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति स्मृत्या उपनयनाङ्गकत्वविधानात् स्मार्तविधीनामप्युपनीताधिकारकत्वम् । निषेधेषु तु 'प्रागुपनयनात्कामचारकामवादकामभक्षाः' इति स्मृत्यैवाभ्यनुज्ञानादुपनयनोत्तरकालत्वम् । अत एव वर्णपुरस्कारेण आम्नातानां सुरापानादिनिषेधानां जातमात्राधिकारित्वमेव स्मृतिसिद्धम् । येषां तु शूद्रादीनामुपनयनाभावस्तेषां विवाहावधि, तस्य तत्स्थानत्वेन विधानात् ॥ ६ ॥

(७)—अभ्यासोऽकर्मशेषत्वात्पुरुषार्थो विधीयते ॥ २३ ॥ तस्मिन्नसम्भवन्नर्थात् ॥२४ न कालेभ्य उपदिश्यन्ते ॥ २५ ॥ दर्शनात्काललिङ्गानां कालविधानम् ॥ २६ ॥

जीवनादिनिमित्तकाग्निहोत्रादौ निमित्तस्य प्रतिक्षणं भेदात् प्रतिनिमित्तं नैमित्तिकावृत्त्या सन्ततानुष्ठानप्रतीतेस्तदनुरोधेन चाशक्याङ्गत्यागस्य वक्ष्यमाणत्वात्कालस्यापि चाङ्गत्वेन त्यागोपपत्तेः काम्यविषयत्वेन तस्य सार्थक्याच्च सान्तत्यानुष्ठानम् । अत एव सोमे वसन्तस्य निमित्तत्वात् तत्रैकैकस्मिन् सकृत्करणप्रतीतेः अमावास्यादिकालानुग्रहेऽपि न क्षतिरिति प्राप्ते—

आहारविहाराद्यनुरोधेन निमित्तश्रुतेरवश्यं सङ्कोचनीयत्वात् अग्निविद्याभ्यामिव कालेनापि सा सङ्कोच्यते । न हि कालस्याङ्गत्वेऽपि यथाशक्त्युपबन्धविषयत्वं, यस्यैव हि प्रयोगविधिप्रयोज्यत्वेन शक्तावनुष्ठानप्रसक्तिः तस्यैवाशक्तौ निमित्तश्रुत्यनुरोधेन त्यागः । ततश्च यथैवाग्निविद्ययोर्विध्यन्तरप्रयुक्त्युपजीवकत्वेन प्रयोगविध्यप्रयोज्यत्वान्न तत्, तथा कालस्यापि स्वरूपेणाननुष्ठेयस्य प्रयोगविध्यप्रयोज्यत्वाद्यथाशक्त्युपबन्धविषयत्वानुपपत्तेः । कालविधिनाऽपि निमित्तश्रुतिसङ्कोचान्न सान्तत्येनानुष्ठानम् । अत एव 'यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपादयेत्' इति काले नैमित्तिकातिक्रम एव प्रायश्चित्तम् ॥ ७ ॥

(८)—तेषामौत्पत्तिकत्वादागमेन प्रवर्तेत ॥२७॥ तथा हि लिङ्गदर्शनम् ॥ २८ ॥

कालशास्त्रेण निमित्तशास्त्रस्य सङ्कोचेऽपि यदा कालावच्छिन्नस्य निमित्तस्य पुनस्सन्निपातस्तत्र नैमित्तिकावृत्तिः। इतरथा स्वोत्पत्ताववश्यानुष्ठापकत्वरूपनिमित्तत्वानुपपत्तेः। अत एव यत्र तस्मिन्नेव निमित्ते कालमात्रस्यावृत्तिस्तत्र न नैमित्तिकावृत्तिः। यथा एकस्मिन्नेव वसन्ते पर्वावृत्तौ। अत्र च पूर्वपक्षस्यातितुच्छत्वात् सुहृद्भूत्वोपदेश इति मन्तव्यम् ॥ ८ ॥

(९)—तथाऽन्तःक्रतु प्रयुक्तानि ॥ २९ ॥

पुरुषार्थनैमित्तिकवदेव क्रत्वर्थनैमित्तिकस्यापि भेदनहोमादेरेकस्मिन् प्रयोगे भेदनानेकत्वे यदि तावत् होमात्पूर्वं तदनेकता तदाऽगृह्यमाणविशेषत्वादश्वप्रतिग्रहेष्टिवच्च तावच्छन्दाभावात् तन्त्रेणैव होमकरणेऽपि होमोत्तरं तदनेकत्वे नैमित्तिकावृत्तिस्स्यादेव। न च तत्र क्रतुजन्यापूर्वोत्पत्तेः पूर्वं होमजन्यादृष्टस्य सत्त्वात्तेनैव प्रसङ्गसिद्ध्याशङ्का। तथात्वे निमित्ते सति नैमित्तिकाकरणे निमित्तत्वव्याघातात्। अत एव निमित्ताभावे होमाभावेऽपि क्रतूपकारसिद्धिः, तत्सत्त्वे तदनुष्ठानेन, तदावृत्तावावृत्तेनेत्यपि बोध्यम् ॥ ९ ॥

(१०)—आचाराद्गृह्यमाणेषु तथा स्यात्पुरुषार्थत्वात् ॥ ३० ॥

आचारप्रमाणकेषु गुरुगमनादौ शिष्यानुगमनादिषु आवृत्तस्यैवाचारस्य दर्शनात् तन्मूलभूतश्रुतौ गुरुगमनादेर्निमित्तत्वकल्पनावगतेः प्रतिनिमित्तमावृत्तिः। न चाचरितॄणामावृत्तेर्दृष्टविधया गुरुप्रीत्यर्थत्वेनाप्युपपत्तेर्निमित्तत्वे प्रमाणाभावः। गुरुप्री-

तेरुपायान्तरेणापि सिद्धेरधीतविद्येनाप्यनुष्ठानान्नियतानुष्ठानबले-न नैमित्तिकत्वप्रतीतेः । यत्तु—तन्त्ररत्ने शास्त्रेणैव सप्तमीशतृ-प्रत्ययादिना निमित्तत्वावगतेः गुरुगमनादेरित्युक्तं तच्छ्रुतिरूप-शास्त्रसत्त्वे सूत्रकारोक्तस्याचारप्रमाणकत्वस्यानुपपत्तेरुपेक्षितम् ॥

(११)–ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्ये न संयोगात् ॥ ३१ ॥

सोमस्य 'वसन्ते वसन्ते ज्योतिषा यजेत' इति वचनादेव नित्यत्वम् । न चायं कालविधिः । 'वसन्ते ज्योतिषा यजेत' इति वीप्सारहितवाक्येनैव तद्विधानात् । न च विनियमनाविरहः । गुणभूतकालानुरोधेन प्रधानावृत्तेरप्राप्ततया वीप्सार्थस्यापि वि-धेयत्वे वाक्यभेदापत्तौ प्रतिनिमित्तं नैमित्तिकावृत्तिन्यायप्राप्तवी-प्सार्थानुवादबलात् तद्वाक्यस्थाया एव सप्तम्या निमित्तप-रत्वावसायात् । अग्निहोत्रादीनां तु नित्यत्वं स्थितमेव । एवं विद्याया अप्यध्ययनसहितायाः 'स्थाणुरयं भारहारः किलाभूत्' अधीत्य वेदं न विजानाति योऽर्थम्, अनधीयाना व्रात्या भवन्ति, इत्यादिनिन्दोन्नीताकरणप्रत्यवायबलेन नित्यत्वम् । एवमुपनय-नस्यापि षोडशादिवर्षोत्तरमकरणे प्रत्यवायश्रवणादेव नित्य-त्वम् । यत्तु 'षष्ठे अन्नाद्यकामस्योपनयीत' इत्यादिफलश्रवणं तदुपनयनाश्रितषष्ठादिकालस्येति ज्ञेयम् । यत्तु तन्त्ररत्ने क्रतू-नामावश्यकत्वात्तदपेक्षितविद्यादेरप्यावश्यकत्वेन फलतो नित्य-त्वमुक्तं, तत् क्रतूनां विद्याप्रयोजकत्वस्य निरस्तत्वात्तद्गत एवा-वश्यकक्रत्वकरणे प्रत्यवायावगतेः विद्यादेरकरणे क्रतूनामनधि-कारादेवानावश्यकत्वादुपेक्षितम् । एवं प्रजोत्पादनमपि । 'अनु-

त्पाद्य सुतं मोहान्मोक्षमिच्छन् पतत्यधः' इत्यविरक्तस्य प्रत्यवायश्रवणान्नित्यत्वम् । अत एव 'जायमानो वै ब्राह्मणस्त्रिभिर् ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इत्यपि सङ्गच्छते । न चात्र ब्राह्मणपदश्रवणात्तस्यैवैते नित्याः इतरयोस्त्वनावश्यका इति शङ्क्यम् । अस्यावदानविधिशेषत्वेनार्थवादस्य विधायकत्वाभावेनात्रत्यब्राह्मणपदस्योपलक्षणत्वात् ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
षष्ठस्याध्यायस्य द्वितीयः पादः.

अथ षष्ठस्याध्यायस्य तृतीयः पादः.

(१)—सर्वशक्तौ प्रवृत्तिस्स्यात्तथा भूतोपदेशात् ॥ अपि वाऽप्येकदेशे स्यात् प्रधाने ह्यर्थनिर्वृत्तिर्गुणमात्रमितरत्तदर्थत्वात् ॥ २ ॥ तदकर्मणि च दोषस्तस्मात्ततो विशेषस्स्यात् प्रधानेनाभिसम्बन्धात् ॥ ३ ॥ कर्मभेदं तु जैमिनिः प्रयोगवचनैकत्वात् सर्वेषामुपदेशास्स्यादिति ॥ ४ ॥ अर्थस्य व्यपवर्गित्वादेकस्यापि प्रयोगे स्यात् यथा क्रत्व-

न्तरेषु ॥ ५ ॥ विध्यपराधे च दर्शनात्स-
माप्तेः ॥ ६ ॥ प्रायश्चित्तविधानञ्च ॥ ७ ॥

नित्यनैमित्तिकानां कर्मणां काम्यवत्सर्वाङ्गोपसंहारेणैव प्रयोगः, एकादशे सर्वेषामङ्गानां साहित्येन क्रतूपकारजनकत्वस्य स्थापयिष्यमाणत्वात्; तिर्यगधिकरणे यथाविनियोगमधिकारकल्पनस्य स्थितत्वाच्च । न चैवं नित्येऽपि तथा कल्पने सर्वाङ्गोपसंहारसामर्थ्ये सत्यनुष्ठानाभावान्निमित्तत्वव्याघातः । अवश्यानुष्ठापकत्वरूपस्य निमित्तत्वस्य कालाग्निविद्यादिभिरवच्छेदवच्छक्त्याऽप्यवच्छेदोपपत्तेः । अतश्च यथैव कालाद्यवच्छिन्नजीवनादेरेव निमित्तत्वादकालादौ निमित्ताभावादेव नैमित्तिकाकरणे न प्रत्यवायः तथा शक्त्यभावेऽपीति बोध्यम् । न च कदाऽपि सर्वाङ्गोपसंहारासामर्थ्यं, काम्येऽपि तदापत्तेः । न वा सकृदेव सर्वाङ्गकरणसामर्थ्यमिति नियमे प्रमाणमस्ति । येन वीप्साद्यनुवादानुपपत्तिराशङ्क्येत, काम्यस्याप्यावृत्त्यनुपपत्तेः । किञ्च निमित्तस्यानुष्ठापकतया कालदेशादिवत्प्रयोगान्वयित्वात् यथैव 'अप्स्ववभृथेन चरन्ति' इत्यादावपां देशत्वादङ्गप्रधानान्वयित्वं तथा निमित्तस्यापि । अतश्चानेकेषु प्रधानेषु यथा न यथाशक्त्युपबन्धः तदकरणस्य प्रत्यवायजनकत्वबोधनादेवमङ्गानामपीति न तेषु यथाशक्त्युपबन्धः । अत एव तद्वदेव तृतीयानिर्देशोऽपि युज्यते । प्रयोगान्वयितया च निमित्तश्रुतेरङ्गविनियोगोत्तरकालीनत्वाच्छक्त्यवच्छेदकल्पनेऽपि न दोषः । एवं सत्यपि यदि निमित्तस्य प्राधान्यं स्यात्तदा तदनुरोधेनाङ्गेष्वेव शक्त्यवच्छेदः कल्प्येत, न त्वेददस्तीति प्राप्ते—

न निमित्तस्यानुष्ठापकत्वं, अपि तु विधिबोधितस्यैवानुष्ठानस्यावश्यकताबोधकत्वमात्रं, तद्बोधस्य च फलं नैमित्तिकाकरणस्य प्रत्यवायजनकत्वबोधः । अन्यथा चेतनप्रवृत्तेरावश्यकत्वानुपपत्तेः । अतश्च यथैव काम्ये प्रवर्तनाक्षिप्तेष्टसाधनत्वं प्रधानांश एव न तु साङ्गे, तथैव निमित्ताक्षिप्तप्रत्यवायजनकाकरणप्रतियोगित्वमपि प्रधान एव न तु साङ्गे । अत एव निमित्तस्यापि विनियोगविधावेवान्वयः । अत एव विनियोगोऽपि प्रवृत्तिजनकीभूतज्ञानविषयीभूतधर्मरूपः उभयसाधारण एव । अत एवाङ्गान्वयोऽपि प्रधानस्य एतदुत्तरकालीन एव, तस्य प्रधानगतफलवत्त्वज्ञानाधीनत्वात् ॥

तत्र त्वयं विशेषः—यत्काम्ये विध्याक्षिप्तेष्टसाधनत्वज्ञानोत्तरमेवाङ्गविनियोगः । नित्ये तु विधिसहकृतनिमित्ताक्षिप्तप्रत्यवायजनकाकरणप्रतियोगित्वज्ञाने जातेऽपि नाङ्गान्वयोऽनपेक्षितत्वात् । अपि तु तदुत्तरं प्रधानकरणकभावनाया भाव्यापेक्षायां पूर्वकृतपापक्षयस्य भाव्यत्वेऽवगते स इति बोध्यम् ।

अत्र हि पापक्षयस्यैव भाव्यत्वं नित्यस्थले 'धर्मेण पापमपनुदति' इत्यादिवाक्येभ्यः प्रतीयते । अत एव न विश्वजिन्न्यायेन स्वर्गकल्पनं न वाऽपुरुषार्थस्यापि यागध्वंसस्यैव भाव्यत्वकल्पनं यागस्यैव वा तत्, तृतीयानिर्देशात् समानपदश्रुतेः करणत्वेनाप्युपपत्तेश्च । न च दर्शपूर्णमासादौ क्लृप्तानामेव स्वर्गादीनां नित्येऽपि भाव्यत्वोपपत्तौ 'धर्मेण' इत्यस्यान्यपरत्वं शङ्क्यम् । तथात्वे मुमुक्षोस्स्वर्गादीनामनिष्टत्वेन तदुत्पत्तौ शास्त्रस्य हितसाधनानुष्ठापकत्वे अप्रामाण्यापत्त्या यावज्जीवादिवाक्यस्यामुमुक्षुविषयतया सङ्कोचापत्तेः । पापक्षयस्य तु सर्वाभिलषि-

त्त्वात् निमित्तस्यैव प्रयोजकतया तस्य नैमित्तिकाप्रयोजकत्वेऽपि निमित्तप्रयुक्तनैमित्तिकानुपङ्क्तिकत्वे बाधकाभावः । न चोद्देश्यानेकत्वम् । तत्त्वेऽपि द्विकर्मकत्वाभावेन अवाक्यभेदात् । अतश्च पापक्षयभाव्यकत्वावगमोत्तरमेवाङ्गान्वयात् पूर्वावगतनिमित्तान्वयानुरोधेनाङ्गेष्वेव शक्त्यवच्छेदकल्पनम् ।

न चोत्पत्तिवाक्य एवाङ्गान्वयस्य वक्ष्यमाणत्वात् तत्र चेष्टसामान्यस्यैव भाव्यत्वात् तदवगमोत्तरत्वेऽपि न निमित्तसम्बन्धावगमोत्तरत्वमङ्गान्वयस्येति वाच्यम् । सामान्यगतविशेषापेक्षया अन्तरङ्गत्वेन प्रथमं कामयावज्जीववाक्यैकवाक्यतया विशेषावगमोत्तरमेवाङ्गवाक्यैकवाक्यतयाऽङ्गान्वयाङ्गीकारेण तत्रैव शक्त्यवच्छेदोपपत्तेः । अत एव कामे निमित्ते च यस्याधिकारिणो यावन्ति प्रमाणान्तरप्रामतान्यङ्गानि तस्य तावद्भिस्सहितैराग्नेयादेरुपकुर्यादिति महावाक्यार्थकल्पनात् काम्ये सर्वाङ्गसाहित्यं, नित्ये च शक्त्यवच्छिन्नमित्यर्थलाभः । अतश्च यथैव एकस्यैव काम्यवाक्यस्य यावज्जीववाक्यस्य च सोमयाज्यसोमयाजिरूपाधिकारिभेदेन प्रधानसाहित्यभेदेऽपि यस्याधिकारिणो यावन्ति प्रमाणान्तरप्रमितानि प्रधानानि तस्य तावतां कर्मे निमित्ते च विधायकत्वं तथाऽत्रापीति न कोपि दोषः । अतस्सिद्धं निमित्तश्रुत्यनुरोधेन यथाशक्त्यङ्गहीनेनापि प्रयोग इति । अत एव विध्यपराधे 'तदेव यादृक्तादृग्घोतव्यम्' इति विगुणसमाप्तिं विध्यपराधे प्रायश्चित्तं च दर्शयति ॥ १ ॥

(२)–काम्येषु चैवमर्थित्वात् ॥ ८ ॥ असंयोगात्तु नैवं स्यात् विधेश्शब्दप्रमाणत्वात् ॥

अकर्मणि चाप्रत्यवायात् ॥ १० ॥

काम्ये तु यद्यपि फलसम्बन्धोत्तरमेवाङ्गान्वयः तथाऽपि साङ्गस्य प्रयोगविधिनाऽनुष्ठानावगमोत्तरं प्रवृत्तिकारणत्वेनोपस्थितायाः कामानायाः अधिकारिविशेषणत्वकल्पने शक्तयाऽवच्छिन्नाया एव तत्कल्पनात् अकरणे प्रत्यवायाश्रवणाच्च सर्वाङ्गोपसंहारसमर्थस्यैवाधिकार इति प्रत्युदाहरणमात्रम् ॥ २ ॥

(३)—क्रियाणामाश्रितत्वाद्द्रव्यान्तरे विभागस्स्यात् ॥ ११ ॥ अपि वाऽव्यतिरेकाद्रूपशब्दाविभागाच्च गोत्ववदैककर्म्यं स्यान्नामधेयं च सत्त्ववत् ॥ १२ ॥

एवं यथाशक्त्युपबन्धे निरूपिते तच्छेषत्वेन प्रतिनिधिविचारे कर्तव्ये उपोद्घाततयेदं विचार्यते—तत्र मूले तावत् द्रव्यस्य क्रियातोऽत्यन्तभेदाभावात् द्रव्यभेदे कर्मभेदापत्तेः न नीवाराद्युपादाने विहितक्रियासिद्धिरिति पूर्वपक्षिते अत्यन्तभेदाभावेऽप्यत्यन्ताभेदस्याप्यभावात् कर्तृदेशकालादिवत् द्रव्यभेदेऽपि तदेवेदं चलनं यजनमित्यादिप्रत्यभिज्ञाबलात् क्रियैक्यप्रतीतेः प्रतिनिध्युपादानेऽपि न क्षतिः । तत्र च जगतीतलवर्तिन्येकैव कर्मव्यक्तिः अभिव्यक्तिमात्रं तु भिद्यते । अथवा शब्दान्तरादिप्रमाणैरेव व्यक्तिभेदः, द्रव्यदेशकालकर्तृव्यक्त्यादिभिस्तु तस्या एव व्यक्तेरभिव्यक्तिभेदमात्रम् । अथवा माऽस्तु तत्रापि व्यक्तिभेदः शब्दान्तरादिप्रमाणैश्चाग्नेयत्वादिजातय एव भिद्यन्त इति सिद्धान्तितम् ।

तत् द्रव्याश्रितत्वेऽपि क्रियायास्तद्भेदे वैजात्यस्य शङ्कितुमशक्यत्वात् व्यक्त्यैक्यसिद्धान्ते चापूर्वापह्नवापत्तेः । तस्याभिव्यक्तिजन्यत्वे च यजिपदे तल्लक्षणापत्तेरुपेक्षितम् ॥

अत एवं विचारो वाच्यः—सत्यपि शब्दान्तरादिप्रमाणैराग्नेयत्वादिवैजात्ये विधेयतावच्छेदकविजातीययागत्वावच्छिन्नं प्रति व्रीहित्वादिनैव कारणत्वावगतेः, तस्यैव तज्जात्यभिव्यञ्जकत्वावसायात् न नीवाराद्युपादाने तज्जात्यवच्छिन्नसिद्धिरिति प्राप्ते—

सत्यपि तज्जात्यवच्छिन्नं प्रति तत्त्वादिना कारणत्वे न तस्य प्रत्येकं तज्जात्यभिव्यञ्जकत्वं, व्रीहित्वादिना कर्मान्तरेऽपि कारणत्वेन व्यभिचारात् । अपि तु सामग्रीत्वेनैव । सामग्री च शक्तस्य व्रीहिघटिता । अशक्तस्य तु तदघटिता । अतश्च व्रीह्यभावे नीवाराद्युपादानेऽपि विजातीययागत्वापूर्वत्वफलत्वावच्छिन्नं जायत एव । फलं परं नित्य एव तारतम्येन जायते । काम्ये तु आरम्भोत्तरमशक्तस्य शिष्टविगर्हणदोषपरिहारार्थं समापनेऽपि न फलोत्पत्तिः । सर्वाङ्गोपसंहारेणैव तदुत्पत्तेः । प्रयोगसमाप्त्यकरणे दोषमात्रोत्पत्तेः । करणे फलान्तराभावात् नापूर्वोत्पत्तिरिति केचित् । नैमित्तिकत्वाविशेषात्तु तत्रापि पापक्षयकल्पनेऽपि तत्रापि तारतम्यमित्यपि ध्येयम् ॥ ३ ॥

(४)–श्रुतिप्रमाणत्वाच्छिष्टाभावे नागमोऽन्यस्याशिष्टत्वात् ॥ १३ ॥ क्वचिद्विधानाच्च ॥ १४ ॥ आगमो वा चोदनार्थाविशेषात् ॥

१५ ॥ नियमार्थः क्वचिद्विधिः ॥ १६ ॥
तन्नित्यं तच्चिकीर्षा हि ॥ १७ ॥

काम्ये आरम्भोत्तरं नित्ये ततः पूर्वमपि श्रुतद्रव्याद्यलाभे द्रव्यान्तरं प्रतिनिधेयं न वेति चिन्तायां अशक्तावङ्गहानेन प्रयोगेऽप्यनङ्गग्रहणे प्रमाणाभावः । तथा हि—न तावद्द्रव्यादिशास्त्रम् । तस्य व्रीहित्वाद्यवच्छिन्नविधायकत्वेन नीवाराद्यविधायकत्वात्, न हि तेषु व्रीहित्वमस्ति । नापि कर्मशास्त्रं तदाक्षेपकम् । द्रव्यशास्त्रेण द्रव्यान्तरसाधारणाक्षेपप्रतिबन्धेन व्रीह्यादिविधानात् द्रव्यान्तराक्षेपानुपपत्तेः । न हि व्रीहिशास्त्रं शब्दतो नियमविधिः अपि त्वाक्षेपप्रतिबन्धद्वारा फलतः । अतश्च यथैवाग्निविद्ययोः स्वविधिप्रयुक्तयोरेव लाभादाक्षेपप्रतिबन्धेनाशक्तस्य शूद्रादेर्वा न तदाक्षेपः, अपितु अग्निविद्ययोरधिकारिविशेषणत्वमङ्गीकृत्य तद्वत एवाधिकारः, एवं द्रव्याद्यंशेऽपि प्रधानविधिनाऽनाक्षेपात् व्रीह्यादिश्रुतद्रव्यवत एवाधिकारित्वकल्पनेन न द्रव्यान्तरोपादानामिति प्रयोगोत्सर्ग एव युक्त इति प्राप्ते—

द्रव्यशास्त्रेण द्रव्यान्तरसाधारण्येनाक्षेपप्रतिबन्धेऽपि व्रीह्यादीनामग्निविद्ययोरिव स्वतन्त्रप्रयोगविधिविधेयत्वाभावात् प्रयाजादिवत् प्रधानविधेरेव व्रीह्यादिप्रयोगविधायकत्वात् प्रयोगविधिविषयीभूतानां तेषामधिकारिविशेषणत्वानुपपत्तौ निमित्तबलादशक्तौ त्यागेनापि प्रधानकर्तव्यतावगतेस्तस्य च द्रव्यान्तरमन्तरेणायोगाद्युक्तं तदाक्षेपकत्वम् । अग्निविद्ययोस्तु स्वतन्त्रप्रयोगविधिसिद्धयोरेतत्प्रयोगविधिविषयत्वाभावेन यथाशक्त्युपबन्धविषयत्वाभावात् युक्तमधिकारिविशेषणत्वमिति वैषम्यम् ॥

न चैवमपि द्रव्यस्योत्पत्तिवाक्ये श्रुतस्य निमित्ताद्यन्वयात्पूर्वमेव यागाद्यन्वयात् पश्चादवगम्यमाननिमित्त एव द्रव्यावच्छेदकल्पनात् द्रव्यावच्छिन्नजीवनादेरेव निमित्तत्वावगतेः कथं द्रव्यान्तरेण याग इति वाच्यम् । विशिष्टविधौ निमित्तान्वयात्पूर्वं भावनायामन्वितस्यापि द्रव्यस्य विशेषणविधौ यागाङ्गताबोधदशायां यागगतफलवत्त्वज्ञानार्थं कामयावज्जीववाक्याभ्यामेकवाक्यत्वाङ्गीकारेण निमित्तपापक्षयाद्यन्वयोत्तरमेव द्रव्यस्य यागाङ्गताबोधेन प्रयाजादिवत्तत्रापि यथाशक्त्युपपन्धोपपत्तेः । अतस्तदा कर्मशास्त्रेण सदृशसाधारण्येन द्रव्यान्तराक्षेपाद्युक्तः प्रतिनिधिः । तस्य चाङ्गत्वाभावेऽप्युपकारकत्वमात्रेण ग्रहणं बोध्यम् । एवं च कर्मचोदनया यत्किञ्चिद्द्रव्यप्राप्तौ युक्त्यन्तरेण सदृशस्य वचनेन च पूतीकानां नियम इति वक्ष्यते ॥ ४ ॥

(५)—न देवताग्निशब्दक्रियमन्यार्थसंयोगात् ॥ १८ ॥ देवतायां च तदर्थत्वात् ॥ १९ ॥

एवं सर्वत्र प्रतिनिधौ प्रसक्ते देवतायां स न भवति । यदि ह्यर्थमात्रस्यैव देवतात्वं त्यागकालीनोच्चारणकर्मभूतशब्दप्रतिपाद्यत्वरूपं भवेत् तदा तस्य शब्दविशेषापेक्षायां प्रतिपादकत्वेन विधिगतस्योपस्थितस्य शब्दस्य नियमेऽपि रोगादिना तत्पदोच्चारणासम्भवे तादृशार्थस्य यागाङ्गत्वानपायात् तद्बोधकश्रौतलाक्षणिकशब्दान्तरप्रयुक्त्या भवेदपि प्रतिनिधिः । यदा तु दाशमिकाधिकरणवक्ष्यमाणरीत्या विधिगतशब्दविशिष्टस्यार्थस्य तादृशशब्दमात्रस्य वा देवतात्वं तदा कः प्रसङ्गः शब्दान्तरस्य । न हि हविस्त्यागकालीनोच्चारणकर्मत्वविशिष्टविधिगतशब्दत्वस-

मनियतं अखण्डोपाधिरूपं वृद्धव्यवहारसिद्धं देवतात्वं शब्दान्तरे समस्ति। यदि तु अर्थस्यापि देवतात्वं कथञ्चिदङ्गीक्रियेत ततस्तत्रापि तादृशविधिगतशब्दप्रतिपाद्यत्वसमनियतमेव तदङ्गीकृत्य प्रतिनिध्यभावस्समर्थनीयः। अत एव यागस्य देवतात्वाक्षेपकत्वेऽपि विधेयत्वघटिततद्विषये आक्षेपकत्वासम्भवात् देवताविधिरपूर्वविधिरेव। तदसम्भवे च यागपदार्थस्य लोप एव यदा तु देवताऽपचारे प्रजापतिरिति वचनं तदभावे विधिविधया प्रामाणिकं तदा तथैवानुष्ठानम्।

एवमग्नेरपि होमाधिकरणस्य न प्रतिनिधिः। तत्राहवनीयादेस्तावदाधानविधिसिद्धत्वादेव क्रतुप्रयोगविध्यविषयत्वात्तेषामधिकारिविशेषणत्वप्रतीतेर्यथाशक्तिन्यायाविषयत्वादेव न प्रतिनिध्याशङ्का। यत्र तु लौकिकाग्नेरेव वाचनिकमधिकरणत्वं यत्र वा पदादेस्तत्रापि सत्यपि तस्य प्रयोगविधिविषयत्वेऽदृष्टार्थत्वात् न तत्प्रतिनिधिः। न हि पूर्वदेशविभागानुकूलव्यापाररूपप्रक्षेपमात्ररूपस्य होमस्याधारापेक्षाऽस्ति। अत एव तद्विधिरप्यपूर्वविधिरेव। पदादिना आहवनीयादिबाधस्तु पतनप्रतिबन्धकत्वरूपाधिकरणताया एवादृष्टोत्पादकत्वादेकेन तत्सिद्धेस्समुच्चयायोगादनुसन्धेयः। अतश्च तत्रापि तत्प्रतिनिधेरदृष्टोत्पादकत्वे प्रमाणाभावान्न सः। क्वचित्तु वाचनिको ब्राह्मणपाण्यादिरभावे विधिरेव।

एवमर्थप्रकाशनार्थेष्वपि मन्त्रेषु न प्रतिनिधिः शब्दान्तरस्य मन्त्रान्तरस्य वा। स ह्युपायान्तरेण ध्यानादिनाऽर्थेऽनवगते तत्प्रतिपादकत्वज्ञानाभावादेवानाशङ्क्यः। अवगते तु तस्मिन् स्मारकानपेक्षत्वादेव न तदुपादानम्। न चैवं यत्र स्वत एवार्थस्स्मृतः तत्र विहितमन्त्रपाठानापत्तिः। तत्र नियमादृष्टसिद्ध्यर्थं मन्त्र-

जन्यस्मृतेरेवाभ्युदयकारित्वकल्पनेन मन्त्रपाठावश्यकत्वात् । प्रतिनिधेस्तु कर्मचोदनाक्षिप्तस्य नियमादृष्टजनकत्वे प्रमाणाभावात् न पाठ इति वैषम्यम् ।

एवमन्यस्मात्तदृदृष्टोत्पत्तौ प्रमाणाभावेनादृष्टार्थप्रयाजादिक्रियाया अपि न प्रतिनिधिः । दृष्टार्थावघातादिक्रियायास्तु स समस्त्येव ।

यत्त्वत्र कैश्चिददृष्टार्थस्य षोडशिग्रहणाभावादेरपि न प्रतिनिधिः । तेन षोडश्यभावयुक्तक्रतुप्रयोगसङ्कल्पे कृते यदि दैवादनङ्गमपि तत्र षोडशी कृतः तदा षोडश्यभावस्याभावे तददृष्टार्थं नाभावान्तरं प्रतिनिधेयमित्युक्तम् । तन्न 'नातिरात्रे षोडशिनं गृह्णाति' इत्यनेन षोडशिग्रहणाभावेऽपि इतराङ्गमात्रादेव क्रतूपकारसिद्धिरित्यवगमात् षोडशिग्रहणाभावस्यादृष्टोत्पादकत्वे प्रमाणाभावात् । अत एव तत्र षोडशिग्रहणे वृथाचेष्टाकृतप्रायश्चित्तमात्रम् ॥ ५ ॥

(६)—प्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः॥२०॥

अनारभ्य श्रुतेन 'अयज्ञिया वै माषा वरकाः कोद्रवाः' इत्यनेन माषादीनां यज्ञाङ्गत्वप्रतिषेधात् यत्र साक्षात्तेषां विधानं तत्रैव विकल्पार्थः प्रतिषेधः । अथवा यत्र धान्यत्वादिना सामान्यधर्मेण विधानं तत्र स्वेच्छाप्राप्तमाषाद्यङ्गप्रतिषेधो 'बर्हिषि रजतं न देयम्' इतिवत् । अतश्च कर्मशास्त्रानुरोधेन माषादीनां प्रतिनिधिस्थले साधनत्वेऽप्यङ्गत्वाभावात् तत्र न प्रतिषेधः । वक्ष्यमाणयुक्त्या द्रव्यशास्त्रानुरोधेन माषादिरूपसदृशप्रतिनिधि-

स्थले व्रीह्यवयवत्वादिनैव तेषां ग्रहणादवर्जनीयतया माषाद्युपादानादङ्गत्वाभावेन न प्रतिषेधः । अतस्तेऽपि प्रतिनिधेया इति प्राप्ते—

अयज्ञिया इत्यनर्हार्थप्रत्ययेन साधनत्वमात्रनिषेधाद्विशेषविहितातिरिक्तस्थले सर्वत्रैव माषादिप्रतिषेधप्रतीतेर्न प्रतिनिधेयाः द्रव्यसामान्याभावे तु ग्राह्या एवेति ध्येयम् । अत्र च लक्षणया यज्ञोद्देशेन माषनिषेधविधानात् नैकप्रसरताभङ्गः ॥ ६ ॥

(७)—तथा स्वामिनः फलसमवायात् फलस्य कर्मयोगित्वात् ॥ २१ ॥

मृते तावद्यजमाने पत्न्यां वा नान्यतरेणान्यतरस्य प्रतिनिधिः यजमाने मृते पत्न्या अग्न्यभावादेवानधिकारात् पत्न्यां मृतायां यजमानस्यापि

आयायै पूर्वमारिण्यै दत्वाऽग्नीनन्त्यकर्मणि ।

इति पक्षे तावदग्न्यभावादेव, विवाहात्पूर्वमनधिकारात् । तत्रापि विधुराधानपक्षे अनौत्तरवेदिककर्मणां पत्नीव्यतिरेकेणैव वाचनिकत्वेन पत्नीप्रतिनिध्यप्रसक्तेः । यदा तु नाग्नीनां पत्न्यै दानं तदाऽपि 'तदाहुरपत्नीकोऽप्यग्निहोत्रमाहरेत्' इति वचनात् पत्नीव्यतिरेकेणैव अग्निहोत्रमात्रानुष्ठानमिति न प्रतिनिधिप्रसक्तिः । यदा तु कस्यचित् कर्मणो मध्येऽन्यतरस्य मृतिस्तदा दाहात्पूर्वमेव तत्समापने वक्ष्यमाणरीत्या प्रोषितादिवदेवानुष्ठानमिति न प्रतिनिधिप्रसक्तिः । रोगादिना अशक्तौ कार्यान्तरव्यापृते वाऽन्यतराधिकारिककर्मसु यद्यपि स्वामिनः कालादिवत्प्रयोग-

विध्यविषयत्वात् तत्तदेकत्वादिवदेव न प्रतिनिधिप्रसक्तिः । तथाऽपि

सन्ध्यामिष्टिं चरुं होममसगोत्रेण कारयेत् ।

इत्यादिवचनबलाच्छिष्टाचाराच्चानुमतिद्वारा कर्त्रन्तरेणाप्यनुष्ठानं स्वत्वत्यागमात्रं तु सति सम्भवे स्वयं कार्यम् । ना चेत्तदपि तेनैव अग्नय इदं न मदीययजमानस्येत्येवं कार्यम् । उभयाधिकारिकेषु दर्शादिषु त्यागघटितं कर्मान्यतरेणैव कार्यं द्वयोरपि संसृष्टस्वत्ववत्त्वात् । अत एव त्यागोऽपि तादृशस्थले मम यजमानस्य च नेत्यादिरूपः । उभयोरशक्तावध्वर्युणैव, असति बाधे सामान्यसमाख्यया तत्प्राप्तः । एवं यजमानप्रवासेऽपि । पत्न्यास्तु प्रवासेऽग्निविच्छेद एव । एवमाज्यावेक्षणादियजमानपदार्थानामध्वर्युणैव करणम् । पत्नीपदार्थानां च सामान्यसमाख्याऽनुरोधेन यजमानस्याप्राप्तेः । एवं फलिसंस्कारष्वपि आनीयमाने फलाभावात् न प्रतिनिध्याशङ्का । अतस्तेषामशक्त्यादौ लोप एव । न तु दम्पतिभ्यां परस्परमपि करणं, तत्तद्वाक्ये यजमानत्वादेरुद्देश्यतावच्छेदककोटिप्रविष्टत्वात् । अध्वर्य्वादीनामशक्त्यादौ तु अध्वर्य्वाद्यन्तरमेवोपादेयमिति न तत्र प्रतिनिधिः ॥ ७ ॥

(८)—बहूनां तु प्रवृत्तेऽन्यमागमयेदवैगुण्यात् ॥

एवं तावत्स्मृत्याचारप्रामाण्यात् क्वचित्कर्त्रन्तरसत्त्वेऽपि न्यायेन तत्प्रतिनिधिरिति स्थितेऽपवादः क्रियते—सत्त्रमध्ये कस्यचिद्यजमानस्य मरणे तत्प्रतिनिधिरन्यः कार्य एव । काम्यस्यापि प्रारब्धस्यावश्यं समापनीयत्वात् । यद्यपि च मुख्यकर्तुः प्रयोगविध्यविषयत्वान्न प्रतिनिधिः न वा मृतेन तदुपादानस-

म्भवः । तथाऽपि 'साङ्कर्तरि सप्तदशावरास्सत्रमासीरन्' इति वाक्येन साप्तदश्यविधानात् साप्तदश्यरूपाङ्गसम्पत्त्यर्थमन्योपादानमवशिष्टैः यार्थम् । न च तस्याख्यातोपात्ताधिकारिसङ्ख्याविशेषत्वादानीयमानस्य च वक्ष्यमाणरीत्या फलभोक्तृत्वाभावादधिकारित्वानुपपत्तेः कथं तमादाय साप्तदश्यसम्पत्तिः । फलभोक्तृत्वाभावेऽपि कर्तृनिष्ठत्वमात्रेणैव साप्तदश्योपपत्तेः । अत एवार्त्विज्येऽपि 'ये यजमानास्त ऋत्विजः' इत्यनेन जघन्यऋत्विक्पदे आर्त्विज्यलक्षणामङ्गीकृत्य तदुद्देशेन यजमानानां कर्तृत्वविधानात् यजमानपदस्य च शानजन्ततया आत्मनेपदरूपत्वेन फलभोक्तृत्वविशिष्टकर्तृत्ववाचित्वेऽपि यथाशक्ति प्रयोगेण भोक्तृत्वाभावेऽप्यानीयमानस्य कर्तृत्वसत्त्वात् सङ्ख्यासम्पत्त्यविघातः । ततश्च सङ्ख्यासम्पत्तये न्यायेनैवात्र प्रतिनिध्युपादानम् । एवं च न्यायप्राप्तेः पूर्वमेव प्रवृत्तेन "यदि सत्राय दीक्षितानां प्रमीयेत योऽस्य नेदिष्ठस्स्यात् तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरन्" इत्यनेन वचनेन नेदिष्ठत्वविधानार्थं पुनर्विधिः । अत एवेदमधिकरणं शिष्यव्युत्पत्तिमात्रार्थं, तदभावेऽपि वचनेनैवान्यागमोपपत्तेः । अत्र च पत्नीमरणेऽपि 'तेन सह यजेरन्' इति पुल्लिङ्गनिर्देशात् यजमानसाप्तदश्येनैव च सङ्ख्याया अपि सम्पत्तेः तत्कर्तव्यपदार्थानां च पत्न्यन्तरेण यजमानैरेव वा सिद्धेः नान्यानयनम् । अत एव तादृशस्थले पत्न्या नाग्निभिर्दाहः । किन्त्वग्न्यन्तरेणैव । यजमानस्य तु मृतस्य पृथक्कृतस्वाग्निभिर्दाहेऽप्यनाहिताग्निसाधारण्येन आनीतस्याग्निसंसर्गे प्रमाणाभावात् ऋत्विग्वदेव कर्तृत्वोपपत्तिः ॥ ८ ॥

(९)—स स्वामी स्यात् तत्संयोगात् ॥ २३ ॥

कर्मकरो वा भृतत्वात् ॥ २४ ॥ तस्मिंश्च फलदर्शनात् ॥ २५ ॥

पूर्वाक्षेपेणेदं आनीयमानस्य न कर्तृत्वमात्रं, अपि तु स्वामित्वमपि तत्स्थानापन्नत्वात् दीक्षारूपफलिसंस्कारश्रवणाच्चेति प्राप्ते—

न तावदत्र सत्रफलं तस्य वैगुण्ये सत्यनुपपत्तेः । तद्धि न तावदानीतस्य साङ्गकर्तृत्वाभावात् । अत एव न मृतस्यापि । नाप्यवशिष्टानां सप्तदशस्वामिकसत्रकर्तृत्वाभावात् । अवशिष्टैस्तु शिष्टविगर्हणादोषपरिहारार्थमवश्यं क्रतुसमापने साम्राद्युपायैस्सङ्ख्यासम्पत्त्यर्थमन्यस्समानीयते । अत एव प्रारम्भानिमित्तकसमापनसाध्यपापक्षयोऽप्यवशिष्टानामेव नानीतस्य प्रारम्भरूपनिमित्ताभावात् । अतस्तस्य कर्तृत्वमात्रमिति सिद्धम् ॥ ९ ॥

(१०)—स तद्धर्मा स्यात् कर्मसंयोगात् ॥२६॥

फलिसंस्काराः ब्रह्मचर्यपयोव्रतादय आनीतस्य फलित्वाभावादप्राकृतकार्यकारित्वापत्तेर्न कर्तव्याः । अवशिष्टानां तु सत्रफलाभावेऽपि प्रारम्भानिमित्तकपापक्षयस्य सत्त्वात्कर्तव्याः । अत एव फलिसंस्काराणां प्रकृतौ प्रधानफलाधानयोग्यताजननार्थत्वात् यदा प्रधानकरणात्पूर्वं मृतिस्तदैव तेषां फलिसंस्काराः । पापक्षयस्य प्रधानजन्यत्वात् न तदूर्ध्वमिति ध्येयम् । दीक्षाकरणं त्वानीतस्य वाचनिकमप्राकृतं कार्यमिति प्राप्ते—

यद्यपि न तस्य फलित्वं तथाऽप्यन्येषां फलिसंस्कारकर्तरि साप्तदश्यसम्पत्त्यर्थमानीतस्यापि ते कार्याः । न च ब्रह्मच-

र्यादिषु पुरुषस्य संस्कार्यत्वेन कर्तृत्वस्यार्थिकत्वात्सङ्ख्यायाश्च वैध एव कर्तृत्वे निवेशात् फलिसंस्कारकर्तरि साप्तदश्याभावः वैधावैधसाधारणावश्यककर्तृत्वद्वारेणैव लाघवात् साप्तदश्यस्य सत्त्राङ्गत्वोपपत्तेः। अतस्तत्सम्पत्त्यर्थं कर्तव्या एव फलिसंस्काराः। ननु 'सप्तदशावराः' इत्यनेन सत्त्रप्रयोगकर्तृपरिच्छेदकत्वेन साप्तदश्यं विहितं न तु प्रत्येकं, तत्तत्पदार्थे। प्रत्येकपदार्थानां सप्तदशभिरकरणात्। न चानुमतिद्वारा सप्तदशानां सर्वत्र कर्तृत्वं तथात्वे फलिसंस्कारेष्वप्यनुमतिद्वारेणैव साप्तदश्योपपत्तेरानीते फलिसंस्कारकरणानापत्तेः। किञ्चैवं मृतस्यैव पूर्वकाले अनुमतिसत्त्वात् सङ्ख्यासम्पत्तिसम्भवेनानयनवैयर्थ्यम्। मृतकर्तव्यपदार्थानुष्ठानार्थमानयनमिति चेत्तेषां कर्मान्तरेष्विव आध्वर्य्वादिसमाख्यया 'इतरमन्यस्तेषाम्' इति न्यायेन वा कर्त्रन्तरैरेव सिद्धेः। अतश्चानयन एव प्रमाणाभावे कुतस्त्यं संस्कारकल्पनामिति चेत्—तन्न—न्यायेन तदसिद्धावपि वचनेनैव तत्सिद्धेः। अत एवोक्तवचने दीक्षितमरणे निमित्ते दीक्षानेदिष्ठसाहित्याद्यनेकगुणविशिष्टनैमित्तिकव्याप्यतावत्पदार्थप्रयोगस्यैव विधानात् न वाक्यभेदः। दीक्षा चाप्राकृतकार्योऽपि वचनादेव विधीयते। तस्याश्च यमनियमपरिग्रहरूपत्वात् ब्रह्मचर्यादिसिद्धिः। एवं च येकेचित्तद्भिन्नास्संस्कारास्ते न कार्या इति प्रतिभाति। सत्त्राय दीक्षितानामिति श्रवणाच्च नाहीने तदानयनम्॥ १०॥

(११)—सामान्यं तच्चिकीर्षा हि॥ २७॥

एवं प्रतिनिधौ विचारिते किं सति सम्भवे सदृश एव प्रतिनिधिरुतानियम इति चिन्तायां— कर्मचोदनया यत्किञ्चिद्-

व्यमात्राक्षेपात् द्रव्यशास्त्रस्य च नीवारेषु व्रीहित्वाभावेन सदृशनीवारादिनियामकत्वाभावात् न सदृशनियमः । न च व्रीह्यवयविनस्स्वावयवैरत्यन्तभेदाभावात्तदवयवानामेव कतिपयानां नीवारोपादानतया नीवाराभिन्नतया व्रीहिशास्त्रेणैव तद्विधानमिति वाच्यम् । तथात्वे व्रीहिसत्त्वेऽपि ,नीवारोपादाने वैगुण्याभावप्रसङ्गादिति प्राप्ते—

व्रीहिशास्त्रेण व्रीहित्वजातेस्साधनत्वे प्रमिते अमूर्तायास्तस्यास्साधनत्वासम्भवादर्थात्तत्परिच्छिन्नस्यावयविनस्साधनत्वमवगम्यते । तस्यापि चावयवोपादानव्यतिरेकेण साधनत्वासम्भवात् तदवयवानामपि साधनत्वमर्थादेवावगम्यते । तज्जातीयावयवानामेव च कतिपयानां विजातीयावयवान्तरोपेतानां नीवारारम्भकत्वमिति यथाशक्तिप्रयोगे जातेरवयविनो अवयवान्तराणां च साधनत्वासम्भवेऽपि कतिपयावयवानामेव तत्सम्पत्त्यर्थमवर्जनीयतया नीवारविजातीयतदवयवोपादानमिति सदृशप्रतिनिधिनयमसिद्धिः । अत एव सादृश्यं समानजातीयावयवारब्धत्वेनैव नियामकं न तु समानजातीयधर्मान्तरेण तस्य व्रीहिशास्त्राविषयत्वात् । एवं च व्रीह्याद्यभावे सुसदृशं तदभावे मन्दसदृशमित्यादिक्रमेण बोध्यम् ॥ ११ ॥

(१२)—निर्देशात्तु विकल्पे यत्प्रवृत्तम् ॥ २८ ॥ अशब्दमिति चेत् ॥ २९ ॥ नानङ्गत्वात् ॥

वैकल्पिकेषु 'खादिरे बध्नाति, पालाशे बध्नाति' इत्यादिषु एकेन प्रक्रान्ते प्रयोगे यदि तस्यापचारः तदा वैकल्पिकान्तरमेवोपादेयं न तु पूर्वोपात्तसदृशं वैकल्पिकान्तरस्याप्युद्देश्य-

तावच्छेदकसामानाधिकरण्येन विहितस्य तस्मिन्नपि प्रयोगे अङ्गत्वस्वरूपयोग्यतया मुख्यत्वेन जातिव्यक्तिसर्वावयवानामेव साधनत्वसम्भवे पूर्वोपात्तारम्भककतिपयावयवमात्रग्रहणे प्रमाणाभावादिति प्राप्ते—

तस्मिन्नपि प्रयोगे इतरस्याङ्गत्वेन तदभावकृतवैगुण्यापत्तेरवश्यं वैकल्पिकस्थले तत्तद्वाक्ययोस्तत्तद्घटितप्रयोगमात्रविषयकत्वावसायात् तत्प्रयोगे इतरस्याङ्गत्वाभावेन पूर्वोपात्तसदृशमेवोपादेयम् । अत एवाग्नेयत्वादिव्याप्यधर्मावच्छिन्नं प्रत्येव व्रीह्यादेः कारणत्वमित्युक्तं कौस्तुभे । तत्रापि 'वैकल्पिकानामादितोऽवधारणम्' इत्यस्य प्रामाणिकत्वे सङ्कल्पोत्तरमेव तदभावे तु एकोपादानोत्तरमेव तस्यापचार इति द्रष्टव्यम् ॥ १२ ॥

(१३)—वचनाच्चान्याय्यमभावे तत्सामान्येन प्रतिनिधिरभावादितरस्य ॥ ३१ ॥ न प्रतिनिधौ समत्वात् ॥ ३२ ॥ स्याच्छ्रुतिलक्षणे नियतत्वात् ॥ ३३ ॥ न तदीप्सा हि ॥ ३४ ॥

'यदि सोमं न विन्देत पूतीकानभिषुणुयात्' इत्यादौ किं सोमाभावे पूतीकत्वेन रूपेण पूतीकानां विधानं उत ? प्रतिनिधिविधया पूतीकगतसोमावयवानां नियम इति चिन्तायां—प्रतिनिधिनियमे पूतीकपदस्य तद्गतसोमावयवे लक्षणापत्तेरभावे विधिरेवायम् । न च नियमविधिलाघवानुरोधेन तदङ्गीकरणमप्यदोषः । निषादस्थपत्यधिकरणन्यायेनापूर्वविधिगौरवस्य फ-

लमुखत्वात् । अभावे विधिपक्षेऽपि प्रतिनिधिनियमस्यार्थसिद्ध-त्वाल्लाघवस्यास्मन्मतेऽपि सत्त्वाच्च । न ह्ययं त्वन्मतेऽपि शाब्दः प्रतिनिधिनियमः । अपितु फलतः । तच्च फलं ममाप्यविशिष्टमेव । किञ्च—सोमाभावे सुसदृशस्यान्यस्यैव प्राप्तेः मन्दसदृशानां पूतीकानां पक्षप्राप्त्यभावादेव नियमविषयत्वानुपपत्तिः । अतः पूतीकत्वेन रूपेण पूतीकानामपि सोमाभावे विहितत्वात्तदपचारे पूतीकसदृशमुपादेयमिति प्राप्ते—

नाभावे विधिरयं तथात्वे पूतीकत्वस्य तदवच्छिन्नव्यक्तेस्तदवयवान्तराणां च सोमावयवविजातीयानां करणत्वकल्पनागौरवापत्तेः प्रतिनिधिनियमे तु क्लृप्तसोमावयवनिष्ठकरणताक्षिप्तोपादानकपूतीकपरिच्छेदकत्वेन यागोद्देशेन पूतीकत्वनियममात्रविधानात् पूतीकव्यक्त्यवयवानां यागकरणत्वाकल्पनाल्लाघवम् । अत एव न लक्षणाऽपि । 'पूतीकानभिषुणुयात्' इत्यत्र तु तृतीयाया अश्रवणात् द्वितीयया यागप्रयोजकत्वस्यैव निरुक्तसम्बन्धेन लक्षणेऽपि न दोषः । यद्यपि च तेन सम्बन्धेन पूतीकत्वस्यैतद्विध्यभावे न पक्षे प्राप्तिः । पूतीकानां मन्दसदृशत्वेन सोमाभावे सुसदृशस्यैव प्राप्तेः । तथाऽपि कर्मचोदनया यत्किञ्चित्प्रतिनिधिप्रसक्तौ सदृशन्यायेन नियमकरणात्पूर्वमेवैतद्वचनप्रवृत्त्या नियमोपपत्तेः । अत एव पूतीकगतसोमावयवनियमफलकपूतीकत्वनियमकरणेऽपि न पूतीकानां सुसदृशाभावे उपादानं, किन्तु सोमाभाव एव, वचनस्यैव शीघ्रप्रवृत्तिकतया नियामकत्वात् 'यदि सोमम्' इति अनुवादसामर्थ्याच्च । एवं च पूतीकापचारे सोमपूतीकोभयसदृशं ग्राह्यम् । पूतीकत्वस्यापि कारणकोटौ प्रवेशात् ॥

यत्तु शास्त्रदीपिकायामेतादृशविषये सोमसदृशमेव ग्राह्य-मित्युक्तं, तत् तन्त्ररत्नविरोधादुपेक्षितम्। तदभावे तु सोममात्र-सुसदृशं पूतीकत्वावच्छिन्नसंसर्गस्य सोमावयवाङ्गत्वेन 'गुणलोपे च' इति न्यायेन बहुतरसोमावयवानामेवानुग्राह्यत्वात्। अभावे त्रिधिपक्षे तु सोमाभावे निमित्ते पूतीकानामेवाङ्गत्वात्तत्सदृश-मवेति विशेषः। अत एव यत्र व्रीह्यादौ तदवयवत्वेनैव नीवारप्रतिनिधिः तत्र नीवारत्वस्यानङ्गत्वात् तदपचारे व्रीहि-सदृशमेवोपादेयं न तूभयसदृशमित्यपि सुलभम्। अत एव मूले उभयविधप्रतिनिध्यपचारे अधिकरणद्वयं कृतं तत्तु मया स्पष्टत्वादुपेक्षितम् ॥ १३ ॥

(१४)—मुख्याधिगमे मुख्यमागमो हि तदभा-वात् ॥ ३५ ॥ प्रवृत्तेऽपीति चेत् ॥ ३६ ॥ नानर्थकत्वात् ॥ ३७ ॥

यदा मुख्यमलभ्यं मत्वा प्रतिनिधिमुपादातुं प्रवृत्त उपा-दाय वा द्वित्राः सर्वे वा संस्काराः कृताः, कार्यं न कृतं तत्र कार्यकरणात्पूर्वं मुख्यलाभे तमेवोपादाय पुनस्संस्कारान् आशु कृत्वा तेनैव प्रधानं कार्यं मुख्यसम्भवे विकल्पोपादा-नस्य वाचनिकस्याप्यन्याय्यत्वात्। न च प्रतिनिधित्यागे सङ्क-ल्पबाधः द्रव्यांशे पृथक्सङ्कल्पे प्रमाणाभावात्। सत्त्वेऽपि वा 'य-थाशक्ति शास्त्रार्थं सम्पादयिष्ये' इत्येव सङ्कल्पात्। प्रधानानुरो-धेन पुनस्संस्कारकरणस्य न्याय्यत्वाच्च। यदा तु प्रतिनिधिनैव का-र्यं निष्पन्नं तदा प्रयोजनाभावात् न मुख्यमुपादेयम्। मुख्या-भावनिमित्तकप्रायाश्चित्तमात्रमेव तु कार्यम् ॥ १४ ॥

(१५)—द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात् ॥ ३८ ॥ अर्थद्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तेर्द्रव्याणामर्थशेषत्वात् ॥ ३९ ॥

यदा नियोजनादिकार्यमात्रयोग्यो मुख्यः तक्षणादिसकलसंस्कारयोग्यस्तु प्रतिनिधिस्तदा मुख्यस्यैवोपादानं 'संस्काराणां तु गुणलोपे च मुख्यस्य' इति न्यायेन लोपेऽपि न दोषः। न चान्यत्र तथात्वेऽपि यूपस्य दृष्टादृष्टसंस्कारसमूहरूपत्वान्न संस्काराणां काष्ठाङ्गत्वमिति वाच्यम्। लाघवेन सकलसंस्कारजन्यपरमापूर्वविशिष्टकाष्ठस्यैव यूपपदार्थत्वात्। अत एव 'यूपं तक्षति' इत्यादौ काष्ठस्यैव संस्कार्यत्वान्न काऽप्यनुपपत्तिः। यत्र तु प्रधानभूतनियोजनासमर्थमेव मुख्यं तत्र तदनादरेण प्रतिनिधिनैव कार्यसम्पादनं द्रष्टव्यम् ॥ १५ ॥

(१६)—विधिरप्येकदेशे स्यात् ॥ ४० ॥ अपि वाऽर्थस्य शक्यत्वात् एकदेशेन निर्वर्तेतार्थानामविभक्तत्वाद्गुणमात्रमितरत्तदर्थत्वात् ॥ ४१ ॥

यत्र त्वश्वशफपरिमाणशेषकार्याद्यपर्याप्ताः पुरोडाशत्वजातिमात्राभिव्यक्तिसमर्था व्रीहयो लभ्यन्ते तत्र तेनैव पुरोडाशं कृत्वा प्रधानमनुष्ठेयम्। शेषकार्याणां लोपः। न च बहूनां शेषकार्याणां पुरोडाशाङ्गभूतानां पुरोडाशाङ्गभूतैकव्रीह्यनुरोधेन लोपासम्भवः। व्रीहीणामपि यागोद्देशेन विहिततया यागाङ्गत्वेन पुरोडाशाङ्गत्वाभावात्। न चोत्पत्तिशिष्टपुरोडाशावरोधात् व्रीहि-

भिः' इति तृतीया प्रयोजकत्वपरेति वाच्यं, पुरोडाशद्वारकत्वरूपव्यापारकत्वेऽपि करणत्वस्य 'काष्ठैः पचति' इत्यादिवदुपपन्नतरत्वेन लक्षणायां प्रमाणाभावात् । अतश्चैकप्रधानाङ्गानुरोधेनानेकेषामप्यङ्गानां लोपो नायुक्तः ॥ १६ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
षष्ठस्याध्यायस्य तृतीयः पादः.

अथ षष्ठस्याध्यायस्य चतुर्थः पादः.

(१)–शेषाद्‌द्व्यवदाननाशे स्यात्तदर्थत्वात् ॥ १ ॥
निर्देशाद्वाऽन्यदागमयेत् ॥ २ ॥

दर्शादौ यदा सकलस्य पुरोडाशस्य दधिपयसोरन्यतरस्य वा हविषस्सम्पूर्णस्य नाशस्तदा प्रधानानुरोधेन हविरन्तरोत्पत्तौ प्रसक्तायां "यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आज्येनैता देवताः परिसङ्ख्याय यजेत" इति श्रुतेन आज्येनैव याग इत्यविवादम् । अत्र हि नाशादीनां प्रत्येकं निमित्तत्वे वाक्यभेदापत्तेरुत्पन्नहविरयोग्यत्वमेव 'अर्धमन्तर्वेदि' इतिवत् लक्षणया निमित्तं, न तु हविरलाभः, नाशाद्युल्लेखवैयर्थ्यापत्तेः । अत एवानुत्पन्नपुरोडाशाद्यसम्भवेनाज्यनियमः, किन्तु यत्किञ्चिदनियतप्रतिनिध्युपादानमेव । एकदेशनाशादौ तु यदि द्व्यवदानग्रहणोत्तरं पात्रीस्थस्य कुम्भीस्थस्य वा नाशस्तदा भाष्यकारमते ताव-

द्व्यवदानस्यैव हविष्ट्वात् शेषकार्याभावेऽपि तेनैव यागः। वार्तिककारमते तु यावन्निरुप्तव्रीहिपरिमितपुरोडाशस्य यावद्दुग्धं सान्नाय्यस्य च हविष्ट्वात् हविर्नाशसत्त्वेन पात्रीस्थनाशेऽपि आज्येनैव यागः। एवं तन्मते द्व्यवदाननाशेऽपि हविर्नाशाविशेषाद्धविरन्तरोत्पत्तिप्रसक्तौ वचनादाज्येन यागः। भाष्यकारमतेऽपि तादृशविषये आज्येनैव यागो न पुनः पात्रीकुम्भीस्थादवदानम्। 'मध्यात् पूर्वार्धाच्चावद्यति' इत्यनेन कृत्स्नस्य यावदुपात्तस्य प्रकृतस्य पुरोडाशादेः यो मध्यादिदेशस्तदपादानतयोपरितनभागस्यैवावदेयत्वात्। तस्य च नष्टत्वेन पुनरवदाने मध्यादेरेवावदेयत्वप्रसङ्गात्। अतस्तत्रापि हविरन्तरोत्पत्तिप्रसक्तौ आज्येन यागः। न च सर्वमते हविष्ट्वावच्छिन्ननाशादिना हविरयोग्यत्वस्य निमित्तत्वे छिन्नावयवनाशेऽपि आज्येन यागापत्तिः। निमित्तज्ञानस्यैव नैमित्तिकानुष्ठापकतया तादृशनाशस्य नित्यतया वा निमित्तत्वानुपपत्तेः। अङ्गुष्ठपर्वन्यूनावर्जनीयातिरिक्तावयवनाशे तु भवत्येवाज्येन यागः। तदेव मीमांसकमर्यादा। याज्ञिकास्तु तां न मन्यन्ते। तेषामयमाशयः—एकदेशदाहवदेवैकदेशनाशस्य न निमित्तत्वं एकदेशनाशेऽपि पुरोडाशाज्यपयोदधित्वादेः प्रत्यभिज्ञायमानत्वात्तस्यैव हविष्ट्वावच्छेदकत्वेन यावन्निरुप्तव्रीहिपरिमितत्वादेस्तदनवच्छेदकत्वात् तन्नाशस्यावर्जनीयत्वाच्च। अतः एकदेशनाशेऽप्यवशिष्टस्यैव यागः। होमः परं मध्यापादानकत्वाभावे द्व्यवदानासम्भवाल्लुप्यताम्॥

वस्तुतस्तु—यावदवशिष्टं तस्यापि हविष्ट्वात्तन्मध्यापादानकत्वं सम्भवत्येवेति होमोऽपि कार्य एव। अत एवाश्वलायनः

'द्व्यवदाननाशे पुनराप्यतनादवदानम्' इति । अतश्च यद्यपि मीमांसकमतं न्यायसिद्धं भवेत् तथाऽपि स्मृत्यनुमितवचनेन तद्बाधोऽग्निष्टुति सुब्रह्मण्योहवत् । 'आग्नेयी सुब्रह्मण्या कार्या' इत्यनेन ऐन्द्र्याः बाधः । कृत्स्नहविर्नाशे तु अनेकहविष्कायामिष्टौ कतिपयहविर्नाशे हविरन्तरोत्पत्तिरेव । सर्वहविर्नाश एवाज्येन पुनरुत्पादितेन यागः । अत एवापस्तम्बः "यद्यप्रत्तदेवतं हविः व्यापद्येत अन्यद्धविस्तद्दैवत्यं निर्वपेत् । यस्य सर्वाणि हवींषि आज्येनैता देवताः परिसङ्ख्याय यजेत" इति । यद्यपि चोत्तरवाक्ये श्रुतौ च सर्वत्वमविवक्षितं, तथाऽपि पूर्ववाक्यवैयर्थ्यापत्तेः हविरुभयत्ववदविरुद्धा सर्वनाशस्य निमित्तता ॥ १ ॥

(२)–अपि वा शेषभाजां स्याद्विशिष्टकारणत्वात् ॥ ३ ॥

यत्र तु त्यागांशयुक्तानि शेषकार्याणि यथा स्विष्टकृदादौ तत्रोत्तरार्धादिनाशे उत्तरार्धान्तराभावादवशिष्टस्य प्रतिपत्त्यन्तरगृहीतत्वाच्च न तावच्छेषेण करणम् । नापि हविरन्तरोत्पत्तिः अप्रयोजकत्वात् । किन्त्वाज्येनैव समापनम् । उक्तवचनस्य श्रुतद्रव्यनाशे द्रव्यापेक्षामात्रेणैव प्रवृत्तेः । याज्ञिकमते तु "यदि प्रत्तदेवतमाज्येन शेषं संस्थापयेत्" इत्यापस्तम्बवचनादवधेयम् । अविशेषप्रवृत्तमपीदमपेक्षानुरोधात्स्विष्टकृत्परमेव । अतस्त्यागांशाभावादिडादेः लोप एव । इदं चोत्तरार्धत्वादिनाऽनेकप्रतिपत्तिविधाने । शेषत्वेनानेकप्रतिपत्तिविधाने तु शेषैकदेशविनाशेऽप्यवशिष्टेनैवावयवशस्सर्वप्रतिपत्तिकरणमिति ध्येयम् ॥

(३)-निर्देशाच्छेषभक्षोऽन्यैः प्रधानवत् ॥ ४ ॥ सर्वैर्वा समवायात्स्यात् ॥ ५ ॥ निर्देशस्य गुणार्थत्वम् ॥ ६ ॥ प्रधाने श्रुतिलक्षणम्॥ अर्थवदिति चेत् ॥ ८ ॥ न चोदनाविरोधात् ॥ ९ ॥

शेषप्रसङ्गादिह दर्शपूर्णमासयोश्शेषभक्षाः श्रुताः । तत्रेडाभक्षे 'यजमानपञ्चमाः इडां भक्षयन्ति' इति श्रुताः कर्तारः । तथा प्राशित्रभक्षे 'प्राशित्रं ब्रह्मणे परिहरात' इति श्रुतः । चतुर्धाकरणभक्षेऽपि व्यादेशाम्नानाच्चत्वार ऋत्विजः यजमानभागब्रह्मभागयोस्तावेव । शंयुवाककालभक्षे तु 'हविश्शेषान् भक्षयन्ति' इत्याम्नातेन बहुवचनेन आध्वर्यवसमाख्याबाधेऽपि कर्मकरत्वात्सर्वे ऋत्विजो भवन्ति । न चेडाभक्षे न्यायप्राप्तर्त्विक्पुनश्श्रवणस्य परिसङ्ख्यार्थत्वात् शंयुवाककालभक्षे तदन्य एव भवेयुरिति वाच्यम् । ऋत्विजां प्राप्तत्वेऽपि अप्राप्तयजमानसाहित्यस्यैव तत्र विधेयत्वेन तस्य भक्षान्तरे ऋत्विक्परिसङ्ख्यार्थत्वाभावात् । अत्र हि इडोद्देशेन कर्तृविशिष्टभक्षान्तरविधानेऽपि विशेषणविधिवेलायां प्राप्ताप्राप्तविवेकेन भक्षो यजमानसाहित्यं च विधीयते । ऋत्विजां तु भक्षस्य प्रयाजशेषाभिघारणन्यायेन कर्तृसंस्कारकत्वस्यापि वक्ष्यमाणत्वेनानन्यर्थत्वात् प्राप्तिसम्भवेन न विधानं, स्वत एवानतत्वाच्चाप्राप्तं यजमानसाहित्यं तु विधीयते । यदि तु करिष्यमाणकर्मणि बलाधानार्थत्वमपि भक्षस्येति विभाव्यते तदाऽस्तु यजमानपञ्चमत्वग्रहणं पत्नीपरिसङ्ख्यार्थम् । सर्वथा भक्षान्तरे कर्तृपरिसङ्ख्याभावात् शंयुवाककालभक्षे ऋत्विज

एव कर्तारः । अस्मिंश्च पक्षे तस्मिन् पत्नीयजमानयोर्निवृत्ति-रत्रैव 'ऋत्विजो हविश्शेषान् भक्षयन्ति' इति कल्पसूत्रकारव-चनादवगन्तव्या ॥ ३ ॥

(४)—अर्थसमवायात्प्रायश्चित्तमेकदेशेऽपि॥ १० न त्वशेषे वैगुण्यात्तदर्थं हि ॥ ११ ॥ स्या-द्वा प्राप्तनिमित्तत्वादतद्धर्मो नित्यसंयोगान्न हि तस्य गुणार्थेनानित्यत्वात् ॥ १२ ॥ गुणानां च परार्थत्वाद्वचनाद्व्यपाश्रयस्स्यात् १३ ॥ भेदार्थमिति चेत् ॥ १४ ॥ शेष-भूतत्वात् ॥ १५ ॥ अनर्थकश्च सर्वनाशे स्यात् ॥ १६ ॥

दर्शपूर्णमासयोः प्रायश्चित्ताधिकारे 'भिन्ने जुहोति स्कन्ने जुहोति' इति श्रुतम् । तत्र कृत्स्नभेद एवेदं उतैकदेशभेद एव उतोभयत्रापीति चिन्तायां–द्वयोस्सङ्कर्षे सति एकदेशभेदस्या-वर्जनीयत्वेन नित्यत्वान्निमित्तत्वानुपपत्तेस्सर्वभेद एवेदं चूर्णता-दशायां प्रयश्चित्तमिति प्रथमः पक्षः । सङ्घर्षेण कतिपयावयवा-नां चूर्णीभावेऽपि भिन्नमिति प्रतीत्यभावात् कापालिकादिस्थू-लावयवविभाग एव भेदनप्रतीतेः तस्यैवानित्यत्वेन सर्वभेदनव-देकदेशभेदनस्यापि निमित्तत्वोपपत्तेः तत्रैवायं होमः । अयं हि भेदनस्य निमित्तत्वेऽपि होमस्य प्रयोजनापेक्षायां सन्निप-त्योपकारकत्वलाभाय भिन्नकपालसंस्कारार्थः । कपाले हि भेदने-

नोक्तपरिमाणबाधात् वैगुण्यप्रसक्तौ तत्परिहाररूपः होमेन संस्कारो नानुपपन्नः। तस्य चानुपयुक्तस्य संस्कारायोगात् सर्वभेदने चोपयोगायोगादेकदेशभेदनमेव निमित्तम्। अस्तु वा सप्तमीयं संस्कार्यत्वपरैव न तु निमित्तत्वार्थिकाऽपि। न च भिन्नस्य कादाचित्कत्वान्नित्यानित्यसंयोगविरोधः रथन्तरस्य कादाचित्कत्वेऽपि सम्मीलनादिधर्मविधिवदुपपत्तेरिति प्राप्ते—

भाव्युपयोगित्वे भूतोपयोगित्वे वा तस्योपधानावश्यकत्वे— 'भिन्नं कपालमप्सु प्रक्षिपति अन्यदुपदधाति' इतिवाक्यविरोधात् नायं स्वतन्त्रो होमो भिन्नसंस्कारकः। नापि प्रकरणपठितहोमानां तत्संस्कारकत्वम्। एतेन प्राकरणिकहोमानुवादेन लौकिकस्य भिन्नकपालस्यैवाधिकरणत्वेन विधिराहवनीयबाधेनेत्यपास्तम्। होमस्य प्राकरणिकस्य कपालोपधानोत्तरत्वात् 'अन्यदुपदधाति' इत्यस्य वैयर्थ्यापत्तेः प्रायश्चित्तसमाख्यानुपपत्तेश्च। अत एवेदं कर्मान्तरं तच्च नैमित्तिकं आरादुपकारकं क्रतुवैगुण्यपरिहारार्थं क्रत्वङ्गत्वेन विधीयते। अतस्सर्वभेदनमेकदेशभेदनमुभयमप्यत्र निमित्तम् ॥ ४ ॥

(५)—क्षामे तु सर्वदाहे स्यादेकदेशस्यावर्जनीयत्वात् ॥ १७॥ दर्शनाद्वैकदेशे स्यात् ॥ १८ अन्येन वैतच्छास्त्राद्धि कारणप्राप्तिः ॥ १९ तद्धविश्शब्दान्नेति चेत् ॥ २० ॥ स्यादन्यायत्वादिज्यागामी हविश्शब्दस्तल्लिङ्गसंयोगात् ॥ २१ ॥

तत्रैव 'यस्य पुरोडाशौ क्षायतस्तं यज्ञं वरुणो गृह्णाति यदा तद्धविस्सन्तिष्ठते अथ तदेव हविर्निर्वपेत्' इति श्रुतप्रायश्चित्ते सर्वपुरोडाशदाहरूपं क्षाणमेव निमित्तम्। अग्निपाक्ये हविषि एकदेशक्षाणस्यावर्जनीयत्वात्। न चावर्जनीयक्षाणातिरिक्तैकदेशक्षाणस्यैव निमित्तत्वं, तस्यैव परिच्छेत्तुमशक्यत्वात्। न च 'तद्धविस्संतिष्ठते' इति श्रवणात्-अवशिष्टेन हविषा यागप्रतीतेः एकदेशक्षाणस्यैव निमित्तत्वं, प्रयोगसमाप्तावेवैवंजातीयशब्दप्रयोगस्य सर्वत्र दर्शनेन प्रयोगसमाप्तेरेव लक्षणया प्रकृतेऽपि प्रतिपादनीयत्वात्। अतस्सर्वक्षाण एवेदं पुनःप्रयोगरूपं प्रायश्चित्तम्। 'यद्दैवत्यं हविर्व्यापद्येत, अन्यत्तद्दैवत्यं निर्वपेत्' इत्यापस्तम्बवचनात्सर्वदाहे प्रायश्चित्तम्। यदि वाऽवदानेभ्यो न प्रभवेत्' इत्यापस्तम्बेन सर्वदाहे अवदानापर्याप्तैकदेशदाहे वा पुनःप्रयोगविधानेन तद्भिन्नैकदेशदाहे प्रायश्चित्तानुपपत्तेः। अतएवैकदेशदाहस्य परिच्छेत्तुं शक्यत्वेऽप्येतन्मूलभूतश्रुत्यैव तत्र प्रायश्चित्तासम्भवः। तादृशैकदेशक्षाणे तु प्राक्तननाशाधिकरणन्यायेनाज्येन दग्धावशिष्टेन वा प्रयोगसमाप्तिमात्रम्। एवं सर्वक्षाणेऽपि प्रयोगसमाप्तिः आज्येन पुरोडाशान्तरोत्पत्त्या वा द्रष्टव्या ॥ ५ ॥

(६)—यथाश्रुतीति चेत् ॥ २२ ॥ न तल्लक्षणत्वादुपपातो हि कारणम् ॥ २३ ॥

दधिपयसोरेकैकस्य नाशे प्रायश्चित्तमुक्त्वा 'यस्योभयं हविरार्तिमार्छेत्। ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' इत्याम्नातम्। तत्र च नार्तिमात्रस्य निमित्तता सर्वदैव कस्यचिदार्तिसत्त्वेन नित्यतया निमित्तत्वानुपपत्तेः। अतो 'अर्धमन्तर्वेदि' इतिवल्लक्ष-

णया हविरार्तिर्निमित्तमिति तावदविवादम्। अतश्च तद्वदेवोभयत्वमपि उभयपदवैयर्थ्यापत्तेः लक्षणया निमित्तकोटिप्रविष्टमिति उभयहविरार्तिरेव निमित्तम्। न ह्यत्रैकवचनादिवत् साधुत्वादिकं प्रयोजनमस्तीति प्राप्ते—

अत्रैकत्वाधिकरणन्यायेनेप्सितोद्देश्यविशेषणस्येव निमित्तरूपोद्देशविशेषणस्यापि विवक्षाऽयोगात् विशिष्टलक्षणायाश्चैकवचनाद्यनुरोधेनेव उभयपदानुरोधेन हविरादिपदेषु करणे प्रमाणाभावादुभयपदस्य चोभयमपीत्येवं पूर्वोक्तैकैकनाशप्रायश्चित्तापेक्षयाऽस्य उत्कर्षेण स्तावकतयाऽप्युपपत्तेरुभयत्वस्य निमित्तकोटिप्रविष्टत्वाभावादेकैकहविर्नाशेऽपीदं प्रायश्चित्तम् ॥

वस्तुतस्तु उभयार्तिरेवात्र निमित्तम्। न च तस्यापि नित्यत्वान्नैमित्तिकत्वानुपपत्तिः प्रकरणादेव हविर्विशेषविषयत्वोपपत्तेः। इतरथा भवन्मतेऽपि दधिपयोविषयत्वानुपपत्तेः। अतो दोहद्वयनाश एवेदं प्रायश्चित्तम्। हविःपदमेव त्वविवक्षितम्। अधिकरणं तु हविःप्राप्त्यभावं कृत्वाचिन्तया। वस्तुतस्तु पक्षद्वयेऽपि न हविरादिपदे लक्षणा सर्वेषां पदार्थानामाख्यातार्थान्वयोत्तरं पश्चात्परस्परान्वयोपपत्तेः। एवं च विशिष्टस्य निमित्ततानादरो निमित्ततावच्छेदकगौरवभियाऽन्यतरविवक्षयाऽपि निमित्तश्रुत्युपपत्तेरन्यतरपदस्य चाधानवाक्यगतपुंस्त्वस्येवानुवादत्वेनाप्युपपत्तेश्चेति द्रष्टव्यः ॥ ६ ॥

(७)—होमाभिषवभक्षणं च तद्वत् ॥ २४ ॥

उभाभ्यां वा न हि तयोर्धर्मशास्त्रम् ॥ २५ ॥

सोमे 'हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्ति' इत्यत्र हविर्धानाधिकरणकग्रावकरणकाभिषवस्याहवनीयाधिकरणकहोमस्य प्रत्यग्गमनस्य सदोऽधिकरणत्वस्य च प्राप्तत्वाद्धोमाभिषवसमानकर्तृकं भक्षान्तरमेवेदं गुणाद्विधीयते इत्युक्तम्। तत्र च होमाभिषवयोः क्लृप्तप्रयोजनयोरेव कर्तृपलक्षणत्वान्निमित्तत्वमिति तद्विशेषणस्यैकवाक्योपादानलभ्यसाहित्यस्याविवक्षितत्वम्। यदि त्वत्रार्थिकं निमित्तत्वं होमाभिषवकर्तुरेव तूपादेयत्वात्तद्विशेषणं साहित्यं विवक्षितमित्याशङ्क्येत तथाऽपि प्रयाजशेषाभिघारणन्यायेन भक्षस्य तद्गतकर्तृनियमस्य वा कर्तृसंस्कारकत्वात् हविर्विशेषणस्येव तद्विशेषणस्याप्यविवक्षा। अभिषवमात्रकर्त्रा नेष्टुन्नेत्रादिना होममात्रकर्तृभिश्चमसाध्वर्य्वादिभिरपि स भक्षः कर्तव्य इति प्राप्ते—

नियमं प्रति कर्तुस्संस्कार्यत्ववादिनः पार्थसारथैर्मते तदापत्तावप्यार्थिकेन विधिना भक्षं प्रति संस्कार्यत्वे उच्यमाने श्रूयमाणेऽपि विधौ कर्तॄणामुपादेयत्वाद्विशेषणविवक्षोपपत्तौ आर्थिकेन विधिना विशेषणविशिष्टस्यैव कर्तुरुद्देश्यत्वाङ्गीकारेण साहित्याविवक्षाऽनापत्तिः। अतोऽत्र मिळितयोरेव होमाभिषवयोरार्थिकं निमित्तत्वम्। यदि तु क्त्वाप्रत्ययस्य द्वितीयक्त्वाप्रत्ययान्तपदोपात्तक्रियायामप्यन्वयो नाव्युत्पन्न इत्यभिषवसमानकर्तृकत्वं होम एव विशेषणं विशिष्टहोमसमानकर्तृकत्वस्य च भक्षणभावनायामन्वय इत्युच्यते तदा सुतरां विशेषणविवक्षा। इतरथाऽभिषवस्याप्यविवक्षापत्तेः ॥ ७ ॥

(८)–पुनराधेयमोदनवत् ॥ २६ ॥ द्रव्योत्पत्तेर्वोभयोस्स्यात् ॥ २७ ॥

'यस्योभावग्नी अनुगतौ आदित्योऽभ्युदियादस्तमियाद्वा पुनराधेयमेव तस्य प्रायश्चित्तिः' इति श्रुतप्रायश्चित्तं किमेकैकाग्न्यनुगमेऽपि भवेत्? उत सर्वाग्न्यनुगतावेवेति चिन्तायां – उभयत्वस्य निमित्तविशेषणत्वेन त्वन्मतेऽप्यविवक्षितत्वादेकैकाग्न्यनुगमेऽपीदं प्रायश्चित्तम्। न च हविरुभयत्ववदेकैकाग्न्यनुगमे व्रातपत्यादिप्रायश्चित्तान्तराम्नानादस्योभयविषयत्वम्। तस्यादित्योदयाद्यभावविषयत्वात्। न चैवमपि प्रकरणादेवकारश्रवणात्पुनःपदयोगाच्च कर्मान्तरत्वानुपपत्तेराधानस्य चोत्पत्तिवाक्ये सर्वाग्निजनकत्वस्यैव क्लृप्तत्वेन विधेयसामर्थ्यानुरोधेनोद्देशनिर्णय इति वाच्यं, उत्पत्तिवाक्येऽप्यग्नीनामुद्देश्यत्वेनाविवक्षितविशेषणत्वात्। अत एव योगसिद्ध्यधिकरणन्यायेनाधानस्य प्रत्यग्नि भिन्न एव योग इति प्राप्ते—

'आयतनेषु सम्भारान् निवपति' इत्यत्रायतनबहुत्वस्य विवक्षितत्वादाधानस्यैकेनैव प्रयोगेण सर्वाग्न्युत्पादकत्वावगतेः विधेयसामर्थ्यानुरोधेन सर्वानुगम एवेदं प्रायश्चित्तम्। अत एव दक्षिणाग्नेर्भिन्नयोनित्वपक्षाभिप्रायेणात्रोभाविति श्रवणम्। समानयोनित्वे तु—त्रितयाग्निनाशे बोध्यम् ॥ ८ ॥

(९)—पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिस्स्यात् ॥ २८ ॥ चोदना वा द्रव्यदेवताविधिरवाच्ये हि ॥ २९ ॥

'ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' इत्यत्र हविर्नाशे आज्यादिना समापने प्रसक्ते प्रतिनिधित्वेन लाघवात्सान्नाय्यानुवादेन पञ्चशरावपरिमितौदनमात्रविधानम् । न च वाक्यभेदः पञ्चशरावौदनपदयोस्समानाधिकरणत्वेन 'अग्नये दात्रे' इतिवद्विशिष्टविधानोपपत्तेः ओदनपदस्य तात्पर्यग्राहकत्वेन पञ्चशरावमिति बहुव्रीहिणैवौदनस्योक्तत्वाच्च ऐन्द्रमिति सान्नाय्यस्येन्द्रदेवताकत्वस्यापि सत्त्वात् 'तावब्रूताम्' इतिवत्पाक्षिकानुवादः ॥

अथ वा तत्तदुत्पत्तिवाक्ये इन्द्रमहेन्द्रभेदेन सान्नाय्यस्य भेदादैन्द्रयागानुवादेनैव प्रतिनिधिविधानमिति प्राप्ते—

सुबन्तपदद्वयस्य परस्परान्वयाव्युत्पत्तेः बहुव्रीहिणा सामान्यतो द्रव्योपादानेऽपि ओदनत्वादिरूपेणोपादाने प्रमाणाभावात् तात्पर्यग्राहकत्वमङ्गीकृत्य एकत्रैव पदे विशिष्टलक्षणाङ्गीकारे च क्वापि प्राप्तकर्मानुवादेनानेकविधाने वाक्यभेदानापत्तेर्वाक्यभेदापादकगुणादेव कर्मान्तरमिदं प्रायश्चित्तत्वेन विधीयते । समाप्तिस्त्वाज्यादिनैव । 'अग्नये दात्रे' इत्यत्रापि तु न देवतामात्रविधिपक्षाश्रयणं वाक्यभेदप्रसङ्गात् अपि तु भावनान्तरविधिपक्ष एव । न चैवमत्रापि भावनान्तरत्वापत्तेर्यागान्तरत्वानापत्तिः, उत्पत्त्यन्वयिनो गुणस्य वाजिनवद्यागभेदकत्वावश्यंभावात् । अभ्युदितेष्टौ तु पूर्वदेवतापनयविधानात् यच्छब्दश्रवणाच्च विशिष्य पूर्वयागीयत्वप्रतीतेर्भावनामात्रभेद इति विशेषः ॥ ९ ॥

(१०)—स प्रत्यामनेत् स्थानात् ॥ ३० ॥
अङ्गविधिर्वा निमित्तसंयोगात् ॥ ३१ ॥

तदिदं कर्मान्तरं द्रव्यनाशप्रयुक्तवैगुण्यपरिहारार्थत्वेन सा-

म्नाय्याङ्गतया विधीयते न तु तत्फलार्थं तत्स्थाने तत्फलस्य पापक्षयादेश्शिष्टविगर्हणनिमित्तकस्य वा सान्नाय्ययागेनैव सिद्धेस्साधनान्तरानपेक्षत्वात्। न हि द्रव्यनाशे यागलोपः, द्रव्यान्तरोत्पत्त्या आज्येन वा तत्समापनोपपत्तेः। न च स्वर्गादिरूपस्य फलस्य वैगुण्ये सत्यनुत्पत्तेः तस्य साधनापेक्षायां यागस्य विधानमिति वाच्यं, तथात्वे तत्कामनाभावे तदनुष्ठाने निमित्तश्रुतेस्सङ्कोचापत्तेः अतः अपेक्षितवैगुण्यसमाधानार्थत्वेनैवास्य विधानम्। अपेक्षा च सान्नाय्ययागस्यैवेति तस्यैव विशिष्योपस्थितत्वात् तद्वाचकपदकल्पनया वाक्यात्तदङ्गत्वमेव। न तु प्रकरणात्सर्वाङ्गत्वम्। अनुष्ठानसादेश्याद्दर्शमात्राङ्गत्वं वा। अत एव नाशे निमित्ते प्रयोगान्तःपात्येवेदमङ्गं न तु क्षाणनिमित्तकपुनःप्रयोगवत्प्रयोगबहिर्भूतम् ॥ १० ॥

(११)—विश्वजित्त्वप्रवृत्ते भावः कर्मणि स्यात् ॥ ३२ ॥ निष्क्रयवादाच्च ॥ ३३ ॥

सत्रप्रकरणे 'यस्सत्रायागुरते स विश्वजिता यजेत' इति श्रुतो विश्वजित्। सत्रसङ्कल्परूपमागूरणं कृत्वा यस्सत्रं न करोति तस्येदं सत्रफलार्थत्वेन विधानं न तु सत्राङ्गतया। तथात्वे आगूरणस्य निमित्तत्वश्रवणवैयर्थ्यात्। न चैवं सत्राकरणस्यापि निमित्तान्तःप्रवेशाद्गौरवापत्तिः। अतस्सङ्कल्पमात्रे निमित्ते नैमित्तिकमिदं फलान्तरार्थं विधीयत इति वाच्यं, फलान्तरकल्पनापेक्षया सत्रफलस्यैव साधनसाकाङ्क्षस्य फलत्वकल्पने लाघवात्। तच्च फलं यद्यपि न मुख्यमेव स्वर्गादि फलत्वेन कल्पयितुं शक्यं, तथात्वे वीतायां फलेच्छायां सङ्कल्परूपस्य निमित्तस्य सत्त्वेन

नैमित्तिकाननुष्ठाने निमित्तसङ्कोचापत्तेः। तथाऽपि प्रारब्धाकरणनिमित्तदोषपरिहारार्थं त्रैध्रातवीयास्थाने विधीयते। अत एव तादृशफलवाचकपदकल्पनयैवाकरणविषयत्वसिद्धेर्न तस्यापि निमित्तान्तःप्रवेशः। अत एवैकस्याप्यकरणे अन्यैः कर्त्रन्तरं सम्पाद्य, असम्पाद्यैव वा सत्रप्रयोगेऽप्यनेनैव विश्वजित्कार्य इत्येकवचनस्याप्युपपत्तिः ॥ ११ ॥

(१२)——वत्ससंयोगे व्रतचोदना स्यात् ॥३४॥ कालो वा उत्पन्नसंयोगात् यथोक्तस्य ॥३५॥ अर्थापरिमाणाच्च ॥ ३६ ॥ वत्सस्तु श्रुतिसंयोगात्तदङ्गं स्यात् ॥ ३७ ॥ कालस्तु स्यादचोदना ॥ ३८ ॥ अनर्थकश्च कर्मसंयोगे ॥३९ अवचनाच्च स्वशब्दस्य ॥ ४० ॥

सत्रेऽप्रवृत्तस्य विश्वजिदित्युक्ते सान्नाय्येऽप्रवृत्तस्यैव व्रतमित्युक्त्यर्थमुत्तराधिकरणं, तदुपोद्घातत्वेनेदं विचार्यते। 'दर्शपूर्णमासयोर्बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायाम्' इति श्रुतम्। तत्र तृतीयया वत्सकरणकभक्षणापरपर्यायव्रतविधिः रागप्राप्तभक्षानुवादेन 'अमाषममांसमसर्पिष्कं व्रतं व्रतयति' इति वचनान्तरप्राप्तभक्षानुवादेन वा वत्समात्रविधिरिति प्राप्ते—

न तावद्वत्सस्य व्रते हस्तादिवत्करणत्वं नापि भक्ष्यत्वेनाशक्यत्वात् नापि मांसप्रकृतित्वेन विना वचनं विशसने प्रमाणाभावात्। अतः 'पुरा वत्सानपाकर्तोर्दम्पती अश्नीयाताम्' इति

वचनान्तरैकवाक्यतालाभाय 'बर्हिषा पूर्णमासे' इत्येतत्प्रायपाठाच्च वत्सप्रातिपदिकेन वत्सापाकरणं लक्षयित्वा तृतीयां चेत्थंभूतलक्षणे व्याख्यायामावास्योद्देशेन वत्सापाकरणपूर्वकालो व्रताश्रितत्वेन विधीयते । व्रतं च प्रकरणप्राप्तमिति न कश्चिद्विरोधः ॥

कालश्चेत्सन्नयत्पक्षे तल्लिङ्गसंयोगात् ॥ ४१ ॥
कालार्थत्वाद्वोभयोः प्रतीयेत ॥ ४२ ॥

यद्यपि वत्सापाकरणं कालोपलक्षणं न तु स्वयमङ्गं परार्थत्वात् । तथाऽपि तदभावे कालस्यैव ज्ञातुमशक्यत्वात् सान्नाय्ययाजिन एव वत्सापाकरणसत्त्वाद्व्रतम् । अत एवैकपुरोडाशायामग्नीषोमीयाभावेऽप्याग्नेयसत्त्वात्कालोपलक्षणसत्त्वेन उपांशुयाजेऽपि न क्षतिरिति प्राप्ते—

'शङ्खवेलायामागन्तव्यम्' इत्यादौ उपलक्षणापायेऽप्युपलक्ष्यानपायाद्वत्सापाकरणाभावेऽप्यन्वाधानपश्चाद्भावरूपतत्कालानपायात्सान्नाय्याभावेऽपि कर्तव्यमेव व्रतम् ॥ १२ ॥

(१३)—प्रस्तरे शाखाश्रयणवत् ॥ ४३ ॥ कालविधिर्वोभयोर्विद्यमानत्वात् ॥ ४४ ॥ अतत्संस्कारार्थत्वाच्च ॥ ४५ ॥ तस्माच्च विप्रयोगे स्यात् ॥ ४६ ॥ उपवेषश्च पक्षे स्यात् ॥

'सह शाखया प्रस्तरं प्रहरति' इत्यत्र प्रहरणएव शाखासाहित्यं प्रस्तरस्य न तु होम इत्युक्तं चतुर्थे । तत्तु न समप्रधानत्वेन प्रस्तरप्रहरणस्येव शाखाप्रहरणस्यापि शाखाप्रतिप-

त्तितया, किन्तु प्रस्तरप्रहरणे शाखासाहित्यं गुणत्वेन मैत्रावरुणग्रह इव पयस्साहित्यं 'सह युक्तेऽप्रधाने' इत्यनुशासनेन गुणत्वावगमादिति प्राप्ते—

शाब्दबोधे गुणत्वश्रवणेऽपि प्रयाजशेषाभिघारणन्यायेनार्थिकप्रतिपत्त्यन्तरविधिकल्पनेन प्रस्तरवच्छाखाया अपि कृतार्थत्वाविशेषेण प्रतिपाद्यत्वं, अत एव शाब्दबोधे गुणत्वश्रवणमपि प्रस्तरप्रहरणकाले प्रतिपत्त्यर्थमित्युक्तं न तु स्वयं तन्त्रम् । अतश्चासन्नयतश्शाखां विनैव प्रस्तरप्रहरणम् । पौर्णमास्यां च यथाशक्तिप्रयोगे प्रस्तराभावेऽपि 'गुणलोपे च' इति न्यायेन शाखाप्रहरणम् ॥ १३ ॥

इति खण्डदेवविरचितायां भाट्टदीपिकायां
षष्ठस्याध्यायस्य चतुर्थः पादः ॥

अथ षष्ठाध्यायस्य पञ्चमः पादः

(१)—अभ्युदये कालापराधादिज्याचोदना स्यात् यथा पञ्चशरावे ॥१॥ अपनयो वा विद्यमानत्वात् ॥२॥ तद्रूपत्वाच्च शब्दानाम् ॥३॥ आतञ्चनाभ्यासस्य दर्शनात् ॥४॥ अपूर्वत्वाद्विधानं स्यात् ॥५॥ पयोदोषात्पञ्चशरावेऽदुष्टं हीतरत् ॥६॥ सान्नाय्येऽपि तथेति

चेत् ॥७॥ न तस्यादृष्टत्वादविशिष्टं हि कारणम् ॥८॥ लक्षणार्था शृतश्रुतिः ॥९॥

दर्शपूर्णमासयोः "यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात् स त्रेधा तण्डुलान्विभजेत् ये मध्यमास्स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत् ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम्" इति श्रुतम् । तत्र निमित्तं तावत् चन्द्राभ्युदयावच्छिन्नदिने प्रारम्भ इति वक्ष्यते । स च निमित्तस्वाभाव्येनैव दर्शस्येत्यपि सिद्धमेव । नैमित्तिकं पुनरत्र किं कर्मान्तरं उत गुणान्तरयुक्तं तदेवेति चिन्तायां-वाक्यभेदापादकगुणात्कर्मान्तराण्येवात्र त्रीणि तत्तद्वाक्यैर्विधीयन्ते न ह्यग्न्यादयो देवताः दातृत्वादयस्तद्गुणाः मध्यमादीनि द्रव्याणि अष्टाकपालत्वादयः तद्धर्माः दधिशृतयोरधिकरणत्वं चरुत्वं चेत्यनेकार्थविधानं प्राप्ते कर्मणि सम्भवति । न चाष्टाकपालकत्वस्याग्नेये प्राप्तत्वेनाविधानं तत्र प्राप्तत्वेऽप्यैन्द्राग्नेऽप्राप्ततया विधेयत्वावश्यकत्वात् । न च दात्रादिपदानां यौगिकत्वात्सामानाधिकरण्यादेवाग्न्यादिपदार्थेष्वन्वयोपपत्तेः दातृत्वादिगुणविशिष्टाग्न्यादिविधानं, आग्नेयोऽष्टाकपालः, पञ्चदशान्याज्यानि इत्यादिवदिहासमस्तपदानां क्रियाव्यतिरेकेण परस्परान्वयस्याव्युत्पन्नत्वात् । अत एव प्रकृतमध्यमादिद्रव्योद्देशेन देवतान्तरमात्रविधिरित्यपास्तं, देवतातद्गुणरूपानेकविधौ वाक्यभेदतादवस्थ्यात् । किञ्चैवं स्थविष्ठादिवाक्ययोर्द्रव्यद्वयोद्देशात् वाक्यभेदः न चासौ स्वीक्रियत इति तन्मतरक्षोक्तं युक्तं, प्रमाणाभावात् सर्वत्रैव तदापत्तेश्च । किञ्च—मध्यमादिषु यच्छब्दप्रयोगेण प्रकृतग्रहणेऽपि दधिशृतयोस्तदभावात् प्रकृतग्रहणे

प्रमाणाभावेनोद्देश्यत्वानुपपत्तिः । न च तथाऽपि प्रयोगान्तर-मात्रस्यैव स्वीकारेण कर्मान्तरत्वे प्रमाणाभाव इति वाच्यं, निमित्तस्य विनियोगान्वयित्वस्यैव यावज्जीवाधिकरणे स्थापितत्वेनात्र प्रयोगान्वयिगुणाभावेन वाजिनवदेव तद्भेदानुपपत्तेः । अत एवोत्पत्त्यन्वयिनो गुणस्य कर्मभेदकत्वादेव न वाजिनवदेव भावनामात्रभेदकत्वं, अतः पञ्चशरावदेव कर्मान्तराण्येव तत्तद्द्रव्यदेवताविशिष्टानि तत्तद्वाक्यैर्विधीयन्ते । तत्प्रकृतिभूततण्डुलानां च 'त्रेधा तण्डुलान् विभजेत्' इत्यनेन मध्यमादिभावेन त्रिधा विभागः प्रयोगान्तःपातितया विधीयते । न तु देवतापनयादि । तथात्वे लक्षणापत्तेः देवतान्तरविधिबलेनैव तत्सिद्धावपनयविधिवैयर्थ्याच्च । अत एव संस्कारविधिबलादेव प्रसिद्धत्वात् 'ये मध्यमाः' इति यच्छब्दोऽप्यनुवादः । दधिशृतयोश्च न मन्मतेऽप्यधिकरणत्वेन विधिः । तथात्वे प्रणीताकार्यापन्नत्वेन सह श्रपणस्यार्थसिद्धत्वादभ्युदितेष्टिप्रकरणस्थ सहश्रपयतीत्येतद्वाक्यवैयर्थ्यापत्तेः । अनेन हि न सर्वेषां भिन्नदेवताकानामपि हविषामेककालावच्छेदेन सहश्रपणं विधीयते । एकप्रयोगविधिवशेनैव तत्प्राप्तेः । अतस्तेन सम्प्रतिपन्नदेवताकानां सहश्रपणं विधीयते । अत एवैतद्वैयर्थ्यभियैवोत्पत्तिवाक्ये दधिशृतयोर्नाधिकरणत्वेन विधिः किन्तु करणत्वेनैव । लक्षणाऽपि सिद्धान्तवन्न दोषः । अतश्चरुत्वाधिकरणत्वयोरर्थप्राप्तत्वादेवाविधानम् । एतेषां च नैमित्तिकानां कर्मणां स्वकाले क्रियमाणदर्शाङ्गत्वं प्रकरणात् तच्चाकालोपक्रमनिमित्तदोषनिर्घातार्थत्वाच्च द्वादशाधिकरणन्यायेन विकल्प्येत ॥

यदि तु अकालेऽनुष्ठितस्याविहितत्वेन वृथा चेष्टारूपत्वात्

विहितानुष्ठाननिषिद्धानुष्ठानप्रयुक्तदोषाभावेन तन्निर्घातार्थत्वानुपपत्तेरदृष्टार्थत्वमेवैतेषां नैमित्तिकानामिति विभाव्यते तदाऽस्तु समुच्चयः । यस्त्वग्नेरायतनाद्बहिर्नयनप्रयुक्तः प्रणयनपक्षे दोषो नासौ दर्शवैगुण्यापादक इति न तमादायाप्यस्य दोषनिर्घातार्थत्वमिति प्राप्ते—

भेदकप्रमाणाभावात् न कर्मान्तरम् । न च वाक्यभेदापादको गुणः, द्रव्योद्देशेन देवतामात्रविधानेन तस्य वाक्यभेदानापादकत्वात् । देवतायाश्चोपपादकीभूतयागापेक्षायामैन्द्रवायवादिवत्प्रकृतानामेवोपपादकत्वोपपत्तेः भवदुक्तरीत्यैव चरुत्वाधिकरणत्वयोरर्थप्राप्तत्वादनुवादः । यच्छब्दप्रयोगादुद्देश्यत्वाच्च मध्यमादेर्दध्यादेश्च प्रकृतस्यैव ग्रहणम् । देवताकारकस्यैकत्वाच्च परस्परविशेष्यविशेषणभावेनाग्निपदस्य तात्पर्यग्राहकत्वमङ्गीकृत्यैकपदोपादानेन वा विशिष्टस्य व्युत्पन्नत्वान्न विधेयानेकता। यथाचाष्टाकपालत्वस्य प्राप्तिस्तथाऽसन्नयतोऽधिकारप्रस्तावे वक्ष्यते । अन्त्ययोरुद्देश्यानेकत्वनिमित्तो वाक्यभेदः परमगत्या स्वीक्रियते इति मूलानुयायिनः ॥

वस्तुतस्तु स्वीकारे प्रमाणाभावात् पञ्चशरावावाक्येऽपि चैन्द्रदेवतोद्देशेन त्वत्पक्षे नैमित्तिकपञ्चशरावौदनरूपैककारकाविधानापत्तेः प्रकृते उद्देश्यानेकत्वाङ्गीकारे च तत्र विधेयानेकत्वस्वीकारस्य वारयितुमशक्यत्वात् द्रव्योद्देशेन देवतामात्रविधिपक्षानुपपत्तेर्द्रव्यदेवताविशिष्टभावनान्तरविधिपक्षेणैव सिद्धान्तोपपत्तिः। न चास्मिन्नपि पक्षे उत्पत्त्यन्वयिनो गुणस्य वाजिनवद्यागभेदकत्वापत्तिः भावनामात्रभेदकत्वेऽपि वा पञ्चशरावावाक्येऽपि तदापत्तिरिति वाच्यं, यच्छब्देन पूर्वपरामर्शकेन पूर्वयागीयत्वोपस्थित्या यागा-

न्तरप्रमापकत्वानुपपत्तेः । अत एव वाक्यभेदपरिहारार्थं परं भावनाभेदमात्रमभ्युपगम्यते । वाजिनपञ्चशरावादौ तु तदभावाद्यागान्तरत्वमिति विशेषः । अत एव धर्मिग्राहकप्रमाणेन यागैकत्वेऽवधारिते पूर्वद्रव्यावरुद्धे तस्मिन् द्रव्यान्तरयोर्दधिपयसोर्विकल्पेन समुच्चयेन वा निवेशायोगात्तयोरपि तत्तद्यागीययोरेव विधेयभावनाविशेषणत्वम् । अतश्च द्रव्यदेवताविशिष्टभावनान्तरविधानेऽपि पूर्वयागीयद्रव्याणां मध्यमादीनामेतद्भावनां प्रत्युपादेयत्वाच्च लौकिकमध्यमादिग्रहणप्रसक्तिः न वा लौकिकदध्यादिग्रहणम् । भवदुक्तरीत्यैव चरुत्वाधिकरणत्वयोरनुवादत्वेन ममाप्यविधेयत्वात् ॥

वस्तुतस्तु स्थविष्ठादिप्रकृतिकपुरोडाशेन दध्यादेस्सहश्रपणापत्तेर्न चरुत्वप्राप्तिरिति तद्विधिरावश्यक एव दध्यादिना च सहश्रपणविधानात्तदधिकरणत्वं परमनुवादः । सर्वथा न लौकिकग्रहणम् । किञ्च 'त्रेधा तण्डुलान्विभजेत्' इत्यस्यापनयविधित्वादप्ययमर्थो निर्णीयते तथाहि—न तावदत्र तण्डुलानां मध्यमादिभावेन त्रेधाविभागो विधीयते तस्य मध्यमादिवाक्यैरेव प्राप्तत्वात् । न चास्मन्मते चित्रेष्टितण्डुलवत्पुरोडाशादिप्रकृतित्वेनापि लोकसिद्धानामेव मध्यमादीनां तण्डुलानां ग्राह्यत्वापत्तेः प्रयोगान्तःपातिविभागसिद्ध्यर्थं विधिरर्थवानिति वाच्यं, लोकसिद्धमध्यमादिग्रहणे तण्डुलप्रकृतिभूतव्रीहिसंस्कारकनिर्वापप्राप्त्यभावेन महारात्र एव हवींषि निर्वपेदित्यनुवादानुपपत्तेः व्रीहीणामेवावश्योपादेयतया विभागस्याप्यर्थप्राप्तत्वाच्छ्रपणसत्त्वेन चित्रेष्टिन्यायाभावाच्च । अतस्त्रेधा तण्डुलानितिपदद्वयमानर्थक्यभिया प्रकृतहविःपरमङ्गीकृत्य तस्या-

परित्यक्तयागान्वयस्यैव प्रकृतदेवताभ्यो अपनयो विधीयते । आनर्थक्यभिया च लक्षणाऽप्यदोषः । तदपनये च प्रकृतदेवतानां यागसम्बन्धोऽप्यपनीतो भवति । न चायमपनयोऽपि नैमित्तिकदेवतान्तरविधिबलादेव सिद्ध इति विधिवैयर्थ्यं, एतद्विध्यभावे पूर्वयागस्य पूर्वदेवताऽवरुद्धतया देवतान्तरानपेक्षत्वेन तत्र नैमित्तिकदेवतान्तरस्य तद्विशिष्टभावनान्तरस्य वा विधानानुपपत्तेः। नैमित्तिकस्य हि निरवकाशतया नित्यबाधकत्वं वक्ष्यते। यागान्तरविधानेनैव सावकाशत्वोपपत्तेर्न निरवकाशता । अत एव यत्र यागान्तरविध्यसम्भवः प्रमाणान्तरप्रमितः तत्र फलचमसादौ निरवकाशेन नैमित्तिकेन नित्यापनयाभावेऽपि नित्यस्य बाधः । अत एवापनयविध्यभावादेव पञ्चशरावशवाक्ये कर्मान्तरं "यः पशुकामस्स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात् ये मध्यमास्तान्विष्णवे शिपिविष्टाय, शृते चरुं ये स्थविष्ठास्तानग्नये सनिमते अष्टाकपालं येऽणिष्ठास्तानिन्द्राय प्रदात्रे दध्नंश्चरुम्" इति वचनविहितायां पशुकामेष्टावपि चापनयनविध्यभावादेव कर्मान्तरं, यच्छब्दस्तु लोकप्रसिद्ध्यनुवादकतयैव कथञ्चित्तत्र व्याख्येयः ॥

अतश्चापनयविधिरेव पूर्वदेवतासम्बन्धं पूर्वयागानामपनयंस्तेषां देवतान्तराकाङ्क्षोद्भावनद्वारा तत्र देवतान्तरसम्बन्धमुपपादयन् क्रियान्तरत्वं प्रतिबध्नाति । प्रकृतानामेव च मध्यमादीनां दधिपयसोश्च भावनान्तरे उपादेयत्वमापादयति "यद्यगृहीतं हविरभ्युदियादेषैव व्रतचर्या यदि गृहीतं हविरभ्युदियात् अथो तर्ह्येतानेव तण्डुलान् सुफलीकृतान् दधि पयश्च" इत्यादिलिङ्गाच्चायमर्थो विज्ञायते । तेन मध्यमादि-

भेदेनाग्नेयस्य वारत्रयमावृत्तिः दधिपयोयागयोस्तु स्थविष्ठाणिष्ठसाध्याग्नेयाभ्यासेन सह तन्त्रेण करणं 'सह श्रपयति' इति वाक्याच्च श्रपणमपि तेषां सम्प्रतिपन्नदेवताकानां सहैव। अत एव दधिशृतयोः श्रपणाप्राप्तावपि साहित्यविध्यन्यथाऽनुपपत्त्यैव श्रपणं शाखासाहित्यवशेन तत्प्रहरणवत्। साहित्यं हि केनचिदावश्यकं तत्र सम्प्रतिपन्नदेवताकत्वात्प्रदानवेलायां तेन तदावश्यकत्वे श्रपणवेलायामपि तस्यैव साहित्यप्रतियोगित्वकल्पनात्, अतश्च अभ्युदितेष्टिर्न कर्मान्तरं अपि तु निमित्ते नैमित्तिकं तद्यागानामेव भावनान्तरं स्वकाले क्रियमाणदर्शप्रयोगाङ्गम्। तस्यैव अकाले प्रारम्भनिमित्तदोषपरिहारार्थं प्रायश्चित्तं अकाले प्रारम्भस्य दोषजनकत्वं सामान्यमुखेनात्रैव वा 'एनं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तम्' इत्यादिवाक्यशेषादवगन्तव्यम्॥

एवमातञ्चनाभ्यासदर्शनं "यदि बिभीयादभिमोदेष्यतीति' महारात्र एव हवींषि निर्वपेत् फलीकृतैस्तण्डुलैरुपासीत अर्धं दधि हविरातञ्चनार्थं निदध्यात् अर्धं न यद्यभ्युदियात्तेनातञ्च्य प्रचरेत् यदि न प्रातरेतेन ब्राह्मणान् भोजयेत्" इत्यकर्मान्तरत्वे उपपद्यते। बिभीयात् शङ्कयेत। महारात्रे चन्द्रोदयात्पूर्वम्। उपासीत प्रतीक्षेत। आतञ्चनार्थं स्वकाले क्रियमाणदर्शार्थदध्यातञ्चनार्थम्। अर्धं न किन्तु तदभ्युदितेष्टावेव विनियुञ्जीत, न च तत्साम्नाय्ययाग एव। तेन आतञ्चनार्थं निहितेन। एतेन आतञ्चनार्थं स्थापितेनैवेति हि तस्यार्थः। तद्यदि कर्मान्तरं स्यात् तदा तेनाकालप्रारम्भनिमित्तदोषपरिहाराय दर्शार्थमुत्पादितेन दध्ना कर्मान्तरकरणानुपपत्तेस्स्वकालक्रियमाणदर्शस्यैव तेन करणापत्तेस्तत्र हविरन्तरो-

त्पादाप्रसक्तौ तत्रातञ्चनाप्रसक्तेरर्धविध्यनुपपत्तिः । कर्मान्तरे च दध्यन्तरस्यैव संस्कारविशिष्टस्योत्पादनापत्तेर्दर्शार्थोत्पादितस्य दध्नः प्रसक्त्यभावादर्धविधानानुपपत्तिः ॥

यत्तु मूले क्रियान्तरत्वपक्षे अधिकरणत्वेन दधिपयसोर्विधानात् लौकिकस्यैवासंस्कृतस्य दध्नो ग्रहणापत्तेर्दर्शार्थोत्पादितस्य प्रसक्त्यभाव इत्युक्तं, तत् 'सह श्रपयति' इत्यस्य वैयर्थ्यापत्तेस्तुल्यत्वेन हविष्ट्वेनैव विधानस्यावश्यकत्वादुपेक्षितम् । सिद्धान्ते तु प्रायश्चित्तस्य दर्शत्वानपायादत्रैव सर्वस्य दध्नः प्रसक्तौ स्वकालेक्रियमाणदर्शे च दध्यन्तरोत्पादनार्थमातञ्चनप्रसक्तावभ्युदयशङ्कायां निमित्ते आतञ्चनसाधनत्वेनार्धमात्रविधिरुपपद्यते । अर्धान्तरस्यार्थादेवाभ्युदितेष्टौ प्राप्तत्वादनुवादो विधिर्वेत्यन्यदेतत् ॥ १ ॥

(२)—उपांशुयाजेऽवचनाद्यथा प्रकृति ॥ १० ॥ अपनयो वा प्रवृत्त्या यथेतरेषाम् ॥ ११ ॥

तत्रैवोपांशुयाजद्रव्यस्याज्यस्यापनयोऽस्ति न वेति चिन्तायां—तण्डुलग्रहणस्योपलक्षणत्वे प्रमाणाभावात् देवतान्तरसंयोगाभावाच्च नापनय इति प्राप्ते—

तण्डुलग्रहणस्य विवक्षितत्वे दधिशृतयोर्हविष्ट्वानुपपत्त्या अधिकरणत्वापत्तेः सहश्रपयतीति वाक्यवैयर्थ्यापत्तेरेव तण्डुलग्रहणस्य हविःपरत्वावसायादाज्यस्याप्यपनयः । देवतान्तरसंयोगाभावादुपांशुयाजो लुप्यते । प्रजापतिविधिरपचारविषयत्वान्नेह प्रवर्तते ॥

यत्त्वत्र भाष्यकारेण पक्षान्तरमुक्तं विभजेत् इत्यनेन नापनयविधिः किन्तु पूर्वयागीयं हविः वैकृतीभ्यो देवताभ्यो

दद्यादिति सामान्यतो विभागरूपं दानं उपांशुयाजीयाज्यसाधारण्येन विधीयते । अपनयस्तु पूर्वदेवतानामर्थात् । तत्र विशेषवचनात् द्रव्यान्तराणां व्यवस्थायामप्याज्यस्य सामान्यवाक्यादेव त्रिभ्योपि दानमिति तदपनयविध्यभावे प्रकृतहविर्ग्रहणे प्रमाणाभावात्सामान्यवाक्यस्यापि कर्मान्तरविषयकसामान्यविधित्वापत्तेरुपेक्षितम् ॥

अस्तु वा कर्मान्तरे सामान्यविधिवैयर्थ्यापत्तेरेव तथा । सर्वथाऽऽज्यस्यापि पूर्वदेवतापनयः । न चैवं प्रयाजादिद्रव्यस्यापि तदापत्तिः । चन्द्राभ्युदयकालीन कर्मप्रारम्भस्यैव निमित्तत्वेन वक्ष्यमाणत्वात् तादृशकर्मसम्बन्धिहविष एव देवतापनयात्प्रयाजादीनां च दीक्षणीयादिवत्पृथगारम्भाभावात्तदीयद्रव्यस्यापनयानुपपत्तेः । इदं चोपांशुयाजद्रव्यस्यापनयाभिधानं शाङ्खायनानां 'अथ यत्सन्नयत्साम्नाय्यस्यान्तरेणोपांश्वाज्यस्य यजति तस्योक्तं ब्राह्मणम्' इति वचनेनामावास्यायामप्युपांशु याजविधानादवगन्तव्यम् । दाशमिकं तु पौर्णमास्यामेवोपांशुयाज इत्यधिकरणं कृत्वाचिन्तया । त्रयोदशामावास्यायामिति चावयुत्यानुवादः । एतद्बलादेव चामावास्यायां विकल्प इत्यपि गुरवः ॥ २ ॥

(३)–निरुप्ते स्यात्तत्संयोगात् ॥१२॥ प्रवृत्ते वा प्रापणान्निमित्तस्य ॥१३॥ लक्षणमात्रमितरत् ॥१४॥ तथा चान्यार्थदर्शनम् ॥१५॥

यस्य हविर्निरुप्तमिति श्रवणात् निर्वापोत्तरकालीनचन्द्राभ्युदयस्यैव निमित्तत्वादमावास्यायां च सूर्योदयात्प्रागेवेष्ट्या-

रम्भविधानान्निर्वापात्प्राक्चन्द्राभ्युदयज्ञाने नेदं प्रायश्चित्तमिति प्राप्ते—

'हविरभ्युदियात्' इत्येतावतैव निमित्तत्वपर्यवसानेन निर्वापग्रहणस्याविवक्षितत्वादभ्युदयावच्छिन्नदिनप्रारम्भस्यैव निमित्तत्वं लाघवात्। पौर्णमास्यां च तस्य नित्यत्वादेव निमित्तत्वानुपपत्तेः परिशेषादेव दर्शविषयत्वम्। अतश्च निर्वापात्प्रागपि तत्क्रममात्रेण प्रायश्चित्तम्। अत एव 'यद्यगृहीतं हविरभ्युदियात्' इति लिङ्गमप्युपपद्यते ॥ ३ ॥

(४)—अनिरुप्तेऽभ्युदिते प्राकृतीभ्यो निर्वपेदित्याश्मरथ्यस्तण्डुलभूतेष्वपनयात् ॥१६॥ ऽयूर्ध्वभाग्भ्यस्त्वालेखनस्तत्कारित्वाद्देवतापनयस्य ॥१७॥

कर्मप्रवृत्तिमात्रस्य निमित्तत्वेऽपि नैमित्तिको देवतापनयस्तण्डुलग्रहणात्तण्डुलावस्थायामेव च कर्तव्यः। पूर्वं तु प्राकृतीभ्य एव निर्वापादि कार्यमिति प्राप्ते—

तण्डुलग्रहणस्य विवक्षितत्वे दधिपयसोरपनयाभावेन देवतान्तरसम्बन्धानापत्तौ सहश्रपयतीति वाक्यवैयर्थ्यापत्तेस्तस्य हविर्मात्रोपलक्षणत्वात् पूर्वमप्यभ्युदयवैकृतीभ्य एव निर्वापादि ॥४॥

(५)—विनिरुप्ते न मुष्टीनामपनयस्तद्गुणत्वात् ॥ अप्राकृतेन हि संयोगः तत्स्थानीयत्वात् ॥ अभावाच्चेतरस्य स्यात् ॥ २० ॥

अर्धनिरुते चन्द्राभ्युदये ज्ञाते अवशिष्टमुष्टयो न तावत्प्राकृतीभ्यो निर्वप्तव्याः निमित्तसत्वेन नैमित्तिकस्यापनयस्य प्रवृत्तौ बाधकाभावात् । नापि वैकृतीभ्यः, पदार्थैकदेशस्याविहितत्वेन तत्र देवतान्तरसंयोगाप्रवृत्तेः । यथैवं हि फलं न भक्षयेदित्यादि निषेधाः अवयवावयविसाधारण्येन प्रवर्तन्ते एवमपनयात्मको निषेधोऽपि । यथैव च फलं दद्यादित्यादिविधयो अवयविन्येव प्रवर्तन्ते एवं देवतान्तरसंयोगोपि । अतश्च तूष्णीमेवावशिष्टो निर्वापः । याज्ञिकास्तु पदार्थैकदेशस्याप्यार्थिकविधिविहितत्वमङ्गीकृत्य वैकृतीभ्य एवानुतिष्ठन्ति ॥ ५॥

(६)–सान्नाय्यसंयोगान्नासन्नयतस्स्यात् ॥२१॥ औषधसंयोगाद्वोभयोः ॥२२॥ वैगुण्यान्नेति चेत् ॥२३॥ नातत्संस्कारत्वात् ॥२४॥

किमियमभ्युदितेष्टिस्सन्नयत एव उतासन्नयतोऽपीति चिन्तायां—द्रव्योद्देशेन देवतामात्रविधिपक्षे यद्यपि द्रव्यस्य साहित्यमविवक्षितं, तथाऽप्युद्देश्यानेकत्वादेवैतत्पक्षापरितोषाद्भावनान्तरविधिपक्षे च तद्विशेषणयोर्दधिस्थविष्णयोः शृताणिष्ठयोश्च साहित्यस्य विवक्षितत्वाद्विधेयसामर्थ्यानुरोधेन सन्नयन्मात्रविषयत्वमिति प्राप्ते—

न चेदन्येन शिष्टा इति न्यायेनप्राप्तविशेषणस्यैव कल्प्यविशेषणविधिविधेयत्वेन द्रव्यसाहित्यस्य तत्तद्यागसाहित्यवशेनैव च प्राप्ततया विशेषणविध्यकल्पनादविवक्षितत्वेनासन्नयतोऽप्यभ्युदितेष्टावधिकारः । अतश्चैन्द्राग्नस्याप्यौषधद्रव्यकत्वान्मध्य-

मादिभेदेनाग्नेयवदावृत्तिः । तत्रापि सहश्रपयतीति वचनेनाग्नेयैन्द्राग्नहविषोस्सहश्रपणे विहिते अष्टाकपालत्वद्वादशकपालत्वयोर्विरोधे मुख्यत्वादष्टाकपालत्वस्यैवानुग्रहेण त्रयोऽप्यष्टाकपाला एव कार्याः । अथ वा आद्य एवाष्टाकपालः । इतरौ तु जले एव चरू ॥६॥

(७)–साम्युत्थाने विश्वजित्क्रीते विभागसंयोगात् ॥२५॥ प्रवृत्ते वा प्रापणान्निमित्तस्य ॥२६ आदेशार्थेतरा श्रुतिः ॥२७॥

'यदि सत्राय दीक्षितानां साम्युत्तिष्ठेरन् सोममपभज्य विश्वजिताऽतिरात्रेण सर्वस्तोमेन सर्वपृष्ठेन सर्ववेदसदक्षिणेन यजेरन्' इति श्रुतम् । तत्र विश्वजिदयं सोमक्रयोत्तरं उत ततः पूर्वमप्युत्थाने भवेदिति चिन्तायां, यद्यपि त्यागापरपर्यायं व्युत्थानमात्रं निमित्तं न तु सामिपदवाच्यार्थत्वमपि विशेषणं, नापि सोमक्रयः । तथाऽपि सोमविभागस्यापि विश्वजिदङ्गत्वेन विधेयत्वात्पुनराधानवदेव नैमित्तिकत्वरूपपर्यालोचनया सोमक्रयोत्तरमेव विधीयते । न हि पूर्वं सोमोऽस्ति येन सोमविभागरूपमङ्गमनुष्ठीयेत । न च बोधायनादिकल्पपर्यालोचनया पूर्वमपि सोमसत्त्वाद्विभागोपपत्तिः विक्रेतृसोमस्यैव क्रयात्पूर्वमुपकल्पनेन तस्मिन् यजमानस्वत्वाभावात् । अतस्सोमक्रयोत्तरमेव व्युत्थाने विश्वजिदिति प्राप्ते—

नात्र विभागविधिः संसृष्टद्रव्याणां व्युत्थाने द्रव्यविभागस्यार्थप्राप्तत्वात् । अत एव सोमपदं संसृष्टवस्तुमात्रपरं, अतश्च

सोममपभज्य इत्यस्यानुवादत्वाद्विश्वजिन्मात्रं नैमित्तिकं सोमक्रयात्पूर्वमपि व्युत्थानस्य निमित्तस्य सत्त्वात्कर्तव्यमेव। किञ्च यद्यपि विभागो विधीयते तथाऽपि तस्याद्दष्टविधया विश्वजित्यारादुपकारकाङ्गत्वान्नावश्यं क्रीतस्यैव स्वस्यैव वा सोमस्य विभागः, किन्तु लौकिकस्यैव सत्रासम्बन्धिनो यस्य कस्यचित्सोमस्य प्रत्येकं विभागः, अतश्च तादृशनैमित्तिकस्य पूर्वमपि सम्भवादविशेषः। अयं विश्वजित् गुणात्कर्मान्तरं स्वर्गार्थविश्वजिदपेक्षया, आगूरणविश्वजिदपेक्षयाऽपि। तयोस्त्वेतदपेक्षया यागान्तरत्वे अभ्यासः प्रकरणान्तरं च प्रमाणं बोध्यम्। एतत्फलमागूरणं विश्वजिद्वदेव द्रष्टव्यम्॥

वस्तुतस्तु निमित्तभेदस्य निर्वक्तुमशक्यत्वाच्छाखान्तरन्यायेन एक एव विश्वजिद्वाक्यद्वयेन विधीयत इति नागूरणविश्वजितोऽस्य भेदः। प्रवृत्तस्य विश्वजित् उताप्रवृत्तस्येति विचारस्तु एतद्वचनाभावं कृत्वा चिन्तयेति ध्येयम्॥७॥

(८)–दीक्षापरिमाणे यथाकाम्यविशेषात्॥२८

सोमे एका दीक्षा तिस्रो दीक्षाः इत्येवं बहवो दीक्षापक्षाश्श्रुताः। तत्र सोमे द्वादशदीक्षापक्ष एव 'द्वादशरात्रीर्दीक्षितो भृतिं वन्वीत' इति विहितस्य भृतिपदवाच्यदक्षिणाद्रव्यार्जनानुकूलयाच्ञारूपस्य भृतिवननस्य पक्षान्तरेष्वसम्भवात् अतो अन्ये पक्षा विकृतिविषयाः 'एकं वृणीते' इत्यादिवदवयुत्यानुवादा वा इति भाष्यकाराभिप्रायः॥

वार्तिककाराशयस्तु भिन्नप्रदेशस्थत्वेन एकं वृणीते इतिवदर्थवादत्वायोगात् सर्वे एव विधय इति तावदविवादम्। प्रकरणानुरो-

धाञ्च नानेकेषामुत्कर्षकल्पनात्तद्वरमेकस्यैव भृतिवननवाक्यस्य पाक्षिकत्वकल्पना । द्वादशरात्रिशब्दो वा दीक्षापरिमाणमात्रपरः यावतीषु रात्रिषु दीक्षा भवति तत्परः ॥

वस्तुतस्तु लक्षणाऽपीयं न विधौ दीक्षितकर्तृकभृतिवननस्यैव पक्षप्राप्तस्य प्रयोगमध्ये अत्यन्ताप्राप्तस्यैव वा विधेयत्वात् द्वादशरात्रिशब्दस्यानुवादत्वोपपत्तेः । अतो नैतस्य पाक्षिकत्वकल्पनाऽपि । दीक्षापक्षाणामेव परं व्रीहियववद्विकल्पः । अस्तु वा तस्य विधेयन्वेऽपि लक्षणा तथाऽपि न दोष इति ॥ ८ ॥

(९)–द्वादशाहस्तु लिङ्गात्स्यात् ॥२९॥

द्वादशाहेषु 'द्वादशरात्रीर्दीक्षितस्स्यात्' इति वाक्येन यवमयश्चरुरितिवत् द्वादशदीक्षाकत्वस्यैव नियमनान्न विकल्प इति प्रत्युदाहरणमात्रम् । अत एव 'षट्त्रिंशदहो वा एष द्वादशाहः' इति लिङ्गं उपसत्तुल्यानां द्वादशत्वस्य प्रमाणान्तरसिद्धत्वात् दीक्षा अपि द्वादशेति गमयति । तथा 'अभीन्धत एव दीक्षाभिः' इति दीक्षाबहुत्वं विधाय 'द्वाभ्यां लोमावद्यन्ति, द्वाभ्यां त्वचं, द्वाभ्यामसृक्, द्वाभ्यां मांसं, द्वाभ्यामस्थि, द्वाभ्यां मज्जानम्' इति तद्वाक्यशेषे षड्किकानुक्रमणमपि ॥ ९ ॥

(१०)–पौर्णमास्यामनियमोऽविशेषात् ॥३०॥ आनन्तर्यात्तु चैत्री स्यात् ॥३१॥ माघी वैकाष्टकाश्रुतेः॥३२॥ अन्या अपीति चेत्॥३३ न भक्तित्वादेषा हि लोके ॥३४॥ दीक्षाऽप-

राधे चानुग्रहात् ॥३५॥ उत्थाने चानुप्ररोहात् ॥३६॥ अस्यां च सर्वलिङ्गानि ॥३७॥

गवामयने 'एकाष्टकायां दीक्षेरन् एषा वै संवत्सरस्य पत्नी यदेकाष्टका' इत्युपक्रम्य 'आर्तं वा एते संवत्सरस्याभिदीक्षन्ते य एकाष्टकायां दीक्षन्ते व्यस्तं वा एते संवत्सरस्याभिदीक्षन्ते य एकाष्टकायां दीक्षन्ते अपो नाभिनन्दन्तोऽवभृथमभ्यवयन्ति' इत्यनेन तत्र दोषानभिधाय 'चित्रापूर्णमासे दीक्षेरन् मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासस्तस्य न का चन निर्या भवति' इत्यनेन चैत्रीं स्तुत्वा 'चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन् तेषामेकाष्टकायां क्रयस्सम्पद्यते तेनैकाष्टकां न छंबट्कुर्वन्ति तेषाम्' इति श्रुतम् । आर्तं दुःखयुक्तं शीतात् । व्यस्तं अयनपरावृत्त्या । अपो नाभिनन्दन्ति शीतादेव । निर्या दोषः । छंबट् रिक्तम् । अत्र जर्तिलयवागून्यायेन सर्वमिदमेकवाक्यमिति तावदविवादं अतश्चतुरह इत्येव विधिः पयोहोमन्यायेन तत्र पौर्णमासीवाक्यशेषे चैत्र्यास्स्तुतत्वाच्चैत्र्येव । न च वाक्यशेष एवोपक्रमोपसंहारयोरेकाष्टकाया माघ्युत्तराष्टमीरूपायाः परामर्शात्तस्याः क्रयसम्पत्त्यनुग्राह्यत्वोक्तेश्च माघ्येव ग्राह्येति वाच्यं, अष्टकाशब्दस्य कर्मविशेषनामतया तत्कालत्वेनाष्टम्यामष्टकाशब्दप्रयोगे 'हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः' इति चतसृष्वपि तदष्टमीषु प्रयोगेण माघ्युत्तराष्टमीग्रहण एव प्रमाणाभावात् 'द्वादशपौर्णमास्यो द्वादशैवाष्टकाः' इति श्रुत्यन्तरे सर्वत्रैव प्रयोगाच्च । अतश्चैत्र्युत्तराष्टम्या अपि तत्त्वानपायाच्चैत्र्या एव पौर्णमासीपदेन ग्रहणात् तस्याः पुरस्ताच्चतुरहे एकादश्यां दीक्षेति प्राप्ते—

वृद्धव्यवहारेणैकाष्टकाशब्दस्य माघ्युत्तराष्टम्यामेव प्रयोगा-त्तस्याश्च संवत्सरपत्नीत्वेनोपक्रमे स्तुतत्वान्माघ्युत्तराष्टमीस्थ कर्माङ्गदेवतायाश्च 'यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवा-यतीम् । संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली' इति तन्मन्त्रे संवत्सरपत्नीत्वेन सङ्कीर्तनात् माघ्युत्तराष्टम्यामेव एका-ष्टकात्वप्रतीतेस्तस्यां क्रयसम्पत्त्यनुरोधेनोपक्रमोपसंहारयोरश्रुत-त्वेन माघ्या एव पौर्णमासीपदेनाभिधानात्ततः पुरस्तादेकादश्यां दीक्षेति सिद्धम् । अत एव सर्वोऽयमर्थवादः एवं व्याख्येयः यद्यपि दोषान्तराभावादेकाष्टकैव दीक्षायां प्रशस्ता, तथाऽप्यार्त-त्वव्यस्तत्वाभिनन्दकत्वरूपदोषत्रयात्तामतिक्रम्यापि चैत्र्यैव परं प्रशस्ता, माघ्येकादशी तु तदपेक्षयाऽपि प्रशस्ततरा, एकाष्टका-याः द्वादशदीक्षोत्तरं त्रयोदशदिनरूपायाः क्रयसम्पत्त्यनुग्रही-तत्वादिति ॥ १० ॥

(११)–दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतानामनुत्कर्षः प्राप्तकालत्वात् ॥ ३८ ॥ उत्कर्षो वा दीक्षितत्वादविशिष्टं हि कारणम् ॥ ३९

सोमे 'दीक्षितो न जुहोति' इत्यादिना पुरुषार्थानामग्निहोत्रा-दीनां क्रत्वङ्गत्वेन पर्युदासः प्रतिषेधो वा दीक्षितस्य श्रुतः । अवभृथे च कृते दीक्षामुक्तिः । तद्यदा दैवादिना कारणेन स-न्ध्यातः पूर्वं क्रियमाणावभृथस्योत्कर्षस्तदा काले अग्निहोत्रं कर्तव्यमेव यावन्तं कालं शास्त्रवशेन दीक्षाऽनुवृत्तिस्तावत्कालं न जुहोतीति तत्प्रतिषेधशास्त्रावधारणादिति प्राप्ते—

काललक्षणायां प्रमाणाभावाद्दीक्षैव निषेधावधिः तस्याश्चानिवृत्तत्वान्न कर्तव्यमेवाग्निहोत्रादि ॥ ११ ॥

(१२)–तत्र प्रतिहोमो न विद्यते यथा पूर्वेषाम् ॥४०॥ कालप्राधान्याच्च ॥४१॥

दीक्षायां सत्यां सोमाङ्गत्वेनाग्निहोत्रप्रतिषेधेऽपि अग्निहोत्रवाक्ये दीक्षितभिन्नस्य कर्तृत्वाश्रुतेः काले तदकरणनिमित्तप्रत्यवायस्यावश्यकत्वात्तत्परिहारार्थं गौणकाले प्रायश्चित्तपूर्वकं कार्य एवाग्निहोत्रहोमः। दैवापराधकृतदीक्षोत्कर्षे तु सुतरामिति प्राप्ते-

यावज्जीवादिवाक्ये कालावच्छिन्नस्य जीवनादेर्निमित्तत्वमित्यविवादम् । तेषां च न सायंकालत्वशुचित्वादिना तत्त्वेन तत्त्वेनावच्छेदकत्वं गौरवात् अपि तु शब्दतोऽर्थतो वा यो निषिद्धः कालः तद्भिन्नकालत्वेन, सायमादिकालविधेर्हि नियमविधित्वात्तदितरकालनिवृत्तिरार्थिकी । एवं शुचित्वादिनाऽशुचिकालादिनिवृत्तिरपि । निषेधोपि चात्र न विधेयक्रियाङ्गभूत एव विवक्षितः, अपि त्वन्याङ्गभूतोऽप्यविशेषात्, तस्मिन् सति विधेयक्रियायाः अकरणस्य तत्राप्यावश्यकत्वाच्च । अतश्च यथैव पश्वर्थेनापि गोदोहनेनावरुद्धस्य प्रणयनस्य न चमसप्रयोजकत्वं तस्मित् सति तस्य कर्तुमशक्यत्वात् अत एव न तदभावकृतं वैगुण्यमपि । एव सोमाङ्गभूतेनापि निषेधेनावरुद्धस्य दीक्षाकालावच्छिन्नजीवनस्य नैमित्तिकानुष्ठापकत्वानुपपत्तेः न तदकरणे प्रत्यवायादि । अतः अपशुकामस्यैव चमसे अधिकारवददीक्षितस्यैवाग्निहोत्रादावधिकारो निषेधपक्षेऽपि फलितो भवति। यदा तु 'दीक्षितो न जुहोति' इत्यस्य अग्निहोत्रादिविध्येकवाक्यतया

पर्युदासत्वमङ्गीक्रियते तदा स्पष्ट एव दीक्षितस्य तत्रानधिकारः। अतश्च मुख्यकालेऽनधिकाराद्गौणकाले करणमनाशङ्क्यम् । एवं दैवादिनाऽवभृथोत्कर्षेऽपि दीक्षावत्त्वस्य कथमप्यविशेषान्मुख्यकालेऽनधिकारस्य तुल्यत्वेन गौणकाले न प्रतिहोमकरणम् ॥ १२ ॥

(१३)–प्रतिषेधाच्चोर्ध्वमवभृथादिष्टेः ॥४२॥

कृतेऽवभृथे यद्युदवसानीयोत्कर्षो दैवादिना भवेत् तदा-काले प्राप्ते अग्निहोत्रहोम एव कर्तव्यः तदकरणे वा प्रतिहोमः कार्यः दीक्षाया अवभृथेनोन्मोचितत्वात् । यत्तु 'एतया पुनराधेयसम्मितया इष्ट्या इष्ट्वाऽग्निहोत्रं जुहोति' इति वचनं तत् प्रकरणान्तरन्यायात्सोमाङ्गतयोदवसानीयेष्ट्यङ्गतयैव वा कर्मान्तरविधायकमिति प्राप्ते—

निषेधप्रतियोगित्वेनाग्निहोत्रादेरुपस्थितत्वात् तदपेक्षितावधिसमर्पकत्वेनाप्युपपत्तौ यागान्तरविधायकत्वानुपपत्तेर्दीक्षोन्मोकेऽपि उदवसानीयेष्टिप्रतीक्षाया आवश्यकत्वात्पूर्ववदेवानधिकारान्न प्रतिहोमादिकरणम् । यदा तु दीक्षा संजाता यस्येति दीक्षित इति व्युत्पत्त्या वृत्तदीक्षोत्पत्तिकत्वमेव निषेधप्रयोजकं रूपमाश्रीयते तदा दीक्षाऽभावेऽपि सर्वदा निषेधप्रसक्तौ उदवसानीयाया अवधित्वमव्याहतमेवेति न तदुत्कर्षे प्रतिहोमादि ॥ १३ ॥

(१४)–प्रतिहोमश्चेत् सायमग्निहोत्रप्रभृतीनि हूयेरन् ॥४३॥ प्रातस्तु षोडशिनि ॥४४॥

यदाऽवभृथोत्कर्षे प्रतिहोमस्तदा कृत्वाचिन्तया विचार्यते–अग्निष्टोमसंस्थाकज्योतिष्टोमे अवभृथस्य सायंकालात्पूर्वमेव क-

र्तव्यत्वेन तदुत्तरं रात्रौ करणे एकस्यैव सायंहोमस्य दीक्षाविमोकोत्तरं गौणकाले करणमाप्रातराहुतेः सायंहोमस्य गौणः कालो वाचनिकः प्रातर्होमस्य सायंकालावधिवत् गौणकालस्याप्यतिक्रमे स्वकालक्रियमाणप्रातर्होमेन सह समस्यहोमविधया तन्त्रेण करणम् । अवभृथोत्कर्षेणानेकहोमकालातिपत्तौ च सर्वान् सायंहोमान् प्रातर्होमांश्च पक्षहोमविधिना समस्यहोमविधिना च स्वकालक्रियमाणहोमेन सह तन्त्रेण कुर्यात् । न चातिपत्तिक्रमेण होमानां क्रमेणैव करणं शङ्क्यं, एकदेशकालकर्तृत्वेन समस्यहोमपक्षहोमविधिवैय्यर्थ्यप्रसङ्गेन चानेकदर्शपूर्णमासातिपत्तिनिमित्तकपथिकृद्वदेव पृथक्करणानुपपत्तेः । अत एव सर्वान् सायंहोमान् सायंकाले प्रातर्होमांश्च प्रातःकाले कुर्यादित्यपास्तम् । स्वकालक्रियमाणहोमात्पूर्वमेवातिपन्नहोमानां कर्तव्यत्वात । एवं च—षोडशिस्तोत्रवति क्रतौ तस्य समयाध्युषितकालीनत्वेनावभृथस्य रात्रावेव क्रियमाणत्वात्तस्य द्वितीयदिने उत्कर्षे प्रातर्होमस्यैव पूर्वोक्तविधयाऽनुष्ठानं, अनेकहोमकालातिपत्तावपि तथैव । न च दर्शपूर्णमासयोः पौर्णमासोपक्रमयोरेव मिळितयोः फलसाधनत्ववत् सायमुपक्रमयोरेव सायंप्रातर्होमाभ्यासयोरेकफलसाधनत्वस्य कल्पसूत्रेष्वभिधानात् षोडशिना सायं होमेऽनधिकारे कथं प्रातर्होमेऽप्यधिकार इति वाच्यं 'प्रातस्तु षोडशिनि' इति जैमिनिसूत्रकृद्वचनादेव सायमुपक्रमकत्वस्य नैयत्याभावप्रतीतेः । अत एव कृत्वाचिन्तोद्घाटनेऽपि यद्युदवसानीयाया रात्रौ करणं तदा प्रातर्होमानुष्ठानं जैमिनिमते नानुपपन्नम् ॥ १४ ॥

(१५)–प्रायश्चित्तमधिकारे सर्वत्र दोषसामा-

न्यात् ॥४५॥ प्रकरणे वाशब्दहेतुत्वात् ॥४६ अतद्विकारश्च ॥४७॥

'भिन्ने जुहोति' इत्यादि प्रायश्चित्तं नैमित्तिकमपि फलापेक्षायां प्रकरणात् क्रत्वङ्गम्। निमित्तमपि भेदनादिकं न लौकिककपालादेः, प्रायश्चित्तसमाख्याबलेन क्रत्वङ्गभूतकपालादिभेदननिमित्तवैगुण्यपरिहारार्थत्वस्यैव कल्पनेन स्वतन्त्रादृष्टकल्पने गौरवात् ॥ १५ ॥

(१६)–व्यापन्नस्याप्सु गतौ यदभोज्यमार्याणां तत्प्रतीयेत ॥४८॥

'व्यापन्नमप्सु परिहरति' इति वाक्ये श्रुतस्य व्यापन्नशब्दस्य यदार्याणामभोज्यं केशकीटावपन्नादि तदर्थः । तत्रैव तेषां प्रयोगादिति शिष्यहितार्थमुक्तम् ॥ १६ ॥

(१७)–विभागश्रुतेः प्रायश्चित्तं यौगपद्ये न विद्यते ॥४९॥ स्याद्वा प्राप्तनिमित्तत्वात्कालमात्रमेकम् ॥५०॥

ज्योतिष्टोमे दक्षिणादानात्प्राक् बहिष्पवमानार्थं तद्देशं कच्छं धृत्वा प्रसर्पतामुद्गातृप्रतिहर्तृप्रस्तोतॄणां मध्ये 'यद्युद्गाताऽपच्छिन्द्यात् अदक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत तत्र तद्दद्यात् यत्पूर्वस्मिन् दास्यं स्यात्, यदि प्रतिहर्ता सर्ववेदसं दद्यात्, यदि प्रस्तोता ब्रह्मणे वरं दद्यात्' इत्यादिना तत्तत्कर्तृकापच्छेदे निमित्ते प्रायश्चित्तं श्रुतम् । तत्रापच्छेदो नाम विभागरूपं फलमेव । यदि वा तज्जनिका क्रिया । सर्वथा तज्जनकक्रियाकर्तृत्वादेषाम् त-

त्कर्तृत्वव्यवहारः । तस्यां चान्यतरक्रियाजन्ये उभयक्रियाजन्ये च विभागे एकैकस्यापि प्रत्येकमस्त्यैव कर्तृत्वमिति उद्गातृमात्रनिष्ठक्रियाजन्यविभाग इवोभयनिष्ठक्रियाजन्यविभागेऽप्युद्गातृकर्तृकत्वव्यपदेशोपपत्तेर्भवत्येव तत्रापि प्रायश्चित्तमित्युत्तरविवक्षया प्राप्यते ॥ १७ ॥

(१८)–तत्र विप्रतिषेधाद्विकल्पस्स्यात् ॥५१॥ प्रयोगान्तरे वोभयानुग्रहस्स्यात् ॥ ५२ ॥ न चैकसंयोगात् ॥५३॥

यौगपद्ये प्रायश्चित्तद्वयमविरोधात्समुच्चयेनैव । प्रतिहर्त्रपच्छेदनिमित्तं सर्वस्वदानमुद्गात्रपच्छेदनिमित्ते पुनःप्रयोगेऽपि शक्यत एव कर्तुम् । अथवा दक्षिणोत्कर्षविशिष्टपुनःप्रयोगमात्रं तन्नैमित्तिकं पुनरदाक्षिण्यमपि तस्यार्थप्राप्तत्वेनानुवाद्यत्वात् अतः पूर्वप्रयोगेऽपि सर्वस्वदाने न कश्चिद्विरोध इति प्राप्ते—

न तावत्पूर्वप्रयोग एव सर्वस्वदानं, असत्यप्यदाक्षिण्यस्य नैमित्तिकत्वे दक्षिणोत्कर्षस्यैव पूर्वप्रयोगे सर्वस्वदाने अनुपपत्तेः । नापि पुनःप्रयोगे सर्वस्वदानं प्रतिहर्त्रपच्छेदवति प्रयोग एव तद्विधानात् । अन्यथा एकस्मिन् प्रयोगे प्रतिहर्त्रपच्छेदे क्रतोस्तद्वत्त्वाविशेषात्तदुत्तरसर्वप्रयोगेषु सर्वस्वदानापत्तिः । निमित्तवति प्रयोगे नैमितिकस्य दैवादकरणे प्रयोगान्तरेऽपि तदापत्तिः । अतो विरोधाददाक्षिण्यसर्वस्वदाक्षिण्ययोर्विकल्प एव । पुनः प्रयोगमात्रं परमविरोधाद्भवत्येव । तेनापि विकल्पं केचिदिच्छन्ति ॥ १८ ॥

(१९)–पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् ॥५४॥

यदा क्रमेण निमित्तद्वयसन्निपातस्तत्रासंजातविरोधित्वादाद्यानैमित्तकमेव नैमित्तिकम् । अथवा नात्र शास्त्रद्वयस्य सामान्यविशेषादिरूपतया बलाबलम् । नापि प्रमाणतदाभासरूपतया, उभयोरपि समतयैव प्रमाणत्वात् । अनुष्ठानवेलायां पौर्वापर्यं तु न शास्त्रार्थावधारणायालं, अतो विकल्प एवेति प्राप्ते—

यथैव नित्यं द्वादशशतं नैमित्तिकेन सर्वस्वेन बाध्यते परत्वात् तद्बलेन च द्वादशशतविधेः निमित्तरहितप्रयोगविषयत्वकल्पनं तथैव परेणापि नैमित्तिकेन पूर्वस्य नैमित्तिकस्यापि परत्वाविशेषादेव बाधः । पूर्वनैमित्तिकविधेश्च परनिमित्तरहितप्रयोगविषयत्वकल्पना । तद्वदेव चानुष्ठानकालीनमेव पौर्वापर्यं शास्त्रार्थावधारणवेलायां पूर्वमेवालोच्य व्यवस्थितविषयत्वकल्पनेति न कश्चिद्विरोधः । न च संजातविरोधित्वेनेह परविज्ञानस्यानुत्पत्तिः ज्ञापकस्य प्रमाणस्य कृतत्वेन तदयोगात् । न ह्यत्रोत्तरं प्रमाणं पूर्वप्रमाणेनैकवाक्यतया स्वार्थबोधजनकं, येन तदुपजीवित्वेन तदानुगुण्येन वर्तेत । अत उत्तरमेव निरपेक्षतयोत्पद्यमानं पूर्वप्रमाणस्य परनिमित्तवत्प्रयोगविषयत्वांशे मिथ्यात्वं कल्पयति । न च पूर्वमेव विज्ञानं परप्रमाणस्य पूर्वनिमित्तवत्प्रयोगविषयत्वांशे मिथ्यात्वं किमिति न कल्पयेत् । न ह्यत्र नित्यापेक्षया नैमित्तिक इव निरवकाशत्वमस्ति उभयोरप्येकैकनिमित्तकप्रयोगे सावकाशत्वादिति वाच्यम् । पूर्वनिमित्तोपनिपातवेळायां परप्रमाणजन्यज्ञानस्य नियमेनोपस्थित्यभावेन धर्मिज्ञानाभावात्तद्गतस्य पूर्वनिमित्तवत्प्रयोगविषयत्वांशे मिथ्यात्वस्य कल्पयितुमशक्यत्वात् परनिमित्तोपनिपातवेळायां तु पूर्वविज्ञानस्य चिकीर्षितविषयत्वेन पुरस्स्फूर्तिकत्वाद्धर्मिज्ञानसत्त्वेन तद्गतमिथ्यात्वकल्पने न

किञ्चिद्बाधकम् । यदि तु परनिमित्तोपनिपातोत्तरमेव पूर्वेण मिथ्याकल्पनमित्याशङ्क्येत तथाऽपि यदा परनिमित्तोपनिपातोत्तरं पूर्वप्रमाणविस्मरणं तदा तेनोत्तरस्य मिथ्यात्वकल्पनानुपपत्तेरवश्यं भवन्मते पूर्वप्रमाणस्मरणं कल्प्यं, मन्मते तु यदा दैववशात् पूर्वप्रमाणस्मरणं तदा तस्य मिथ्यात्वकल्पनेऽपि विस्मरणे परनैमित्तिकस्यैवानुष्ठानान्न किञ्चित्कल्प्यम् । तथा चायमत्र क्रमः—परनिमित्तोपनिपाते तन्नैमित्तिकवाक्यार्थज्ञानं पूर्वविज्ञानस्मरणं च, ततः परज्ञानस्य तेन सह विरोधज्ञानं, ततस्तेनापेक्षाबुद्ध्यात्मकेन विनश्यदवस्थेन चतुर्थक्षणे पूर्वविज्ञानस्य भ्रान्तित्वकल्पना, विरोधज्ञानदशायां तदुत्तरं वा परनैमित्तिकवाक्यार्थस्मरणात्सेति न विरोधः । अतस्सिद्धं परेण पूर्वस्य बाध इति ॥ १९ ॥

(२०)—यद्युद्गाता जघन्यस्स्यात् पुनर्यज्ञे सर्ववेदसं दद्यात् यथेतरस्मिन् ॥५५॥

क्रमेऽपि यद्युद्गात्रपच्छेदो जघन्यस्तदा तन्निमित्तपुनःप्रयोगे सर्वस्वमेव देयं न तु द्वादशशतं परनिमित्तापातात्पूर्वं तस्यैव पूर्वप्रयोगे देयत्वेन प्रसक्तत्वात् 'तत्र तद्दद्यात्' इत्यनेन यत्पूर्वप्रयोगे परनिमित्तापातात्पूर्वं देयत्वेन प्रसक्तं तस्यैव दक्षिणात्वेन विधानात् द्वादशशतस्य पूर्वनिमित्तेनैव बाधितत्वेन देयतयाऽप्रसक्तेः । अतश्च यद्यपि सर्वस्वमपि अदाक्षिण्येन दक्षिणोत्कर्षेण वा पूर्वप्रयोगे वस्तुतो बाधितमेव । तथाऽपि परनिमित्तापातात्पूर्वं बाधज्ञानाभावाद्देयत्वेन प्रसक्तौ न काचित् क्षतिः । यदा तु प्रतिहर्त्रपच्छेदो जघन्यस्तदा तस्मिन्नेव प्रयोगे सर्वस्वं देयं न तु पूर्वापच्छेदनिमित्तकः पुनः प्रयोगः कार्यः ।

न च सर्वस्वदाने अदाक्षिण्यस्यैव विरोधात्तद्बाधेऽपि पुनःप्रयोगबाधे प्रमाणाभावः अदाक्षिण्यपुनःप्रयोगयोस्समुच्चितयोरेव नैमित्तिकत्वेनैकाभावे इतरस्यानुपपत्तेः । अतश्च यथा पत्न्याः श्मश्रूणामभावात्केशानामपि न वपनं साहित्यस्य विवक्षितत्वात् तथैवादाक्षिण्यस्याभावे पुनःप्रयोगस्याप्यभावः । यद्यपि च दक्षिणोत्कर्षस्य पुनःप्रयोगाङ्गतया विधानस्यावश्यकत्वादेव पूर्वप्रयोगेऽदाक्षिण्यस्यार्थप्राप्तत्वात् 'अदक्षिणं तं' इत्यस्यानुवादत्वमुच्यते । तथाऽपि पाक्षिकानुवादभियैवादाक्षिण्यलोपे पुनःप्रयोगलोप इति द्रष्टव्यम् ॥

वस्तुतस्तु 'सोममपभज्य' इतिवत्पाक्षिकानुवादत्वेऽपि पुनःप्रयोगलोपे प्रमाणाभावः । न च तस्य संसृष्टद्रव्यमात्रोपलक्षणत्वान्न पाक्षिकानुवादत्वमिति वाच्य, संसृष्टद्रव्यनाशेऽपि पूर्वप्रयोगाङ्गभूतकर्त्रानत्यर्थं विश्वजित आवश्यकत्वेन पाक्षिकानुवादत्वानिवारणात् ॥

वस्तुतस्तु नायमनुवादः 'तत्र तद्दद्यात्' इत्यनेन पूर्वप्रयोगे दातव्यदक्षिणायाः पुनःप्रयोगाङ्गतया विधानेऽपि पूर्वप्रयोगाङ्गभूतकर्त्रानत्यर्थं तस्मिन्नपि तस्याआवश्यकत्वेनादाक्षिण्यप्राप्त्यभावात् । न चैवं पुनःप्रयोगस्य ज्योतिष्टोमत्वादेव द्वादशशतादिरूपदक्षिणाप्राप्त्युपपत्तेः 'तत्र तद्दद्यात्' इत्यस्य वैयर्थ्यमिति वाच्य, तस्य पूर्वप्रयोगे एकविंशत्यादिपक्षकरणेन पुनःप्रयोगे द्वादशशतादेरपि प्राप्त्यापत्तौ तन्निवृत्त्यर्थत्वेन सार्थक्यात्, उद्गातुर्जघन्यत्वे सर्ववेदसप्राप्त्यर्थत्वाच्च । न चैवं केशश्मश्रुन्यायेन पुनःप्रयोगबाधः, तत्र द्वन्द्वेन साहित्यस्योपादेयकेशश्मश्रुगतत्वेनोक्तत्वात्साहित्यावच्छिन्नस्यैव क्रियाङ्गत्वेन प्रत्येकं तदङ्गत्वाभावात्, प्रकृते तु अरुणैक-

हायन्योरिवापनयदेवतान्तरसंयोगयोरिव च प्रत्येकमेव क्रियान्वयादेकवाक्योपादानादिना पश्चात्साहित्यावगमेऽपि नैकलोपेऽपरस्य लोपः। न ह्यारुण्यासम्भवे एकहायनीलोपः, उपांशुयाजे देवतान्तरसंयोगाभावे वाऽपनयलोप इष्टः। अतः प्रतिहर्तुः परत्वे पूर्वप्रयोग सर्वस्वं दत्वा पुनःप्रयोगेऽपि तद्देयमिति सिद्धम्। यदा त्वाद्यप्रयोगे उद्गातृमात्रापच्छेदः तन्निमित्तकाद्वितीयप्रयोगे च प्रतिहर्त्रपच्छेदः तदा तत्रैव सर्वस्वमेव देयम्। नैमित्तिकत्वेन नित्यदक्षिणाबाधकत्वात्। न च पुनःप्रयोगस्य प्रायश्चित्ततया पूर्वप्रयोगाङ्गत्वात् 'तत्र तद्द्यात्' इत्यनेन च पूर्वप्रयोगाङ्गभूतदक्षिणाया एवोत्तरप्रयोगवृत्तित्वमात्रविधानादङ्गगुणविरोधन्ययिनाङ्गभूतपुनःप्रयोगाङ्गसर्वस्वदक्षिणाबाधेन प्रधानभूतपूर्वप्रयोगाङ्गदक्षिणाया एव देयत्वमुचितमिति वाच्यं, अपूर्वविधित्वाद्दृष्टार्थत्वादिदोषप्रसङ्गेनोत्तरप्रयोगवृत्तिदक्षिणायाः पूर्वप्रयोगाङ्गत्वानुपपत्तेः। अतस्तस्यापि पुनःप्रयोगाङ्गत्वात्परेण नैमित्तिकेन पूर्वस्य बाधात् सर्वस्वमेव देयम् ॥ २० ॥

(२१)—अहर्गणे यस्मिन्नपच्छेदस्तदावर्तेत कर्मपृथक्त्वात् ॥ ५६ ॥

द्वादशाहाद्यहर्गणे यद्येकस्मिन् कस्मिंश्चिदहनि उद्गातुरपच्छेदो भवति तदा कृत्स्नस्याहर्गणस्यावृत्तिः। सुत्याहर्गणस्यैव द्वादशाहपदवाच्यत्वेन फलसाधनत्वात्तस्यैव प्रायश्चित्तादिरूपाङ्गग्राहित्वात्। अस्तु चोत्पत्तिवाक्ये प्रत्येकं करणत्वावगमात् द्वादशाहपदेनापि च समुदायिनामेवोक्तेः प्रत्येकमेव फलं प्रति करणत्वं एकपदोपादानाच्च करणानां समुच्चयः। अतश्चाङ्गग्राहित्वमपि प्रत्येकमेव। तथाऽपि यत्क्रतुसम्बन्ध्युद्गाताऽपच्छिन्द्या-

त्तेन क्रतुना यजेतेत्यर्थावगमादुद्गातुश्चैकस्यैव सर्वसाधारणत्वेन सर्वावृत्तिरिति प्राप्ते—

नोद्गातुः क्रतुसम्बन्धो विवक्ष्यते, अपि त्वावश्यकत्वाद्यत्क्रतुसम्बन्धिबहिष्पवमानार्थं प्रसर्पन्नुद्गाताऽपच्छिन्द्यात्तेन क्रतुना यजेतेत्यर्थावगतेस्तस्य च प्रातिसुत्यं भेदेन तत्सुत्याया एवावृत्तिः । तत्सुत्याया अपि च तत्सुत्याव्यवहितोत्तरमेवावृत्तिः साङ्गपूर्वसुत्याकरणव्यतिरेकेणोत्तरसुत्यायामनधिकारात् । अत एव पूर्वाङ्गानामप्यत्र नावृत्तिरिति ध्येयम् ॥ २१ ॥

इति खण्डदेवविरचितायां भाट्टदीपिकायां
षष्ठस्याध्यायस्य पञ्चमः पादः ॥

अथ षष्ठाध्यायस्य षष्ठः पादः

(१)—सन्निपातेऽवैगुण्यात् प्रकृतिवत्तुल्यकल्पा यजेरन् ॥१॥ वचनाद्वा शिरोवत्स्यात् ॥२॥ न वाऽनारभ्यवादत्वात् ॥३॥ स्याद्वा यज्ञार्थत्वादौदुम्बरीवत् ॥४॥ न तत्प्रधानत्वात् ॥५ औदुम्बर्याः परार्थत्वात्कपालवत् ॥६॥ अन्येनापीति चेत् ॥७॥ नैकत्वात्तस्य चानधिकारात् शब्दस्य चाविभक्तत्वात् ॥८॥

सन्निपातात्तु निमित्तविघातस्स्याद्बृहद्रथन्तरवद्विभक्तशिष्टत्वाद्वसिष्ठनिर्वर्त्ये ॥९॥ अपि वा कृत्स्नसंयोगादविघातः प्रतीयेत स्वामित्वेनाभिसम्बन्धात् ॥१०॥ साम्नोः कर्मवृद्ध्येकदेशेन संयोगे गुणत्वेनाभिसम्बन्धस्तस्मात्तत्र विघातस्स्यात् ॥११॥

दर्शपूर्णमासादौ कल्पभेदः श्रुतः—'राजन्यवासिष्ठानां नाराशंसो द्वितीयः प्रयाजः तनूनपादन्येषाम्' इत्यादिना । अत्र हि 'तनूनपातं यजति' इत्यनेन एकदेशप्रवृत्तिनिमित्तनामधेयमङ्गीकृत्य विहितस्य द्वितीयप्रयाजस्य क्रमे शाखाभेदेन समाम्नातयोर्नाराशंसतनूनपान्मन्त्रयोरव्यवस्थया विकल्पेन द्वितीयप्रयाजसम्बन्धित्वेन प्राप्तयोर्वासिष्ठसम्बन्धमात्रं नाराशंसस्य क्रियते । अत एव नाराशंस इति तद्धितः द्वितीयपदं प्रयाजपदं चानुवादः । ततश्च परिशेषादेव तनूनपान्मन्त्रे अन्यसम्बन्धसिद्धेः तनूनपादन्येषां इत्यपि 'षोडश्युत्तरे' इतिवदनुवाद एव । न च नाराशंसमन्त्रस्य पशुप्रकरणे पाठेऽपि दर्शपूर्णमासप्रकरणे पाठाभाव इति केषांचिदुक्तं युक्तं, पशुप्रकरणेऽपि सूक्ते वैकृतनाराशंसमन्त्रपाठेऽपि 'नाराशंसोऽग्नय आज्यस्य वेतु' इत्यस्य दर्शपूर्णमासप्रकरणे पाठात् । अत एवाश्वलायनादिभिः तत्रैव स पठितः ॥

यत्तु नाराशंसवाक्ये द्वितीयत्वादिविशिष्टप्रयाजान्तरविधिः तस्य च वासिष्ठसम्बन्धित्वेन विधानादन्येषामभाव इति । तन्न—तथात्वे समिद्यागोत्तरत्वरूपद्वितीयत्वस्य नराशं-

सयागे विधानेऽपि वासिष्ठानां तनूनपाद्यागबाधे प्रमाणाभावा-न्नाराशंसोत्तरं तत्करणाद्यापत्तेः । न हि द्वितीयपदे तत्कार्य-कारित्वेन नाराशंसविधिः, येन तेषां तनूनपाद्बाधश्शङ्क्येत । तथात्वे सिद्धान्ते वासिष्ठानामप्युद्देश्यत्वेन वाक्यभेदापत्तेः । 'न च तनूनपादन्येषाम्' इत्यनेन अन्येषामेव तनूनपाद्विधानात् वासि-ष्ठानां तद्बाधोपपत्तिः, तस्यैकवाक्यत्वेनोपपत्तौ वाक्यभेदाङ्गीकारे प्रमाणाभावात् विशिष्टविध्यपूर्वविधिकर्मान्तरकल्पनागौरवप्रस-ङ्गाच्च । अतः पूर्वोक्तप्रकारेण मन्त्रस्यैव वासिष्ठसम्बन्धविधा-नेन कल्पभेद उपपादनीयः । स च दीक्षणीयादिद्वाराऽनेकक-र्तृकेषु सत्रादिषु प्राप्तः । तत्र सत्रादौ भिन्नकल्पानामप्यधिकारः उत समानकल्पानामेवेति चिन्तायां—अविशेषाद्भिन्नकल्पानामपि । न चैककल्पकरणेऽन्येषां वैगुण्यप्रसङ्गः, वासिष्ठानां इत्यत्र मन्त्र-स्य शुद्धवासिष्ठार्थत्वविधाने प्रकरणबाधाद्यापत्तेः । क्रतुयुक्त-पुरुषधर्मत्वे च परिसङ्ख्यापत्तेः वासिष्ठत्वस्य नाराशंसमन्त्रे हौत्रे वैश्वामित्रविधानात् साक्षात्कर्तृपरिच्छेदकत्वेन विध्ययोगेऽपि प्रयोजककर्तृभूतयजमानपरिच्छेदकत्वेन वासिष्ठत्वविध्युपपत्तेः स-त्रादावौदुम्बरीसम्मानवदेकवासिष्ठकर्तृकत्वेऽप्यन्येषां वैगुण्याना-पत्तेः । अतो भिन्नकल्पानामप्यधिकार इति प्राप्ते—

विकल्पेन प्राप्तयोर्मन्त्रयोर्नियमार्थत्वेन वाक्यसार्थक्योप-पत्तौ नियतप्राप्तावासिष्ठव्यावृत्तिरूपपरिसङ्ख्याफलकत्वायोगात् वासिष्ठोद्देशेनैव प्रमाणान्तरवशाद्वासिष्ठाभिलषितफलसाधनीभूत-दर्शपूर्णमासाङ्गभूतद्वितीयप्रयाजद्वारा नराशंसमन्त्रविनियोगवि-धिः । अतश्च नराशंसमन्त्रस्य वासिष्ठेषु ।विनियोगाभावादेव निवृत्तिरिति न तत्परिसङ्ख्याया वाक्यप्रवृत्तिफलत्वं, अतश्च भि-

समकल्पानामप्यधिकारे एकाङ्गभूतमन्त्रपाठे इतरेषां फलानापत्तेस्समानकल्पानामेवाधिकारः ॥ १ ॥

(२)–वचनात्तु द्विसंयोगस्तस्मादेकस्य पाणित्वम् ॥१२॥ अर्थाभावात्तु नैवं स्यात् ॥१३॥ अर्थानां च विभक्तत्वात् न तच्छ्रुतेन सम्बन्धः ॥१४॥ पाणेः प्रत्यङ्गभावादसम्बन्धः प्रतीयेत ॥१५॥

एतेन 'राजपुरोहितौ सायुज्यकामौ यजेयाताम्' इत्यत्रापि न भिन्नकल्पयोरधिकारः, द्वन्द्वस्य युगपदधिकरणवचनत्वेन पदद्वयेऽपि लक्षणावृतत्वात् । तदनङ्गीकारेऽपि वा साहित्यबोधार्थं पदद्वये लक्षणाया आवश्यकत्वाच्च । अन्यथा देवतात्वादेर्व्यासज्यवृत्तित्वानुपपत्तेः अतस्तत्पुरुष एवायं तदुत्तरं चैकशेषः अतश्च समासादुत्पन्नं द्विवचनं तदर्थस्यैव द्वित्वमाह, तस्माद्राजद्वयसम्बन्धिनौ द्वौ पुरोहितौ समानकल्पावेव यजेयातामित्याद्यः पक्षः ॥

द्विवचनस्य विशेषान्वयित्वव्युत्पत्तेस्सङ्ख्याधिकरणे व्युत्पादितत्वादेकस्यानेकस्य वा राज्ञो द्वौ पुरोहिताविल्यपरः । अथवा एकशेषं कृत्वैव तत्पुरुषः कार्यः । इतरथा पदद्वयावृत्तिप्रसङ्गात् राजपदवैयर्थ्यप्रसङ्गाच्च । अत एवैकस्यैव राज्ञो द्वौ पुरोहिताविल्यन्यः । पूर्वपदे लक्षणायां प्रमाणाभावात् 'पुरोहितं वृणीते' इत्युपादेयतादशायामेकत्वस्य विवक्षितत्वेन एकस्य राज्ञः पुरोहितद्वयाभावाच्च कर्मधारय एवायमिति प्राप्ते—

ब्राह्मणानामेव पौरोहित्यश्रवणात्कर्मधारयानुपपत्तेर्द्वन्द्व एवायम् । न च तत्र पदद्वये लक्षणा, युगपदाधिकरणवचनत्वम्

निराकृतत्वात् । न च साहित्यप्रतीत्यर्थं लक्षणा, तत्प्रतीतेरानुमानिकत्वेनाप्युपपत्तौ लक्षणायां प्रमाणाभावात् । समाहारे परमेकत्वान्वयार्थं पदद्वयेऽपि समुदायलक्षणेति विशेषः ॥

वस्तुतस्तु—इतरेतरद्वन्द्वेऽपि व्याप्त्यभावेन साहित्यप्रतीतेरानुमानिकत्वायोगादवश्यं प्रतीयमानस्य तस्य यद्यपि लाक्षणिकत्वमावश्यकमेव । तथाऽपि तल्लक्षणाया एकशेषऽपि समानत्वेन सर्वपक्षेष्वावश्यकत्वात्पूर्वोक्तयुक्त्या द्वन्द्वत्वोपपत्तिः । अतश्च राज्ञः पुरोहितस्य च भिन्नकल्पयोरप्यधिकारः । पुरोहितोऽपि तस्यैव राज्ञः, पुरोहितत्वस्य ससम्बन्धिकत्वेन राजप्रतियोगित्वावश्यंभावे ऐहिकस्यैकराज्यपतित्वरूपसायुज्यफलकत्वस्यान्यत्रानुपपत्तेः । अस्तु वाऽन्यस्यापि । भिन्नकल्पत्वं च यद्यपि न नराशंसमन्त्रे, राज्ञोऽनुरोधेन पुरोहितस्यापि नराशंससमानकल्पस्यैव सम्भवेन तादृशयोरेव तयोरधिकारोपपत्तेः । तथाऽपि सोमफलचमसरूपभिन्नकल्पयोरप्यधिकारः । तत्रापि न विकल्पः, राज्ञः प्राथमिकत्वान्निमित्तत्वाच्च तन्नैमित्तिकेन सोमस्य बाधात् ॥

(३)—सत्राणि सर्ववर्णानामविशेषात् ॥१६॥ लिङ्गदर्शनाच्च ॥१७॥ ब्राह्मणानां वेतरयोरार्त्विज्याभावात् ॥१८॥ वचनादिति चेत् ॥ न स्वामित्वं हि विधीयते ॥२०॥ गार्हपते वा स्यातामविप्रतिषेधात् ॥२१॥ न वा कल्पविरोधात् ॥२२॥ स्वामित्वादितरेषामहीने लिङ्गदर्शनम् ॥२३॥

सत्रेऽपि 'ये यजमानास्त ऋत्विजः' इति श्रुतम् । तत्र न तावद्यजमानानां क्रतुयजनकर्तृत्वरूप ऋत्विक्त्वमादाय द्वयोः प्रथमान्तयोस्सामानाधिकरण्येनान्वयः । 'स्वामिसप्तदशाः' इतिन्यायेन प्राप्ततया वाक्यवैयर्थ्यापत्तेः । अतात्र ऋत्विक्पदं परिक्रयक्रीतर्त्विक्परं तेनापि च न यजमानपदस्य यागकर्त्रभिन्ना इत्येवं सामानाधिकरण्येनान्वयः स्वात्मनि परिक्रयाऽसम्भवेन बाधात् । न च ऋत्विक्पदे न प्रकृतो वस्तुतो ये परिक्रयक्रीताः तत्कार्यकर्तृनाभधाय तेन सह यजमानपदस्याभेदान्वयः, सुबन्तयोः परस्परान्वयस्याव्युत्पन्नत्वाद्विशिष्टकर्तृलक्षणापेक्षया तत्कार्यलक्षणाया एव ऋत्विक्पदे न्याय्यत्वाच्च । अतो 'यो होता सोऽध्वर्युः' इतिवज्जघन्ये ऋत्विक्पद एव तत्कार्यं लक्षयित्वा यजमानसंस्कारार्थत्वेन तद्विधीयते यच्छब्दप्राथम्याभ्यां यजमानस्यैवोद्देश्यत्वप्रतीतेः । अत एव फलमुखत्वादप्राकृतकार्यकल्पनाऽपि न दोषः । एवमृद्धिकामत्वाविशेषात् त्रयाणामपि वर्णानामार्त्विज्यसंस्कार्यत्वावगतेस्त्रयाणामपि सत्रे अधिकारः । अत एव द्वादशाहे 'बार्हद्गिरं ब्राह्मणस्य' इत्यादिलिङ्गमप्युपपद्यते । एवं च यजमानसंस्कारकैरेव ऋत्विक्पदार्थैः प्राकृतक्रतूपकारस्यापि सिद्धेर्न तदर्थं परिक्रयादिभिः ऋत्विगन्तरसम्पादनमित्यपि द्रष्टव्यमिति प्राप्ते—

ज्ञापकसत्वे व्यवहितान्वयकल्पनया शाब्दबोधस्य लोके दृष्टत्वादिहापूर्वविधित्वाददृष्टरूपाप्राकृतकार्यकल्पनादिदोषभिया यच्छब्दस्य व्यवहितान्वयेन स्वरूपप्राप्तिमात्रसूचनेन वा ऋत्विक्कार्यस्यैवोद्देश्यत्वमङ्गीकृत्य यजमानाः कर्तारो विधीयन्ते । न चैतावता अनृत्विक्कर्तृकत्वं शङ्क्यं, यजमानानामपि ऋत्वि-

क्त्वस्य साधितत्वात् वरणादिविध्युन्नीतं यजमानभिन्नत्वं परमतिदेशप्राप्तमुपदेशेन बाध्यते। न त्वेतावताऽब्राह्मणकर्तृकत्वमपीति तदनुग्रहाय ब्राह्मणानामेवाधिकारः। बार्हद्गिरादिदर्शनं त्वहीनाभिप्रायेण ॥

(४)–वासिष्ठानां वा ब्रह्मत्वनियमात् ॥२४॥ सर्वेषां वा प्रतिप्रसवात् ॥२५॥ विश्वामित्रस्य हौत्रनियमात् भृगुशुनकवसिष्ठानामनधिकारः ॥२६॥

प्रकृतौ 'वासिष्ठो ब्रह्मा वैश्वामित्रो होता' इति ब्रह्मत्वाद्युद्देशेन वासिष्ठादिविधानात् तयोश्च विरुद्धकल्पत्वात्सत्रे विकल्प इति प्राप्ते—

'य एव कश्चित्स्तोमभागानधीते स एव वासिष्ठः' इत्यर्थवादेन श्येनपदस्येव विधिस्थवासिष्ठपदस्य लक्षणया स्तोमभागाध्येतृमात्रपरत्वावसायाच्छक्यार्थविध्यभावेन वैश्वामित्रसमानकल्पानामेवाधिकारः। भाष्ये तु 'य एव कश्चित्स्तोमभागानधीते स एवं ब्रह्मा भवेत्' इति वाक्यमुदाहृत्य तस्य विधित्वाङ्गीकारेण वासिष्ठो ब्रह्मेत्यस्य तदर्थवादत्वाच्छक्यार्थविध्यभाव इत्युक्तम् ॥

(५)–विहारस्य प्रभुत्वादनग्नीनामपि स्यात् ॥२७ सारस्वते च दर्शनात् ॥२८॥ प्रायश्चित्तविधानाच्च ॥२९॥ साग्नीनां वेष्टिपूर्वत्वात् ॥३०

स्वार्थेन च प्रयुक्तत्वात् ॥३१॥ सन्निवापं च दर्शयति ॥३२॥

सारस्वतसत्रे 'परस्थैर्वा एते स्वर्गं लोकं यन्ति येऽनाहिताग्नयस्सत्रमासते' इति विधौ सत्रग्रहणस्य प्रकरणेन सङ्कोचे प्रमाणाभावात् सर्वसत्रेष्वनाहिताग्नीनामप्याहिताग्निसहितानामधिकारः इति मन्यते। अत एव सारस्वतसत्रवदेवेतरसर्वसत्रव्यतिरिक्तविषयमेवाधानगतात्मनेपदम्। इष्टिसोमोत्तरकालता तु क्रत्वङ्गत्वादेकं कश्चित्तादृशमिष्टिसोमकर्तारमपेक्ष्योपपन्नैव। न हि तत्रेष्टिसोमसमानकर्तृकत्वमपि विधीयते वाक्यभेदप्रसङ्गादिति प्राप्ते—

'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत य एतेनानिष्ट्वा उत्तरेण यजेत गर्तपत्यमेव तद्भवति' इति वाक्येभ्योऽतिदेशादेककत्वापदोपादानेन वाक्यभेदाभावादिष्टिसोमसमानकर्तृकत्वावगतेः तत्र च आधानगतात्मनेपदानुरोधेनाहिताग्निमात्रकर्तृकत्वावगतेः सारस्वतसत्रप्रकरणस्थविधिवाक्येन च व्रीह्यादिवत्तत्रैवानाहिताग्नेरभ्यनुज्ञानादात्मनेपदानुरोधेन इतरसत्रेष्वाहिताग्नीनामेवाधिकारः ॥

(६)–जुह्वादीनामप्रयुक्तत्वात्सन्देहे यथाकामी प्रतीयेत ॥३३॥ अपि वाऽन्यानि पात्राणि साधारणानि कुर्वीरन् विप्रतिषेधाच्छास्त्रकृतत्वात्॥३४॥ प्रायश्चित्तमापदि स्यात्॥३५

जुह्वादिपात्रेषु तु आत्मनेपदाश्रवणादौदुम्बरीसम्मानत्व-द्गौणत्वाच्च यस्य कस्य चिद्यजमानस्य पात्रैरपि सत्रे अधि-कार इति प्राप्ते—

यस्यैव पात्रैरुपक्रान्तः प्रयोगः तस्यैव यजमानस्य सत्र-प्रयोगमध्ये कदाचिन्मरणे यदि तत्पात्रैस्तस्य दाहस्तदा सत्र-वैगुण्यं, यदि न दाहस्तदा 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च दक्षिणे हस्ते जुहूमासादयति' इत्यादिना विहितस्य पात्रप्रति-पत्तिपूर्वकस्य पात्रगुणकदाहस्य लोपप्रसङ्गः । अतस्साधारणान्य-न्यानि पात्राण्युत्पाद्य सत्रे अधिकारः ॥

(७)—पुरुषकल्पेन वा विकृतौ कर्तृनियमस्स्या-द्यज्ञस्य तद्गुणत्वादभावादितरान् प्रत्येक-स्मिन् अधिकारस्स्यात् ॥३६॥ लिङ्गाच्चेज्या विशेषवत् ॥३७॥ न वा संयोगपृथक्त्वाद्गु-णस्येज्याप्रधानत्वादसंयुक्ता हि चोदना॥३८ इज्यायां तद्गुणत्वाद्विशेषेण नियम्येत॥३९॥

यासु विकृतिषु 'सप्तदश सामिधेनीरनुब्रूयात्' इति श्रुतं तासु वैश्यस्यैवाधिकारः प्रकृतौ 'सप्तदश वैश्यस्य' इत्यनेन तत्त-द्विकृतिस्थसाप्तदश्यानुवादेन वैश्यस्य कर्तृत्वेन विधानात् । वैश्यो-द्देशेनापूर्वसाप्तदश्यविधौ पाञ्चदश्यबाधापत्तेः । वासिष्ठानामित्यत्र तु व्यवस्थार्थत्वात्तथाऽङ्गीकरणमिति विशेषः । अतश्च वैश्यकर्तृ-कसाप्तदश्यानुरोधेन तस्यैव तास्वधिकार इति प्राप्ते—

सामिधेनीसाधनीभूतसाप्तदश्योद्देशे विशिष्टोद्देशापत्तेः सा-प्तदश्यमात्रोद्देशे च विकृत्यपूर्वसाधनीभूतसामिधेनीनामेव त्रि-

शिष्योपस्थापकाभावेनानुवादायोगात् यूपसाप्तदश्यादावपि विधानापत्तेः प्रकरणानुग्रहाच्च वैश्योद्देशेनैव तदधिकारिकदर्शपूर्णमाससम्बन्धिसामिधेनीवृत्तित्वसम्बन्धेन साप्तदश्यं विधीयते, अर्थाच्च वैश्यस्य निमित्तत्वम् । विकृतौ चानैमित्तिकत्वार्थं पुनश्श्रवणमिति सर्वाधिकारः ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
षष्ठस्याध्यायस्य षष्ठः पादः

अथ षष्ठस्याध्यायस्य सप्तमः पादः.

---

(१)–स्वदाने सर्वमविशेषात् ॥१॥ यस्य वा प्रभुस्स्यादितरस्याशक्यत्वात् ॥२॥

विश्वजिति सर्वस्वं ददातीति श्रुतम् । तत्र पित्रादीनामपि ज्ञातित्वेन स्वशब्दवाच्यत्वाद्धनवदेव दानम् । न च पित्रादिषु यथेष्टविनियोज्यत्वरूपस्वत्वस्य 'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु' इत्यादिस्वत्वहेत्वभावेनासम्भवात्, पितृत्वाद्यतिरेकेणात्मीयत्वाभावात् स्वत्वत्यागघटितददातिकर्मत्वानुपपत्तिः । कन्यापुत्रदानादेरपि स्मृतिषूक्तत्वेन तत्रापि स्वत्वाङ्गीकारात् । अस्तु वा तदनुरोधेन परस्वत्वापादनमेव दानपदार्थ इति प्राप्ते—

परविधेयीकरणमात्रेण लोके दानशब्दप्रयोगाभावात् स्वत्वत्यागपूर्वकपरस्वत्वापादनमेव दानपदार्थः । न च पित्रादौ स्वत्वे प्रमाणमस्ति स्वत्वहेतूनामभावात् । कन्यादानादौ ददातेर्गौणत्वात् । न चेह तदाश्रयणं युक्तं, स्वशब्दस्य स्वत्वाश्रयीभूतधनपरत्वेनाप्युपपत्तेः । किञ्चायं स्वशब्दः प्रत्येकशक्त्यैवात्मीयज्ञातिधनेषु प्रवर्तते सर्वानुगतैकशक्यतावच्छेदकाभावात् । अतश्चैकस्मिन् प्रयोगे एकस्यैवार्थस्य ग्राह्यत्वाद्ददात्यनुरोधेन धनस्यैव ग्रहणम् ॥

(२)—न भूमिस्स्यात्सर्वान् प्रत्यविशिष्टत्वात् ॥३

येयं महापृथिवी तस्यास्सार्वभौमधनत्वात् तेन तद्दानमिति प्राप्ते—

सार्वभौमस्यापि न तस्यां स्वत्वम् । जयस्यापि च शत्रुस्वामिकधनगृहक्षेत्रादिविषय एव स्वत्वोत्पादकत्वात् । महापृथिव्यां तु राज्यमात्राधिकारस्यैव जयेन सम्पादनात् राज्यं हि स्वविषयपरिपालनकण्टकोद्धारणरूपं, तन्निमित्तकं च तस्य कर्षकेभ्यः करादानं दण्ड्येभ्यश्च दण्डादानं इत्येतावन्मात्रम् । न त्वेतावता तस्यां स्वत्वम् । तथात्वे वनगततृणकाष्ठादावपि स्वत्वापत्तौ तत्र स्वत्वोत्पादकपरिक्रयविधिविरोधापत्तेः तद्विषयस्थप्रजागृहादिष्वपि स्वत्वापत्तेश्च । तस्मन्नासौ देया । माण्डलिकेनापि न मण्डलम् । परिक्रयादिलब्धं गृहक्षेत्रादिकं तु देयमेव ॥

(३)—अकार्यत्वाच्च ततः पुनर्विशेषस्स्यात् ॥४॥

अश्वादयः केसरिणोऽपि सर्वस्वे न देयाः 'न केसरिणो ददाति नोभयतोदतः प्रतिगृह्णाति' इति तेषां पर्युदासात् । यद्यपि चानारभ्याधीतेनानेन रागतः प्राप्तस्यैव मित्रादिभ्यः अश्वदानस्य 'यथाश्रद्धं दक्षिणां ददाति' इत्यादौ अनियमेन विहितस्यापि चाश्वविषये ऐच्छिकस्य दानस्य प्रतिषेध एव क्रियते । तथाऽपि विश्वजित्प्रकरणस्थेनानेन पर्युदास एव । सर्वस्वपदेन नियमत एव सर्वस्वदानस्य विहितत्वेनाश्वांशेऽपि तत्प्रवृत्तेर्वैधतया निषेधपक्षे विकल्पस्यापरिहार्यत्वात् । आवश्यकी चेयं वाक्यद्वयकल्पना । इतरथा अश्वप्रतिग्रहेष्ट्यधिकरणादौ लौकिकाश्वदाननिषेधकथनानुपपत्तेः । 'नोभयतोदतः प्रतिगृह्णाति' इत्यत्र तु पुरुषार्थः प्रतिषेधो दानलक्षणया वा पर्युदास इत्यपि ध्येयम् ॥

वस्तुतस्तु प्राकृतस्यैव नैमित्तिकस्य सर्वस्वदानस्यानैमित्तिकत्वार्थं विधेयत्वस्य वक्ष्यमाणत्वात् प्रकृतौ च दक्षिणार्थभागे इच्छयैवाश्वानां प्रसक्तेरनारभ्याधीतेनैव तन्निषेधोपपत्तौ न विश्वजित्प्रकरणे वाक्यान्तरकल्पनमपि । अत एव ज्योतिष्टोम तद्विकारानङ्गे सर्वस्वदाने अश्वानां दानमिष्टमेव । (इदमत्र चिन्त्यं - ज्योतिष्टोमे सर्वस्वदानपक्षे सर्वस्वं द्वादशशतगवाश्वादिघटितदक्षिणादिकमित्यस्याग्रे स्थापयिष्यमाणत्वान्नाश्वस्य सर्वस्वघटितत्वमावश्यकमिति) ॥

(४)–नित्यत्वाच्चानित्यैर्नास्ति सम्बन्धः ॥५॥

यत्किञ्चित्पुरुषस्योपभोग्यं स्वं कुप्याकुप्यशयनासनगवादि तत्सर्वं ददाति इति शास्त्रार्थावधारणात् यस्यापि यन्नास्ति सोऽपि तदार्जयित्वा दद्यात् धात्वर्थविधिलाभादिति प्राप्ते—

षष्ठविधिप्रकारापत्तेश्चोदकप्राप्तदानानुवादेन द्वादशशतबाधेन सर्वतामात्रविधानात् प्रसिद्धस्वत्वेष्वेव सर्वशब्दस्योपपत्तावप्रसिद्धस्वत्वार्जनाक्षेपकत्वानुपपत्तेश्च नार्जयित्वा देयम् ॥

(५)–शूद्रश्च धर्मशास्त्रत्वात् ॥६॥

धर्मार्थं भृत्यर्थं वा परिचारकत्वेनावस्थितश्शूद्रोऽपि न देयः तत्रास्य स्वत्वाभावात् परवश्यत्वानभ्युपगमसम्भवाच्च । गर्भदासादयस्तु देया एव ॥

(६)–दक्षिणाकाले यत्स्वं तत् प्रतीयेत तद्दानसंयोगात् ॥७॥

दक्षिणाकाले यत्रास्य स्वत्वं तस्यैव दानं न तु ततः प्रागपि यत्प्राप्तोपभोगं धनं तदनुपभुज्य प्रयत्नेन धारयित्वा देयम् । धारणप्रयोजकत्वे प्रमाणाभावात् । भाविनस्तु तदानीं स्वत्वाभावादेवाशक्यं दानम् । न च भाविन्यापि प्रतिश्रवणमात्रेण स्वत्वोत्पत्तिः । तथात्वे दत्तस्य पुनर्दानासम्भवेन 'देयं प्रतिश्रुतं चैव' इति विधिवैयर्थ्यप्रसङ्गात् । ददातेस्समर्पणमात्रार्थत्वे लक्षणाप्रसङ्गाच्च । प्रतिश्रवणेन च स्वोपभोगान्यदानायोग्यता परं जन्यते उक्तदाननियमात् 'यच्चान्यस्मै प्रतिश्रुतम्' इत्यन्यस्मै दाननिषेधाच्च, न तु स्वत्वं निर्वापवत् ॥

(७)–अशेषत्वात्तदन्तस्स्यात् कर्मणो द्रव्यसिद्धत्वात् ॥८॥ अपि वा शेषकर्मस्यात्क्रतोः प्रत्यक्षशिष्टत्वात् ॥९॥ तथा चान्यार्थदर्श-

नम् ॥१०॥ अशेषं तु समञ्जसादानेन शेषकर्म स्यात् ॥११॥ नादानस्य नित्यत्वात् ॥ दीक्षासु तु विनिर्देशादक्रत्वर्थेन संयोगस्तस्मादविरोधस्स्यात् ॥१३॥

ज्योतिष्टोमे तद्विकारे तदन्यत्र च यत्र सर्वस्वदानमाम्नातं तत्र वृत्ता कथा । तत्र तु कर्मारम्भ एव त्रिधा यजमानेनात्मीयं धनं वचनाद्व्यवस्थापितं भक्षार्थं क्रत्वर्थं दक्षिणार्थं चेति । तत्र सर्वस्य स्वत्वाविशेषात् त्रिविधस्यापि दानं न तु दक्षिणार्थभागस्यैव सर्वता । तस्य प्रकृतौ दक्षिणार्थत्वे सर्वस्वदानविधिवैयर्थ्यम् । तदभावे भागत्रयस्याप्यविशेषात् दक्षिणार्थोऽयं भाग इति व्यपदेशानुपपत्तिः । अतश्च प्रत्यक्षवचनोपदिष्टसर्वस्वदानवशेनातिदेशप्राप्तकर्मशेषलोपः । पदार्थानां प्रधानत्वादङ्गभूतदक्षिणानुरोधेन बाधस्य प्रमेयबलाबलन्यायेनानुपपत्तेर्वा किञ्चित् क्रतवे शिष्ट्वा सर्वमन्यत्प्रदीयतामिति प्राप्ते—

दक्षिणार्थेन निर्दिष्टस्य तत्सम्बन्धप्राप्तौ सर्वतामात्रविधाने लाघवमिति तस्यैव सर्वदानम् । न चैवं प्रकृतावपि तस्य दानापत्तेरत्र विधिवैयर्थ्यं, इतरथा तस्य दक्षिणार्थत्वानुपपत्तिरिति वाच्यं, यद्येतावता ऋत्विजो नानमेयुः, अपि तु सर्वस्वेनेत्यनेन वचनेन द्वादशशतेनानत्यसम्भवे तस्यापि दक्षिणार्थत्वात् । अत्र च दक्षिणार्थभागस्यैव देयत्वे अवस्थिते पूर्वतनानि षडधिकरणानि क्त्वाचिन्तयेति केचित् ॥

वस्तुतस्तु—पित्रादीनामपि दक्षिणाभागान्तःपातित्वेन विचारोपपत्तेर्न क्त्वाचिन्तात्वम् ॥७॥

(८)–अहर्गणे च तद्धर्मा स्यात् सर्वेषामविशेषात् ॥१४॥ द्वादशशतं वा प्रकृतिवत् ॥१५ अतद्गुणत्वात्तु नैवं स्यात् ॥१६॥ लिङ्गदर्शनाच्च ॥१७॥

अस्त्यष्टरात्रोऽहीनः तस्य विश्वजित्प्रथममहः ततोऽभिप्लवषडहः ततोऽभिजित् 'पशुकामो ह्येतेन यजेत' इति श्रुतः । तत्र विश्वजिति प्रकरणान्तराधिकरणोक्तन्यायेन कर्मान्तरे नामातिदेशेनैकाहकाण्डपठितविश्वजितो धर्मः सर्वस्वं अन्येषु तु गणत्वाद्द्वादशाहतो ज्यौतिष्टोमिकी दक्षिणा । द्वादशाहेऽपि च प्रतिसुत्यं भेदेनातिदेशेऽपि प्रयोगैकत्वेन कर्तैकत्वस्य दशमे वक्ष्यमाणत्वात्तदानत्यर्थाया दक्षिणाया अपि तन्त्रेणादावन्ते वा देयत्वप्रसक्तौ 'अन्वहं द्वादशशतं ददाति' इत्यनेनावृत्तिफलकोऽन्वहकालो विधीयते । द्वादशशतस्यापि विधाने वाक्यभेदापत्तेः । प्राकृतषष्टिपक्षादि दक्षिणामात्रोपलक्षणं तत् । तेन या दक्षिणा तन्त्रेण देयत्वेन प्रसक्ता तां प्रत्यहं ददातीति तद्वाक्यार्थः ॥

तदिहाष्टरात्रे नामातिदेशप्राथम्याभ्यां विश्वजिद्धर्मानुग्रहप्राप्तावपि भूयोऽनुग्रहस्य न्याय्यत्वात् द्वादशशतस्यैव तन्त्रेणोपकारकत्वप्रसक्तेस्तस्यैवान्वहमित्यनेनावृत्तिकरणाद्द्वादशशतमेव प्रत्यहं देयमिति वार्तिककाराशयः । भाष्यकाराशयस्तु अष्टरात्रप्रकरणस्थेनैव "हीयते वा एष पशुभिर्यो विश्वजिति न सर्वस्वं ददाति" इत्यनन्यथासिद्धलिङ्गोपष्टब्धप्राथम्यादिना तत्कल्प्यविधिनैव वा सर्वस्वविधानादाद्य एव सर्वेषु वाऽहस्सु सर्वस्वं देयमिति ॥८॥

(९)—विकारस्सन्नुभयतोऽविशेषात् ॥१८॥ अधिकं वा प्रतिप्रसवात् ॥१९॥ अनुग्रहाच्च पादवत् ॥२०॥

प्रकृतिभूते विश्वजिति द्वादशशतादिन्यूनधनस्यापि सर्वस्वपदवाच्यत्वोपपत्तेः तद्वतोऽप्यधिकार इति प्राप्ते—

प्रकृतौ ज्योतिष्टोमे यद्येतावता ऋत्विजो नानमेयुरपि तु सर्वस्वेनेत्यनेन द्वादशशतासाध्यायामानतौ सर्वस्वविधानात्तत्र च तदधिकस्यैव योग्यतया प्राप्तेस्तादृशस्यैवात्र पक्षप्राप्तस्य नियममात्रकरणाद्द्वादशशताधिकधनवत एव विश्वजित्यधिकारः ॥

(१०)—अपरिमिते शिष्टस्य सङ्ख्याप्रतिषेधस्तच्छ्रुतित्वात् ॥२१॥ कल्पान्तरं वा तुल्यवत्प्रसङ्ख्यानात् ॥२२॥ अनियमोऽविशेषात् ॥ अधिकं वा स्याद्बह्वर्थत्वादितरेषां सन्निधानात् ॥२४॥ अर्थवादश्च तद्वत् ॥२५॥

आधाने "एका देया षट् देयाः द्वादश देयाश्चतुर्विंशतिर्देयाश्शतं देयं सहस्रं देयं अपरिमितं देयमिति" श्रुतम्। तत्रापरिमितशब्दः परिमाणशून्यमवयवव्युत्पत्त्याऽभिधत्ते। न च परिमाणशून्यस्य दानं सम्भवतीत्यतः प्रकृतपरिमाणशून्यत्वमर्थः। तेन प्रकृतपरिमाणप्रतिषेध एवायमिति प्राप्ते—

ज्ञातपरिमाणेऽपि बाहुल्यमात्रेण लोके अपरिमितशब्दप्रयोगात् बाहुल्ये शक्तिः। ततश्चाश्वकर्णादिवद्रूढ्या योगबाधा-

श्चायं पूर्वपरिमाणप्रतिषेधः । अपरिमितशब्दस्य नञ्समासत्वेन तदन्तर्गतस्य नञः क्रियान्वयव्युत्पत्त्यभावेन निषेधायोगाच्च । प्रकृतपरिमाणानामनेकत्वबलेनैव विकल्पप्राप्तेर्निषेधवैयर्थ्याच्च । प्रकृतपरिमाणातिरिक्तानियतपरिमाणकदानान्तरविध्यङ्गीकारे च लक्षणाद्यापत्तेः वरं बहुत्वावच्छिन्नद्रव्यकदानान्तरविधिरेवायम् । बहुत्वस्य चापेक्षिकत्वेन पूर्वप्रकृतसहस्रावधिकत्वनिश्चयात्तदपेक्षयाऽधिकमेवापरिमितम् ॥ १० ॥

(११)—परकृतिपुराकल्पं च मनुष्यधर्मस्स्यादर्थाय ह्यनुकीर्तनम् ॥२६॥ तद्युक्ते च प्रतिषेधात् ॥२७॥ निर्देशाद्वा तद्धर्मस्स्यात्पञ्चावत्तवत् ॥२८॥ विधौ तु वेदसंयोगादुपदेशस्स्यात् ॥२९॥ अर्थवादो वा विधिशेषत्वात्तस्मान्नित्यानुवादस्स्यात् ॥३०॥

दर्शपूर्णमासयोः "इति ह स्माह बर्कुर्वार्ष्णिर्माषान्मे पचत" इति श्रुतम् । इदं चैककर्तृकोपाख्यानपरत्वात्परकृतिः । अयं चारण्याशनविधेश्शेषः । बहुकर्तृकोपाख्यानपरं च वाक्यं पुराकल्पः सत्रे "उल्मूकैस्सह पूर्वे समाजग्मुः तानसुरा रक्षांसि निजघ्नुः" इति । अयं च "ग्रहपतेरेवाग्निषु निर्मन्थ्यं निर्वपेरन्" इति निर्मन्थ्याग्निसंसर्गस्तुत्यर्थः उल्मूकसंसर्गनिन्दकस्सन् तद्विधेश्शेषः । न तु स्वतन्त्रो विधिरित्यौदुम्बराधिकरणे निर्णीतमेव । परकृत्युदाहरणे तु यदा विधिस्तदा कृत्वाचिन्तया विचार्येते । वृष्णिगोत्रोत्पन्नाधिकारिकदर्शपूर्णमासोद्देशेन तत्क-

तृसंस्कारार्थतया वा माषपाकविधिरिति तद्वत एव माषपाकाधिकारो वैश्यनिमित्तकसाप्तदश्यवत् । न ह्यत्र प्राच्यत्ववत् वृष्णिगोत्रत्वं दुर्वचं येन तत्कल्प्यविधेः सामान्यविषयत्वं स्यादिति प्राप्ते—

स्तुत्युपायत्वेनोपात्तस्य वृष्णिगोत्रत्वस्य विधेयमाषपाकविशेषणत्वकल्पने प्रमाणाभावान्माषपाकमात्रविधानेन सर्वाधिकारः ॥

(१२)—सहस्रसंवत्सरं तदायुषामसम्भवात् मनुष्येषु ॥३१॥ अपि वा तदधिकारान्मनुष्यधर्मस्स्यात् ॥३२॥ नासामर्थ्यात् ॥३३ सम्बन्धादर्शनात् ॥३४॥ स कुलकल्पस्स्यादिति कार्ष्णाजिनिरेकस्मिन्नसम्भवात् ॥३५ अपि वा कृत्स्नसंयोगादेकस्यैव प्रयोगस्स्यात् ॥३६॥ विप्रतिषेधात्तु गुण्यन्यतरस्स्यादिति लावुकायनः ॥३७॥ संवत्सरो विचालित्वात् ॥३८॥ सा प्रकृतिस्स्यादधिकारात् ॥३९॥ अहानि वाऽभिसङ्ख्यत्वात् ॥४०॥

"पञ्च पञ्चाशतस्त्रिवृतस्संवत्सराः । पञ्चपञ्चाशतः पञ्चदशाः । पञ्चपञ्चाशतस्सप्तदशाः । पञ्चपञ्चाशत एकविंशाः । विश्वसृजामयनं सहस्रसंवत्सरमिति" श्रुतम् । तत्र पञ्चाशच्छब्दः सङ्ख्या-

पर एव। त्रिवृत्संवत्सरशब्दौ तु लक्षणया त्रिवृत्स्तोमकसंवत्स-रसाध्यक्रतुवृत्तिपरौ । पञ्चाशच्छब्दविशेषणं पञ्चशब्दोऽपि। तेन तादृशक्रतुवर्तिनी पञ्चत्वसङ्ख्यावच्छिन्ना पञ्चाशत्सङ्ख्येति पार्ष्ठिकान्वयवेलायां फलितोऽर्थः । तदिदं त्रिवृदादिस्तोमकत्वं यद्यपि साक्षात्सम्बन्धेनाहन्येव। तथाऽपि तादृशाहर्घटितत्वात्सं वत्सरेऽपि तत्सम्भवतीति न कोपि दोषः ॥

तत्र संवत्सरशब्दो मुख्यया वृत्त्या संवत्सरमेवाभिधत्ते तेन मनुष्याणां सहस्रायुष्ट्वाभावात्तिर्यगधिकरणे निराकृतोपि श्रुतिबलाद्गन्धर्वादीनामेवाधिकारः । तेषां त्वन्नाद्युपसंहारा-सामर्थ्यान्मनुष्याणामेव वा रसायनलब्धसहस्रायुषां सः । रसायनादेरेतावदायुस्सम्पादनसामर्थ्ये प्रमाणाभावात् 'शतायुर्वै पुरुषः' इति श्रुतेश्चैकेनारब्धस्य पुत्रादिपारम्पर्येण समापनमिति कुलकल्पो वा । 'शास्त्रफलं प्रयोक्तरि' इति न्यायस्य विनावचनमपवादे प्रमाणाभावात् समस्तकर्मानुष्ठानाभावे विकलानुष्ठायिनां फलानुत्पत्तिप्रसङ्गात्सत्रारम्भादेव सहस्रायुष्यं जायत इति वा कल्प्यम । एतादृशकल्पनेऽपि प्रमाणाभावात् पञ्चपञ्चाशत इति यजमानाभिप्राया सङ्ख्या । तेनैकोपि त्रिवृत्स्तोमकयागयुक्तस्संवत्सरः पञ्चपञ्चाशत्सङ्ख्याकैर्यजमानैस्सम्बध्यमानस्तावत्सङ्ख्य इत्युपचर्यते। अतश्चतुस्संवत्सरमिदं सत्रं सार्धशतद्वयैर्यजमानैः कार्यमिति वा पक्षान्तरम्। अस्यापि बुद्धावत्यन्तमनारोहात् 'सप्तदशावराश्चतुर्विंशतिपरमाः' इत्यातिदेशिकपरिमाणबाधापत्तेश्चानुपपत्तिः ॥

तस्मात् सङ्ख्याशब्दं संवत्सरशब्दं वा गौणमाश्रित्यैव मनुष्याधिकारस्समर्थनीयः। तत्रापि सङ्ख्याशब्दयोर्मुख्यत्वादेकार्थनि-

श्रयसामर्थ्याच्च न स्वार्थत्यागः । संवत्सरपदं तु जघन्यत्वात् सौरचान्द्रादिभेदेनानेकार्थत्वाच्चार्थनिश्चयासमर्थं भवतीति गौणम्। तत्र 'यो मासस्ससंवत्सरः' इति दर्शनान्मासेष्वेव संवत्सरशब्द इत्येकः पक्षः । तत्रापि त्वशक्तिस्तदवस्थैव । न ह्याधानादूर्ध्वं सहस्रमासपर्यन्तं जीवनं सम्भवति । अतः 'संवत्सरप्रतिमा वै द्वादश रात्रयः' इति प्रयोगात् द्वादशरात्रिष्वित्यपरास्सिद्धान्तः। प्रतिमाशब्दविशेषणं त्वत्र संवत्सरशब्दो, न तस्य द्वादशरात्रिषु प्रयोगः, तेन त्रिवृदादिशब्दसामञ्जस्यादिवसेषु संवत्सरशब्दः । त्रिवृदादिपदैर्हि स्तोत्रमात्रवाचकैरपि तद्विशिष्टं अहरेव लक्षणया प्रकाश्यते । तत्सङ्ख्यस्तु लक्षितलक्षणया । लक्ष्यतावच्छेदकगौरवाङ्गीकारेण वा । अतस्ताद्धिया संवत्सरपदं दिवसपरमेवेति सिद्धान्तः । इदं च कृतादियुगान्तरेष्वपि मनुष्याणां शतमेव परमायुरिति कृत्वाचिन्तया । यदा तु स्मृतिपुराणेतिहासादौ श्रुतस्य प्रकृष्टतरपुण्ययोगादिफलस्यानेकसहस्रवत्सरपरिमितस्यायुषोपि प्रकृतश्रुत्युपष्टब्धस्य प्रामाणिकत्वं एतज्ज्ञापकबलेनैव च 'शतायुर्वै पुरुषः' इति श्रुतौ शतान्यायूंषि यस्येति विग्रहः कलियुगाभिप्रायत्वं वाऽऽश्रयणीयं, तदा त्रिवृदादिशब्दैनाहस्सङ्ख्यमेव त्रिवृत्स्तोमकाहर्घटितत्वसम्बन्धेन लक्षयित्वा संवत्सरशब्दो यथाश्रुत एव । सत्रं च गोवधादिवद्युगान्तरस्थतावदायुष्यमनुष्यपरमिति ध्येयम् । न हि मीमांसकमते युगादिव्यवस्थाऽलीका । तत्तद्युगधर्मव्यवस्थापकस्मार्तविधीनां निर्विषयत्वापत्तेः ॥ १२

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां षष्ठस्याध्यायस्य सप्तमः पादः ॥

अथ षष्ठाध्यायस्याष्टमः पादः

(१)—इष्टिपूर्वत्वादक्रतुशेषो होमस्संस्कृतेष्वग्निषु स्यादपूर्वोऽप्याधानस्य सर्वशेषत्वात् ॥१॥ इष्टित्वेन तु संस्तवश्चतुर्होतॄनसंस्कृतेषु दर्शयति ॥२॥ उपदेशस्त्वपूर्वत्वात् ॥३॥ स सर्वेषामविशेषात् ॥४॥ अपि वा क्रत्वभावादनाहिताग्नेरशेषभूतनिर्देशः ॥५॥ जपो वाऽनग्निसंयोगात् ॥६॥ इष्टित्वेन तु संस्तुते होमस्स्यादनारभ्याग्निसंयोगादितरेषामवाच्यत्वात् ॥७॥ उभयोः पितृयज्ञवत् ॥८॥ निर्देशो वाऽनाहिताग्नेरनारभ्याग्निसंयोगात् ॥९॥ पितृयज्ञे संयुक्तस्य पुनर्वचनम् ॥१०॥

सन्ति चतुर्होतृसंज्ञका मन्त्राः "पृथिवी होता। द्यौरध्वर्युः" इत्यादयः तैर्जपहोमाश्च विहिताः। तत्र ये तावत्क्रत्वर्थाः पुरुषार्थां अपि वा वचनात् क्रतुप्रयोगमध्यवर्तिनः तेषु विवाद एव नास्ति। येऽपि पृथग्भूताः काम्या जपास्तेष्वप्यविवाद एव आहिताग्न्यनाहिताग्निसाधारणत्वात्। ये तु तादृशा होमाः

तेषां 'यदाहवनीये जुहोति' इत्यनेनाहवनीयाधिकरणकत्वस्य विहितत्वादितरहोमवदेवाहिताग्निमात्राधिकारकत्वम् । यत्तु 'एषा वै अनाहिताग्नेरिष्टिः' इति चतुर्होतृसन्निधौ वचनं तद्येयमनाहिताग्नेः क्रिया जपादिरूपा सा इष्टितुल्येत्येवमिष्टिसादृश्यमात्रानुवादेन जपाभिप्रायकतया नानुपपन्ना । यदि तु विध्यन्तरशेषत्वाभावेनार्थवादत्वानुपपत्तेर्जपे इष्टिसादृश्यस्य कथमप्यनुपपत्तेश्चायं, येयं त्यागघटितत्वसादृश्याच्चतुर्होतृहोमरूपेष्टिः साऽनाहिताग्नेरित्यर्थाङ्गीकारेण विधिरित्याश्रीयेत तथाऽप्यस्याहिताग्निपरिसङ्ख्यार्थत्वे प्रमाणाभावात् पिण्डपितृयज्ञवदुभयाधिकारिकत्वमिति प्राप्ते--

प्रत्यक्षवचनेनानाहिताग्नेः कर्तृत्वविधौ तत एव स्मार्ताग्न्यधिकरणकत्वप्राप्तेराहवनीयाधिकरणकत्वस्यासम्भवादेव बाधात्परिसङ्ख्यात्वानापत्तेरनाहिताग्नेरेवाधिकारः । पिण्डपितृयज्ञे तु एवमनाहिताग्नारिति वचनेऽनाहिताग्नेरप्यभ्यनुज्ञानादुभयाधिकार इति विशेषः ॥ १ ॥

(२)--उपनयन्नादधीत होमसंयोगात् ॥११॥ स्थपतीष्टिवल्लौकिके वा विद्याकर्मानुपूर्वत्वात् ॥१२॥ आधानं च भार्यासंयुक्तम् ॥१३॥ अकर्म चोर्ध्वमाधानात्तत्समवायो हि कर्मभिः ॥१४॥ श्राद्धवदिति चेत् ॥१५॥ न श्रुतिविप्रतिषेधात् ॥१६॥ सर्वार्थत्वाच्च पुत्रार्थो न प्रयोजयेत् ॥१७॥ सोमपाना-

न्तु प्रापणं द्वितीयस्य तस्मादुपयच्छेत् ॥१८॥ पितृयज्ञे तु दर्शनात्प्रागाधानात्प्रतीयेत ॥१९॥

उपनयनाङ्गभूता होमा आचार्यकर्तृका माणवककर्तृकाश्चो-भयेऽप्युपनयनद्वारा माणवकसंस्कारार्था इत्यविवादम् । तत्र य तावदाचार्यकर्तृकास्तेषां सत्यप्याचार्यस्याहिताग्नित्वे आधानगतात्मनेपदविरोधान्नाचार्याग्निषु कार्याः । अपि तु लौकिक एवाग्नौ । ये तु माणवककर्तृकास्ते तु सुतराम् । क्रतुविधीनामिवोपनयनाङ्गभूतहोमानामप्याधानाप्रयोजकत्वात् । प्रयोजकत्वेऽपि वाऽऽधानस्येतरकर्मवत् ज्ञानाक्षेपकत्वाभावेनोपनयनात्पूर्वं कर्तुमशक्यत्वाच्च । आक्षेपकत्वेऽपि चोभयाधिकारकस्याधानस्य भार्याभावेनानुपपत्तेश्च । भार्यायाश्च 'स्नात्वा भार्यामधिगच्छेत्' इति समावर्तनोत्तरकालं विवाहविधानेन पूर्वमसम्भवात् । न च प्रयोजनानुरोधेन कालबाधः । एतद्वाक्यस्य निर्विषयत्वापत्तेः । न चापत्यार्थं दारान्तरकरणे कालविधिः । 'धर्मे चार्थे च' इत्यादिपर्यालोचनया धर्मार्थमपत्यार्थं च दारान्तरानुपपत्तेः दारक्रियायामपि स्वतन्त्रकालाम्नानेन क्रतुविधीनामाधानाध्ययनवदेव दारक्रियाप्रयोजकत्वाभावाच्च । अत एव न विरक्तस्य कर्मार्थं दारक्रिया, किन्त्वाश्रमान्तरमेव । किञ्चोपनयनात्पूर्वमाधानकरणे जातपुत्रत्वाद्याधानकाललोपोऽष्टवर्षाद्युपनयनकाललोपो वा प्रसज्येत । अतस्तेऽपि लौकिकाग्नावेव ॥ २ ॥

(३)—स्थपतीष्टिः प्रयाजवदग्न्याधेयं प्रयोजयेत्तादर्थ्याच्चापवृज्येत ॥२०॥ अपि वा लौ-

किकेऽग्नौ स्यादाधानस्यासर्वशेषत्वात् ॥२१

निषादेष्टेः दर्शपूर्णमासविकृतित्वादतिदेशेनाहवनीयादिप्राप्तौ तेषामाधानाधीनत्वादसत्यपि तस्य स्वतन्त्राधानविधौ निषादेष्टि-रेवास्याधानं प्रयोजयेदिति प्राप्ते—

सत्यपि तस्याग्निजनकाकाङ्क्षत्वे जनकीभूतस्याधानस्य ब्राह्मणादिकर्तृकत्वेनैवोत्पन्नत्वात् निषादकृतेनाग्निनिष्पत्तौ प्रमाणाभावात् प्रकृतौ परप्रयुक्ताग्न्युपजीवनेनेहाहवनीयादिप्राप्तेरेवाभावाच्च न तेषु सा। विद्यायास्तु तद्व्यतिरेकेण निषादेष्टेरेवासम्भवात्तदुपायस्य लौकिकत्वेनाक्षेपोपपत्तिरिति वैषम्यम्। तेनाहवनीयाद्यनाक्षेपकत्वेऽपि 'यत्र क्वच न होष्यन् स्यात् पञ्चभूसंस्कारान् कृत्वा लौकिकाग्निं प्रतिष्ठापयेत्' इति स्मृतिवचनेनाग्न्यन्तराभावे होममात्रोद्देशेन लौकिकाग्निविधानात्तमेव तद्देशे स्थापयित्वा तेष्विष्टिः कार्या। यत्तु 'तस्मिन् गृह्याणि' इति गौतमवचनं लौकिकाग्निप्रापकत्वेन तन्त्ररत्ने उदाहृतं तत् गौतमस्मृतौ तच्छब्देन स्मार्ताग्नेरेव परामर्शात् निषादेष्टेश्च गृह्यत्वाभावादुपेक्षितम्। न हि गृहशब्दवाच्यदम्पत्योर्हितमिति व्युत्पत्त्याऽस्यापि गृह्यपदवाच्यत्वं, अभियुक्तप्रसिद्ध्या गृह्यपदस्य गृह्यसूत्रोक्तकर्मस्वेव रूढत्वेन योगस्याप्रयोजकत्वात्। इतरथा गृह्यत्वापत्तेः ॥ ३ ॥

(४)—अवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वात् ॥२२॥

'यो ब्रह्मचार्यवकिरेत् स नैर्ऋतं गर्दभं पशुमालभेत' इति श्रुतौ यागोऽपि लौकिक एवाग्नौ सत्यपि त्रैवर्णिकत्वे विद्वत्त्वे वा

भार्याभावेनाधानासम्भवात् । न चावकीर्णिनोपि स्नात्वा विवाहे बाधकाभावः 'अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्' इति वचनेन विप्लुतब्रह्मचर्यस्यावकीर्णिनोऽकृतप्रायश्चित्तस्य विवाहनिषेधात् । न ह्यत्राविप्लुतब्रह्मचर्यपदेन कृतब्रह्मचर्याश्रमोत्तराश्रमयोः पौर्वापर्यमात्रस्यानेन विधानादवकीर्णिनोऽपि विवाहे बाधकाभावः । 'स्नात्वा भार्यामुपेयात्' इत्यनेनैव स्नानपूर्वभाविनो ब्रह्मचर्यस्य स्नानोत्तरभाविना विवाहेनार्थात् पौर्वापर्यसिद्धेरस्य वचनस्य साङ्गब्रह्मचर्यवत एव विवाहाधिकार इत्येवमर्थतयाऽवकीर्णिनो विवाहानुपपत्तेः । अतस्सोपि लौकिकाग्नावेव । आपस्तम्बवचनादप्सु वा । अयं चावकीर्णियागो न दैक्षप्रकृतिकः । 'गर्दभं पशुम्' इति पशुशब्दोपादानवैयर्थ्यात् । किन्तु 'अथ पशुकल्पः' इत्याश्वलायनोक्तायास्स्मार्तपश्वितिकर्तव्यताया एव तदङ्गत्वमिति केचित् ॥ ४ ॥

(५)–उदगयनपूर्वपक्षाहःपुण्याहेषु दैवानि स्मृतिरूपान्यार्थदर्शनात् ॥२३॥ अहनि च कर्मसाकल्यम् ॥२४॥ इतरेषु तु पित्र्याणि ॥२५॥

श्रुतौ स्मृतौ वा यस्मिन् कर्मणि दैवे पित्र्ये वोदगयनशुक्लकृष्णपक्षादिः यः कालः प्रत्यक्षवचनेनान्यार्थदर्शनकल्प्यविधिना वा विहितस्सोऽविरोधे समुच्चयेन विरोधे विकल्पेन ग्राह्य इत्येवं सुहृद्भूत्वा सूत्रकारश्शिष्येभ्य उपदिष्टवान् ॥ ५ ॥

(६)–याच्ञाक्रयणमविद्यमाने लोकवत् ॥२६ नियतं वाऽर्थवत्त्वात्स्यात् ॥२७॥

'दीक्षितो भृतिं वन्वीत' इति याच्ञा यस्यापि दक्षिणादानार्थं द्रव्यमस्ति तेनापि कार्या न त्वविद्यमानद्रव्येणैव । नित्यवच्छ्रवणेन सर्वदैव क्रतुनाऽपूर्वेण च प्रयुक्तत्वात् । न चास्याः द्रव्यप्राप्तिद्वारा द्रव्यसंस्कारकत्वात् द्रव्यसत्त्वे च तत्प्रापणोपायवैयर्थ्याद्सत्यपि निमित्तत्वश्रवणे प्रयोजनवशादेवाकाङ्क्षितविधिन्यायेन नियमविधित्वोपपत्तिरिति वाच्यं, अनाकाङ्क्षितविधानस्य फलकल्पकत्वेन दोषत्वात् प्रकृते चाविद्यमानद्रव्यस्थले द्रव्यप्राप्तिरूपफलवत् विद्यमानद्रव्यस्थलेऽपि तत्फलत्वाविशेषात् कल्पनाभावेन दोषत्वाभावात् । याच्ञाप्राप्तद्रव्यस्यैव क्रत्वपूर्वेण ग्रहणात् नित्यत्वोपपत्तेः । एवं विद्यमानेऽपि सोमे क्रयस्यावश्यकत्वम् ॥ ६ ॥

(७)–तथा भक्षप्रैषाच्छादनसंज्ञप्तहोमद्वेषम् ॥

एवं पयोव्रताद्यपि विद्यमाने अविद्यमानेऽपि भक्षान्तरे स्यात् । 'अग्नीदग्नीन् विहर' इति च प्रैषोऽन्यतोऽनवबुद्धे अवबुद्धेऽपि स्यात् । बुद्धेऽप्यर्थे एतद्बोधजन्यानियमादृष्टसिद्ध्यर्थं प्रैषावश्यकत्वात् । अत एव प्रैषजन्यबोधानुष्ठितेनैव फलसिद्धिरिति कल्पनमपि प्रामाणिकम् । प्रैषग्रहणं च मन्त्रमात्रोपलक्षणम् । तथा दर्भमयं वासो वाजपेये वासोऽन्तरसत्त्वेऽपि परिधेयमेव । तथा "यत्पशुर्मायुमकृतोरो वा पद्भिराहते अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः" इति मन्त्रेण विहितस्य संज्ञप्तहोमस्यापि पशुयागे नित्यं करणम् । न च संज्ञप्तहोमस्य मान्त्रवर्णिकशब्दकरणादिजन्यदोषनिर्घातार्थत्वप्रतीतेः तदनुरोधेन मायुपदवाच्यशब्दकरणादावेव होम इति वाच्यं, शब्दादिकरणस्य दोषजनकत्वे प्रमाणाभावेन मान्त्रवर्णिकफलकल्पनानुपप-

त्तेः। एतद्बलेनैव दोषकल्पने गौरवाच्च । किञ्च नात्र शब्दादिकरणादेव दोषः। अपि तु तदनुकूलप्रयत्नरूपादाख्यतार्थात् तस्य च प्रतिबन्धकवशाच्छब्दाद्यनुत्पत्तावप्युत्पत्त्यावश्यकत्वेन संज्ञप्नहोमस्य नित्यत्वम् । तथा 'योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' इति मन्त्रोऽपि द्वेष्यनिश्चयसत्त्वे असत्त्वे वा सर्वदैव प्रयोक्तव्यः। न च मन्त्रलिङ्गवशेन प्रकरणसङ्कोचः। परकर्तृकद्वेषस्यायोग्यत्वेन तदभावनिश्चयायोगात् । स्वनिष्ठद्वेषविषयस्यान्ततः पापादेरपि सम्भवेन मन्त्रलिङ्गाविरोधात् ॥ ७ ॥

(८)–अनर्थकं त्वनित्यं स्यात् ॥२९॥

पयोव्रतं यदि रोगोत्पत्त्यादिना मरणादिहेतुस्सम्भाव्यते तदा क्रतुविरोधप्रसङ्गान्न कार्यमिति जातेष्टिन्यायेन गतार्थमपीदं शिष्यहितार्थमुक्तम् ॥ ८ ॥

(९)–पशुचोदनायामनियमोऽविशेषात् ॥३०॥ छागो वा मन्त्रवर्णात् ॥३१॥ न चोदनाविरोधात् ॥३२॥ आर्षेयवदिति चेत् ॥३३॥ न तत्र ह्यचोदितत्वात् ॥३४॥ नियमो वैकार्थ्यं ह्यर्थभेदाद्भेदः पृथक्त्वेनाभिधानात् ॥ अनियमो वाऽर्थान्तरत्वादन्यत्वं व्यतिरेकशब्दभेदाभ्याम् ॥३६॥ रूपाल्लिङ्गाच्च ॥३७ छागेन कर्माख्या रूपलिङ्गाभ्याम् ॥३८॥ रूपान्यत्वान्न जातिशब्दस्स्यात् ॥३९॥

विकारो नोत्पत्तिकत्वात् ॥४०॥ स नैमित्तिकः पशोर्गुणस्याचोदितत्वात् ॥४१॥ जातेर्वा तत्प्रायवचनार्थवत्त्वाभ्याम् ॥४२॥

'अग्नीषोमीयं पशुमालभेत' इत्यादौ पशुशब्दो न सामान्यवचनः। न हि पशुत्वं जातिः प्रमाणाभावात् कार्यतायाः कारणताया वाऽनवच्छेदकत्वात्। नापि पुच्छादिमत्त्वं तस्याननुगतत्वाभावेन सामान्यत्वाभावात्। अतः पशुशब्दो व्यक्तिवाची। ततश्च सर्वासामश्वादिव्यक्तीनामप्युक्तत्वात् नायं सन्दिग्धः। अतश्च नार्थवादवदत्र 'छागस्य वपायाः' इति मन्त्रस्य निर्णायकत्वम्। यद्यपि चायं सामान्यवाची भवेत्। तथाऽपि मन्त्रस्य भिन्नवाक्यत्वात् तद्व्यतिरेकेणैव विधेः सर्वविषयतया पर्यवसानात् न तत्सङ्कोचकत्वम्। एवं सत्यपि यदि मन्त्रस्य विधायकता भवेत् तदा 'आर्षेयं वृणीते त्रीन् वृणीते' इतिवद्भवेदपि विशेषणविशेष्यभावो न त्वेतदस्ति। अतो मन्त्रस्थछागपदं छिन्नपुंस्त्वाख्यगमनवत्त्वयोगेन वयोविशेषवचनत्वेन वा सर्वपशुपरम्। छागपक्षे वाऽयं मन्त्र इति प्राप्ते—

छागशब्दस्याजे रूढत्वेन यौगिकत्वानुपपत्तेः पुंस्त्ववतो विहितत्वेन यौगिकार्थग्रहणानुपपत्तेश्च न तावद्यौगिकत्वम्। वयोऽवस्थाविशेषवचनत्वेऽपि वा शोणादिशब्दवदजागतस्यैव वयसो वाच्यत्वादश्वादिग्रहणानुपपत्तेः। छागग्रहणेनापि पशुत्वस्याविरोधोपपत्तौ मन्त्रस्य पाक्षिकत्वकल्पनानुपपत्तेः छागस्यैव ग्रहणम्। यद्यपि च पशुशब्दो व्यक्तिवचनस्स्यात्। तथाऽपि युगपत्सर्वव्यक्तिग्रहणाभावेनैकव्यक्तिग्रहणे मन्त्रस्य त्वकाधात्वाच्च छागव्यक्तिमात्रग्रहणेऽपि न किञ्चिद्बाधकम् ॥

वस्तुतस्तु सामान्यवाच्येवायं, तदपि च यद्यपि पुच्छव-त्त्वादि, तथाऽपि लोमवत्पुच्छत्वावच्छिन्नवत्त्वस्यैवानुगतस्य वक्तुं शक्यत्वात् न विरोधः । वस्तुतस्तु पुच्छाद्यप्रतीतावपि पशु-त्वप्रतीतेः पशुत्वं जातिरेवेति सामान्यवचनत्वमव्याहतं तेन युक्त एव मन्त्रेण निर्णयः । भिन्नवाक्यत्वेऽपि च पशुछागशब्दयोः विशेषणविशेष्यभावो वाक्यैकवाक्यतया न विरुध्यते । इदं च सर्वं 'अजोऽग्नीषोमीयः' इति शाखान्तरवाक्यं नास्तीति कृत्वा-चिन्तया बोध्यम् । तत् सिद्धं छागवत एवाधिकार इति निरू-पितोऽधिकारः ॥ ९ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
षष्ठस्याध्यायस्याष्टमः पादः
अध्यायश्च समाप्तः ॥

अथ सप्तमस्याध्यायस्य प्रथमः पादः

(१) श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावस्स्यात् ॥ १ ॥ उत्पत्त्यर्थाविभागाद्वा सत्त्ववदैकधर्म्यं स्यात् ॥ २ ॥ चोदनाशेषभावाद्वा तद्भेदाद्व्यवतिष्ठेरन् उत्पत्तेर्गुणभूतत्वत् ॥ ३ ॥ सत्त्वे लक्षणसंयोगात्सार्वत्रिकं प्रतीयेत ॥ ४ ॥ अविभागात्तु नैवं स्यात् ॥ ५ ॥ द्व्यर्थत्वं च विप्रतिषिद्धम् ॥ ६ उत्पत्तौ विध्यभावाद्वा चोदनायां प्रवृत्तिस्स्यात्ततश्च कर्मभेदस्स्यात् ॥ ७ ॥ यदि वाऽप्यभिधानवत्सामान्यात्सर्वधर्मस्स्यात् ॥ ॥ ८ ॥ अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु पूर्ववत्त्वात्प्रयोगस्य कर्मणश्शाब्दभाव्यत्वाद्विभागाच्छेषाणामप्रवृत्तिस्स्यात् ॥

स्मृतिरिति चेत् ॥ १० ॥ न पूर्ववत्त्वात् ॥ ११ ॥ अर्थस्य शब्दभाव्यत्वात्प्रकरणनिबन्धनाच्छब्दादेवान्यत्र भावस्स्यात् ॥ १२ ॥

एवं साधिकारे उपदेशेऽवगतेऽधुना तदधीनसिद्धिरतिदेशो निरूप्यते । अतिदेशो नाम यः पदार्थो यादृशोपकारद्वारा यदङ्गत्वेनावधारितः तस्य पदार्थस्य तत्सम्बन्धित्वेन रूपेण तादृशोपकारद्वारैवान्याङ्गताबोधकं प्रमाणम् । भवति हि प्रकृतिवद्विकृतिः कर्तव्येत्येवमादिकं वाक्यं प्रयाजादिपदार्थानां यादृशोपकारद्वारा आग्नेयाङ्गत्वेनावधारितानामाग्नेयादिसम्बन्धित्वेन रूपेण तादृशोपकारद्वारा सौर्याद्यङ्गत्वबोधकम् । 'एतद्ब्राह्मणान्येव पञ्च हवींषि' इत्यपि च तदीयब्राह्मणवत्त्वज्ञापनद्वारा तदीयधर्माणां ब्राह्मणार्थभूतानामुक्तरीत्यैव विकृत्यङ्गत्वबोधकम् । 'मासमग्निहोत्रं' इत्यग्निहोत्रनामापि तदीयधर्मवत्त्वलक्षणया गौण्यैव वोक्तविधाङ्गत्वबोधकम् । एवं श्येनापत्त्यतिदेशे, आश्रयतो धर्मातिदेशेऽपि च लक्षणसमन्वयो बोध्यः । अत्र च दर्शपूर्णमासादीनां स्वर्गाद्यङ्गत्वेनावधारितानां तेनैव द्वारेण पापक्षयाद्यङ्गताबोधके यावज्जीवादिवाक्ये अतिप्रसङ्गवारणाय तत्सम्बन्धित्वरूपेणेति विशेषणम् । न हि दर्शादेस्स्वर्गसम्बन्धित्वेन रूपेण पापक्षयार्थता, प्रमाणाभावात् । अपि तु दर्शत्वादिनैव । प्रकृते तु प्रयाजादीनां आग्नेयेतिकर्तव्यतात्वेनैवानुगमात्तदेव विकृतिसम्बन्धितावच्छेदकम् । पुरोडाशकपालादेश्च पुरोडाशसम्बन्धित्वेनावधारितस्य तेनैव रूपेण तुषोपवापाङ्गत्वात् तद्बोधकवाक्येऽ-

तिप्रसङ्गवारणार्थं तादृशोपकारद्वारेति विशेषणम्, पुरोडाशे स्व-प्रयोजकीभूतश्रपणाधिकरणत्वेन तुषोपवापे स्वाप्रयोजकीभूतोपवापकरणत्वेनेति तत्र द्वारभेदात् ।

केचत्तु सादृश्यकल्पितवाक्यत्वमतिदेशत्वमित्याहुः । तद्-तिदेशान्तरेष्वव्यापकत्वादुपेक्षितम् । अतिदेशनिरूपणोपोद्घातत्वेनेदं निरूप्यते । किं प्रयाजादीनामुपदेशेन प्रकृतिमात्रार्थत्वं उत प्रकृतिविकृतिसाधारण्यमिति । साधारण्ये हि अतिदेशवैयर्थ्यमित्युपोद्घातता । तत्र यद्यपि प्रयाजादिषु आग्नेयादिमात्रविषयप्रकरणादेर्विशेषविषयत्वम् । तथाऽपि तत्कल्प्यस्य वाक्यस्य 'प्रयाजादिभिर्यजेत' इत्येतादृशस्यैव कल्पना न तु प्रयाजादिभिराग्नेयादिः कार्य इति । आग्नेयादिभेदेनानेकवाक्यकल्पनापत्तेः । नापि दर्शपूर्णमासौ कार्याविति, तथात्वे उद्देश्यवाचकस्य विधिवाचकस्य च पदद्वयस्य कल्पनापत्तेः । तत्र च यागत्वस्यैवोद्देश्यतावच्छेदकत्वात्सर्वार्थत्वसिद्धिः । न हि तत्र प्रयाजादिविशिष्टयागकरणकप्रकृतभावनाविधिः येन विशिष्टक्रयाविधिवत् प्रयाजादीनां प्रकृतभावनायामेवान्वयात्पाष्ठिकान्वयेऽपि प्रकृतयाग एवान्वयस्स्यादित्याशङ्क्येत । भावनानामुत्पत्तिवाक्यादेव प्राप्तत्वान्न च विशिष्टविध्याशङ्का । उत्पत्तिवाक्येष्वेव तु प्रयाजादिवैशिष्ट्यं भिन्नवाक्यत्वादेवासम्भवि । न हि तत्तद्वाक्यार्थबोधवेलायामनन्वितस्य प्रयाजादेर्वाक्यैकवाक्यतावेलायामन्वयस्सम्भवी । सकृदुच्चरितस्य विधेरैकरूप्येणैकशाब्दबोधजनकत्वनियमात् । अतः प्रयाजादीनां प्रकृतिमात्रगामित्वम् ।

अथ वा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यं स्वर्गसम्बन्धपरं सार्वकाम्यवाक्येनैव प्राप्तेः अपितु समिदादि-

वाक्यैकवाक्यतया यागोद्देशेन प्रयाजादिविधिपरम् । अतश्च तत्र यागत्वस्यैवोद्देश्यतावच्छेदकत्वात् सर्वार्थता । न च तत्र दर्शपूर्णमासपदं उद्देश्यविशेषणं उद्देश्यसमर्पकं वाऽस्त्विति शङ्क्यं, विशिष्टोद्देशे वाक्यभेदापत्तेः । धातोरुद्देश्यपरत्वे सम्भवति उपपदस्यान्याय्यत्वाच्च । अतश्च तत्रत्यं दर्शपूर्णमासपदं रूढ्या कालपरमेव सत् सर्वयागेषु 'य इष्ट्या' इति वाक्यप्राप्तकालानुवादकम् । अधिकरणस्यापि करणत्वाच्च तृतीया । तथा स्वर्गकामपदं च अवयुत्यानुवादः सर्वथा सर्वधर्माणां सर्वफलवदर्थत्वमुपदेशेनैवेति न कचिदतिदेशासिद्धिः । एवं च 'समानमितरच्छेचनेन' इत्याद्यनुवाद एव । 'अग्निहोत्रं' इत्यादीनामपि सिंहो देवदत्त इतिवत्सिद्धसादृश्यं तत्प्रख्यन्यायमेव वाऽऽदायानुवाद इति प्राप्ते—

यद्यपि यागानुवादेन धर्मविधिः तथाऽप्यनुवादस्य सति सम्भवे सन्निहितगामित्वनियमात् 'व्रीहिभिर्यजेत' इतिवत् प्रकृतमात्रगामित्वं विशेषतश्च नवमाद्यन्यायेन यागस्वरूपे आनर्थक्यादपूर्वसाधनत्वलक्षणार्थमपि प्रकरणानुप्रवेशः -

वस्तुतस्तु—उत्पत्तिवाक्येषु आकाङ्क्षाबलेनेष्टसामान्यस्य भाव्यकत्वकल्पनवत् इतिकर्तव्यतासामान्यस्यापीत्थमिति पदकल्पनयाऽन्वयस्वीकारात्स्वर्गादिवाक्यधच्च प्रयाजादिवाक्यानां विशेषसमर्पकतया तद्वदेव वाक्यैकवाक्यात्वोपपत्तेरंशत्रयविशिष्टविजातीयभावनाया एव विधानात् पार्ष्ठिकान्वये च प्रकृत एव तद्भावनाकरणीभूते यागेऽनुग्राहकत्वकल्पनान्न सर्वार्थत्वमौपदेशिकम् । उत्पत्तिवाक्य इतिकर्तव्यतासामान्यान्वयाच्च न सकृदुच्चरितस्येति विरूपानेकबोधजनकता । वाक्यैकवाक्यताजन्यबोधस्तु न श्रुतशाब्दबोध इति न सरूपनानाबोधजनकत्वम-

प्येकस्य । अतः पारिप्लवत्वाभावाद्धर्मकाणामैन्द्राग्न्यादीनां धर्माकाङ्क्षायामतिदेशसिद्धिः ॥ १ ॥

यत्तु मूले अतिदेशसिद्ध्यर्थं याजिप्रयुक्तत्वं वा धर्माणामपूर्वप्रयुक्तत्वं वेति चिन्तान्तरं कृतम् । तत् यजिप्रयुक्तत्वेऽपि प्रकृतयजिप्रयुक्तत्वोपपत्तेः इतरथाऽपूर्वप्रयुक्तत्वेऽपि तदनापत्तेर्नावमिकेन पौनरुक्त्यापत्तेश्चोपेक्षितम् । स चातिदेशो द्विविधः वचनातिदेशो नामातिदेशश्चेति । आद्योपि द्विविधः प्रत्यक्षवचनातिदेशोऽनुमितवचनातिदेशश्चेति । अनुमितवचनातिदेशोऽपि त्रिविधः सादृश्यकल्पितवचनातिदेशः स्थानापत्तिकल्पितवचनातिदेशः आश्रयोपस्थितिकल्पितवचनातिदेशश्चेति ॥ १ ॥

(२)–समाने पूर्ववत्त्वादुत्पन्नाधिकारस्स्यात् ॥१३॥ श्येनस्येति चेत् ॥ १४ ॥ नासन्निधानात् ॥ १५ ॥ अपि वा यद्यपूर्वत्वादितरदधिकार्थे ज्यौतिष्टोमिकाद्विधेस्तद्वाचकं समानं स्यात् ॥ १६ ॥

तत्र प्रत्यक्षवचनातिदेशो निरूप्यते । इषुर्नामैकाहो ज्योतिष्टोमविकारः । तत्र प्राकृते साम्नि वषट्कारनिधनमाम्नातम् । प्राकृतविष्टुतौ च इष्वाकारत्वं स्तोत्रे प्राकृते सप्ताहाख्यं साम ततः 'समानामितरच्छ्येनेन' इति श्रुतम् । तत् किमनुवादः उतातिदेशविधिरिति चिन्तायां—

इतरशब्दस्य सन्निहितवचनत्वेन लोके प्रासिद्धत्वान्नास्यासन्निहितश्येनवैशेषिकधर्मवाचित्वं तेषामसन्निहितत्वात् । अपि

तु ये ज्योतिष्टोमातिदेशेन सन्निहितास्तत्परत्वमेव । तेषां च श्येनेऽप्यतिदेशप्राप्तत्वेन श्येनसादृश्योपपत्तेरनुवाद एवायमिति न श्येनवैशेषिकाणां वचनातिदेश इति प्राप्ते—

इतरशब्दस्य सन्निहितवाचित्ववत् पूर्वोक्तेतरतत्सदृशवाचित्वमपि लोकसिद्धम् । 'चैत्रमैत्रयोः कम्बलकौशेये प्रदेये इतरद्विष्णुमित्राय' इत्यत्र सन्निहितपूर्वोक्तेतरतत्सदृशवस्त्रादेरेव प्रतीतेः । अतश्च वार्तिककारीया पूर्वोक्तसादृश्यस्यावाच्यत्वोक्तिरुपेक्षणीयैव । ततश्च यत्सन्निहितं प्राकृतं न तत्पूर्वोक्तसदृशं अप्राकृतानां सप्ताहादीनां पूर्वोक्तत्वाद्यच्च सदृशं श्यैनवैशेषिकं अप्राकृतत्वसाधर्म्यात् न तत्सन्निहितम् । ततश्चावश्यहातव्येऽन्यतरस्मिन् वचनस्यार्थवत्त्वाय सन्निहितं हित्वा सादृश्यपरिग्रहेण श्येनवैशेषिकाणामेवेतरशब्देन ग्रहणम् । न ह्यन्यथा विध्यन्तराशेषभूतस्यानुवादस्यार्थवत्त्वं सम्भवति । ततश्च श्येनसादृश्यवत् यत्पूर्वोक्तसदृशं सत् पूर्वोक्तभिन्नं तदिषौ कुर्यादिति वाक्यार्थः । श्येनसादृश्यं च श्येनानिष्ठाङ्गवृत्तिधर्मसमानजातियधर्मवत्त्वम् । भवति हि श्येनानिष्ठाङ्गानां कण्टकवितोदनादीनां ये धर्माः कण्टकवितोदनत्वादयः तत्समानजातीयास्त एव तद्वत्त्वं कण्टकावितोदनादौ । अत एव श्येनपदं श्येनाङ्गपरं, न तु यथाश्रुतम् । न हि श्येनप्रतियोगिकं सादृश्यं कण्टकवितोदनादौ सम्भवति । अतश्च फलतश्श्येनधर्मा एव पूर्वोक्तसदृशाः पूर्वोक्ताभिन्नाश्च कार्या इति पर्यवासितोर्थः ।

पूर्वोक्तसादृश्यं च अप्राकृतत्वेन प्राकृताङ्गमुद्दिश्य विहितत्वेन वा । तेन श्येने ये अपूर्वा धर्माः कण्टकवितोदनादयस्त इहाप्यतिदिश्यन्ते, ये वा श्येने प्राकृताङ्गानुवादेन विहिताः लोहितोष्णीषादयस्त एवातिदिश्यन्ते ।

यत्तु—अस्मिन् पक्षे नैतेषामेव नियम इति तन्त्ररत्नोक्तं तद्-वान्तरस्सादृश्यत्यागे प्रमाणाभावादुपेक्षितम् । अस्मिंश्च पक्षे इषुयागोद्देशेनानेकपदार्थविधानायोगात् पदद्वयेन लक्षणया श्येनीयप्राकृताङ्गसम्बन्धिविकारमात्रस्येषूद्देशेन विधानम् ।

यद्वा—इतरपदे सन्निहितत्वत्यागे प्रामाणाभावात्प्राकृताङ्गानामपि चोद्देश्यतया पूर्वमुक्तत्वात् पूर्वोक्तप्राकृताङ्गभिन्नतत्सदृशप्राकृताङ्गान्तराणामेवेतरपदेन ग्रहणम् । तेषामतिदेशेन सन्निहितत्वात्तादृशप्राकृताङ्गोद्देशेनैव च श्येनसादृश्यविधिः । सादृश्यं चास्मिन्पक्षे श्येनीयप्राकृताङ्गवृत्तिधर्मसमानधर्मवत्त्वम् । स च धर्मः श्येनप्राकृताङ्गानुवादेन विहितो विकारो लोहितोष्णीषादिः । अत एव सादृश्यं न श्येननिरूपितं, अपि तु श्येनीयप्राकृताङ्गनिरूपितमेव उपमानतावच्छेदसम्बन्धेन श्येनवृत्तिधर्मस्य लोहितोष्णीषादेस्तेनैव सम्बन्धेन प्राकृताङ्गेष्वभावादुपमानतावच्छेदकसम्बन्धेनोपमेयवृत्तित्व एव उपमानियमात् ।

अत एवास्मिन् पक्षे श्येनपदं श्येनीयप्राकृताङ्गपरम् । ततश्च फलैतस्तादृशधर्मा एवेष्वपूर्वसाधनीभूततादृशप्राकृताङ्गोद्देशेन विधीयन्ते । अत एव विधेयसामर्थ्यानुरोधेन श्येने यो विकारो यत्प्राकृताङ्गे विहितस्तत्प्राकृताङ्ग एव सोऽत्र विधीयते । इतरथा अप्राकृतकार्यकारितापत्तेः । अतोऽस्मिन्नपि पक्षे विवक्षितगत्या इषुसम्बान्धित्वेनैव तादृशश्येनीयविकारविधिः । न चैवमस्यातिदेशस्य कल्पितत्वाभावादानुमानिकवचनातिदेशापेक्षया प्राबल्येऽपि श्येनेन समानमिति पदद्वये तादृशविकारलक्षणायाश्चावश्यकत्वान्नामातिदेशापेक्षया प्राबल्ये मानाभावः : नामातिदेशस्थले अग्निहोत्रपदेनानभिहितानामेव धर्माणां लक्षणा। वचनातिदेशे तु समानपदेनोक्तानामेव तादृशधर्माणां विधेय-

तावच्छेदकीभूतश्येनीयप्राकृताङ्गवृत्तिविकारत्वावच्छिन्नत्वसिद्ध्यर्थं लक्षणेति तस्य तदपेक्षया प्राबल्यात् ॥ २ ॥

(३)—पञ्चसञ्चरेष्वर्थवादातिदेशस्सान्निधानात् ॥१७॥ सर्वस्य वैकशब्द्यात् ॥ १८ ॥ लिङ्गदर्शनाच्च ॥ १९ ॥ विहिताम्नानान्नेति चेत् ॥२०॥ नेतरार्थत्वात् ॥ २१ ॥

चातुर्मास्येषु वैश्वदेवे पर्वणि आद्यानि पञ्च हवींषि सधर्मकाणि विधाय वरुणप्रघासेषु विहितानि । तेषां च विनिगमनाविरहेणाभ्यासात्कर्मान्तरत्वम् । वरुणप्रघासस्थहविस्सन्निधौ च 'एतद्ब्राह्मणान्येव पञ्च हवींषि, यद्ब्राह्मणानीतराणि' इति श्रुतम्। इतराणि वैश्वदेविकानीत्यर्थः । अत्र च ब्राह्मणस्यैवातिदेशः। यद्यपि चान्यत्रोपकारस्य तत्पृष्ठभावेन पदार्थानामेव वाऽतिदेशो न तु पदार्थबोधकशास्त्राणां प्रयोजनाभावात्। तथाऽपीह लक्षणायां प्रमाणाभावाच्छास्त्रस्यैवातिदेशः। न च शास्त्रातिदेशे तद्बोधितपदार्थानां प्राकृतोपकाराभावे उपकारान्तरकल्पनादूहबाधानुपपत्तिः शास्त्रस्यापि विजातीयोपकारजनकविजातीयपदार्थप्रतिपादकतया निरूपितरूपस्यैवातिदेशादुपकारान्तरकल्पनानुपपत्त्या ऊहबाधोपपत्तेः ।

वस्तुतस्तु ब्राह्मणपदेनार्थविधायकवाक्यस्याक्तत्वाल्लाघवादपेक्षितत्वाच्चात्राप्यर्थस्यैवातिदेशः । अत एवातिदेशलक्षणमपि नासङ्गतम्।

तदिहार्थविधायकवाक्यस्यैवैतद्ब्राह्मणपदेनोक्तत्वात्सार्थवादकस्यैव विधायकत्वादाकाङ्क्षाभावेन प्रधानातिदेशाभावेऽपि स्तुति-

मात्रस्यातिदेशो न त्वङ्गानाम् । एतेषां स्वस्वाङ्गविधिविधेयत्वेन हविर्विधिविधेयत्वाभावात् । अत एव वरुणप्रघासेषु 'अग्निं मन्थति, प्रसुवो भवन्ति' इत्यादिविधयोऽप्युपपद्यन्ते अन्यथा अतिदेशादेव प्राप्तत्वेन वैयर्थ्यापत्तेरिति प्राप्ते—

अङ्गविधीनामप्येतद्धविस्सम्बन्ध्यङ्गविधायकत्वेनैतद्ब्राह्मणत्वोपपत्तेश्शास्त्रस्य महाविषयत्वसिद्ध्यर्थमङ्गानां स्तुतेश्चातिदेशः। न चापेक्षाक्रमेणैव सर्वत्रान्वयादर्थभावनाया इतिकर्तव्यतापेक्षायामङ्गातिदेशेऽवगते पश्चात्तद्विशिष्टार्थभावनाया विधिसम्बन्धावगमोत्तरं तस्य स्तुत्यपेक्षायां स्तुत्यतिदेश इति विरम्यव्यापारापत्तिः । इष्टसामान्यवदितिकर्तव्यतासामान्याक्षेपादेव तद्विशिष्टभावनाविधिसिद्धेः स्तुत्यपेक्षावेलायामेवातिदेशप्रवृत्तेः। अत एवानुमानिकवचनातिदेशेऽप्यर्थवादातिदेशसिद्धिः । या त्वेवंसति विश्वजित्यातिदेशिकार्थवादिकफलकल्पनाप्रसक्तिः सा कौस्तुभ एव निरस्ता ।

वस्तुतस्तु—वाचनिकातिदेशस्य भिन्नवाक्यविधया प्रमाणत्वादुत्पत्तिवाक्ये इतिकर्तव्यतासामान्याक्षेप आवश्यक एव । न च प्राशस्त्यातिदेशे तस्य निरुक्ताङ्गत्वसत्त्वे प्रमाणाभावादतिदेशलक्षणस्याव्याप्तिः लक्षणेऽङ्गत्वपदेन भावनेतिकर्तव्यतात्वेनान्वितस्य विवक्षितत्वात् । अतश्चार्थभावनेतिकर्तव्यतात्वस्य तत्करणोपकारजनकत्वरूपस्य शाब्दभावनेतिकर्तव्यतात्वस्य च रुचिरूपतत्करणोपकारजनकज्ञानविषयत्वाख्यस्य द्विविधस्यापि संग्रहः । अन्वितपदोपादानाच्च आर्थिके प्रासङ्गिके वोपकारजनकेऽपि नातिदेशः । तस्य प्रकृतिभावनानन्वितत्वात् । तस्मादुभयातिदेशः । अग्निमथनादीनां तु दक्षिणाविहारे प्राप्त्यभावात् युक्त-

स्तदर्थं पुनर्विधिः। अत एव नवप्रयाजत्वादेरतिदेशात् 'वाजिनो यजन्ति आहुतीनां सम्पत्त्यै त्रिंशत्त्वाय' इति लिङ्गमप्युपपद्यते। इतरथा त्रिंशत्त्वानुपपत्तेरिति सूत्रकारभाष्यकारौ।

वस्तुतस्तु—मारुतियागस्यापि वैश्वदेविकामिक्षायागविकारत्वान्नवप्रयाजत्वादिवदेवाग्निमथनादीनामपि प्राप्तिसंभवान्नायं वैयर्थ्यपरिहारः आमिक्षैककपालानुरोधेनैव च नवप्रयाजत्वादिसिद्धेः त्रिंशत्त्वस्याप्युपपत्तिः। न च भूयसां दर्शपूर्णमासविकारत्वात्तदनुरोधेन पञ्चप्रयाजत्वं, पशुपुरोडाशवन्नवाहुत्तावपि पञ्चत्वाविरोधात्। अतो भाष्यमनादृत्य सूत्रमेवं व्याख्येयम्। अग्निमन्थनादिवाक्यानामौचित्येनातिदेशविधिस्तुत्यर्थत्वात् नेतरार्थत्वादिति सूत्रं विधायकत्वातिरिक्तस्तावकत्वरूपप्रयोजनकथनार्थं तदेव चातिदेशवाक्यस्थाङ्गविधिपरत्वे लिङ्गमिति लिङ्गदर्शनसूत्रस्यार्थः। अतस्सिद्धमङ्गानामप्यतिदेश इति। न चामिक्षैककपालयागानुरोधेनैव वैश्वदेविकधर्मप्राप्तिसिद्धेरातिदेशाविध्यानर्थक्यं यत्र धाय्याविराजादिविरुद्धनानाधर्मविषये मुख्यत्वभूयस्त्वाभ्यां, दार्शिकधर्मप्रसक्तिस्तद्विषये वैश्वदेविकधर्मप्राप्त्यर्थत्वेन सार्थक्यात्॥ ३॥

(४)—एककपालैन्द्राग्नौ च तद्वत्॥ २२॥

एवं साकमेधे श्रुतयोरैन्द्राग्नैककपालयोरपि "एतद्ब्राह्मण ऐन्द्राग्नः यद्ब्राह्मण इतरः। एतद्ब्राह्मण एककपालो यद्ब्राह्मण इतरः" इति वाक्याभ्यां सार्थवादिकसाङ्गविधिकाण्डस्यातिदेश इत्युत्तरविवक्षया स्मार्यते॥ ४॥

(५)—एककपालानां वैश्वदेविकः प्रकृतिराग्र

यणे सर्वहोमापरिवृत्तिदर्शनादवभृथे च सकृद्व्यवदानस्य वचनात् ॥ २३ ॥

एककपालस्य प्रकृतिभूत एककपालो वारुणप्रघासिक एव। न तु धर्मभूयस्त्वेऽपि वैश्वदेविकः वक्ष्यमाणात्सर्वैककपालेषु चोदनालिङ्गातिदेशादेव वैश्वदेविकधर्मप्राप्तिसिद्धेः। अनन्यलभ्यकतिपयधर्मप्राप्त्यर्थं वारुणप्रघासिक एव। एवं चैन्द्राग्नप्रायपाठोऽप्युपपद्यते। तत्र हि न दार्शिकैन्द्राग्नातिदेशविधिः चोदनालिङ्गातिदेशादेव सिद्धेः। नाप्यैन्द्राग्नान्तराणां, अनुपस्थितत्वात्। अत एव चातुर्मास्यप्रकरणस्थत्वेनोपास्थितत्वाद्वैश्वदेवे चैन्द्राग्नाभावाद्वारुणप्रघासिकस्यैव। अतस्तत्प्रायपाठादपि साकमेधैककपालस्य वारुणप्रघासिकैककपालप्रकृतिकत्वम्। धर्माश्च 'हिरण्मयाः स्रुचो भवन्ति' इत्यादयस्सामान्यविहिता इति भाष्यकारः।

वस्तुतस्तु—साकमेधस्थपञ्चसञ्चरेषु अतिदेशविधिरस्ति न वा? अन्त्ये दर्शपूर्णमासविकारत्वापत्तेः भूयोऽनुग्रहाय न हिरण्मयत्वादिप्रसक्तिः। आद्येऽप्येतदधिकरणन्यायस्यान्यलभ्यत्वस्याभावात् धर्मभूयस्त्वलाभाय वैश्वदेविकपञ्चसञ्चराणामेव धर्मातिदेशात् तथैव वारुणप्रघासिकहिरण्मयत्वाद्यप्राप्तिः।

वस्तुतस्तु—याज्ञिकाचाराद्यत्र वरुणप्रघासेषु स्रुगन्तरोत्पत्तिप्रसक्तिस्तत्रैव हिरण्मयत्वशमीमयत्वादेर्विध्यौचित्येन दक्षिणविहार एव तन्निवेशादैन्द्राग्नैककपालयोरपि न हिरण्मयत्वाद्यतिदेशः। अस्तु वा सः। तथाऽपि यद्यैन्द्राग्नाद्यतिदेशविधिवैयर्थ्याभियैव भूयसामनुग्रहमप्यनङ्गीकृत्य हिरण्मयत्वाद्यभ्यनुज्ञानमित्युच्येत। तत ऐन्द्राग्नैककपालयोर्मध्येऽन्यतरातिदेशेनैव तत्प्रा-

प्तिसिद्धेरितरानर्थक्यं, अतोऽवश्यं तत्ताद्विशेषविहितधर्मप्राप्तिसिद्ध्यर्थमेवेदमतिदेशद्वयम् । विशेषविहितधर्माश्च ऐन्द्राग्ने याज्यादयः । एककपालेऽपि केचिच्छाखान्तरेष्वनुसन्धेया इति ध्येयम् ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
सप्तमस्याध्यायस्य प्रथमः पादः

अथ सप्तमस्याध्यायस्य द्वितीयः पादः

(१)—साम्नोऽभिधानशब्देन प्रवृत्तिस्स्याद्यथाशिष्टम् ॥ १ ॥ शब्दैस्त्वर्थविधित्वादर्थान्तरेऽप्रवृत्तिस्स्यात्पृथग्भावात्क्रियाया ह्यभिसम्बन्धः ॥ २ ॥ स्वार्थे वा स्यात्प्रयोजनं क्रियायास्तदङ्गभावेनोपदिश्येरन् ॥ ३ ॥ शब्दमात्रमिति चेत् ॥ ४ ॥ नोत्पत्तिकत्वात् ॥ ५ ॥ शास्त्रं चैवमनर्थकं स्यात् ॥ ६ ॥ स्वरस्येति चेत् ॥ ७ ॥ नार्थाभावाच्छ्रुतेरसम्बन्धः ॥ ८ ॥ स्वरस्तूत्पत्तिषु स्यान्मात्रावर्णाविभक्तत्वात् ॥ ९ ॥ लिङ्गदर्शनाच्च ॥ १० ॥ अश्रुतेस्तु विकारस्योत्तरासु यथाश्रुति ॥ ११ ॥ शब्दानां चा-

सामञ्जस्यम् ॥ १२ ॥ अपि तु कर्मशब्दस्स्याद्भावोऽर्थः प्रसिद्धग्रहणत्वाद्विकारो ह्यविशिष्टोऽन्यैः ॥ १३ ॥ अद्रव्यं चापि दृश्यते ॥ १४ ॥ तस्य च क्रिया ग्रहणार्था नानार्थेषु विरूपित्वादर्थो ह्यासामलौकिको विधानात् ॥ १५ ॥ तस्मिन् संज्ञाविशेषास्स्युर्विकारपृथक्त्वात् ॥ १६ ॥ योनिशस्याश्च तुल्यवदितराभिर्विधीयन्ते ॥ अयोनौ चापि दृश्यतेऽतथायोनि ॥ १८ ॥ ऐकार्थ्ये नास्ति वैरूप्यमिति चेत् ॥१९॥ स्यादर्थान्तरेष्वनिष्पत्तेर्यथापाके ॥ २० ॥ शब्दानां च सामञ्जस्यम् ॥ २१ ॥

प्रकृतौ ज्योतिष्टोमे अभीवर्तयामुत्पन्नं रथन्तरं विकृतिविशेषे अविवाक्यादौ कवतीषु कर्तव्यत्वेन श्रूयते 'कवतीषु रथन्तरं गायति' इत्यादिना। 'तथा 'यद्योन्यां गायति तदुत्तरयोर्गायति' इति च श्रुतम्। तत्र रथन्तरादिशब्दानां गीतिविशेषविशिष्टायां ऋचि प्रयोगाद्विशिष्टवाचित्वे प्राप्ते—

आकृत्यधिकरणन्यायेनैव गीतिविशेषमात्रं विजातीयगीतित्वमात्रं वा वाच्यम्। एवं सामशब्दस्यापि गीतिमात्रं गीतित्वमात्रं वा वाच्यं न तु गीतिस्तद्विशिष्टा वा ऋक्। तस्या व्यक्तिन्यायेन अरुणापद इव सति मुख्यार्थबाधे लक्षणया बोधोपप-

त्तेः । आकृत्यधिकरणस्यैव तु प्रयोजनकथनार्थानि सूत्राणि। यदि हि ऋग्वाचित्वं भवेत् तदा ऋचि ऋगतिदेशासम्भवात् कवतीशब्दः कार्यलक्षणार्थः । तत्कार्यमर्थप्रकाशनं लक्षणादिना अभीवत्या तु कुर्यादिति कवतीकार्ये ऋगन्तरस्यातिदेशः । देशलक्षणार्थौ वा । कवतीदेशे अभिवर्त्ती पठेदिति जघन्यं रथन्तरपदं वा तद्धर्मलक्षणार्थं सत्तद्धर्मातिदेशार्थं कवतीषु सम्मीलनादीन् रथन्तरधर्मान् कुर्यादित्यर्थः । अन्ये तु भाष्यस्थाः पक्षाः असम्भवदुक्तिकत्वान्न लिखिताः।

सिद्धान्ते तु लक्षणायां प्रमाणाभावात् ऋच इह बोधस्यैवाभावेन गीतिमात्रस्यैव कवतीष्वतिदेश इति प्रयोजनम्। प्रसङ्गादाकृत्यधिकरणासिद्धस्यैव गीतिवाचित्वस्योपोद्बलकानि कानिचिल्लिङ्गदर्शनसूत्राणीति द्रष्टव्यम् । न च 'यद्योन्यां गायति' इत्यादौ योनिसम्बन्धित्वेन रूपेण विधेयत्वादतिदेशलक्षणोपपत्तावपि 'कवतीषु रथन्तरं गायति' इत्यादौ रथन्तरत्वस्यैव विधेयतावच्छेदकत्वादतिदेशत्वानुपपत्तिरिति वाच्यं, तत्रापि धर्मग्राहकक्लृप्तोकारलाभार्थं अभिवतीसम्बन्धित्वस्यैव विधेयतावच्छेदकत्वात् ।

वस्तुतस्तु—गृहमेधीये आज्यभागाविधेरातिदेशत्वाभाववदस्याप्यातिदेशत्वाभावे न काचित् क्षतिः । लाघवेनाभिवतीषु येन रूपेणोपकारकत्वं तेनैव रूपेण कवतीषूपकारकत्वस्वीकारेणोहोपपत्तेः ॥ १ ॥

इति श्री खण्डदेवविरचितायां भाट्टदीपिकायां
सप्तमस्याध्ययस्य द्वितीयः पादः

अथ सप्तमस्याध्यायस्य तृतीयः पादः

(१)—उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशस्स्यात् ॥ १ ॥ अपूर्वे वाऽपि भागित्वात् ॥ २ ॥ नाम्नस्त्वौत्पत्तिकत्वात् ॥ ३ ॥ द्गुणसंयोगात्क्रियाभिधानं स्यात् तदभावेऽप्रसिद्धं स्यात् ॥ ४ ॥

इदानीं नामातिदेशः प्रस्तूयते । 'मासमाग्निहोत्रं जुहोति' इत्यादौ नैयमिकाग्निहोत्रवाचिनो नाम्नो न तावत्कर्मान्तरवाचकत्वं, अनेकशक्तिकल्पनापत्तेः । दर्वीहोमत्वेन चोदनालिङ्गातिदेशाभावात् नामातिदेशाभावेऽग्निदेवताकत्वे प्रमाणाभावेन तत्प्रख्यन्यायानुपपत्तेश्च । न च 'यदाहवनीये जुहोति' इत्यनेनाग्नेः प्राप्तत्वादग्न्यधिकरणकत्वेन योगोपपत्तिः । तस्यातिप्रसक्तत्वेन रूढ्यादिकल्पने पुनर्गौरवतादवस्थ्यात् अन्तोदात्तस्वरस्य सप्तमीबहुव्रीहावनुपपत्तेश्च । सप्तमीतत्पुरुषस्य शौण्डादिगणे पाठाभावेनानुपपत्तेश्च । यदि तु नित्याग्निहोत्र इव अग्नेः होत्रं होम इति व्युत्पत्त्या अधिकरणत्वं षष्ठ्यर्थमङ्गीकृत्य मासाग्निहोत्रेऽपि योग आश्रीयेत तदाऽपि प्रचुरप्रयोगादग्निहोत्रपदस्य निरूढलक्षणया नित्याग्निहोत्रे प्रयोगात् तस्याश्च शक्तितुल्यत्वेन मासाग्निहोत्रे तदसम्भवात् गौणत्वमावश्यकम् ।

अनयैव च दिशा 'मासं दर्शपूर्णमासाभ्यां' इत्यदौ गौण-

त्वोपपादनं द्रष्टव्यम्। अन्यथा 'य इष्ट्या' इत्यादिना पौर्णमासीकालकत्वप्राप्तरुभयत्वलाक्षणिकत्वाविशेषात्। दर्शादिकाल प्राप्तावपि वा एकत्र मुख्यस्यापरत्र गौणत्वनियमात् प्रसिद्धदर्शादौ निरूढलक्षणाऽऽवश्यकयेव। सौमिकचोदनालिङ्गातिदेशादेव-रूपलाभोपपत्तौ तदभावस्याप्यत्रासाधकत्वाच्च। एतेन गौणत्वाभावेऽप्येकनामकत्वसादृश्येन चोदनालिङ्गातिदेशादेवाग्निहोत्रधर्मलाभ इत्यपास्तं, उभयत्र निरूढलक्षणायां प्रमाणाभावेनैकनामकल्पनासिद्धेः। न च तथाऽपि देवताकालादिरूपगुणविधायकत्वेनैवोपपत्तौ गौणत्वे प्रमाणाभावः। तत्प्रख्याधिकरणोक्तकौस्तुभोक्तरीत्या समासासम्भवेन देवताविध्यनुपपत्तेः। कालस्य प्राप्तत्वादिना विध्यनुपपत्तेश्च। अतश्चाग्निहोत्रादिशब्दाः कर्मान्तरे गौणाः। तत्र वस्त्यर्थरूपधर्मलक्षणापूर्वकं कर्मान्तरे गौणीति प्राञ्चः। तत्सिद्धिसूत्रोक्तकौस्तुभरीत्या तु गौणीज्ञानकार्यतावच्छेदकमेवाग्निहोत्रीयधर्मविशिष्टकर्मान्तरशाब्दबोधत्वमित्यपि शक्यं वक्तुम्।

तत्र च सिंहो देवदत्त इतिवत् प्रमाणान्तरसिद्धसादृश्येन गौणत्वासम्भवेऽप्यस्मिन्नेव वाक्ये तदीयधर्मविशिष्टकर्मान्तरविधानेन साध्यसादृश्येन गौणत्वोपपत्तिरिति सिद्धो नामातिदेशः। पदार्थातिदेशेऽपि च निरूपितरूपस्यैवातिदेशादूहबाधसिद्धिः॥

(२)—अपि वा सत्रकर्माणि गुणार्थैषा श्रुतिस्स्यात्॥ ५॥

द्वादशाहे प्रथममहः प्रायणीयं सधर्मकं विधाय गवामयने 'वैश्वानरो ज्योतिष्टोमः प्रायणीयमहर्भवति' इति श्रुतम्। तदेते द्वे कर्मणी विनिगमनाविरहादिति निर्णीतं प्रकरणान्तराधिकरणे

कौस्तुभे। तदत्र गावामयनिकं प्रायणीयपदं पूर्वन्यायेनैव द्वादशाहिकप्रायणीयधर्मातिदेशार्थम्। न च चोदनालिङ्गातिदेशादेव तत्प्राप्तिसिद्धेर्नामातिदेशवैयर्थ्यं, गणत्वसाम्येऽपि द्वादशाहान्तर्गतदशाहस्यैव चोदनालिङ्गातिदेशेन धर्मप्राप्तेर्वक्ष्यमाणत्वादिति प्राप्ते-

येनैव प्रथमं यन्ति अनेनेति व्युत्पत्त्या प्राथम्यगुणयोगेन द्वादशाहिकेऽहनि प्रवृत्तिस्तेनैव गावामयनिकेऽपीति प्राथम्ययोगेनोभयत्रापि मुख्यतयैव प्रवृत्तौ गौणत्वे प्रमाणाभावः। न चात्र पूर्ववत् द्वादशाहिके प्रचुरतरप्रयोगो येन तत्रैव रूढिर्निरूढलक्षणा वा अन्यत्र गौणीत्याश्रीयेत अतोऽत्र न नामातिदेशः प्रायणीयपदे। वैश्वनरपदं तु प्रकरणे वैश्वानरग्रहविधानात् तत्प्रख्यन्यायेन नामधेयमपि वैश्वानरसंज्ञकस्य कर्मान्तरस्याप्रासिद्धेः नैवातिदेशिकम्। ज्योतिष्टोमपदं तु ज्योतिष्टोमधर्मप्रतिप्रसवार्थं सद्भवत्येवातिदेशिकम्। तेनैतत्सुत्यायां विरोधेन गणत्वसामान्यात् द्वादशाहिकद्वितीयाहधर्माः। अपि तु ज्यौतिष्टोमिकाः। साधारणास्तु भूयोऽनुग्रहात् द्वादशाहिका एव।

इदं चाधिकरणं गावामयनिके प्रथमेऽहनि प्रायणीयपदस्य भाष्यकारादिलेखनादवगन्तव्यम्। यदा तु छन्दोगसूत्रानुसारेण प्रायणीयपदस्य गावामयनिके द्वितीये चतुर्विंशेऽहनि प्रयोगः तदाऽतिदेशो भवत्येवेति ध्येयम्॥ २॥

(३)—विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वाज्ज्यौतिष्टोमिकानि पृष्ठानि अस्ति च पृष्ठशब्दः॥ षडहाद्वा तत्र हि चोदनाः॥ ७॥ लिङ्गाच्च॥ ८॥ उत्पन्नाधिकारो ज्योतिष्टो-

मः ॥ ९ ॥ द्वयोर्विधिरिति चेत् ॥ १० ॥
न व्यर्थत्वात्सर्वशब्दस्य ॥ ११ ॥

'विश्वजित् सर्वपृष्ठोऽतिरात्रः' इत्यत्र सर्वपृष्ठशब्दोऽनुवादः? अथवा षाडहिकानां रथन्तरबृहद्वैरूपवैराजशाक्वररैवतानां साम्नां विधिरिति चिन्तायां—पृष्ठशब्दस्य स्तोत्रवाचित्वात् सामपरत्वे विधौ लक्षणापत्तेः ज्योतिष्टोमे च 'पृष्ठैस्स्तुवते' इत्यनेन षण्णां पृष्ठस्तोत्राणां विधानस्य चित्राधिकरणे कौस्तुभे व्युत्पादितत्वादिहातिदेशेन बहुत्वप्राप्त्युपपत्तेः विशिष्टविधिगौरवाच्च अनुवाद एवायमिति प्राप्ते—

अनुवादत्वे वैयर्थ्यापत्तेः 'पवमाने रथन्तरमार्भवे बृहत् मध्यत इतराणि वैरूपं होतुः पृष्ठे वैराजं मैत्रावरुणस्य रैवतं ब्राह्मणाच्छंसिनः शाक्वरमच्छावाकस्य' इति सन्निवेशमात्रविधिरूपतात्पर्यग्राहकबलेन सर्वपृष्ठशब्दस्य निरूढलक्षणया षाडहिकरथन्तरादिसामपरत्वावगतेस्तेषामेव विधिः। निरूपितश्च पृष्ठशब्दस्य निरूढलक्षणान्वाख्यानार्थोऽर्थवादः कौस्तुभे। अत एव सर्वपदेनातिदेशप्राप्तयोर्वैकल्पिकयोः बृहद्रथन्तरयोस्समुच्चयविधिरित्यपास्तम्। होतुः पृष्ठे वैरूपस्यौपदेशिकत्वेन तयोर्बाधात्। सर्वशब्दस्य बहुत्वापेक्षत्वेन द्वयोरसम्भवाच्च। अतष्षाडहिकानां विधिः।

यन्मते तु एकमेव प्रकृतौ पृष्ठस्तोत्रं पृष्ठद्वयं वा तन्मतेऽप्राप्तत्वादपि नानुवादः। अयं च यद्यपि न नामातिदेशः, सर्वपृष्ठशब्दस्य षडहवाचित्वाभावात् विश्वजिति बहुव्रीहिणैव प्रवृत्तेर्गौणत्वाभावाच्च। न वाऽयं वचनातिदेशः, गृहमेधीये 'आज्य-

भागौ यजति' इतिवदेव षडहीयत्वस्य विधेयतानवच्छेदकत्वात्। तथाऽप्युपदेश एवायं रथन्तरादीनाम्। अत एव न षडहधर्मान्तराणामिह करणम्। अन्यकर्माङ्गत्वस्यैतद्वाक्यप्रवृत्तेः पूर्वावगमसाम्यात्। कर्मसमानाधिकरणपदगम्यत्वसाम्याच्च सप्तमे नामातिदेशप्रस्तावे समारम्भः। 'प्रधानं नीयमानम्' इति न्यायेनैव च रथन्तरादिधर्माणामावश्यकस्तोभादीनां पवमानादिकार्यान्तरोपयोगिरथन्तरादिसाधनत्वेनापि प्राप्तिरविरुद्धा॥

(४)—तथाऽवभृथस्सोमात् ॥१२॥ प्रकृतेरिति चेत् ॥ १३ ॥ न भक्तित्वात् ॥ १४ ॥ लिङ्गदर्शनाच्च ॥ १५ ॥ द्रव्यादेशे तद्द्रव्यश्रुतिसंयोगात्पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् ॥ १६ ॥

वरुणप्रघासेषु 'वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति' इति श्रुतम्। तत्र दार्शपूर्णमासिकमपां व्युत्सेकमवभृथपदेनानूद्य लाघवात्तुषनिष्कासौ विधीयेते षष्ठीबलाच्च शब्दस्य निपातत्वाच्च परस्परान्वयस्य व्युत्पन्नत्वेन न विधेयानेकतादोषाय। अस्ति चापां व्युत्सेकेऽप्यवभृथपदप्रयोगः 'एष वै दर्शपूर्णमासयोरवभृथः' इत्यादौ। अतो नात्र विशिष्टकर्मान्तरविधिः न चाऽवभृथशब्दस्य त्र विधौ गौणत्वमङ्गीकृत्य नामातिदेशकत्वमिति प्राप्ते—

अनेकशक्तिकल्पनाभिया अपां व्युत्सेके आर्थवादिकावभृथशब्दस्य जलसम्बन्धित्वसादृश्येन गौणत्वात् प्राप्तकर्मानुवादेनानेकगुणविधाने वाक्यभेदापत्तेश्च कर्मान्तरविधिरेवायम्।

सत्यामपि च निपातस्योपपदार्थान्वयव्युत्पत्तौ उपपदार्थद्वयस्य परस्परान्वयव्युत्पत्त्यभावात् विधेयानेकता स्पष्टैव। अतश्च गुणात्प्रकरणान्तराद्वाऽत्र कर्मभेदः। वारुणीनिष्कासस्य वैमृधन्यायेन पदान्तरकल्पनया संस्कार्यत्वादेकादशे वक्ष्यमाणमर्थकर्मत्वं परं तुषांश इत्युक्तं प्रकरणान्तराधिकरणे कौस्तुभे। अतश्च तत्रावभृथनाम्ना सौमिकावभृथधर्मातिदेशः। अत एव 'नायुर्दौ जुहोति न साम गायति न गमनमन्त्रं जपति' इत्यादिनिषेधोपि सङ्गच्छते। अतिदेशेऽपि च न तदीयद्रव्यस्यैककपालस्यातिदेशः। औपदेशिकेन विशेषविहितेन च तुषनिष्कासद्रव्येण लाक्षणिकस्य सामान्यविहितस्यातिदेशप्राप्तस्य द्रव्यस्य बाधात्॥ ४॥

(५)–गुणविधिस्तु न गृह्णीयात्समत्वात् ॥१७॥

सोमे आतिथ्येष्टिः 'वैष्णवो नवकपालः' इत्यनेन वैशेषिकधर्मयुक्ता विहिता। राजसूये च 'वैष्णवस्त्रिकपाल' इति श्रुतम्। तत्र वैष्णवशब्दस्य न धर्मातिदेशकत्वं सत्यप्युत्पत्तिशिष्टगुणावरोधादिनोभयत्र कर्मविधित्वे वैष्णवशब्दस्योभयत्रापि देवताविधायकत्वेन धर्मातिदेशकत्वानुपपत्तेः। न चातिदेशेनैव देवतायाः प्राप्तिसम्भवेन बह्वर्थलाभाय धर्मातिदेशकत्वाङ्गीकरणं, गौणत्वे प्रमाणाभावात्। बह्वर्थलाभाय जघन्यवृत्त्यङ्गीकारेऽतिप्रसङ्गात्॥ ५॥

(६)–निर्मन्थ्यादिषु चैवम् ॥ १८ ॥

अग्नौ 'निर्मन्थ्येनेष्टकाः पचन्ति' इति। पशौ 'बर्हिषा यूपावटमवस्तृणाति, आज्येन पशुमनक्ति' इति श्रुतम्। ततः पूर्वव-

देव निर्मन्थ्यशब्दो मन्थनक्रियाविधायकत्वेन गौणत्वायोगान्न पाशुकानां मथनधर्माणामतिदेशार्थः। बर्हिराज्यशब्दे च द्रव्यविधित्वान्न दार्शपूर्णमासिकबर्हिराज्यधर्मातिदेशार्थौ। न च त्रिकपालस्य नामातिदेशेन धर्मप्राप्त्यभावेऽपि ऐष्टिकधर्मातिदेशेन निराकाङ्क्षत्वान्न गौणत्वाङ्गीकारः। प्रकृते तु धर्माकाङ्क्षयैव गौणत्वाङ्गीकारान्नामातिदेशोपपत्तिरिति वाच्यं, लोकतोपि मथनादिधर्मलाभेन श्रुत्यर्थत्यागे प्रमाणाभावात् ॥ ६ ॥

(७)–प्रणयनं तु सौमिकमवाच्यं हीतरत् ॥ १९ उत्तरवेदिप्रतिषेधश्च तद्वत् ॥ २० ॥ प्राकृतं वाऽनामत्वात् ॥ २१ ॥ परिसङ्ख्यार्थं श्रवणं गुणार्थमर्थवादो वा ॥ २२ ॥ प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधात् ॥ मध्यमयोर्वा गत्यर्थवादात् ॥ २४ ॥ औत्तरवेदिकोऽनारभ्यवादप्रतिषेधः ॥ २५ ॥

चातुर्मास्येषु 'वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्यानि चत्वारि पर्वाणि। तत्र 'द्वयोः प्रणयन्ति द्वाभ्यामेति' इति श्रुतम्। तत्र भाष्यकारः सप्तभिस्सूत्रैरधिकरणद्वयमेवं व्याचख्यौ-तत्राद्ये तावत् सौमिकं सधर्मकं प्रणयनमिदं उत प्राकृतमधर्मकं गार्हपत्यादाहवनीयं प्रतीति चिन्तायां--

प्राकृतस्य चोदकेनैव प्राप्तत्वेन विधिवैयर्थ्यापत्तेर्वचनार्थवत्त्वाय प्रणयतिरयं सौमिकप्रणयनपरस्तद्विधानार्थः।' अत एव तत्रोत्तरवेदेस्सत्त्वेन तत्प्राप्तौ 'न वैश्वदेवे उत्तरवेदिमुपवपति न

शुनासीरीये' इति तत्पर्युदासोपि सङ्गच्छते । तेन तयोरुत्तरवेदिव्यतिरिक्तास्सौमिकप्रणयनधर्माः कार्याः । यत्तु 'उपात्र वपन्ति' इत्युत्तरवेदेरुत्पत्तिवाक्यं यच्च 'उत्तरवेद्यामग्निं निदधाति' इति तस्याः विनियोगवाक्यं तन्मध्यमयोः पर्वणोः प्राकृतप्रणयनकाल एवोत्तरवेदिमात्रविधायकमिति प्राप्ते—

न प्रणयतिस्सौमिकप्रणयनस्यैव विशिष्योपस्थपकः सन्निहितत्वात्तु प्राकृतमेवोपस्थापयति । अतस्तस्यैवातिदेशप्राप्तः पूर्वप्रवृत्त्या विधिरनुवाद एव वा । तत्प्रयोजनं च यद्यपि नेतरयोः परिसङ्ख्या त्रैदोष्याद्यापत्तेः, प्रणयनाभावे इतरपर्वणोरग्न्यभावेन यागानुपपत्तेश्च । नाप्यर्थवादोपपत्तिः विध्यभावेऽर्थवादत्वस्यैवानुपपत्तेः तथाऽप्युत्तरवेदिरूपगुणार्थं पुनश्श्रुतिः । एतदभावेहि चतुर्ष्वपि प्राकृतप्रणयनप्राप्तौ देशापेक्षायामुत्तरवेदिविधानं चतुर्ष्वपि प्राप्नुयात् । एतत्सत्त्वे तु पर्वद्वयवृत्तिप्रणयनस्यैव विशिष्योपदेशेनोपस्थितत्वात्तत्रैवोत्तरवेदिस्तदीयाग्निनिधानमेव च द्वारमिति सिद्ध्यति । अतः इतरपर्वणोरुत्तरवेदिपरिसङ्ख्यैवानुवादप्रयोजनमिति ।

द्वितीयाधिकरणे तु सोऽयमनुवादः प्रथमोत्तमयोः मध्यमयोर्वेति चिन्तायां मध्यमविषयत्वे तत्रैवोत्तरवेदिप्राप्तेः प्रथमोत्तमयोस्तत्पर्युदासानुपपत्तिप्रसङ्गात् प्रथमोत्तमविषयत्वमेव । ततश्च तत्रैवोत्तरवेदिप्राप्तौ तत्रैवायं निषेध इति तयोरुत्तरवेदेर्विकल्पः । 'द्वाभ्यामेति ऊरू वा एतौ यज्ञस्य यद्वरुणप्रघासाः साकमेधाश्च' इति प्रणयनार्थवादस्तु लक्षणया प्रथमोत्तमपर इति प्राप्ते—

लक्षणाया विकल्पस्य चान्याय्यत्वात् मध्यमविषय एवायमनुवादः उत्तरवेद्युपसंहारार्थः । एवं च प्रथमोत्तमयोरुत्तर-

वेदिप्रासक्त्यभावात्तत्र तत्प्रतिषेधो नित्यानुवादः। तत्प्रयोजनं च 'उपात्र वपन्ति' इत्यादेर्वरुणप्रघासावान्तरप्रकरणबाधः। एतद्भावे हि तदवान्तरप्रकरणे पठिताया उत्तरवेदेस्तन्मात्राङ्गत्वप्रसक्तौ तदितरेषु त्रिषु पर्वसु नित्यानुवादस्स्यात् न द्वयोः। अतो द्वयोर्नित्यानुवादबलादवान्तरप्रकरणबाधेन महाप्रकरणात्सर्वाङ्गत्वप्रसक्तौ 'द्वयोः प्रणयन्ति' इत्यनेन मध्यमयोरुत्तरवेद्युपसंहारो युज्यते। न चैवमपि प्रथमोत्तमयोः पर्युदासवशेनावान्तरप्रकरणबाधवन्मध्यममात्रविषयत्वस्यापुच्चत्तरेवद्युत्पत्तिविनियोगयोस्सिद्धेः 'द्वयोः प्रणयन्ति' इत्यस्य वैयर्थ्यमिति वाच्यम्। 'उत्तरवेद्यामग्निं निदधाति' इत्यनेन हि न निधानानुवादेनोत्तरवेदिर्विधीयते अतिप्रसङ्गात्। नाप्यग्निनिधानानुवादेन विशिष्टोद्देशापत्तेः। नाप्यग्निमात्रोद्देशेन गार्हपत्यादावप्युत्तरवेद्यापत्तेः। किन्तु अतिदेशप्राप्तेः पूर्वप्रवृत्त्या उत्तरवेदिविशिष्टप्राकृतनिधानमेवाग्न्युद्देशेन विधीयते उत्तरवेदिमात्रफलकं अतश्चौपदेशिकप्रणयनविध्यभावे प्रणीताग्निनिधान इव कपालतापार्थाग्निनिधानेऽपि तदापत्तिः।

औपदेशिकप्रणयनविधिसत्त्वे तु तस्यैव पुरस्स्फूर्तिकस्य देशापेक्षायामातिदेशिकविधितः पूर्वमुत्तरवेदिरूपदेशविधानान्न तापाद्यर्थाग्निनिधाने उत्तरवेदिप्राप्त्यापत्तिः। अत एवौपदेशिकप्रणयनविधिसत्त्वेऽपीतरयोरातिदेशिकप्रणयनसत्त्वादुत्तरवेद्यापत्तिरित्यपास्तम्। औपदेशिकप्रणयनस्य पुरस्स्फूर्तिकत्वेन तत्रैवोत्तरवेदिविधानात्। अतो भाष्यकारमतेऽपि न वार्तिकोक्तदूषणावकाशः।

वार्तिककारमतोपपादनं तु एवं—सप्तभिस्सूत्रैस्त्रिपक्षकमेकमधिकरणम्। तत्र प्राकृतं सौमिकं वा प्रणयनमिति पूर्वपक्ष-

द्वयं कृत्वा अपूर्वं प्रणयनान्तरमत्र विधीयते न तु सौमिकं तस्यानुपस्थितत्वात् । नापि प्राकृतं प्राकृतप्रणयनस्याहवनीयोत्पादकत्वेनाहवनीयापादानकत्वासम्भवात् ‘ आहवनीयाद्द्वावग्नी प्रणयतोऽध्वर्युश्च प्रतिप्रस्थाता च ’ इति शाखान्तरवचनेऽवश्यं प्राकृतप्रणयनोत्तरमाहवनीयापादाकप्रणयनान्तरविधानावगतेः । साकमेधेऽपि च बोधायनादिकल्पसूत्रानुसारेणैतत्समानार्थकस्याहवनीयापादनकप्रणयनान्तरविधायकविधेः कल्पनेन प्रणयनान्तरविधानावगतेस्तदुभयसमानार्थकतया ‘ द्वयोः प्रणयन्ति ’ इत्यस्याप्यांहवनीयापादानकप्रणयनान्तरविधायकत्वस्यैव निश्चयेन प्राकृतप्रणयनानुवादकत्वानुपपत्तेः ।

अतः प्राकृतप्रणयनोत्तरमाहवनीयापादानकं प्रणयनान्तरमपूर्वं विधीयते । तच्च गत्यर्थवादान्मध्यमयोरेव । तस्य चापेक्षितोद्देशविशेष उत्तरवेदिरुत्पत्तिविनियोगविधिभ्यां विधीयत इति तावपि मध्यमविषयावेव । एवं च प्रथमोत्तमयोस्तत्प्रतिषेधोपि नित्यानुवाद एव भाष्यकारमत इवावान्तरप्रकरणबाधार्थमिति सर्वमनाकुलम् । याज्ञिकास्तु पशुबन्धवत् सौमिकानेव धर्माननुतिष्ठन्ति । उत्तरवेदिपरिमाणं परं शम्यामात्रमौपदेशिकं कुर्वन्ति । तन्मते ‘प्रणयन्ति’ इति बहुवचनमपि ब्रह्महोत्रादिसद्भावादुपपद्यत इति ध्येयम् ॥ ७ ॥

(८)—स्वरसामैककपालामिक्षं च लिङ्गदर्शनात् ॥ २६ ॥ चोदनासामान्याद्वा ॥२७

पूर्वमुत्तरवेदिप्रतिषेधरूपेण लिङ्गेन सौमिकप्रणयनातिदेशे निरस्ते अधुना लिङ्गादप्यतिदेशोऽस्तीत्येवं तदपवादः प्रस्तूयते।

गवामयने 'त्रयस्स्वरसामानः' इति सप्तदशस्तोमकत्वादिधर्मका यागास्समाम्नाताः। अन्यत्रापि 'द्वौ स्वरसामानौ' इति। तथा वैश्वदेवे पर्वणि 'वैश्वदेव्यामिक्षा द्यावापृथिव्य एककपालः' इति सधर्मकौ यागौ। अन्यत्रापि 'मैत्रावरुण्यामिक्षा काय एककपालः' इत्याद्यामिक्षैककपालद्रव्यका यागाश्श्रुताः। ते किं स्वरसामानो गावामयनिकस्वरसामप्रकृतिकाः? अन्ये आमिक्षायागाश्च वैश्वदेविकामिक्षायागस्य? अन्ये एककपालाश्च वैश्वदेविकैककपालस्य? उत नेति चिन्तायां—गुणत्वादिनैव कल्पितेनातिदेशेनेतिकर्तव्यताकाङ्क्षाशान्तेस्स्वरसामादिशब्दानां च स्वराख्यसामादिरूपगुणविधायकत्वेनानतिदेशकत्वान्नोक्तयागप्रकृतिकत्वमिति प्राप्ते—

गुणत्वादिसादृश्यापेक्षया स्वरसामकत्वादिविशेषसादृश्येन लिङ्गोपबृंहितेनातिदेशकल्पनाच्चोदनालिङ्गातिदेशेन तत्प्रकृतिकत्वम्। लिङ्गानि च स्वरसामसु तावत् 'पृष्ठ्यः षडहो द्वौ स्वरसामानौ' इत्युक्त्वा आह–'तत्र यत्तृतीयं सप्तदशमहस्तत् त्रयस्त्रिंशत्स्तोमकस्य स्थानमभिपर्याहरन्ति स उत्तराणां स्तोमानामव्यवायाय त्रयाणां सप्तदशानामनूचीनतायै' इति द्वयोस्स्वरसाम्नोस्सप्तदशस्तोमकत्वदर्शनम्। मैत्रावरुण्यामिक्षायां च 'न वाजिनेन प्रचरन्ति' इति प्रतिषेधवचनम्। आग्रयणे द्यावापृथिव्यमेककपालं विधाय 'यत्सर्वहुतं जुहोति सा त्वेका परिचक्षा हुतोऽहुतः पर्यावर्तते सा द्वितीया आज्यस्यैव द्यावापृथिव्यौ यजेत' इति एककपालयागे सर्वहुतत्वादिप्रयुक्तं दोषमभिधाय वैकल्पिकाज्ययागविधिपरं वचनम्। न ह्युक्तातिदेशाभावे सप्तदशस्तोमकत्ववाजिनेज्यासर्वहुतत्वादीनां प्राप्तिस्सम्भवति तस्मादतिदेशः। अयं च तत्सदसाधारणध-

र्माणां साधारणधर्माणां च नवप्रयाजत्वप्रसूनमयत्वादीनां चातिदेशः। मुख्यानां भूयसां च प्रधानान्तराणामनुरोधेन तु क्वचिद्विरोधे साधारणधर्माणां वा बाधः। याज्ञिकास्तु असाधारणानामेवातिदेशं मन्यन्ते॥

(९)—कर्मजे कर्म यूपवत् ॥ २८ ॥ रूपं वाऽशेषभूतत्वात् ॥ २९ ॥

कर्मनामधेयानामाग्निहोत्रादिपदानामतिदेशकत्वमुक्तम्। तद्वदेव च संस्कारनाम्नामपि यूपादिशब्दानां 'खलेवाली यूपो भवति' इत्यादौ सिद्धमेवातिदेशकत्वम्। तद्वत्तु अनोवासःप्रभृतीनां पदानां किं तत्तदुत्पादकक्रियानिमित्तत्वं उत जातिनिमित्ततेत्यातिदेशसिद्ध्यर्थं विचार्यते। तत्र तक्षणादिक्रियाभावे तच्छब्दप्रयोगाभावात्तत्र क्रियानिमित्तका एवैते शब्दाः निर्मन्थ्ययूपादिशब्दवत्। अतश्च तद्वदेव 'अनो ददाति, वासो ददाति' इत्यादौ तक्षणवानरूपक्रियाविशिष्टद्रव्यस्यैव दानाङ्गतया विधानात् तक्षणं वानं च प्रयोगमध्ये कृत्वा अनो वासश्च देयम्। अत्र च तक्षणक्रियाया वस्तुत उपदेशोऽप्यन्यत्र लोकादौ क्लृप्ताया एव विधानादतिदेशत्वव्यवहारो भाक्त इति ध्येयम्। सर्वथा तक्षणादि प्रयोगमध्येऽनुष्ठेयमिति प्राप्ते—

क्रियानाशोत्तरमपि जातिदशायां प्रयोगाल्लाघवाद्यौगिकत्वाभावाच्च जातावेव शक्तिः। जातिस्तु परं क्रियाभिव्यङ्ग्या तज्जनितसंयोगविशेषादिरूपफलाभिव्यङ्ग्या वेति तदुत्तरमेव शब्दप्रयोगः। न त्वेतावता शब्दः क्रियावाचीति तस्या अविधेयत्वेनानङ्गत्वाल्लौकिकमेव सिद्धमनो वासश्च देयम्। निर्मन्थ्य-

शब्दस्तु यौगिक इति युक्तं तस्य मथनक्रियाविधायकत्वम्। यूपशब्दे तु क्रियानाशोत्तरं प्रयोगेऽपि तज्जन्यादृष्टविशिष्टकाष्ठवाचित्वान्न शुद्धजातिवाचित्वमिति युक्त एव तत्र संस्कारातिदेशः। वस्तुतस्तु—यूपकार्ये खलेवालीविधानात् यूपशब्दस्य न संस्कारादिशक्तत्वम्। संस्कारातिदेशस्तु स्थानापत्त्येति सूत्रोक्तयूपपददृष्टान्तोऽप्यसङ्गत एव॥

(१०)—विशये लौकिकस्स्यात्सर्वार्थत्वात्॥ न वैदिकमर्थनिर्देशात्॥ ३१॥ तथोत्पत्तिरितरेषां समत्वात्॥ ३२॥

गर्गत्रिरात्रे आज्यदोहानि सामानि प्रकृत्य 'अग्निमुपनिधाय स्तुवीत' इति श्रुतम्। तत्राग्निः किं वैदिको लौकिको वेति चिन्तायां—यद्यपि द्वादशे आहवनीयादीनां योग्यतया लौकिकपाकाद्यर्थत्वं निरस्यते तथाऽपि 'यैरस्म्यधिकृतो यांश्च शक्ष्ये प्रयोक्तुम्' इति सामान्यवचनेन वैदिककर्ममात्रार्थत्वावगतेः वैदिक एवेति प्राप्ते—

'आहवनीये जुहोति' इत्यादिविशेषवचनानामुपलक्षणत्वे प्रमाणाभावात् 'यैरस्म्यधिकृतः' इत्यस्य च होमादिमात्रविषयत्वेऽपि सार्थक्यादुपधानविधेश्च लौकिकाग्निग्रहणेऽपि चरितार्थतया आहवनीयादीनां 'वि वा एष इन्द्रियेण वीर्येणर्ध्यते। यस्याहिताग्नेरग्निरपक्षायाति' इति वचनेन निषिद्धस्यायतनाज्ज्वलनस्याक्षेप्तुमशक्यत्वाल्लौकिकाग्नेरेव ग्रहणम्। अत एव धिष्ण्याग्नीनामपि व्याघारणमात्रप्रयोजनत्वादग्रहणम्। यदि परं व्याघारणोत्तरं लौकिकत्वाविशेषादुपस्थितत्वात्तेषामेव ग्रहणमित्याशङ्क्येत तदाऽस्तु नाम तत्॥

(११)—संस्कृतं स्यात्तच्छब्दत्वात् ॥ ३३ ॥
भक्त्या वाऽयज्ञशेषत्वाद्गुणानामभिधानत्वात् ॥ ३४ ॥

यूपैकादशिन्यां यूपसमीपे एकं काष्ठं स्थापनीयामिति विधाय 'उपशयो यूपो भवति' इति श्रुतम् । तत्रोपशये काष्ठे यूपशब्दोऽयं यूपधर्मान् जोषणादीन् संस्कारनिमित्तत्वादसत्यपि स्थानापत्त्यतिदेशे नामातिदेशविधयाऽतिदिशेदिति प्राप्ते—

अस्य गौण्या शक्त्यैव वा धर्मविधायित्वे वाक्यभेदापत्तेरुपशयस्तुत्यर्थत्वेन तद्विध्येकवाक्यतापन्नस्यास्य पृथग्विधित्वानुपपत्तेः अर्थप्राप्तकतिपयछेदनादिधर्मयोगेन गौण्या वृत्त्या उपशयस्तुतिरेवेदं न तु नामातिदेशकम् ॥

कर्मणः पृष्ठशब्दस्स्यात्तथाभूतोपदेशात् ॥
अभिधानोपदेशाद्वा विप्रतिषेधाद्द्रव्येषु पृष्ठशब्दस्स्यात् ॥ ३६ ॥

अग्नौ 'पृष्ठैरुपतिष्ठते' इति श्रुतम् । तत्र पृष्ठशब्देन किं विधीयत इति चिन्तायां पृष्ठशब्दस्य स्तोत्रविशेषवचनत्वात् तस्य च बहुत्वाभावेन चयनाङ्गतया विधानानुपपत्तेः प्रत्ययाभिहितभावनान्तराण्येव पृष्ठधर्मकाणि धातूपात्तसमीपावस्थानेतिकर्तव्यताकानि विधीयन्ते पृष्ठधर्मकत्वाच्च तेषां स्तोत्ररूपतासिद्धिः धातूपात्तमपि च समीपावस्थानमक्लृप्तकार्यत्वात्कर्मान्तराङ्गमेव । अथवा पाशाधिकरणन्यायेन बहुवचनानुरोधेन पृष्ठप्रातिपदके गौण्यङ्गीकारस्यायुक्तत्वात् बहुवचनेनैकत्वादि लक्षयित्वा चयना-

ङ्गतया ज्योतिष्टोमपृष्ठविधिरेवायम्! समीपस्थितिस्तु पूर्ववत् पृष्ठस्तोत्रस्यैवाङ्गम्। वस्तुतस्तु—पृष्ठबहुत्वस्यापि ज्योतिष्टोमे साधितत्वात् सर्वाण्येव पृष्ठस्तोत्राणि चयनाङ्गतया विधीयन्ते। न तु पृष्ठमन्त्राणां रथन्तरादिसाम्नां वा विधानं, उपक्रमस्थ-पृष्ठपदे लक्षणाप्रसङ्गात्। एवं च जघन्यमात्मनेपदमेव बाहुल-कतया साधुत्वार्थं व्याख्येयमिति प्राप्ते—

पृष्ठशब्दस्य शरीरावयवेऽपि शक्तत्वेन तत्करणकसमीपाव-स्थितेरपि विधिसम्भवेन स्तोत्रविधावेव नियामकाभावेन सन्दि-ग्धत्वान्निस्सन्दिग्धात्मनेपदानुरोधेन पृष्ठपदमेवान्यथा नेतुमुचि-तम्। तथाहि 'उपान्मन्त्रकरणे' इति स्मृत्या आत्मनेपदबला-त्समीपावस्थाने मन्त्रस्य करणत्वावगतेः साक्षात्सम्बन्धेनाभिधा-नातिरिक्ते व्यापारे मन्त्रस्य करणत्वासम्भवेऽपि समीपावस्था-नप्रयोजनीभूताभिधानद्वारा समीपावस्थानं प्रति करणत्वाङ्गी-कारात् तदनुरोधेन पृष्ठशब्दस्य मन्त्रपरत्वावगतिः। अत एव समीपावस्थानजन्याभिधानजनकत्वसंसर्गेण मन्त्राणां समीपाव-स्थानं प्रति करणत्वमिति नाभिधानलक्षणाऽपि।

वस्तुतस्तु—ऐन्द्र्यधिकरणस्थकौस्तुभोक्तन्यायेन लक्षणयाऽ-भिधानमेव प्रकृताग्निकर्मकं धातुना विधीयते तत्रैव पृष्ठपदार्थस्य करणत्वं समीपावस्थानं परमत्र 'अभि त्वा' इत्यादिमन्त्रलिङ्गादेव प्राप्तमनूद्यते। पृष्ठपदेन तु आत्मनेपदानुरोधेन पृष्ठस्तोत्रसाध-नीभूता मन्त्रा लक्ष्यन्ते।

वस्तुतस्तु—षाडहिकेषु रथन्तरादिषु षट्सु सामसु पृष्ठशब्दा-न्वाख्यानार्थार्थवादवशेन निरूढलक्षणायाश्चित्राधिकरणकौस्तुभे व्यवस्थापितत्वात् तान्येवाभिधानं प्रति करणत्वेन विधीयन्ते सम्भवति च स्तोत्रे इहाभिधानं प्रति साङ्गः करणत्वं अगक्ष-

राभिव्यक्तिद्वारा। अत एव तदाधारभूतानां योनिऋचामप्यभि-धानाङ्गत्वं उत्तरयोस्तु 'एकं साम तृचे क्रियते स्तोत्रीयम्' इति स्तोत्र एव विनियोगान्नाभिधानाङ्गत्वप्रसक्तिः। अतश्च योन्या-धारकरथन्तरादिषाडहिकसामविशिष्टाभिधानमेवात्र स्थण्डिल-संस्कारकत्वेन विधीयत इति सिद्धम्। सामांशे उपदेशोऽप्य-यमन्याङ्गत्वस्य पूर्वावगममात्रेणेह चिन्तितः॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
सप्तमस्याध्यायस्य तृतीयः पादः॥

अथ सप्तमस्याध्यायस्य चतुर्थः पादः

(१)–इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम्॥ स लौकिकस्स्याद्दृष्टप्रवृत्तित्वात्॥ २॥ वचनात्तु ततोऽन्यत्वम्॥ ३॥ लिङ्गेन वा नियम्येत लिङ्गस्य तद्गुणत्वात्॥ ४॥ अपि वा न्यायपूर्वत्वात् यत्र नित्यानु-वादवचनानि स्युः॥ ५॥ मिथो विप्रति-षेधाच्च गुणानां यथार्थकल्पना स्यात्॥ ६ भागित्वात्तु नियम्येत गुणानामभिधा-नत्वात्सम्बन्धादभिधानवद्यथा धेनुः किशो-

रेण ॥ ७ ॥ उत्पत्तीनां समत्वाद्वा यथाऽधिकारं भावस्स्यात् ॥ ८ ॥ उत्पत्तिशेषवचनं च विप्रतिषिद्धमेकस्मिन् ॥ विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्तेत यथा हि लिङ्गदर्शनम् ॥ १० ॥ लिङ्गहेतुत्वादलिङ्गे लौकिकं स्यात् ॥ ११ ॥ लिङ्गस्य पूर्ववत्त्वाच्चोदनाशब्दसामान्यादेकेनापि निरूप्येत यथा स्थालीपुलाकेन ॥ १२ ॥

तदेवं सप्रसङ्गो नामातिदेशो निरूपितः। इदानीं कल्पितवचनातिदेशो निरूप्यते। यत्रोद्भित्सौर्यादौ नैवेतिकर्तव्यताऽऽम्नाता। यत्र वा द्रव्यदेवतोपहोमादिरूपा समाम्नाताऽपि न निराकाङ्क्षीकरणसमर्था तत्र भावनास्वाभाव्येन तस्याः करणानुग्राहकव्यापाररूपेतिकर्तव्यताकाङ्क्षायां वक्ष्यमाणसादृश्येन प्रकृतिभावनोपस्थितौ तदंशत्रयस्याप्युपस्थितेस्तत्र च फलकरणयोरनपेक्षितत्वादिनाऽतिदेशस्य निराकरिष्यमाणत्वादितिकर्तव्यतैव प्रकृतिवत् इत्येवंकल्पितेन विकृतिवाक्यशेषरूपातिदेशेन विकृत्यङ्गतया विधीयते। न च प्रबलप्रमाणेन प्रकृत्यङ्गतयाऽवगतायाः कथं विकृत्यङ्गत्वमिति वाच्यं, प्रबलस्यापि विकृतिविधेरितिकर्तव्यताकाङ्क्षाशान्त्यभावेनानर्थक्यप्रसङ्गात् दुर्बलप्रमाणबाधकत्वानुपपत्तेः। अतस्सर्वत्रानाम्नातेतिकर्तव्यताकस्थले आम्नातेतिकर्तव्यताकस्यातिदेशः। आम्नातेतिकर्तव्यताकाश्च सोम-

दर्शपूर्णमासादयश्श्रुतास्त्रेताग्निसाध्याः। पार्वणस्थालीपाकादयश्च स्मार्ताग्निसाध्याः। अत एव मूले लौकिकपदेनोच्यन्ते। तत्राविशेषात्सौर्यादावुभयोरप्यतिदेशः। यदि तु प्रकृतावेकैकस्याः प्रत्येकं निराकांक्षीकरणसमर्थाया इह समुच्चयेन मिळिताया निराकाङ्क्षीकरणसामर्थ्यकल्पने प्रमाणाभावादेकस्या एवातिदेशः इत्याशङ्क्येत ततोऽस्तु लौकिक्या एवातिदेशः। तस्याः कल्पसूत्रकारादिवचनैराग्रहायणिककर्मादावतिदेशस्य क्लृप्तत्वेन दृष्टप्रवृत्तिकतया सौर्यादावपि तस्या एवातिदेशात्।

यत्तु सौर्यादौ 'प्रयाजे प्रयाजे कृष्णलं जुहोति' ऐन्द्राबार्हते अर्धं बर्हिषो लुनाति, पितृयज्ञे न होतारं वृणीते, गृहमेधीये आज्यभागौ यजति' इत्यादिलिङ्गदर्शनं तत् यत्र नित्यानुवादवचनानि स्युः इत्येवं परिहर्तव्यम्। तथा हि यत्र प्रयाजदर्शपूर्णमासादौ तत्र कृष्णलहोमविधिरिति तन्त्ररत्नकारः।

वस्तुतस्तु--प्रयाजोद्देशेन कृष्णलहोमान्तरविधौ आरादुपकारकत्वेन सर्वप्रयाजार्थं तन्त्रेणानुष्ठानापत्तेः। 'प्रयाजे प्रयाजे' इति वीप्साऽनुवादानुपपत्तिः। प्रयाजीयहोमेद्देशेन कृष्णलमात्रविधौ विशिष्टोद्देशः। होममात्रोद्देशेन विधावतिप्रसङ्गः। अतः प्रयाजोद्देशेन कृष्णलमात्रं पूर्वपक्षे आज्येन सह विकल्पेन प्रातिनिधित्वेन वा विधीयते। सिद्धान्ते तु तद्बाधकत्वेन। प्रयाजाश्च पूर्वपक्षे दर्शपूर्णमासीयाः। सिद्धान्ते सौरीया इत्येतावान् विशेषः। जुहोतिस्तु संस्कारकत्वेन प्राप्तोऽनूद्यते।

अत एव भाष्यकारोक्तमस्य वचनोदाहरणत्वमपि पञ्चमविधिप्रकारापत्तेरयुक्तम्। याज्ञिकास्तु आज्येनैव प्रयाजहोमे कृष्णलप्रक्षेपमधिकं कुर्वन्ति। एवं 'अर्धं बर्हिषः' इत्यत्रापि। यत्र

दर्शादौ बर्हिर्लवनं तत्र लवनानुवादेनार्थत्वविधिः। 'न होतारं' इति तु नित्यानुवादः। आज्यभागविधिस्तु अपूर्वविधितया वचनमिति द्रष्टव्यम्। यत्र हि गुणोपादानं भवेत् तत्र सर्वत्र तृतीयविधिप्रकारलोभेन यत्र इत्यस्यैवोदाहरणत्वं भवेत् न वचनस्य। अस्तु वा यत्र प्राकरणिकगुणावरुद्धे गुणान्तरस्य प्रतिनिधित्वादिनाऽपि कथंचिन्निवेशासम्भवस्तत् वचनोदाहरणम्। सर्वथाऽतिदेशाभावेऽपि लिङ्गोपपत्तिरिति प्राप्ते—

स्वप्रत्यक्षपठितवेदविहितत्वसादृश्यात् वैतानिकाग्निसाध्यत्व-सादृश्याच्च वैदिक्या एवातिदेशः। अतिदेशाभावेऽपि हि सौर्यादीनां गृह्यसूत्रेष्वनुक्तत्वात् न स्मार्ताग्निसाध्यत्वम्। अतस्सामान्यविहिताहवनीयादिसाध्यत्वे बाधकाभावात् सादृश्योपपत्तिः। अत एवंजातीयकेषु दर्शपूर्णमासादिधर्माणामेवातिदेश इति सिद्धम्। लिङ्गान्यप्येवं सत्युपपन्नानि भवन्ति, इतरथा प्रकरण-बाधो वाक्यानर्थक्यं वा प्रसज्येत॥

(२)—द्वादशाहिकमहर्गणे तत्प्रकृतित्वादैकाहिकमधिकागमात्तदाख्यं स्यादेकाहवत्॥ लिङ्गाच्च॥ १४॥ न वा क्रत्वभिधानादधिकानामशब्दत्वम्॥ १५॥ लिङ्गं सङ्घातधर्मः स्यात्तदर्थापत्तेर्द्रव्यवत्॥ १६॥ न वाऽर्थधर्मत्वात् सङ्घातस्य गुणत्वात्॥ अर्थापत्तेर्द्रव्येषु धर्मलाभस्स्यात्॥ १८॥ प्रवृत्त्या नियतस्य लिङ्गदर्शनम्॥ १९॥

विहारदर्शनं विशिष्टस्यानारभ्यवादानां प्रकृत्यर्थत्वात् ॥ २० ॥

तदेवं निरूपितस्त्रिविधोऽतिदेशः। तत्र प्रत्यक्षवचनातिदेशस्य द्विविधादप्यतिदेशात्प्राबल्यं धर्माणामुपात्तत्वात् वाक्यवैयर्थ्यापत्तेश्च पूर्वमेव प्रसङ्गादुपपादितम् । अतस्तादृशविषये चोदनालिङ्गातिदेशस्य नैव कल्पना। नाम्नस्तु यदि समानविषयत्व तदा प्रत्यक्षवचनापादितसिद्धसादृश्यमादायैव नाम्नो गौणत्वापत्तेर्नातिदेशकत्वम् । यदि तु भिन्नविषयत्वेन न सादृश्यसम्पत्तिस्तदा नाम्नोऽप्यविरुद्धधर्मातिदेशकत्वमवधेयम् ।

एवं नामातिदेशसत्त्वेऽपि समाने असमाने वा विषये चोदनालिङ्गातिदेशस्य नैव कल्पना नाम्नः प्रत्यक्षत्वेन तेनैवेतिकर्तव्यताकाङ्क्षाशान्तेः। अत एव गवामयने 'ज्योतिर्गौरायुः' इत्येवमादिष्वहस्सु एकाहकाण्डपठितज्योतिरादिधर्माणां नाम्ना प्राप्तिः न तु गणत्वसादृश्याद्द्वादशाहधर्माणाम् । न चाहरन्तरार्थमवश्यकल्प्येन गणत्वसादृश्याद्गवामयनानिष्टद्वादशाहिकातिदेशेनैव तद्धर्मप्राप्तिरेवावश्यकी। तत्तदहरुत्पत्तिवाक्यस्थेष्वेव भावनाया इतिकर्तव्यताकाङ्क्षायां गणान्तर्गतत्वसादृश्येन चातुर्मास्यान्तर्गताग्नेयादिवत् प्रत्येकमेवातिदेशकल्पनेन ज्योतिरादिनामातिदेशसत्त्वेन चोदनालिङ्गातिदेशस्यैवाकल्पनात्। न च लाघवाद्गवामयने एक एवातिदेशः गवामयनत्वस्य प्रत्येकवृत्तित्वेन प्रत्येकमेव फलसम्बन्धात् साधनानां समुच्चयेऽपि तत्तत्साधनानां प्रत्येकमेवेतिकर्तव्यताकाङ्क्षया प्रत्येकमेव तत्कल्पनात्। अतो ज्योतिरादौ नैव चोदनालिङ्गातिदेशः। नचैवं तेषु त्र्युपसत्त्वस्यैव प्राप्तेः 'द्वाभ्यां

लोमावद्यति द्वाभ्यां मांसम्' इत्यादि षाड्विकाननुक्रम्य यद्वादशोपसदो भवन्ति' इति द्वादशाहिकद्वादशोपसत्त्वदर्शनानुपपत्तिः तस्य भूयोऽहरन्तरानुरोधेन नामातिदेशप्रापितत्रित्वबाधकत्वोपपत्तेः द्वादशसु तिसृणामप्युपकारकत्वोपपत्तेश्च। तस्मात् तत्तत्सुत्याकालीनाङ्गानामन्येषामपि वा त्रित्वाद्यतिरिक्तानामेव नामातिदेश इति सिद्धम्।

नन्वेवमप्येकादशिन्यां विहारदर्शनानुपपत्तिः। तथाहि—ज्योतिष्टोमे सौत्येऽहनि वैकल्पिकी एकादशिनी समाम्नाता, तस्याश्च द्वादशाहे विहरश्श्रुतः। तस्यातिदेशेन गवामयने एकषष्ट्यधिकशतत्रयसुत्यात्मके प्राप्ताविदं श्रुतं 'यस्यातिरिक्तमेकादशिन्यामालभेरन् अप्रियं भ्रातृव्यमतिरिच्येत द्वौद्वौ पशू समस्येयुः कनीय आयुः कुर्वीरन् यदेते ब्राह्मणवन्तः नव पशव आलभ्यन्ते नाप्रियं भ्रातृव्यमतिरिच्यते न कनीय आयुः कुर्वीत' इति। गवामयने हि सम्पूर्णैकादशिन्या द्वात्रिंशद्वारमावृत्तौ द्विपञ्चाशदधिकशतत्रयमहानि पूर्यन्ते अवशिष्टानि नव तत्र पुनरेकादशिनीकरणे अतिरेकः समासो वाऽऽपद्येत। अतो ब्राह्मणवतां तेषु विधानम्। तद्यदि चोदनालिङ्गातिदेशेन ज्योतिरादिसुत्यास्वपि विहारः प्राप्यते तत एव तल्लिङ्गमुपपद्येत। यदि तु नामातिदेशप्राबल्यं तदा तद्बलेन ज्योतिरादिसुत्यासु सम्पूर्णाया एकादशिन्या एव प्राप्तेः विहारदर्शनानुपपत्तिरिति चेन्न—

एकादशिनीविरहस्यानारभ्याम्नातस्य गवामयने औपदेशिकत्वेन तदंशे नामातिदेशबाधात्। तथाहि 'यथा हि प्रभवः पशवस्स्युः तानेताननूचीनानालभेरन् आग्नेयमेव प्रथमेऽहन्यालभेरन् सारस्वतीं मेषीं द्वितीये सौम्यं बभ्रुं तृतीये वारुणम-

स्तः । अथ पुनर्ज्योतिरादीनां पर्यावर्तेषु आग्नेयमेव प्रथमेऽहनि' इत्याद्यनारभ्याधीतस्यैकादशिनीविहारस्य प्रकृतौ ज्योतिष्टोमे द्वादशाहे वा ज्योतिराद्यहस्समूहाभावेन निवेशानुपपत्तेः तृतीयप्रकृतौ गवामयने निवेशः । अन्ततः एकादशेऽहनि । अतश्चौपदेशिकत्वान्नामातिदेशस्तदंश एव बाध्येतेत्युपपन्नं लिङ्गम् ॥ २ ॥

इति श्रीखण्डदेवविरचितयां भाट्टदीपिकायां

सप्तमस्याध्यायस्य चतुर्थः पादः ॥

अध्यायश्च समाप्तः